In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत-अकाडमी ग्रन्थमाला - 82

भाणवाङ्मयचरितम्

लेखकः
आचार्यः के.वी.रामकृष्णमाचार्यः

प्रधानसम्पादकः
श्रीनिवासः वरखेडी
निदेशकः

संस्कृत अकाडमी
राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था
उस्मानिया विश्वविद्यालयः, हैदराबाद्

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकादमी ग्रन्थमाला - ८२
In Public domain. Digitization Muthulakshmi Research Academy

भाणवाङ्मयचरितम्

लेखकः
आचार्यः के.वि.रामकृष्णमाचार्यः
कुलपतिचरः,
जगद्गुरु-रामानन्दाचार्य-राजस्थान-संस्कृतविश्वविद्यालयः, जयपुरम्

प्रधानसम्पादकः
श्रीनिवासः वरखेडी
निदेशकः

संस्कृत अकादमी
राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था
उस्मानिया विश्वविद्यायः
हैदराबाद्
2010

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series-82
In Public domain. Digitization Muthulakshmi Research Academy

Bhāṇavāṅmayacaritam

By

Prof.K.V.Ramakrishnamacharyulu

Former Vice Chancellor,
Jagadguru Ramanandacharya Rajasthan Sanskrit University,
Jaipur

General Editor

Dr. Shrinivasa Varakhedi

Director

SANSKRIT ACADEMY

(Adarsha Shodha Sanstha, Rashtriya Sanskrit Sansthan, New Delhi)

Osmania University

Hyderabad - 500 007

Phone & Fax 040-27070281

Email – sanskritacademyhyd@gmail.com

2010

Sanskrit Academy Series – 82
Bhanavajgmaya Charitam by Prof.K.V.Ramakrishnamacharyulu
In Public domain. Digitization Muthulakshmi Research Academy

ISBN – 978-93-80171-18-0

This publication has been brought out with the financial assistance of Rashtriya Sanskrit Sansthan, (Deemed University) Ministry of Human Resource Development Govt. of. India, New Delhi.

Publisher & General Editor: Dr. Shrinivasa Varakhedi
Director, Sanskrit Academy

Coordinator : Dr. V. Subrahmanyam
Dy. Director, Sanskrit Academy

© Sanskrit Academy

First Edition : 2010

Copies : 300

Price : Rs/-250
$ 25

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sansthan
Osmania University Campus,
Hyderabad – 500 007
Phone & Fax: 040 - 27070281
Email: sanskritacademyhyd@gmail.com
Web: osmania.ac.in\sanskritacademy

Printed at: Karshak Art Printers, Hyderabad

In Public domain. Digitization Muthulakshmi Research Academy

निवेदनम्

अस्मद्गुरुवः, प्राच्यप्रतीच्यविद्याविशारदाः, वैयाकरणमूर्धन्याः प्राशासनिके कर्मणि दक्षाः, विद्यापक्षपातिनः, विनयसारल्यादि-गुणभूषिताः, साम्प्रदायिकेषु पण्डितेषु आधुनिकाः विद्वांसः, आधुनिकेषु पण्डिताः, आदर्शभूताः कुलपतयः, श्रीमन्तः कन्दाल वेङ्कटरामकृष्णमाचार्याः कदाचित् सँल्लापावसरे स्वोपज्ञं भाणवाङ्मयचरिताख्यं प्रबन्धमणिं प्रास्तुवन्। तदानीमेव मदीयां प्रार्थनामनुरुध्य ग्रन्थप्रकाशनाय सोत्साहं अङ्गीचक्रुः। यत्किञ्चिदिह तत्तेषामेव केवलम्। "पार्थो वत्सः सुधीः भोक्ता दोग्धा गोपालनन्दनः"। तत्रभवताम् आचार्याणां छात्रवात्सल्यस्येदं किञ्चिद् उदाहरणम्। पूर्वरचितमपि ग्रन्थं पुनः परिष्कृत्य दत्तं यथावत् वाचकहस्ते समुपाहरामः। ग्रन्थोऽयं महामहोपाध्याय आचार्य पुल्लेल श्रीरामचन्द्रमहोदयानां "स्थापनया" परिमलेन योजितं स्वर्णकमलमिव शोभते तमाम्।

श्रीनिवासः वरखेडी

In Public domain. Digitization-Muthulakshmi Research Academy

भारतराष्ट्रपतिसम्मानितः, शताधिकग्रन्थकर्ता, महामहोपाध्यायः
पद्मश्रीः **पुल्लेल श्रीरामचन्द्रः**
संस्कृत-अकाडम्याः निदेशकचरः,
उस्मानिया-विश्वविद्यालयीय संस्कृतविभागस्य निवृत्ताचार्यः अध्यक्षचरश्च

स्थापना

संस्कृतभाषायां रूपकाणां निर्मितिः नितरां प्राचीना। अष्टाध्याय्यां प्रयुक्तैः नट-नटसूत्रादिभिः शब्दैः इदमवगम्यते यत् पाणिनेः पूर्वमेव (क्रिस्तोः पूर्वं सप्तमशताब्द्याः पूर्वमेव) रूपकाणि व्यरच्यन्त, तेषां च प्रचुरः प्रयोगः आसीत्, तत्सम्बद्धञ्च शास्त्रमाविरभूत्।

दशसु रूपकेषु अन्यतमं रूपकं भाणः। नाटक-प्रकरणादीनां रचनातः बहोः कालात्पूर्वमेव भाणस्य प्रादुर्भावः आसीदिति अभिप्रयन्ति केचिद्विद्वांसः। अतः भाणानां चरितेन नितरां पुरातनेन भवितव्यम्। तादृशं चरितं भाणानामधिकृत्य इदम्प्रथमतया संस्कृतभाषायां सर्वाङ्गपूर्णतया निर्मितमिमं ग्रन्थं श्रीमान् प्रो.रामकृष्णमाचार्यमहोदयः उपायनीकरोति संस्कृतभाषाप्रणयिभ्यः। द्वादशाध्यायात्मके अस्मिन् ग्रन्थे भाणसम्बद्धाः सर्वेऽपि विषयाः सुलभया मधुरया च वाण्या स्पष्टं प्रतिपादिताः।

अष्टात्रिंशत् (38) पृष्ठमिते प्रथमेऽध्याये भाणस्य वस्तु-रस-वृत्ति-लास्याङ्ग-नायक-नायिकादयः विषयाः, आभरतमुनेः आ च विश्वनाथात् सर्वेषामालङ्कारिकाणां विविधमतोपन्यासपूर्वकं सुविशदं चर्चिताः। उपलभ्यमानेषु भाणेषु दृश्यानि कानिचित् लक्षणानि अनुरुद्ध्य पूर्वोक्तेषु विषयेषु स्वीयाः निर्णया अपि प्रदर्शिताः रचयित्रा। ग्रन्थेऽस्मिन् भाणस्वरूपनिरूपणपरः अयमध्यायः प्राधान्यतोऽपि प्रथमं स्थानं भजते। द्वितीयेऽध्याये- भाणवाङ्मये अद्य उपलभ्यमानेषु भाणेषु अतीव प्राचीनान्, 'चतुर्भाणी' इति नाम्ना विद्वल्लोके प्रथितान् चतुरो भाणान्, द्वादशशतकसम्बद्धं वत्सराजविरचितं 'कर्पूरचरितं' च

In Public domain. Digitization Muthulakshmi Research Academy

तद्गतवैशिष्ट्यवर्णनपूर्वकं सम्यक् विमृश्य तृतीयाद्यध्यायषट्के चतुर्दशशतकादारभ्य विंशशताब्दं यावत् सप्तसु शताब्दीषु विरचितानां भाणानां चरितम् उपक्षिप्तम्। कालेऽस्मिन् दक्षिणभारते एव किल भाणानां रचना अधिकं दृश्यते।

भाणेष्वेषु केचिल्लभ्याः, केचित् खण्डशः लभ्याः, केचिन्मुद्रिताः, केचिदमुद्रिताः लिखितपुस्तकनिक्षेपालयेष्वेव लभ्याः, केचिच्च विघातनाममात्राः। लभ्यानां भाणानां स्वरूपादिवर्णनं तथा प्रस्तुतं रचयित्रा यथा श्रोतॄणां मनसि तेषां भाणानां विषये पिपठिषा, प्रयुयुक्षा, दिदृक्षा च उदियात्। प्रायः सार्धचतुश्शतम् अतीवमनोहराः श्लोकाः भाणेभ्यः उद्धृत्योदाहृताः। एवमाहत्य षडशीत्युत्तरशत (186) सङ्ख्याकानां भाणानां स्वरूपं न्यरूपि अस्मिन् ग्रन्थे।

मद्य-द्यूत-वनितासेवनरूपा व्यसनत्रय्येव जगति प्रायः सर्वान् मानवान् स्ववशंवदान् कृत्वा नर्तयति सर्वेष्वपि कालेषु। तादृशी अतिबहुला सामाजिकप्रवृत्तिरेव भाण-प्रहसनादिषु रूपकेषु केषुचिदुपरूपकेषु च तैस्तैः कविभिरुपनिबद्धा। एवं स्थिते सर्वमपि संस्कृतसाहित्यं राजप्रासादसम्बद्धं, धनिकवर्गव्यवहृतिमात्रवर्णनपरं चेति केषाञ्चित् साहित्यविमर्शकम्मन्यानामुक्तिः। द्वित्रमहाकाव्यनाटकादिमात्रस्थूलानुशीलनफलमिति जानन्त्येव परिचित-भाणादिकाव्यविशेषाः सहृदयाः। अयमेव विषयः सविस्तरम् अस्मिन् ग्रन्थे 'वेशसंस्कृतिः' 'सामाजिकदुष्प्रवृत्तयः' इति कृतशीर्षके अन्तिमे अध्यायद्वये सूचितः। परिशिष्टे च विविधभाणेभ्यः उद्धृत्य दत्ताः पञ्चसप्तत्युत्तरशतद्वयसङ्ख्याकाः (275) सूक्त्यादयः नितरां मनोरञ्जकाः, धियां प्रचोदकाश्च भवेयुः पठितॄणाम्।

एवं नैकेभ्यः पुरातनेभ्यः ग्रन्थेभ्यः विषयजातं समाहृत्य, लभ्यांश्च सर्वान् भाणान् सूक्ष्मेक्षिकया परिशील्य विरचितोऽयं ग्रन्थः संस्कृतसाहित्याध्यापकानां विद्यार्थिनाञ्च महते ज्ञानलाभाय, भाणादिपठितिनिर्मित्यादौ श्रद्धायै च भवेदित्याशास्यते।

नैकशास्त्रेषु विशेषतश्च व्याकरणे लोकविश्रुतेन वैदुष्येण मण्डितः,
In Public domain. Digitization Muthulakshmi Research Academy
उत्तमशास्त्राध्यापकतया लब्धवर्णः, राजस्थानसंस्कृतविश्वविद्यालयस्य कुलपतिचरश्च श्रीमान् रामकृष्णमाचार्य महाशयः संस्कृतलोकस्य कृतज्ञतामर्हति एतादृशस्य ग्रन्थरत्नस्याविष्कृतये।

हैदराबाद्

पुल्लेल श्रीरामचन्द्रः

In Public domain. Digitization Muthulakshmi Research Academy

किञ्चिन्निवेदनम्

महानयं मे प्रमोदस्य अवसरः यत् चत्वारिंशद्भ्यो वर्षेभ्यः पूर्वमारब्धः प्रयासः इदानीं फलेर्ग्रहिर्जायमानोऽस्तीति । यदाहमध्ययनं समाप्याध्यापने प्रवृत्तः तदा मम अध्यात्मगुरवः मम ज्येष्ठपितृष्वसुः पतिदेवाः उभयवेदान्तपारदृश्वानः पश्चिमगोदावरीमण्डलान्तर्गतकाल्लकूरुग्रामे विराजमानस्य भगवतो वेङ्कटेश्वरस्य देवालयस्य स्थानाचार्याः कुमाण्डूरि इलयवल्लि वेङ्कटाचार्याः संस्कृते आन्ध्रभाषायां सरसकविताधुरीणाः कदाचित् मद्गृहमागत्य नितरां प्रेम्णा मह्यं पञ्चषान् भाणग्रन्थानुपायनीकृत्य, संस्कृतभाषापाटवं सम्पादयितुमवश्यमेव भाणवाङ्मयं पठनीयमिति मामुपादिशन् । तदाहं किञ्चित् किञ्चित् श्लोकरचनाभ्यासं कुर्वन्नासम् । तस्मिन्नेव समये सहाध्यापकस्य प्रेरणया 'श्रीरामचन्द्रमनिशं हृदि भावयामि' इति मुकुटेन वसन्ततिलकवृत्ते रामचन्द्रभावनाविंशतिः रचिता । तदा तेषामुपदेशेन भाणग्रन्थपठनमारब्धं मया । वसन्ततिलकभाणेनारब्धमिदं परिशीलनं पञ्चबाणविजय - शृङ्गारतिलक - शृङ्गारसर्वस्व - शृङ्गारभूषण - मुकुन्दानन्दादिपरिशीलनपर्यन्तमेकस्मिन्नेव वर्षे सम्पन्नम् । तेन च तत्र आसक्तिः उत्सुकता च प्रवृद्धे । तस्मिन्नेव समये 'भाणतिलकं वसन्ततिलकम्' इति शीर्षकाङ्कितः मदीयः प्रसङ्गोऽपि विजयवाडा-आकाशवाणीकेन्द्रात् प्रसारितः आसीत् । काश्चन मदीयाः कविताः अपि अनन्तरं ततः एव प्रसारिता आसन् । ततः लक्षणग्रन्थानां परिशीलनं कुर्वता मया तत्तल्लक्षणग्रन्थेभ्यः भाणलक्षणानि सङ्गृहीतानि । यदा चाहं क्रि.श. 1973 वर्षे तिरुपतिकेन्द्रीयसंस्कृतविद्यापीठे अध्यापकत्वेन नियुक्तः तदा विद्यापीठीयग्रन्थालये विविधतालपत्रग्रन्थालयमातृकासूच्यः भाणग्रन्थानां विषये परिशीलिताः । तथा कृष्णमाचार्यस्य संस्कृतसाहित्येतिहासोऽपि परिशीलितः । एतत्परिशीलनेन ज्ञातं यत् भाणानां संख्यापि नाल्पा किन्तु गणनीया अस्तीति । तदा तेषु तेषु अन्वेषयता मया प्रायः सार्धशतं भाणानां नामानि प्राप्तानि । तत्र केचित् प्रकाशिताः, केचिच्चा-

प्रकाशिताः मातृकारूपेणोपलभ्यमानाः, केचिच्च नाममात्रावशिष्टाः । तत्रैव ग्र-
In Public domain. Digitization Muthulakshmi Research Academy
न्थालये चतुर्भाणी अपि लब्धा 'श्रृङ्गारहाट' नाम्ना हिन्दी-अनुवादेन मोतीचन्द्रेन सम्पादिता। तथैवान्येऽपि केचन भाणाः ग्रन्थालये उपलब्धाः, येषां परिशीलनार्थं कश्चन स सुवर्णावकाशः आसीत् । तावत्पर्यन्तं भाणवाङ्मयमनुसृत्य न केनापि विशिष्य परामृष्टमासीत् । अतः भाणसाहित्यमेवाश्रित्य किञ्चिल्लेखनीयमिति सङ्कल्पः जातः यश्च सपदि कार्यान्वितोऽपि जातः। तत्प्रयासफलरूपेण राष्ट्रियसंस्कृतसंस्थानस्य शोधपत्रिकायां विमर्शाभिधानायां 'भाणवाङ्मयचरितम्' इति शीर्षकेण क्रि. श. 1974 वर्षादारभ्य क्रि. श. 1978 पर्यन्तं चतुर्षु भागेषु संस्कृते भाणानुद्दिश्य मदीयः लेखः प्रकाशितः आसीत् यस्य अन्ते 153 भाणग्रन्थानामुल्लेखः कृतः ।

ततः परं क्रि. श. 1978 वर्षे साहित्य-अकाडमी संस्थायाः आन्ध्रप्रदेशशाखया भाणवाङ्मयविषये एव काचित् स्पर्धा आयोजिता आसीत् । तदर्थं तेलुगुभाषायां लघुप्रबन्धः मयापि सज्जीकृतः आसीत् । अस्मिन्नवसरे उपलभ्यमानानां भाणग्रन्थानां तत्कर्तॄणां परिचयोऽपि यथोपलब्धि दत्तः आसीत् । तत्तच्छतकक्रमेण तेषां भाणानां परिचयः तत्र प्रस्तुतः आसीत् । एवमन्येन पण्डितद्वयेन श्रीरामकृष्णमूर्ति-श्रीनिवासुलु इत्याख्येन अपि मिलित्वा तदर्थं कश्चित् प्रबन्धः समर्पितः आसीत् । पुरस्कारश्च ताभ्यां लब्धः । एतावता भाणानां विषये यत्कर्तव्यं तत्कृतमेवेति विचिन्त्य ततः परं मयापि तस्मिन् विषये उपेक्षैव कृता। परन्तु यथासमयम् आन्ध्रभाषायां सम्पादितस्य भाणकविपरिचयस्य संस्कृतीकरणमपि क्रियमाणमासीत् यत्र मम साहित्यगुरूणां ज्येष्ठभ्रातॄणां वेङ्कटरामनरसिंहाचार्यवर्याणां प्रोत्साहः सहकारश्चासीत् । ततः परं कार्यान्तरव्यापृतेन मया अस्मिन् विषये अवधानं न दत्तम् । यदा 'संस्कृतभाणसाहित्यमु' नाम्ना तयोः द्वयोः प्रकाशितः प्रबन्धः मया परिशीलितः तदा भाणग्रन्थपरिचये तेषां पद्धतिः कालानुगुणा नास्तीति मयावगतम् । तत्र आहत्य

उपशतं भाणानाम् एव परिचयः दत्तः । तैश्च आन्ध्रदेशीयाः तदितरे चेति अर्वाचीनभाणानां विभागः कृतः आसीत् । तत्रापि कविकालादिविषये तावती श्रद्धा न प्रदर्शिता यावती भाणेतिवृत्तादिविषये प्रदर्शिता । अस्मिन्नेव काले मया मलयालभाषायां रचिततात् केरलीय संस्कृतसाहित्यचरितादपि अनेके विषयाः सङ्गृहीता आसन् यत्र मम शिष्याः केरलीयाः नारायण-विष्णु प्रभृतयः साहाय्यं समाचरन् । अस्मिन्नन्तरे रामजी उपाध्यायैः 'आधुनिकसंस्कृतरूपक' इति हिन्दीभाषायां तथा 'संस्कृत के एकाङ्की रूपक' इति वीरवलाशर्मणां च ग्रन्थद्वयमपि अवलोकितम् । तत्रत्या अपि केचन विषयाः सङ्गृहीता आसन् । क्रमेण भाणानां सङ्ख्यापि 153 तः शतद्वयादुपरि सञ्जाता । अतोऽवश्यमेव संस्कृते 'भाणवाङ्मयचरितं' प्रकाशनीयम् इति पुनरिच्छा जाता । भाणेषु नवतिःप्रतिशतं भाणाः दाक्षिणात्या एव । अतस्तेषां परिचयः दाक्षिणात्येनैव कर्तुं शक्य इति चिन्तनमपि मम कार्येऽस्मिन् प्रोत्साहकमासीत् । अतः इदानीमयं प्रबन्धः उपलभ्यमानतत्तद्वाङ्मयचरिताद्यनुशीलनात्सकः, तत्रत्योपयुक्तविषयसङ्ग्रहरूपः, तत्तत्कालानुगुणतत्तद्ग्रन्थकर्तृपरिचयपरः, समग्रप्रायः भाणवाङ्मयपरिचायने अलमिति मे मतिः, यस्यौचित्येऽनौचित्ये वा सहृदयपरिशीलका एव प्रमाणम् ।

अस्य ग्रन्थस्य प्रकाशनार्थं यदा मया उस्मानियाविश्वविद्यालयपरिसरे भाग्यनगरे विराजमाना 'संस्कृत-अकाडमी' उपसृता, तदा तन्निदेशकाः, प्रकाशनसमितेः सदस्याः उस्मानिया विश्वविद्यालयकुलपतयः, उस्मानियाविश्वविद्यालयकलासंकायाध्यक्षाः, संस्कृतविभागाध्यक्षाः, भूतपूर्वसंस्कृतविभागाध्यक्षाः, पूनाविश्वविद्यालयस्य संस्कृतविशिष्टाध्ययनकेन्द्रस्य भूतपूर्वनिर्देशकाः, अन्ये च मयि स्निह्यन्तः अकाडमीद्वारा एतत्प्रकाशयितुं निरणैषुः यदर्थमेतेभ्यः सर्वेभ्यः मदीयं कार्तज्ञं विनिवेदयामि ।

In Public domain. Digitization Muthulakshmi Research Academy

अमुं जनमाशीर्वादेन अनुग्रहीतुं प्रार्थिताः राष्ट्रपतिसम्मानिताः, मम गुरुकल्पाः, शताधिकग्रन्थकर्तारः अनेकविशिष्टपुरस्कारभाजः, उस्मानियाविश्वविद्यालयस्य भूतपूर्वसंस्कृतविभागाध्यक्षाः, 'संस्कृत-अकाडमी'संस्थायाः स्वीयनिदेशकत्वेन स्वीयकृतिविशेषैश्च समुन्नायकाः, संस्कृतभाषाप्रचारसमितेः कुलपतयः, महामहोपाध्यायाः श्रीरामचन्द्रुडुमहाभागाः, ये च मयि अकारणं स्निह्यन्ति, सर्वदा मदीयमभ्युदयमेवाकाङ्क्षन्ते, तेऽपि स्वीयेनाशीर्वचनेन मां मदीयमिदं प्रयत्नं चानुगृह्णन्ति इति कृतार्थोऽहम् । अतस्तेभ्यो महद्भ्यः साष्टाङ्गप्रणामपुरस्सरं स्वीयकृतज्ञतां विनिवेदयामि । तथैव अकादम्याः निदेशकान् डा. श्रीनिवासवरखेडीमहाभागान्, सहनिदेशकौ वरलक्ष्मीसुब्रह्मण्यौ, तथा अन्यांश्च कार्यकर्तॄन् अभिनन्दनेन सभाज़यामि । अस्य प्रबन्धस्य कम्प्यूटरद्वारा 'लेटेक्स्' प्रक्रमद्वारा सम्पादितवतः मच्छिष्याग्रगण्याय चि. अनिलकुमाराय आशिषः प्रदीयन्ते । कम्प्यूटरद्वारा अक्षरयोजने उपकृतवद्भ्यां मम ज्येष्ठजामात्रे चि. बालाजीनाम्ने चि. मल्लिकार्जुनाय च साभिनन्दनं कार्तज्ञमावेदयामि । तथा साक्षात् परम्परया च उपकृतवद्भ्यः सर्वेभ्योऽपि कार्तज्ञं निवेदयामि ।

In Public domain. Digitization Muthulakshmi Research Academy

अथात्र ग्रन्थस्वरूपमधिकृत्य किञ्चिन्निवेद्यते । आदौ भाणलक्षणादिविवेचनं तत्तन्मतमतप्रदर्शनपुरस्सरं विहितम् । ततश्च कालभेदेन भाणानां तत्कर्तॄणां च परिचयः आरब्धः । 'प्राचीनभाणाः' इति प्रथमोऽध्याये क्रि.श. त्रयोदशशतकपर्यन्तं रचिताणां भाणानां परिचयः प्रदत्तः । ततश्च प्रत्येकस्मिन् शतके रचिताः भाणाः परिचायिताः । तत्तद्भाणरचनाकालमनुसृत्यैव तेषां तेषां तत्तच्छतके योजनं कृतम् । अन्ते च येषां कालः न ज्ञातः तेषां परिचयः प्रदत्तः । ततः परं वेशसंस्कृतेः, भाणानां मुख्यस्य लक्ष्यस्य च परिचयः प्रदत्तः । अत्र च आहत्य प्रायः 140 भाणग्रन्थानां तत्कर्तॄणां च परिचयः प्रदत्तः । 'संस्कृतभाणसाहित्यमु' इति तेलुगुग्रन्थे परिचायिताः सर्वेऽपि अत्र सन्त्येव । येषां विषये तत्र कश्चन सन्देहः अभिव्यञ्जितः तेषामपि विवरणम-

In Public domain: Digitization Muthulakshmi Research Academy

त्रोपलभ्यते । ततश्च प्रायः न कोऽपि भाणकृत् परित्यक्तः । एवमेव रामजी उपाध्यायेन, वीरबलाशर्मणा, कृष्णमाचार्येण, रामराजुमहाशयेन, कुञ्जुण्णिराजामहाशयेन, केरलीयसंस्कृतसाहित्यचरितकारेण च येषामुल्लेखः कृतः ते सर्वेऽपि अत्र सन्त्येव । अथ ये केचन नाममात्रावशिष्टाः, येषां विषये किमपि न ज्ञायते तेऽपि अन्ते योजितायां पट्टिकायां योजिताः । भाणेषु उपलभ्यमानानां लोकोक्तीनां सूक्तीनां च पट्टिकापि अन्ते योजिता । इत्थमयं प्रवन्धः भाणवाङ्मयस्य सम्पूर्णस्य परिचायकः स्यादिति मम विश्वासः । अत्र च विमर्शकाः एव प्रमाणम् । इदमत्र किंचित् अक्षरयोजनविषये निवेद्यते । अत्र ऋकारविशिष्टः शकारः "शृ"रूपेण, शकररेफयकारसंयोगः "श्र्य" इति च दृश्येत । तथा हस्तलिखिततालपत्रशब्दौ पर्यायरूपेण प्रयुक्तौ ।

अन्ते च पुनरेकवारम् एतद्ग्रन्थस्य एवं रूपेण प्रकाशने कारणभूतानां सर्वेषां हार्दं कार्तज्ञं विनिवेद्य एतादृग्भाग्यनिदानभूतस्य इष्टदैवस्य वेङ्कटेश्वरस्य सन्निधौ सहस्रशः प्रणामपुरस्सरं ममपितृपादानां, मातामही-मातामह्योश्च दिव्यस्मृतौ मातृदेवतानां श्रीयतिराजवल्लीत्याख्यानां, तथा गुरुभूतानां ज्येष्ठभ्रातॄणां श्रीमतां वेङ्कटरामनरसिंहाचार्याणां च करकमलेषु ग्रन्थममुं समर्प्य आत्मानं कृतार्थयितुमिच्छामि ।

विकृति-मार्गशीर्ष-पौर्णमी

21-12-2010

इत्थं

निवेदयिता

विद्वज्जनविधेयः

रामकृष्णमाचार्यः

श्रीगुरुभ्यो नमः

In Public domain. Digitization Muthulakshmi Research Academy

श्रीश्रीनिवासपरब्रह्मणे नमः

मङ्गलम्

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ॥

यस्य द्विरदवक्त्राद्याः पारिषद्याः परः शतम् ।
विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये ॥

विघ्नेशं वैष्णवं नौमि शंखचक्रविशोभितम् ।
गजाननं हीष्टकार्यविघ्नध्वंसाय सर्वदा ॥

शारदा शारदाम्भोजवदना वदनाम्बुजे ।
सर्वदा सर्वथास्माकं सन्निधिः सन्निधिं क्रियात् ॥

श्रीवेंकटाचलाधीशं श्रियाध्यासितवक्षसम् ।
श्रितचेतनमन्दारं श्रीनिवासं श्रये सदा ॥

श्रीरामानुजभागिनेयमपरं कामूरवंशोद्भवं
In Public domain. Digitization: Muthulakshmi Research Academy
कन्दाडान्वयमूलभूतमनघं श्रीदाशरथ्याह्वयम् ।
तद्वंश्यं वरदार्यदेशिकमनुप्राप्तं हि काञ्चीपुरात्
श्रीरामानुजदर्शनं हि वितनितुं ह्यान्ध्रांश्च, सेवेऽनघम् ॥

प्रादुर्भूतं च वंशेऽस्मिन्ननघं प्रपितामहम् ।
पद्मनाभस्वामिवर्यं, वदान्यं च पितामहम् ॥
श्रीवेंकटनृसिंहार्यं सम्प्रदायप्रवर्तकम् ।
तां जगन्नायकीं मान्यां प्रणमामि पितामहीम् ॥

मातामहं तिरुमलार्यमादर्शाध्यापकं गुरुम् ।
मातामहीं सदास्मासु वत्सलां नरसाम्बिकाम् ॥

यतिराजवल्लीमम्बां तां पितरं वीरराघवम् ।
रामनाम्ना च विख्यातं भ्रातरं भ्रातृवत्सलम् ।
नरसिंहाचार्यनामानं साहित्याध्यापकं गुरुम् ॥
नरसिंहभाष्यकारेत्यभिधं शाब्दिकं गुरुम् ।
रामानुजाचार्यवर्यं न्यायशास्त्रविशारदम् ।
प्रणमामि तथैवान्यान् बाल्ये ज्ञानप्रदान् गुरून् ॥

प्राप्तसंस्कृतसंस्कारं शास्त्राध्ययनतत्परम् ।
पुत्रवन्मामनुगृह्य समग्रं पाणिनीयकम् ।
यो ह्यध्यजीगपत्तं हि लङ्कवंशाब्धिकौस्तुभम् ॥
वैयाकरणपञ्चास्यं वेदवेदान्तपारगम् ।

वरदार्यस्य सच्छिष्यं नरसिंहाभिधं गुरुम् ॥
In Public domain. Digitization Muthulakshmi Research Academy
कौशिकं वेंकटार्यं च वेदान्तोभयपरगम् ।
साष्टाङ्गं प्रणिपत्याथ ध्यायं ध्यायं श्च तद्वचः ॥

नारायणगुरुं नौमि त्रिवेणीधामसंस्थितम् ।
समुद्धर्तुमुपक्रान्तम् रामानन्दार्यदर्शनम् ॥

पाणिन्यादिमुनीन् प्रणम्य विबुधं श्रीसूर्यनारायणं
ताताचार्यगुरुं च सन्नुतगुणं कोटीश्वराख्यं तथा
गोडाशास्त्र्यभिधं गुरूपमगुरुं, श्रीरामचन्द्रार्यकम्
विद्वद्वर्यगणं गुरूपममहं सम्प्रार्थये सिद्धये ॥

यत्प्रेरणाभ्यनुज्ञाने निदानं ह्यत्र प्रक्रमे ।
निर्देशकं श्रीनिवासं वरखेडीत्युपनामकम् ।
परिषदस्संस्कृतस्य स्निह्यन्तं मयि सर्वदा ॥

साम्राज्यलक्ष्मीं पत्नीमप्यनुरक्तां पतिव्रताम् ।
अपत्यानि च स्निग्धानि कनिष्ठभ्रातरौ तथा ।
परिवारजनान् सर्वानभिनन्द्य समारभे ॥
रामकृष्णेति ख्यातोऽद्य प्रार्थये विबुधान् पुनः ।
इष्टसाफल्यसिद्ध्यर्थमनुग्राह्योऽहमाशिषा ॥

In Public domain. Digitization Muthulakshmi Research Academy

भाणवाङ्मयचरितम्

कं.वें.रामकृष्णमाचार्यः

In Public domain. Digitization Muthulakshmi Research Academy

विषयानुक्रमणिका

1 भाणलक्षणस्वरूपादिविवेचनम् 1
1.1 भाणलक्षणविवेचनम् 3
1.2 भाणेषु लास्याङ्गप्रयोगः 9
1.3 विमर्शकानामभिप्रायाः 10
1.4 भाणपदव्युत्पत्तिः 12
1.5 वृत्तिः 12
1.5.1 भारतीवृत्तिः 12
1.5.2 कैशिकी वृत्तिः 13
1.6 रसः 13
1.7 नायकः 15
1.8 नायिका 20
1.9 सहायकाः 25
1.10 भाणेषु अवान्तरभेदौ 25
1.11 भाणेषु प्रस्तावना 26
1.12 भाणस्वरूपविवेकः 27
1.13 भाणनामानि 31
1.14 भाणः–प्रहसनम् 32

In Public domain. Digitization Muthulakshmi Research Academy

1.15 भाणः–वीथी 33
1.16 भाणः–भाणिका 34
1.17 सिंहावलोकनम् 34

2 प्राचीनाः भाणाः 39
2.1 पद्मप्राभृतकम् – शूद्रकः 43
2.2 उभयाभिसारिका – वररुचिः 49
2.3 धूर्तविटसंवादः – ईश्वरदत्तः 54
2.4 पादताडितकम् – श्यामिलकः 58
2.5 मेघदूतस्य मूलम् 63
2.6 कर्पूरचरितम् – वत्सराजः 64

3 क्रि. श. चतुर्दशशतकभाणाः 71
3.1 शृङ्गारमञ्जरी – सर्वज्ञसिङ्गभूपालः 71
3.2 वसन्तभूषणम् – वरदाचार्यः 72
3.3 अज्ञातनामा भाणः – पेद्दयामात्यः 73
3.4 मदनविलासः – पशुपतिनागनाथः 73
3.5 अज्ञातनामकर्तृकः भाणः 75

4 क्रि. श. पञ्चदशशतकभाणाः 77
4.1 वसन्ततिलकभाणः – वरदाचार्यः 78
4.2 शृङ्गारभूषणभाणः – वामनभट्टबाणः 85
4.3 शृङ्गारशेखरभाणः–वेल्लाल उमामहेश्वरः 90
4.4 कन्दर्पदर्पणभाणः – श्रीकण्ठः 93
4.5 कन्दर्पविजयभाणः – उद्दण्डकविः 94
4.6 शृङ्गारजीवनभाणः – अवधानसरस्वती 95

In Public domain. Digitization Muthulakshmi Research Academy
4.7 हरिविलासभाणः – हरिदासः 95

5 क्रि. श. षोडशशतकभाणाः 97
5.1 शृङ्गारसर्वस्वभाणः – वेदान्ताचार्यः 97
5.2 शृङ्गारसर्वस्वभाणः – राजचूडामणिदीक्षितः 98
5.3 महिषमङ्गलभाणः – नारायणन् नम्बूतिरिः 99
5.4 शृङ्गाररसोदयभाणः – लिङ्गमगुण्ट रामकविः 103
5.5 मदनगोपालविलासभाणः – गुरुरामकविः 105
5.6 विलासभूषणभाणः – वेङ्कटकृष्णय्य 107
5.7 चातुरीचन्द्रिकाभाणः – वेङ्कटार्यः 109

6 क्रि. श. सप्तदशशतकभाणाः 111
6.1 अनङ्गजीवनभाणः – आत्रेयवरदाचार्यः 111
6.2 शृङ्गारदीपभाणः – वेङ्कटाध्वरी 114
6.3 शृङ्गारस्तबकभाणः– नृसिंहः 117
6.4 अनङ्गब्रह्मविद्याविलासभाणः – वाधूलवरदाचार्यः . . . 119
6.5 मदनमहोत्सवभाणः – श्रीकण्ठः (नञ्जुण्डः) 121
6.6 शृङ्गारकोशभाणः – गीर्वाणेन्द्रदीक्षितः 123
6.7 कन्दर्पविजयभाणः – श्रीकण्ठः 125
6.8 अनङ्गमङ्गलभाणः – श्रीनिवासाचार्यः 125
6.9 रसविलासभाणः – चोक्कनाथः 126
6.10 रसोल्लासभाणः – श्रीनिवासाचार्यः 127
6.11 रसिकतिलकभाणः–कविराक्षसः (मुद्दुरामकविः) . . . 130
6.12 शृङ्गारमञ्जरीभाणः–अष्टभाषाबहरी गोपालरायः 132
6.13 पञ्चबाणविजयभाणः – वाधूलरङ्गाचार्यः 135

In Public domain. Digitization Muthulakshmi Research Academy

6.14 शृङ्गारतिलकभाणः – रामभद्रदीक्षितः 140
6.15 मदनभूषणभाणः – अप्पाध्वरी 146
6.16 शृङ्गारसर्वस्वभाणः – नल्लाबुधः 148
6.17 पञ्चबाणभाणः – भट्टिवेङ्कटेशः 154

7 क्रि. श अष्टादशशतकभाणाः 159
7.1 अनङ्गविजयभाणः – शिवरामकृष्णः 159
7.2 अनङ्गविजयभाणः – कावल जगन्नाथः 161
7.3 मदनसञ्जीवनभाणः – घनश्यामः 162
7.4 वेङ्कटभाणः – श्रीधर पेरुसूरिः 165
7.5 शृङ्गारविलासभाणः – साम्बशिवशास्त्री 166
7.6 शृङ्गारसर्वस्वभाणः – अनन्तनारायणः 167
7.7 शृङ्गारविलसितभाणः – नारायणः 168
7.8 सरसकविकुलानन्दभाणः – वेल्लाल रामचन्द्रकविः . . 168
7.9 शारदातिलकभाणः – शेषगिरिः 172
7.10 अनङ्गसर्वस्वभाणः – लक्ष्मीनृसिंहः 172
7.11 शृङ्गारचन्द्रिकाभाणः – वात्स्यश्रीनिवासाचार्यः 173
7.12 अनङ्गतिलकभाणः – वात्स्यरङ्गनाथः 174
7.13 अनङ्गभूषणभाणः – वेङ्कटवरदः 176
7.14 रसिकामृतभाणः – शङ्करनारायणः 176
7.15 शृङ्गारसुधाकरभाणः – अश्वति तिरुनाल् रामवर्मा . . 177
7.16 अज्ञातनामकर्तृकः भाणः 179
7.17 शृङ्गारसुन्दरभाणः – ईश्वरवर्मा 179
7.18 कमलाविलासभाणः – नारायणः 182
7.19 शृङ्गारसञ्जीवनभाणः – गूटाल शठजित्कविः 183

In Public domain. Digitization Muthulakshmi Research Academy
7.20 मुकुन्दानन्दभाणः – काशीपतिः 183
7.21 कामकलाविलासभाणः – वेङ्कटभूपतिः 187
7.22 शृङ्गारमञ्जरी – विश्वनाथः (दूर्वादि) 189
7.23 रसोदारभाणः – सुरपुरम् अण्णयार्यः 191
7.24 रसिकजनरसोल्लासभाणः – कामसमुद्रं वेङ्कटाचार्यः . . 192
7.25 शृङ्गारभूषणभाणः – चन्द्रगिरि वेङ्कटाचार्यः 193
7.26 शृङ्गाररसभृङ्गारभाणः – इन्द्रगण्टि कोण्डय्य 194
7.27 शारदातिलकभाणः – शङ्करः 195
7.28 मदनलीलादर्पणभाणः – पद्मनाभः 196

8 एकोनविंशशतकभाणाः 199

8.1 पञ्चायुधप्रपञ्चभाणः–त्रिविक्रमभट्टः 199
8.2 शृङ्गारकेतुलीलाचरितभाणः – भास्करः 200
8.3 विटनिद्राभाणः – अज्ञातकर्तृकः 202
8.4 रससदनभाणः – युवराजः 203
8.5 मदनाभ्युदयभाणः – शिष्टु कृष्णमूर्तिशास्त्री 208
8.6 वल्लवीपल्लवोल्लासभाणः – शिष्टु कृष्णमूर्तिशास्त्री . . . 210
8.7 शृङ्गारसुधार्णवभाणः–कोराडरामचन्द्रशास्त्री 212
8.8 रसिकरञ्जनभाणः – सुन्दराजय्यङ्गारः 215
8.9 रासविलासभाणः – केरलवर्मा 216
8.10 रामजन्मभाणः – ताराचरणशर्मा 216
8.11 श्यामलाभाणः–चिन्तामणिः 217
8.12 रसिकभूषणभाणः – उदयवर्मा 217
8.13 शृङ्गाररसर्वस्वभाणः – स्वामिशास्त्री 218
8.14 शृङ्गारमञ्जरीभाणः – केरलवर्मा 219

In Public domain. Digitization Muthulakshmi Research Academy

8.15 रसरत्नाकरभाणः – जयन्तः 221
8.16 वल्लवीपल्लवोल्लासभाणः – मञ्जुलाचार्यः 221
8.17 शृङ्गारराजतिलकभाणः – अविनाशीश्वरः 222
8.18 गोपाललीलार्णवभाणः – उटके गोविन्दाचार्यः 223
8.19 विटराजविजयभाणः – कोच्चुण्णि भूपालः 224
8.20 अनङ्गजीवनभाणः – कोच्चुण्णि भूपालः 227
8.21 शृङ्गारजगन्मोहिनीभाणः – साधुपल्लि चन्द्रशेखरकविः . 230
8.22 शारदातिलकभाणः – चामयमन्त्री 231
8.23 मन्मथमन्थनभाणः – सुब्रह्मण्यसूरिः 232
8.24 शृङ्गारभूषणभाणः – विंजमूरि अनन्ताचार्यः 232
8.25 शृङ्गारदीपकभाणः – विंजमूरि राघवाचार्यः 234
8.26 पौण्डरीकभाणः – कोक्कोण्ड वेङ्कटरत्नम् 235
8.27 कन्दर्पदर्पणभाणः – नावल्पाक्कं वेङ्कटाचार्यः 235
8.28 शृङ्गारतरङ्गिणीभाणः – ईचम्बाडि श्रीनिवासाचार्यः . . 239
8.29 रसिकरञ्जनभाणः – प्रतिवादिभयङ्करं श्रीनिवासाचार्यः 242
8.30 मदनविजयभाणः – विंक्किराल शेषाचार्यः 245
8.31 शृङ्गारजगन्मोहनभाणः – एक्किराल नरसिंहाचार्यः . . 249
8.32 शृङ्गारजीवनभाणः–वरदाचार्यः 250
8.33 शारदानन्दनभाणः–श्रीनिवासाचार्यः 250

9 क्रि.श.विंशशतकभाणाः 253
9.1 विटविलासभाणः – महादेवशास्त्री 254
9.2 कन्दर्पविलासभाणः– बेल्लंकोण्ड रामरायकविः 255
9.3 मदनानन्दभाणः – भट्टर् पार्थसारथि अय्यंगार् 257
9.4 रसार्णवतरङ्गिणी भाणः – कपिष्ठलं कृष्णमाचार्यः . . 260

In Public domain. Digitization Muthulakshmi Research Academy

9.5 शृङ्गारशेखरभाणः – सुन्दरेशशर्मा 260

9.6 वसन्तमित्रभाणः – मङ्गलगिरि कृष्णद्वैपायनाचार्यः . . 262

9.7 रसिकशेखरभाणः – गादाधरविद्याभूषणः 263

9.8 श्रीनिवासविलासभाणः – पैत्तम्बाडि रामानुजाचार्यः . 263

9.9 अखिलजनमनोहरभाणः – विक्राल शेषाचार्यः 265

9.10 मनोजविजयभाणः – शिरिशिनगल् कृष्णमाचार्यः . . . 265

9.11 कृत्तिकाभाणः – राघववर्मा 266

9.12 मर्कटमार्दलिकभाणः – महालिङ्गशास्त्री 266

9.13 पुरुषपुङ्गवभाणः – जीवन्यायतीर्थः 267

9.14 साक्षात्कारभाणः – शिवप्रसादः भारद्वाजः 270

9.15 फण्टूसचरितभाणः – अभिराजराजेन्द्रमिश्रः 272

9.16 धूर्तानुभवभाणः – सूरं श्रीनिवासुलु 273

9.17 नटसमागमभाणः – सूरं श्रीनिवासुलु 274

9.18 गुरुवररञ्जनभाणः – सूरं श्रीनिवासुलु 276

9.19 कविजनमण्डनभाणः – सूरं श्रीनिवासुलु 276

10 अज्ञातकालाः भाणाः 279

10.1 अज्ञातनामकर्तृकः भाणः 279

10.2 अनङ्गमङ्गलभाणः – सुन्दरकविः 280

10.3 कामभाणः – नारायणः 280

10.4 कामिनीकामुकोल्लासः – विश्वनाथः 282

10.5 चन्द्ररेखाभाणः – शङ्करकविः 282

10.6 तरुणभूषणभाणः – शठकोपकविः 283

10.7 मदनमञ्जरीभाणः – वेङ्कटेशः 285

10.8 मदनविजयभाणः – अनन्ताचार्यः 286

In Public domain. Digitization Muthulakshmi Research Academy

10.9 रतिभूषणभाणः – कवितार्किककण्ठीरवः 286
10.10 वसन्ताभरणभाणः – श्रीनिवासः 287
10.11 शृङ्गारपावनभाणः – वैद्यनाथः 287
10.12 शृङ्गारभूषणभाणः – श्रीनिवासाचार्यः 288
10.13 शृङ्गारमञ्जरीभाणः – रतिकरः 288
10.14 शृङ्गारमञ्जरीभाणः – वेङ्कटनारायणः 289
10.15 शृङ्गारमञ्जरीभाणः 289
10.16 शृङ्गारमञ्जरीभाणः 290
10.17 शृङ्गाररत्नाकरभाणः – सुन्दरताताचार्यः 290
10.18 शृङ्गाररसभाणः 290
10.19 शृङ्गारशेखरभाणः – रामानुजः 291
10.20 सम्पत्कुमारविलासभाणः – रङ्गनाथः 291
10.21 हेमन्ततिलकभाणः – तिरुमलाचार्यः 292

11 वेशसंस्कृतिः 293
11.1 वेशवाटिका 293
11.2 वेश्या 294
11.3 आपानगोष्ठी, उद्यानविहारः 299
11.4 कलत्रीकरणम् 300
11.5 वेश्यामाता 301
11.6 मुख्योत्सवौ 304
11.7 क्रीडाविहाराः 306

12 सामाजिकदुष्प्रवृत्तयः 313

परिशिष्टम् 321

In Public domain. Digitization Muthulakshmi Research Academy

परिशिष्टम् – अ. लोकोक्तयः–सूक्तयः–विशिष्टव्यावहारिकाश्च 321

परिशिष्टम् –ब. भाणपट्टिका 339

श्लोकानुक्रमणिका 349

उपयुक्तग्रन्थसूची–सङ्केतसहिता 360

In Public domain. Digitization Muthulakshmi Research Academy

अध्यायः 1

भाणलक्षणस्वरूपादिविवेचनम्

नाटकं सप्रकरणं भाणः प्रहसनं डिमः ।
व्यायोगसमवाकारौ वीथ्यङ्केहामृगा दश ।।

इति दशविधेषु रूपकेषु भाणः प्राचीनकालादारभ्य अद्य यावत् अनुस्यूत–रूपेण प्रवाहनित्यतां भजन् रूपकवाङ्मये प्रधानस्थानं भजति । भाणाः सं–स्कृतवाङ्मये नाटकसमकक्षतया प्रवृद्धाः । संस्कृतवाङ्मयपरिशीलनेन इ–दानीं शतद्वयपर्यन्तं भाणाः उपलभ्यन्ते, येषु केचन नाममात्रावशिष्टाश्च सन्ति । अनेके कालगर्भे निलीना अपि भवेयुः । परन्त्वेतदेव शोचनीयं यत् तेषु शताधिकाः ग्रन्थाः अप्रकाशिताः यथाकथञ्चित् ग्रन्थालयैस्सं–रक्ष्यमाणा वर्तन्ते । अप्रकाशितेषु भाणेषु प्राचीना अपि भाणाः वर्तन्ते । संस्कृतवाङ्मये नाटकानां भाणानां च परस्परं वैलक्षण्यं बहु वर्तते । ना–टकानि सर्वाण्यपि सुन्दरभाषायाः, चरित्रचित्रणस्य उदात्तशृङ्गारभावानां च प्रतीकभूतानि । तेषु अनेकानि नाटकानि केवलं राज्ञां प्रेमव्यवहा–रसम्बद्धानि । अतः तेषु तत्कालीनजनप्रवृत्तयः न प्रतिबिम्बिताः । य–द्यपि तत्रस्थविटविदूषकादिपात्रद्वारा किञ्चिदवगन्तुं शक्येत तथापि ता–न्यपि पात्राणि तत्र तथा न समर्थानि । यतः नाटकानामितिवृत्तं प्रख्यातं

In Public domain. Digitization Muthulakshmi Research Academy

भवेदिति नियमः कृतः, अतः तेषु तात्कालिकजनजीवनस्य प्रतिबिम्ब-नमशक्यमेव। उत्पाद्येतिवृत्तेषु प्रकरणादिषु तु अस्त्येवावकाशः। तच्चा-स्माभिरक्षिसात्क्रियते शूद्रकस्य मृच्छकटिके। अत्युन्नतप्रमाणयुक्ते आ-दर्शभूतेऽपि समाजे भवन्त्येव काश्चन दुष्प्रवृत्तयः, येषां प्रकाशनपुरस्सरं ताभ्यः समाजस्य संरक्षणमनिवार्यम्। अतः तेषां सामाजिकदोषाणां नि-शितपरीक्षणपूर्वकमाविष्कारं विधास्यन् समाजः यथा समीचीनमार्गगामी स्यात् तथा कर्तुं प्रयतते भाणः। अत एवात्रेतिवृत्तं वेश्याविटादिनीचज-नसम्बद्धं वर्तते। अत एव च भाणः नैतिकदृष्ट्या हीनः। एतादृशं भाण-वाङ्मयमधिकृत्य स्थूलरूपेण स्वकीयेषु संस्कृतवाङ्मयचरितेषु अनेके वि-मर्शनं कृतवन्तः। परन्तु एतेषां विमर्शनानां सर्वेषामपि आविर्भावः त-दारभ्यासीत् यदा चतुर्भाणीनाम्ना प्राचीनानां चतुर्णां भाणानां प्रकाशनं श्रीमद्भिः एम्. रामनाथशास्त्रिभिः 1922 संवत्सरे कृतम्। उपलभ्यमानेषु भाणग्रन्थेषु एते चत्वारः प्राचीनाः। एतद्भाणचतुष्टयप्रकाशनमेव विमर्श-कानां दृष्टिं भाणोन्मुखीं चकार। ततः अनेके भाणवाङ्मयम्, एतद्भाण-चतुष्टयं चाधिकृत्य स्वकीयानभिप्रायान् तत्तत्पत्रिकासु लेखादिद्वारा प्र-काशितवन्तः। तेषु श्रीमन्तः एफ्. डब्ल्यु. थामस्, टी. बरो, एस्. के. डे, इत्यादयो मुख्याः। तेषु एफ् डब्ल्यु. थामस् महोदयः स्वकीयलेखे भाणवाङ्मयमधिकृत्येत्थं स्वाभिप्रायमाविश्चकार– It will, I think, be admitted that these compositions, inspite of the unedifying character of their general subject and even inspite of occasional vulgarities, have a real literary quality. They display a natural humour and a polite, intensely Indian irony which need not fear comparison with that of a Ben Jonson, or a Moliere. The language

In Public domain. Digitization: Muthulakshmi Research Academy

is the veritable ambrosia of Sanskrit speech (Centenary Supplement of J.R.A.S.[1] 1924, P.135)

भाणेषु नीचजनवृत्तमेवेतिवृत्तं भवति। तत्र तत्र अश्लीलवर्णनादिकमपि वर्तते। अथापि सहजसाहित्यस्वरूपावगतिः भवति। अत्रैव भारतीयस्य सहजस्य परिहासस्य, व्यङ्ग्यस्य च अनुभवो दृश्यते। न केवलमेतत्। किन्तु व्यावहारिकी, स्वाभाविकी, सरला च संस्कृतभाषा अत्रैवाक्षिसात्कर्तुं शक्या। अत्रत्या भाषा व्यावहारिकसंस्कृतस्य कश्चन अमृतमयः प्रकारः।

एवं समाजदोषाविष्कारकं सहजव्यावहारिकसंस्कृतभाषास्वरूपप्रदर्शकं च इदं भाणसाहित्यम् अतिप्राचीनमिति अलङ्कारशास्त्रग्रन्थसमालोचनया ज्ञायते। एतेषां प्रचारप्रभावविषये प्राचीनानां न केवलमासक्तिरेवासीत् अपितु एतद्वाङ्मयं कदाचित् बहुलप्रचारे अवर्तत इत्यप्यूहितुं शक्यते। एतच्च भाणवाङ्मयम् उत्तरभारते समुद्भूतं दक्षिणभारते च प्रवृद्धम्। भरतनाट्यशास्त्ररचनाकालमारभ्य एतावत् पर्यन्तमनुस्यूततया इतरसाहित्यप्रक्रियाभिस्सह वृद्धिं प्राप्तम्। एतादृशस्य भाणस्य लक्षणस्वरूपादिकं किञ्चिद् परिशीलयामः।

1.1 भाणलक्षणविवेचनम्

अस्य भाणवाङ्मयस्य अतिप्राचीनत्वादेव भरतमुनिमारभ्य एतावत्पर्यन्तं स्थिता आलङ्कारिकास्सर्वेऽपि स्थूलरूपेण सूक्ष्मरूपेण च भाणलक्षणं प्रदर्शितवन्तः। तेषु भरतः स्वकीये नाट्यशास्त्रे[2] भाणलक्षणमेवमकथयत्–

आत्मानुभूतशंसी परसंश्रयवर्णनाविशेषश्च।

---

1 Journal of Royal Asiatic Society
2 नाट्यशास्त्रम् – अध्यायः 18. – पृ. 449. Gayakwad Oriental Series, Baroda.

In Public domain. Digitization Muthulakshmi Research Academy

विविधाश्रयो हि भाणो विज्ञेयस्त्वेकहार्यश्च ॥

परवचनमात्मसंस्थैः प्रतिवचनैरुत्तरोत्तरग्रथितैः ।

आकाशपुरुषकथितैः अङ्गविकारैरभिनयेच्च ॥

धूर्तविटसम्प्रयोज्यो नानावस्थान्तरात्मकश्चैव ।

एकाङ्को बहुचेष्टः कार्यो बुधैर्भाणः ।।

अस्य अभिनवगुप्ताचार्यस्य व्याख्या एवं वर्तते। "अथ हास्यरसोचित-विटधूर्ताद्यनुप्रवेशेन समानयोगक्षेमं भाणलक्षणमाह–आत्मानुभूतशंसीति। एकेन पात्रेण करणीयः सामाजिकहृदयं प्रापयितव्योऽर्थो यत्र स भाणः। एकमुखेनैव भण्यन्ते उक्तिमन्तः क्रियन्ते अप्रविष्टा अपि पात्रविशेषा यत्रेति भाणः। तत्र स प्रविष्टः पात्रविशेषः आत्मानुभूतं शंसति परगतं वा वर्णयति। तत्र च प्रयोगप्रयुक्तिमाह– परवचनमिति। परसम्बन्धिवचनं स्वयमङ्ग-विकारैरभिनयेत्। ननु तत्परवचनम् उक्तं कथमभिनयेदित्याह–आकाशे शून्ये यानि पुरुषकथितानि दृष्टानि, यत्र शून्ये तेन वर्ण्यते वा, कश्चित् पश्यत्याकर्णयति च, तद्वचनं स एवानुवदन् सामाजिकान् बोधयति यथा 'बोदबले! किं ब्रवीषी'त्यादौ। न केवलं परवचनमभिनयते। किन्तु स्वो-क्त्यैस्सह। अत एवोत्तरोत्तरग्रथितैः योजनाभिरुपलक्षितैः। ननु योऽसावेकः प्रविशति स क इत्याह–धूर्तविटेति। नाना प्रकारावस्थाविशेषात् लोक-व्यवहारो वेश्याविटादिवृत्तान्तात्मा निरूप्यत इति बाहुल्येन पृथग्जनव्यु-त्पत्त्युपयोगि रूपकमिदम्" इति। अन्यत्र भरतः अस्माद्विनिस्सृतानि तु भाण इवैकप्रयोज्यानि (ना. शा. 19–117) इति लास्याङ्गानि दशात्रो-पयोज्यानीत्युक्तवान्। एव मन्यत्र–

वीथी समवकारश्च तथैहामृग एव च।

उत्सृष्टिकाङ्को व्यायोगो भाणः प्रहसनं डिमः ।

कैशिकीवृत्तिहीनानि रूपाण्येतानि कारयेत् ॥ (ना०शा० 18–8–9)

In Public domain. Digitization Muthulakshmi Research Academy

इति कैशिकीवृत्तिं भाणे निषिद्धवान्। एवं मुखनिर्वहणसन्धिद्वयमेवात्रे-त्यपि अन्यत्रोक्तवान्। अभिनवगुप्ताचार्यः अन्यत्र स्वकीयायां विवृत्याम् – उत्सृष्टिकाङ्कप्रहसनभाणास्तु करुणहास्यविस्मयप्रधानत्वात् रञ्जकर-सप्रधानाः इति शृङ्गारहास्यकरुणैरिह कैशिकी स्यादिति कोहलेनोक्तं त-न्मुनिमतविरोधादुपेक्ष्यम् इति प्रहसनभाणयोरपि वाग्व्यापारप्राधान्यादेव भारतीवृत्तिः इति चोक्तवान्। उपरिनिर्दिष्टानां विषयाणां पर्यालोचनेन भा-णलक्षणस्वरूपमित्थमवगन्तुं शक्यते।

1. भाणे इतिवृत्तं कविकल्पितम्।
2. एक एव अङ्कः। मुखनिर्वहणावेव सन्धी।
3. कैशिकीवृत्तिरेव भरतेन निषिद्धा। परन्तु अभिनवगुप्तेन भारतीवृ-त्तिरेव इति नियमः कृतः।
4. भरतोऽत्र रसविषये तूष्णीं स्थितवान्। अभिनवगुप्तस्तु व्याख्याने इमं प्रहसनसमकक्षं कृत्वा, हास्य रसोचितविटधूर्तादिपात्राणि अ-त्रावश्यकानीति उक्तवान्। प्रहसनसमनन्तरं भाणलक्षणस्योक्त-त्वात् भरतः भाणं प्रहसनेन समानयोगक्षेमं अमन्यतेति ऊहितुं शक्यते। रसोऽत्राद्भुत इति अभिनवगुप्तः उक्तवान्।
5. इतिवृत्तं सकलजनाह्लादकारि वेश्याधूर्तविटादिनीचजनसम्बद्धम्।
6. तात्कालिकसमाजगतनानावस्थासूचकः भाणः।
7. धूर्तविटः एव नायकः। एकेनैव पात्रेण सहृदयरञ्जकः भाणः। ए-केनैव पात्रेण अप्रवेशितानामपि पात्राणां प्रयोगसूचको भाणः। रङ्गं प्रविश्य विटः स्वानुभूतं परानुभूतं च स्वयमङ्गविकारैरभिनयति। परवचनं स्वोक्त्या सह अनुवदति। नटनं च क्रमेणसम्पन्नप्रश्न-समाधानरूपवाचनमाश्रितम्। पात्रधारी विटः पण्डितः, ललितः, वाग्मी च भवति।

In Public domain. Digitization Muthulakshmi Research Academy

8. इतिवृत्तं एकस्यैव अङ्कः सम्बद्धम्।
9. भाणे दश लास्याङ्गानि यथा सन्दर्भं प्रयोज्यानि।

भरतः प्रहसनानन्तरं भाणं लक्षितवान्। विटो नायको भवतीत्युक्तवान्। अतः भाणतत्त्वं हास्यशृङ्गाररसावहं भवेत्। परन्तु तद्रसोपयोगिन्याः कैशिक्याः निषेधं कृतवान्। एवं भाणेतिवृत्तविषये, रसविषये च तूष्णीं बभूव। एतत् सर्वं सम्यक् परिशील्य धनञ्जयः स्वीये दशरूपके[3] भरतेन त्यक्तानपि विषयान् सम्यक् विचारितवान्। सः भाणलक्षणमित्थं वदति–

भाणस्तु धूर्तचरितं स्वानुभूतं परेण वा।
यत्रोपवर्णयेदेकः निपुणः पण्डितो विटः॥
सम्बोधनोक्तिप्रत्युक्तीः कुर्यादाकाशभाषितैः।
सूचयेद्वीरश्रृङ्गारौ शौर्यसौभाग्यसंस्तवैः॥
भूयसा भारतीवृत्तिः एकाङ्कं वस्तुकल्पितम्।
मुखनिर्वहणे साङ्गे लास्याङ्गानि[4] दशापि च॥ इति।

"धूर्ताः चौरद्यूतकरादयः तेषां चरितं यत्रैक एव विटः स्वकृतं परकृतं वा उपवर्णयति स भारतीवृत्तिप्रधानत्वात् भाणः। अस्पष्टत्वाच्च वीरशृङ्गारौ सौभाग्यशौर्यवर्णनया सूचनीयौ" इति तद्व्याख्याने च।

अभिनवगुप्तपादविवृतेः धनञ्जयदशरूपकस्य च साम्यमेव दृश्यते। रसविषये स्थूलदृष्ट्या यद्यपि वैलक्षण्यं वर्तत इवाभाति। परन्तु सूक्ष्मदृष्ट्या विवेचने कृते सति द्वयोरपि सिद्धान्तयोः समन्वयः सम्भवत्येव। तथाहि–धनञ्जयः शौर्यसौभाग्यवर्णनैः वीरश्रृङ्गारसूचनमावश्यकमित्युक्तवान्। विस्मयावहाद्भुतरसप्राधान्यमभिनवगुप्तः समाचख्यौ। भाणे अङ्गतया वी–

3 दशरूपकम् – तृ. प्र. 49–51.
4 भाणलास्याङ्गयोर्विषये यथास्थितं तत्त्वं विस्तरतो विचार्य विशदीकृतं डा० वे० राघवन् महोदयैः स्वीये श्रृङ्गारप्रकाशनिबन्धे पृ० 574–583।

In Public domain. Digitization Muthulakshmi Research Academy

रशृङ्गारयोः स्थितिर्भवति। अन्ततश्च अद्भुतरसप्राधान्यं लक्ष्यते। तत्कालीनभाणग्रन्थाः सर्वेऽपि एवमेव वर्तन्ते। वीरशृङ्गारसूचनं भवति तेषु, तथा अन्ते विटस्य प्रियासङ्गमोपायचातुर्यं विस्मयावहं च भवति। प्रत्येकस्मिन् भाणे वीररसस्य शृङ्गाररसस्य च सूचना आवश्यकी। अत एव शृङ्गारप्रधानेऽपि वेशसम्बन्धिनि इतिवृत्ते कुक्कुटयुद्धादिभिः वीरसूचनं क्रियते। द्वयोरपि रसयोः प्राधान्यं शृङ्गारस्यैव अर्वाचीनभाणेष्वपि समागतम्।

परन्त्वत्र आश्चर्यकरविषयः एको वर्तते। भरतः भाणप्रहसनयोः समानयोगक्षेमतां व्यक्तीचकार किल। अतः हास्यरसप्राधान्यमस्याप्यङ्गीकर्तव्यं खलु। परन्तु अभिनवगुप्तो वा धनञ्जयो वा कुत्रापि अस्य हास्यप्राधान्यं नोक्तवन्तौ। न केवलमेतत्। हास्यसूचनमपि नोक्तवन्तौ। परन्तु भाणसाहित्ये वीरशृङ्गाराभ्यां सह हास्यस्यापि सूचना सम्यक् वर्तते। न केवलमेतत्। किन्तु इतररसानामपि सूचना वर्तते। अतः अनुकूलरससूचना सर्वापि भवितुं योग्यैव, वीरशृङ्गारसूचना तु अवश्यं भाव्या इत्येवं यदि स्वीक्रियते तर्हि लक्षणं समञ्जसं भवति।

एवं हेमचन्द्रो[5]ऽपि स्वकीये काव्यानुशासने भरतोक्तमेवलक्षणमनुवदन् अस्य उपयोगम् एवं कथितवान् "बाहुल्येन पृथग्जनव्युत्पत्त्युपयोगिरूपकमिदम्। राजपुत्रादीनामपि शम्भलीवृत्तान्तो ज्ञेय एवावञ्चनार्थमिति स प्रयोज्य इत्यर्थः" इति। अनेन स्पष्टं ज्ञायते यत् यद्यपि अत्र इतिवृत्तं कल्पितमेवाथापि तात्कालिकवेशजनजीवनसम्बद्धमिति।

भावप्रकाशने[6] शारदातनयोऽपि दशरूपकलक्षणतुल्यं भाणलक्षणमुक्तवान्। तत्र कोहलादीनां मतान्यपि प्रदर्शितानि। कोहलमते भाणे प्रधानो

5 काव्यानुशासनम् – अध्यायः–8. पृ.–389.
6 भावप्रकाशनम् – अष्टमाधिकारः पृ.–245.

In Public domain. Digitization Muthulakshmi Research Academy

रसः शृङ्गारः । अयं कोहलः अभिनवगुप्तादपि पूर्वः । एवं शृङ्गारप्रकाशे भोजोऽपि धनञ्जयमनुसृत्यैव भाणलक्षणमुक्तवान् । रामचन्द्रगुणचन्द्रौ स्वकीये नाट्यदर्पणे यथापूर्वं भाणलक्षणमुक्तवन्तौ । वृत्तिविषये भारतीवृत्त्या एव प्रधानता दत्ता । परन्तु अङ्गतया कैशिकीसात्वतीवृत्ती अपि प्रयोज्ये इति वृत्तिविषये कश्चन नूतनः विचारः प्रकटीकृतः । तदनन्तरः विश्वनाथकविराजः स्वकीये साहित्यदर्पणे दशरूपकमनुसृत्य भाणं लक्षयन् "वृत्तिः प्रायेण भारती" इत्यवोचत् । सः स्वकीयवृत्त्यां प्रायेण भारती, क्वापि कैशिक्यपि वृत्तिर्भवति इति कैशिक्याः अपि भाणाङ्गतां स्वीचकार ।

ततः प्रतापरुद्रीय[7] नञ्जराजयशोभूषण[8] दशरूपकपद्धतिषु[9] दशरूपकानुसारिलक्षणं वर्तते । वृत्तिप्रशंसा नास्ति । रसार्णवसुधाकरे केवलं भारतीवृत्तिरैकैवेत्युक्तम् ।

अथ भाणान् परिशीलयामश्चेत् "सकलरसपोषोपजनकः" इति, "सरसमधुनिष्यन्दलहरी समुन्मेषद्वेषी" इति च भाणप्रशंसा दृश्यते । अनेन च शृङ्गारस्य प्राधान्यं, तेन कैशिकीवृत्तेः उपयोगश्च सूच्यते । अतः इदानीं भाणलक्षणम् एवं सिद्ध्यति –

1. विटो नायकः – एकः अङ्कः – एकं पात्रम्–एकस्मिन् अहनि जातं सर्वजनोपयोगिधूर्तविटादिसम्बन्धि इतिवृत्तं – सम्बोधनोक्तिप्रत्युक्तयः मुखनिर्वहणसन्धी–दश लास्याङ्गानि ।
2. रसः प्रधानः शृङ्गारः – इतररसानामपि सूचना–अन्ते अद्भुतरसः ।
3. वृत्तिः प्रधानतया भारती, कैशिकी च । अङ्गतया सात्वती । आरभटी अपि विरलतया प्रयोक्तुं शक्यैव, यतः भरतेन कैशिक्या एव नि–

---

7 प्रतापरुद्रीयम् – नाटकप्रकरणम् – पृ.–88 (1898 Madras.)

8 नञ्जराजयशोभूषणम् – पृ.–85 Gayakwad Oriental Series – 1930.

9 दशरूपकपद्धतिः – पृ.–21 Toronto University publication.

षेधात्।

1.2 भाणेषु लास्याङ्गप्रयोगः

सर्वेऽपि लाक्षणिकाः भाणेषु लास्याङ्गानां प्रयोगं सूचितवन्तः। लास्याङ्गानि च दश। तानि –

1. **गेयपदम्** – वीणादिवादनयुक्तं नायिकायाः ललितगीतं प्रियगुणकीर्तनपरम्।
2. **स्थितपाठ्यम्** – उपविष्टया नायिकया वाक्याभिनयपूर्वकं पठितम्। प्रायः प्राकृतभाषायां गीतम्।
3. **आसीनम्** – चिन्ताशोकसमन्विता नायिका स्वचिन्तां शोकं च भ्रूनेत्रादिविलासेन अभिनयति। अत्र पठनं नास्तीति भरतः। अत्र अभिनयस्यैव प्राधान्यम्।
4. **पुष्पगण्डिका पुष्पगन्धिका वा** – विविधवाद्यैः विविधतालैः युक्तं लास्यम्। आसीनं वाद्यरहितम्। पुष्पगण्डिका तु आतोद्यसहितमिति द्वयोः भेदः।
5. **प्रच्छेदकम्** – नायके अन्यस्त्रीसङ्गशङ्कया रोषाविष्टया नायिकया, कामोद्दीपकचन्द्रपादादिवशात् प्रियसङ्गमाय क्रियमाणं लास्यम्।
6. **त्रिमूढकम्** – सरससरलपदैः समवृत्तैश्च अलङ्कृतं, पुरुषभावाढ्यं नाट्यम्।
7. **सैन्धवकम्** – वीणावाद्यसहितं, देशभाषायुक्तं नाट्यम्।
8. **द्विमूढकम्** – मुखप्रतिमुखाभ्यां गीताङ्काभ्यां युक्तम्, चतुरस्रपदक्रमं, श्लिष्टभावयुतं, चित्रार्थाभिनयरूपम्। इयमेव व्याजचेष्टा इति केचित्।

In Public domain. Digitization Muthulakshmi Research Academy

9. **उत्तमोत्तमकम्** – विविधरससंश्रयविचित्रश्लोकबन्धयुक्तं हेलाहावभावविचित्रं, सोत्कण्ठवाक्ययुतम्।

10. **उक्तप्रत्युक्तम्** – साधिक्षेपवचोयुक्तं, प्रश्नोत्तररूपं, कोपप्रसादजनितम्।

डा. राघवन्[10] महोदयः स्वीयशृङ्गारप्रकाशविमर्शे लास्याङ्गविषयकचर्चायां भाणादिरूपकेषु लास्याङ्गानि मृग्यानीत्युक्तवान्। शारदातनयः भावप्रकाशे[11] "उत्तमोत्तमकं भाण्या मुक्तप्रत्युक्तमेव च" इति भाणे उत्तमोत्तमकम्, उक्तप्रत्युक्तमिति लास्याङ्गद्वयमेवेति सूचितवान्। अत्र "चान्यदुक्तप्रत्युक्तमेव च" इति पाठान्तरमपि दृश्यते। सिङ्गभूपालः रसार्णवसुधाकरे लास्याङ्गानि लक्षयित्वा उदाहरणानि शृङ्गारमञ्जर्यादिभाणेषु द्रष्टव्यानीत्युक्तवान्। शारदातनयोक्तदिशा उत्तमोत्तमकोक्तप्रत्युक्ते प्रायः सर्वेषु भाणेषु सङ्गमयितुं शक्ये। अन्यान्यपि लास्यङ्गानि कानिचित् कुत्रचित् प्रयुक्तानि[12] स्युः। परन्तु सर्वाणि सर्वत्र तु नोपलभ्यन्त एव। कर्पूरचरिते कानिचित् दृश्यन्ते तानि तत्रैव सोदाहरणं प्रदर्शयामः। सिङ्गभूपालस्य शृङ्गारमञ्जरीभाणस्तु नाममात्रावशिष्टः। अतः तत्र कति लास्याङ्गानि उदाहृतानीति परिशीलयितुं न शक्यम्।

1.3 विमर्शकानामभिप्रायाः

डी. के. एच्. द्विवेदी महोदयः स्वकीये नाट्यदर्पणविमर्शने भाणमधिकृत्य स्वाशयमेवं प्रकटितवान् – "सर्वेष्वपि रूपकेषु भाणे एकपात्रप्रयोज्यता प्रत्येकधर्मः। सम्भाषणात्मके रूपके अल्पाल्पतया पात्रद्वयस्यावश्यकत्वं वर्तते। परन्तु भाणे एका एव व्यक्तिः उक्तिप्रत्युक्तीः आचरति।

10 Bhoja's S ngāraprakāsa - P.576-586
11 भावप्रकाशः – अष्टमाधिकारः पृ.–245
12 संस्कृत में एकाङ्की रूपक – डा. वीरबाला शर्मा – पृ. 35

In Public domain. Digitization: Muthulakshmi Research Academy

एष च प्रायः कथाकथनतुल्यः भवति। एतादृशं कथाकथनमद्यापि भारतदेशग्रामेषु प्रचारे वर्तते इति"। एतादृशं भाणतत्त्वं दृष्ट्वा प्रो. डी. आर्. मन्कड् महाशयः संस्कृतरूपकाणां प्राथमिकावस्था भाण इत्यपि अभिप्रैति। "एतदेकाङ्कता, एकपात्रप्रयोज्यता च संस्कृतरूपकाणां प्राथमिकदशाज्ञापिका भवतु नाम। परन्तु एकेनैव पात्रेण विविधानां मनुजानां, संघटनानां, चरितानां च वर्णनम् एकात्युन्नतनाटकप्रक्रियानिदर्शकमित्यस्मिन् विषये नास्ति सन्देहः" इति। प्रो. कीथ् महोदयः "जनजीवनसम्बद्धपात्रेण, जनजीवनसम्बद्धेतिवृत्तेण च उत्तमं रूपकं भाण" इति प्रशंसितवान्। श्री एस्. के. डे. महाशयः अस्य सहजतां मौलिकतां च स्वीकृत्य एवं कथयति यत् "प्रहसनमिव अयमपि जनानां विनोदार्थमेव कल्पितः। पण्डितजनरञ्जकेभ्यः नाटकादिभ्यः अयं भिन्नः। तेषां रूपकाणां यादृशी नैतिकदृष्ट्या समुन्नतिः गौरवं च वर्तते, तादृशं गौरवमस्य नास्ती"ति। एफ्. डब्ल्यु. थामस् महोदयस्याभिप्रायस्तु पूर्वमेव दत्तः। वासुदेवशरण-अग्रवालमहोदयः अभिप्रैति यत् "भाणसाहित्यं सरलस्य व्यावहारिकसंस्कृतस्य प्रतिबिम्बभूतम्। भाणीया भाषा तात्कालिकजनव्यवहारादीन् व्यवहारोपयुक्ताभाणकादीन् ज्ञापयन्ती चमत्कारजनिका" इति।

अथ भाणरचनमितररूपकरचनापेक्षया सुलभमिति, अत एव अनेके भाणरचनं कृतवन्त इति च शृङ्गारशेखरभाणपीठिकायां श्री बी. रामराजु महोदयः कथितवान्। परन्तु विचार्यमाणे भाणरचनमेव। इतरेषु रूपकेषु अनेकपात्राणि वर्तन्ते, तेषां चित्रणं पृथक्तया कर्तुं शक्यते। अत्र तु रङ्गे एकमेव पात्रम्। तेनैव पात्रेण अन्यान्यपि पात्राणि प्रयोज्यानि, चित्रणीयानि च। अत्र वस्त्वैक्यतासंप्राप्तिः अतीव कठिना। एवं रञ्जकतापि श्रमसाध्या। भाणः कवेः सहजायाः प्रतिभायाः, वाक्चातुर्यस्य निकषोपलः। अत एव

In Public domain. Digitization Muthulakshmi Research Academy

अनेकैः भाणाः रचिता अपि केचन एव प्रथिताः ।

1.4 भाणपदव्युत्पत्तिः

1. एकमुखेनैव भण्यन्ते उक्तिमन्तः क्रियन्ते अप्रविष्टा अपि पात्रविशेषा यत्रेति भाणः (भरतनाट्यशास्त्रव्याख्यायाम् अभिनवगुप्तः)।
2. भारतीवृत्तिप्रधानत्वाद्भाणः (दशरूपकम्)।
3. भण्यते व्योमोक्त्या स्वपरवृत्तं प्रकाश्यत इति भाणः (साहित्यदर्पणम्)

भण धातोः कर्मणि घञि भाण इति भवति । आकाशभाषितेन यत्र स्वपरवृत्तं प्रकाश्यते स भाणः । अत्र वाग्व्यापार एव प्रधानः । अत एव भारतीवृत्तिप्रधानो भाणः इति दशरूपककारः व्युत्पत्तिं प्रदर्शितवान्। सन्दर्भानुसारं भाणोपयुक्तवृत्तिं परिशीलयामः ।

1.5 वृत्तिः

वृत्तयः चतस्रः कैशिकी, आरभटी, सात्वती, भारती च। तत्र भाणेषु भारतीवृत्तिः प्रधानेत्युक्तत्वात् प्रथमं भारतीं पश्यामः ।

1.5.1 भारतीवृत्तिः

भरतशास्त्रप्रवीणाः सूत्रधाराः काव्यार्थसूचकैः श्लोकैः प्रस्तावनां कृत्वा भारतीवृत्तिं समाश्रित्य ऋतुवर्णनमाचरन्तीति शारदातनयः स्वकीये भावप्रकाशने भारतीवृत्तेः लक्षणमेवमवोचत्–

भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयः ।

या वाक्प्रधाना पुरुषप्रयोज्या स्त्रीवर्जिता संस्कृतपाठ्ययुक्ता ।

स्वनामधेयैः पुरुषैः प्रयोज्या सा भारतीनाम भवेत्तु वृत्तिः ॥

In Public domain. Digitization Muthulakshmi Research Academy

नटेन स्वीक्रियमाणः संस्कृतबहुलः वाग्व्यापार एव भारतीवृत्तिः। अत्र मुख्यतया वाच एव च प्राधान्यम्। पुरुषा एवात्र अधिकृताः। पाठ्यं संस्कृतमेव। भरतनामभिः पुरुषैः प्रयुज्यमाना भारती इत्यभिधीयते।

"ईषत्प्रौढार्थसंदर्भा भारती वृत्तिरिष्यते" इति प्रतापरुद्रीये उक्तं लक्षणम्। ईषत्प्रौढार्थसन्दर्भा नाम हास्याद्भुतादिरससन्दर्भाः। अत एवाभिनवगुप्तः भाणमद्भुतरसप्रधानमाख्यातवान्। परगतशृङ्गारहावभावादीनां वर्णनं नटेनैव क्रियते इत्यतः शृङ्गारसूचनामात्रं भवति, नतु तेषां यथावत् प्रदर्शनम्। अत एव कैशिकी, निषिद्धा प्राचीनैः। परन्तु अर्वाचीनाः कैशिकीं, सात्वतीं च अङ्गीचक्रुः। केषुचिद्भाणेषु प्राकृतश्लोकानुवादादिकमपि वर्तते। प्रसङ्गवशेन कैशिकीमधिकृत्यापि किञ्चिद् उच्यते।

1.5.2 कैशिकी वृत्तिः

"अत्यन्तसुकुमारार्थसन्दर्भा कैशीकी मता" इति विद्यानाथः कैशिकीमलक्षयत्। शृङ्गारकरुणरससन्दर्भौ अत्यन्तसुकुमारौ। अतः तत्र कैशिकी एवोपयोक्तव्या। शृङ्गारविषयकगानस्य, नाट्यस्य, प्रेमसन्दर्भेषु, स्त्रीपुरुषयोश्चोपयुक्ता कैशिकी। प्रेम, दाक्षिण्यं, विलासः, विभ्रमः, परिहासः, नर्मोक्तयः, वेषभूषादिनटनम् इत्येतादृशेषु विषयेषु उपयुक्ता कैशिक्येव। प्रेम्णः विविधरूपाणां, विविधभावानां चाविष्कारः कैशिक्या एव भवति। अतः अर्वाचीनैः शृङ्गारप्रधानानां भाणानां कृते एषापि निर्दिष्टा। कोहलः भाणेषु कैशिकीमङ्गीकृतवान्। अन्ये द्वे वृत्ती अपि तत्र अङ्गतया भवितुमर्हतः। यतः वीरसूचनाय आरभट्याः उपयोगः आवश्यक एव।

1.6 रसः

पूर्वोक्तलाक्षणिकानामभिप्रायपरिशीलनेन भाणरसविषये विभिन्नाः अभिप्रायाः लक्ष्यन्ते। तत्र कोहलः हास्यरसप्राधान्यमुक्तवान्। अभिनव-

In Public domain. Digitization Muthulakshmi Research Academy

गुप्तस्तु भाणस्य विस्मयप्राधान्यमाश्रित्य अद्भुतो रसः भाणेषु भवेदित्युक्तवान्। धनञ्जयस्तु वीरशृङ्गाररसूचनं भवेदित्युक्तवान्। परन्तु प्रधानः रसः क इति स्पष्टं नोक्तवान्। अन्ये सर्वेऽपि प्रायः धनञ्जयमेवानुसृतवन्तौ। धूर्तविटादिसम्बन्धीतिवृत्तमिति भरतेनैवोक्तत्वात् इतिवृत्तं वेशवाटीसम्बद्धमेव भवतीति शृङ्गाररसूचनं भरतेनापि अङ्गीकृतमेव। वेशवाटिकायां नागरिकाः वेश्याभिस्सह उद्यानविहार–आपानकगोष्ठी–पणबन्धप्रधानविनोदेषु आत्मानं विनोदयन्तीति तत्र विनोदेषु कुक्कुटमेषयुद्धादिकमपि वेशसंस्कृत्यङ्गमिति कृत्वा वीरसूचनमपि अल्पमात्रया अङ्गीकृतमेव। एतदेवाभिप्रेत्य धनञ्जयः वीरशृङ्गाररसूचनमुक्तवान्।

भाणस्य एकपात्रप्रयोज्यत्वात् भारतीवृत्तिप्रधानत्वाच्च वाग्व्यापार एव प्रधान इति श्रव्यतैव प्रधाना भवतीति, श्रव्यकाव्यसादृश्यमेव भाणस्य। अतः अत्र नायिकानायकयोः हावभावादीनां विलासचेष्टानां च प्रदर्शनस्य अवकाशो न भवति। अत एव धनञ्जयः सूचयेदित्युक्तवान् न तु दर्शयेदिति। अतः अत्र रसः शृङ्गार इति कथने तात्पर्यं किमिति पर्यालोचनीयम्।

अत्रेतिवृत्तस्य एकाहसम्बद्धत्वात् एकस्मिन्नेवाहनि रसनिर्वहणमसाध्यमेव। किञ्चात्र नायिका वेश्येति कृत्वा तस्या प्रेम कृत्रिममिति, तत्सम्बद्धशृङ्गारस्य रसत्वमपि न घटते। अतः अत्र रसाभासलक्षणमेव घटते इति केचित्। रसाभासोऽपि आस्वादार्ह एव। यतोऽत्र एकत्रैवानुरागः, योषितो बहुसक्तिः इति द्विविधः रसाभासः दृश्यते। अतः भाणेषु प्रस्तावनायां यद्यपि कविभिः शृङ्गारस्य प्राधान्यं बहुधा सूचितं, तथापि तद्रसाभासरूपमेवेति तेषामाशयः। अतः विटस्य तत्तत्कार्यसाधनप्रकारः य एवात्र प्रधानेतिवृत्तभूतः सः यत्र विस्मयावहः तत्र अद्भुतरसस्य प्रतीतिः वक्तव्या। प्राचीनभाणेषु एतच्चानुभूयते। पारदारिकेतिवृत्तेष्वपि एतदनुभूयत एव।

In Public domain. Digitization Muthulakshmi Research Academy

अत्र पद्मप्राभृतके द्वयोरपि परस्परमकृत्रिममेव प्रेम इति शृङ्गारः प्रधानतया सूच्यते, उभयाभिसारिकायामपि तथा। परन्तु कर्पूरचरिते तु अद्भुतरस-स्यैव प्राधान्यं सम्यगनुभूयते। एवं पञ्चबाणभाणमुकुन्दानन्दादिष्वपि पा-रदारिकेतिवृत्तेषु। अन्यत्र तु विटस्य तत्तद्व्यक्तिविशेषैः सह सल्लापः न-र्मगर्भं सम्भाषणं, तेषां गूढपल्लवितानामाविष्कारश्च विस्मयावहानि इति कथञ्चित् विस्मयप्राधान्यं वक्तव्यम्।

1.7 नायकः

धूर्तविटो नायकः। अयं द्यूतनिपुणश्च। कविरिव विषयवर्णनसमर्थः। स्वभावमधुरमस्य वर्तनम्। हास्योक्तिगुम्फितसम्भाषणचतुरः। सुरूपी। द-क्षिणः। वाग्मी। युवतीजनाकर्षणकुशलः। धीरललितः। वेश्यानां कुला-चारोपदेष्टा। वेश्याविषयकव्यवहारनिपुणः। वियोगव्यथाकुलितयोः युव-तीयुवकयोः संघटनचतुरः। एतादृशस्य विटस्य वेषः देशोपदेशे एवमुक्तः

उदञ्चितकचः किञ्चिच्चुबुकश्मश्रुवेष्टने।
दिने देवगृहाधीशवदनं वीक्षते विटः॥

कचानूर्ध्वमाबध्य, किञ्चिच्चुबुकश्मश्रु च दधानः, शिरसः किमपि वेष्टनं दधानो धनिकानां राज्ञां च प्रेमव्यवहारादिकं पश्यन् धनिकान् राज्ञश्च सेवते। एतादृशस्य विटस्य कर्तव्यमधिकृत्य श्यामिलकः स्वकीये पा-दताडितके एवं कथयति-

स्वैः प्राणैरपि विद्विषः प्रणयिनामापत्सु यो रक्षिता
यस्यार्तौ भवति स्व एव शरणं खड्गद्वितीयो भुजः।
संघर्षात् मदनातुरो मृगयते यं वारमुख्यो जनः
स ज्ञेयो विट इत्यपावृतधनो यो नित्यमेवार्थिषु॥

In Public domain. Digitization Muthulakshmi Research Academy

स्वप्राणानपि दत्वा आपद्भ्यः रक्षति। तस्य तु स्वकीयः खड्गद्वितीयः भुज एव शरणम्। अतः अयमतीवशूरः धीरश्च भवति। अमुमेव मदनातुरो वेश्याजनः अन्वेषयति। अयं प्रेयसीप्रेमिकयोः दूतकार्यमपि करोति। अयं दयाविष्टचेताः भवति। अस्य धनं तु सर्वैरपि उपभुक्तप्रायं भवति। अमुमेवार्थम् अन्यः श्लोकोऽपि कथयति तत्रत्य एव–

चरणकमलयुग्मैरर्चितं सुन्दरीणां
समुकुटमिव तुष्टया यो बिभर्त्युत्तमाङ्गम्।
स विट इति विटज्ञैः कीर्त्यते यस्य चार्थान्
सलिलमिव तृषार्ताः पाणियुग्मैर्हरन्ति॥

रससदनभाणेऽपि विट आत्मानम् एवं प्रथयति–"जानाति किं न भवती रसिकेषु मुख्यमन्योपकारकरणे च सदारतं माम्" इति। एवं शृङ्गारसुधाकरभाणे "सुहृदर्थविधानबद्धकक्ष्ये मयि संजीवति माकृथा विषादमि"ति, भास्करकविरचिते शृङ्गारतिलके "यूनामनुरागजुषां संघटने पटुतरोऽस्मि वेत्सि न किम्" इति च। न केवलमेतत्। अयं प्रियासङ्गमसङ्घटनविषये प्रतिज्ञामपि करोति। "यद्यहं न युवयोः संघटनमद्य करोमि तर्हि श्वः सूर्यो दक्षिणे उदियात्" इत्येतादृश्यः प्रतिज्ञाः अपि तेषु तेषु भाणेषु समुपलभ्यन्ते। अयं तु दक्षिणनायक इव नटनं करोति। परन्तु हृदये शठत्वमेव वर्तते। अत एव शठत्वं बहुकार्यसाधकमिति धूर्तविटसंवादे एवमुक्तम्–

नीचैर्भावः प्रियवचनता क्षमा नित्यमप्रमादश्च।
शाठ्यादुत्पद्यन्ते केनैतद्दूष्यते लोके॥ इति।

अपकृष्टता, मधुरभाषणम्, सहनशीलता, प्रमादाभावश्च शाठ्यादेव भवन्तीति उक्तम्। एवं अन्यत्रापि–

शाठ्यमनृतं मदो मात्सर्यमवमतं तथा प्रणयकोपः।
मदनस्य योनयः किल विद्यन्ते नैव ते स्वर्गे॥ (धू० वि० सं०)

In Public domain. Digitization: Muthulakshmi Research Academy

इति शाठ्यं मन्मथोद्दीपकेषु परिगणितम्। क्वचित् साक्षाद्यथार्थत्वेन श-ठोऽपि भवति। तादृशमेव विटतत्त्वं रामभद्रदीक्षितः स्वकीये शृङ्गारतिल-कभाणे एवं व्याचख्यौ–

बहिस्तु मधुराकारमन्तः तिक्तरसं पुनः।
विटस्य हृदयं मन्ये विषद्रुमफलोपमम् ॥ इति।

विटहृदयं स्थूलतया मधुरतयैव दृश्यते। परन्तु अन्तः हालाहलमेव भवति। एष विटः द्यूतप्रियोऽपि। धूर्तविटसंवादे विटस्य "नमोऽस्तु द्यूताय। एक-शाटिकामात्रावशिष्टो हि नः प्रच्छदपटः" इति वाक्यं तस्य द्यूतप्रियत्वमपि व्यक्तीकरोति। अयं च नाटकीयविटेभ्यः भिन्नः। नाटकविटान् एते नी-चभावेन पश्यन्ति। पद्मप्राभृतके विटः भावजरद्गवं पुराणनाटकविट इति अवहेलनं करोति। अयं साङ्घिकदुराचाराणां शत्रुः। निगूढान् दुराचारान् बहिष्कृत्य साङ्घिकान् दोषान् अयं सर्वेभ्यो ज्ञापयति।

जलधरनीलालेपः तडित्समालभनविह्वलद्गात्रः।
विकसितकुटजनिवसनो विटो यथा भाति घनसमयः ॥

इति धूर्तविटसंवादे घनसमयवर्णनेन विटः नीलालेपवान्, विद्युदिव प्र-काशमानशरीरः स्वच्छवस्त्रधारी इति च ज्ञायते। वृद्धा विटाः नष्टां शक्तिं पुनराधातुं किमपि रसायनं स्वीकुर्वन्ति स्म। अयं विटः वेश्याभिः वे-श्याजननीभिश्च सह कलहं करोति। यां कामयत्ययं, तां बलात्कारेण नीत्वा अनुभवति च। क्वचिच्चायं वेश्याजनन्यादिभ्यो भीतः पलायते स्म। विटाः सर्वेऽपि एकस्मिन् मण्डपे स्थित्वा द्यूतक्रीडां, मद्यपानं वा समाचरन्ति स्म। श्यामिलकः पादताडितके विटचरितमेवं प्रकाशयति–

दिवसमखिलं कृत्वा वादं सह व्यवहारिभिः
दिवसविगमे भुक्त्वा भोज्यं सुहृद्भवने क्वचित्।
निशि च रमसे वेशस्त्रीभिः क्षिपस्यपि चायुधं

In Public domain. Digitization Muthulakshmi Research Academy

जलमपि च ते नास्त्यावासे तथापि च कत्थसे ॥ (पा0 ता0 15)

दातृभिः, प्रतिग्रहीतृभिः स्वतुल्यैः दिवा बादं कुर्वन्, रात्रौ एकस्मिन् मित्रगृहे भुक्त्वा, वेशस्त्रीभिः सह रात्रौ रममाणः, आवश्यकत्वे आयुधमपि उपयुज्य स्वकार्यं साधयन्, गृहे स्वकीयस्य वस्तुनः अभावेऽपि धनी इव विकत्थमानः विटः स्वजीवनं यापयति इति । एतादृशविटश्रेण्यां राजानः, महाराजाः, वैद्याः, मन्त्रिणः, सङ्गीतविद्वांसः इत्यादयः अनेके वर्तन्ते। तथा च न हि विटत्वं एकनीचजात्याश्रितमिति वक्तुं शक्यते। अयं पीटमर्दविदूषकादिसाहाय्येन वेश्यानां नागरिकानां च सन्धिं विदधाति। स कदाचित् नायकस्य दूतोऽपि भवति। नायको विटद्वारा स्वप्रियां सङ्केतस्थानमानायति। एतादृशो विटो भरतनाट्यशास्त्रे एवं लक्षितः—

यो हि सर्वकलोपेतः सर्वशिल्पविचक्षणः ।
स्त्रीचित्तग्रहणाभिज्ञो वैशिकः स भवेत् पुमान् ॥ इति ।

सर्वकलाभिज्ञः, सर्वशिल्पाभिज्ञः, स्त्रीचित्ताकर्षणनिपुणः, वैशिकः (विटः) इत्युक्त्वा तस्यावश्यकान् गुणान् एवं परिगणितवान् भरतः। ते च गुणाः शास्त्रज्ञानम्, शिल्पनैपुण्यम्, सौन्दर्यं, प्रियभाषिता, चतुरता, शुचित्वम्, कामोपचारचातुर्यम्, दाक्षिण्यं, देशकालविज्ञानम्, अदीनवाक्यत्वम्, स्मितवत्वम्, वाग्मिता, कार्यसामर्थ्यम्, प्रियंवदता, स्त्रीसंमोहनम्, दृढस्मृतिः, मानः, चित्रो वाग्व्यापारः इत्यादि त्रयस्त्रिंशत्। शृङ्गारतिलकदशरूपकादिषु "एकविद्यो विटः स्मृतः" इति एककलाकुशलः विटत्वेन अभिहितः। साहित्यदर्पणे विश्वनाथकविराजः—

संभोगहीनसंपद्विटस्तु धूर्तः कालैकदेशज्ञः ।
वेशोपचारकुशलो वाग्मी मधुरोऽथ बहुमतो गोष्ठ्याम् ॥ इति

निर्धनताकारणेन संभोगहीनः, धूर्तः, देशकालाभिज्ञः, वेशोपचारचतुरः, वाचालः, मधुरस्वभावः, सभासु गौरवभाजनभूतो विटः इति विटलक्ष-

णमुक्तवान्। कामसूत्र (1-4-45) व्याख्याने "भुक्तविभवस्तु गुणवान् सकलत्रो वेशे गोष्ठ्यां च बहुमतस्तदुपजीवी विटः" इति ऐश्वर्यहीनः, गुणवान्, सभार्यः, वेशे गोष्ठीषु च अभिमतः, वेशोपचारेण जीवननिर्वाहकः विट इति लक्षणमुक्तम्। उपरिनिर्दिष्टलक्षणपर्यालोचनेन ऐश्वर्यहीनः कामुकः विट इति ज्ञायते। अस्मिन् कामुकता-कला-मैत्री-धूर्तता-दाक्षिण्य-मधुरस्वभावानामपूर्वं सम्मिश्रणं लक्ष्यते। एतदेव सम्मिश्रणं तस्य जीवनाधारो भवति। एतच्च प्राचीनकालिकविटलक्षणम्। परन्तु मध्यंकाले विटशब्दार्थः किञ्चिदिव विपरिणतः। मध्यकालीनसाहित्ये एष शब्दः वेशवाटिकायां सञ्चरमाणान् कामुकधूर्तान् अभिधत्ते। कुट्टिनीमते एतादृशविटाः वर्णिताः। विटाः वारयुवतीः सम्यग् अनुभूय देयं धनमदत्त्वैव पलायन्ते स्म। यदि सः वेश्याभिः तदनन्तरं कदाचिदुपलभ्येत तर्हि ताः तर्जयित्वा देयं धनादिकं स्वीकुर्वन्ति स्म। अयं विटो वेश्या आवर्जयितुं गीतं गायन् वेशवाटे सञ्चरति। धनिकस्य वेश्यासमागमं विधत्ते। मध्यकालविटस्य नीचकामुकत्वमधिकृत्य क्षेमेन्द्रस्य कलाविलासे, देशोपदेशे, नर्ममालायां च स्पष्टमुक्तम्। तत्र कलाविलासे-

> भक्षितनिजबहुविभवाः परविभवक्षपणदीक्षिताः पश्चात् ।
> अनिशं वेश्यावेशस्तुतिमुखरमुखा विटाश्चिन्त्याः ।। इति ।

प्रथमं स्वकीयं धनं नाशयित्वा, ततः परवित्तापहरणदीक्षितः, सर्वदा वेशवाटिकास्तुतिपरश्च दुष्टः विटः भवतीति उक्तम्। देशोपदेशनर्ममालयोः तस्य कौटिल्य - भोगासक्ति - परस्त्रीसङ्गेच्छा - चापल्य - वेश्यातिरस्कारभाजनत्व - धनवन्नटनादिविषयाणां वर्णनं वर्तते। ग्रीष्मसमये उष्णकराणि, शीतकाले शैत्यकराणि वस्त्राणि स परिधत्ते इति, समये अदृश्यो भवतीति, स्वकीयमिथ्याधिक्यतावादी, असत्यभाषी, धूर्तश्च भवतीति तत्रैवोक्तम्।

In Public domain. Digitization Muthulakshmi Research Academy

एवं विटानां श्रेणीद्वयमुपलभ्यते किल। एते द्विविधा अपि विटा अस्माकं भाणवाङ्मये संलक्ष्यन्ते। प्राचीनेषु चतुर्षु भाणेषु, केरलीयेषु च भाणेषु प्रथमश्रेणीविटाः नायकीभूताः स्वमित्राणां प्रियासङ्गमाय प्रयतन्ते। शिष्टेषु दक्षिणदेशीयभाणेषु सर्वत्र नायको विटः स्वलाभपर एव। न तु यथाकथमपि परोपकारी। अयं द्वितीयश्रेण्यां समागच्छति। वसन्ततिलकमारभ्य ततोऽर्वाचीनेषु भाणेषु सर्वत्र अयमेव वर्तते। परन्तु भरतेन प्रोक्तेषु त्रयस्त्रिंशद्गुणेषु मुख्या गुणा अपि केचन अस्य सन्ति। कामुकत्वं, धूर्तता, असत्यभाषणं, परस्त्रीव्यामोहः, चौर्यं, द्यूतम् इत्यादिगुणा अधिकतया वर्तन्ते। कालमनुसृत्य विटशब्दार्थे जातः परिणामः भाणवाङ्मयेऽप्यासीदिति अनेन स्पष्टं भवति। एतादृशमेव विटं नायकत्वेन प्रधानपात्ररूपेण वा स्वीकृत्य रचितानां भाणानाम् इतिवृत्तं वेशवाटिकासम्बद्धं, जारिणीसंम्बद्धं, शृङ्गारविषयकं च कुतो न भवति?

1.8 नायिका

भाणस्यैकपात्रप्रयोज्यत्वेन नायिकात्र रङ्गस्थले न दृश्यते। अथापि नायकस्य, तत्सहायकस्य विटस्य वा प्रयासः यामभिवर्तते सैवात्र नायिकेति परिगण्यते। प्राचीनेषु भाणेषु वेश्या एव नायिका। सापि न सामान्या वेश्या। किन्तु सम्मान्या गणिकेति प्रथिता। शीलरूपगुणयुक्ता वेश्या कलाकुशला गणिका भवति। अस्याः समाजे तदा विशिष्टं स्थानं आसीत्। प्रभुभिः विद्वद्वरिष्ठैश्च प्रशस्यमाना, कलोपदेशं कुर्वन्ती, स्वीयं कलाकौशलं तदा तदा प्रदर्श्य समाजे सर्वैरप्यादरणीयतामभजत्। एषा च राजोपचारकुशला, चतुष्षष्टिकलाभिज्ञा मृदुभाषिणी, चतुरस्वभावा च। अस्याः समाजे अत्युन्नतवर्गेण सह सम्बन्धः आसीत्। एतादृग्वेश्याभिस्सह प्राचीनाः नागरिकाः वनविहारादिकं चरन्ति स्म। तच्च विहारादिकं पूर्वपुण्यचयेनैव लब्धमिति तेषां विश्वासः आसीत्। उभयाभिसारिकायां ना-

In Public domain. Digitization Muthulakshmi Research Academy

रायणदत्ता, पद्मप्राभृतके देवसेना, पादताडितके मदनसेनिका, वसन्त-तिलके वासन्तिका इत्याद्याः नायिकाः सर्वाः वेश्याः एव। भरतनाट्यशास्त्रे (35/ 60-62), कामसूत्रेषु च वेश्या स्तुता। यतः सा राजोपचार-कुशला, अतः सा राड्भिः, तत्प्रकृतिवर्गेण, पण्डितैर्नागरिकैश्च समादृता आसीत्। वेश्यासङ्गमाय तदा सर्वे नागरिकाः उत्सुकाः आसन्। एतादृग्वेश्यासङ्गः परदारासङ्ग इव न तथा निषिद्ध इति धूर्तविटसंवादे "यथा च परस्त्रियो न गम्या इति प्रतिकण्ठमभिहितं न तथा वेश्याः" इति वचनेन ज्ञायते।

क्रमशः वेश्यायाः औत्कृष्ट्यं क्षत्युन्मुखमासीत्। कुट्टिनीमत-देशोपदेश-नर्ममालादिपरिशीलनेन सुस्पष्टमिदमवगम्यत एव। गुप्तयुगानन्तरं ताः स्व-जीविकायै स्वभावं पर्यवर्तयन्। परन्त्वस्माकमयं देशः यावत् कालं राड्भिः पालितः तावत्पर्यन्तं तासां स्थितिः न तावच्छोचनीया आसीत्। तासु काश्चिद्वा स्वोत्कर्षं संरक्षयितुं प्रायतन्त। परन्तु सप्तदशशतकमारभ्य देशोऽयं विदेशीयोपद्रवैः पीडितः आसीत्। अतः राजानः तत्प्रकृतिवर्गो वा एताः न यथापूर्वं सभाजयामासुः। तस्मादेताः धनपिशाचाः, नीचाश्च भूत्वा समाजे अधमां स्थितिमाजग्मुः। काले चेदानीन्तने प्रायः वेश्याः धूर्तैः प्रलोभिताः, चारित्रभ्रंशात् स्वजातिभ्रष्टाः, गत्यन्तराभावात् स्वीकृतवेश्यावृत्तयः कुलस्त्रिय एव। तस्मादेतासु धनग्रहणाभिलाषैव दृश्यते, न कलाकुशलता। काले चास्मिन् विटाः कुलस्त्रियः भ्रष्टाः कृत्वा, वेशवीथ्यां समारोप्य पुनः तासां मुखमपि न पश्यन्ति। पश्यत एतास्वन्यतमा मुकुन्दानन्दे कथं स्वप्रियमुपालभते-

वल्लरीषु मधुपेन वल्गता पद्मिनी न परिभुज्यते यदि।
किं फलं कितव सौरभप्रियः कर्दमादपि कथञ्चिदुत्थितेः॥ (मु.143)

In Public domain. Digitization Muthulakshmi Research Academy

तस्मात् सप्तदशशतकमध्यादारभ्योत्पन्नानां भाणानामितिवृत्तं प्रायः पारदारिकमेव। नायिकाप्यन्यैव। विटानां परदारेषु यादृशी आसक्तिः तादृशी नासीत् वेश्यासु। तद्वदति भुजङ्गशेखरो मुकुन्दानन्दे–"किं गणिकागणं गणयति साधारणो भुजङ्ग इव भुजङ्गशेखरः" इति।

अत्र समालोचनीयमस्त्यन्यदपि। कुतः प्राचीनकाले नागरिकाः वेश्यासङ्गत्यै परितप्ताः आसन् इति। सम्भाव्यते हि तदा कुलस्त्रीषु कामुकप्रवृत्तेरभावः। ताः तदा तदा प्रजार्थमेव भर्तृसङ्गतिं विन्दन्ते स्म। अलङ्कारादि नैपुण्यं, कलाकुशलता च तासु मृग्ये। एतदेव कथयति ईश्वरदत्तः धूर्तविटसंवादे–

जात्यन्धां सुरतेषु दीनवदनाम् अन्तर्मुखाभाषिणीम्
हृष्टस्यापि जनस्य शोकजननीं लज्जापटेनावृताम् ।
निर्व्याजं स्वयमप्यदृष्टजघनां स्त्रीरूपबद्धां पशुं
कर्तव्यं खलु नैव भोः कुलवधूकारां प्रवेष्टुं मनः ॥

तत्रैव वेश्यासङ्गोपीत्थं प्रशंसितः –

काञ्चीतूर्यमसक्तपीनजघनं विस्रम्भदत्ताधरं
श्वासोत्कम्पितनर्तितस्तनतटं भ्रूभेदजिह्मेक्षणम् ।
सीत्कारानुविषक्तरोमपुलकं कालेन कोपाञ्चितं
वेश्यानां क इहास्ति भो मदवशादाज्ञारतं विस्मरेत् ॥

वेश्यायाः कुलस्त्रियश्च भेदोऽपीत्थं प्रदर्शितस्तत्रैव–

वेश्याजघनरथस्थः कुलनारीं कस्सचेतनो गच्छेत् ।
नहि रथमतीत्य कश्चित् गोयानेन व्रजेत् पुरुषः ॥ इति।

एतादृक्षु कुलस्त्रीषु क्रमशः स्वभावे विपरिणतिरागता। ताः अपि स्वगार्हस्थ्यजीवनं सुखमयं कर्तुं प्रायतन्त। स्वभर्तारः यथा वेश्यालम्पटाः न भवेयुः, यथा च स्वधनकनकवस्तुवाहनादिकं वेश्याधीनं न स्यात् तथा

In Public domain. Digitization Muthulakshmi Research Academy

कर्तुम् अलङ्कारादिकलासु नैपुण्यमाप्तुं प्रायतन्त। एतादृशो विपरिणामः चतुर्दशपञ्चदशशतकयोः उत्पन्नेषु भाणेषु द्रष्टुं शक्यते। तदारभ्यैव विटेषु परदाराग्रहणासक्तिः अङ्कुरिता। तदा परस्त्रीरतं वेश्यारताख्यमृष्टान्नभोजने उपदंशप्रायमासीत्। उक्तञ्च अष्टभाषाबहिरी गोपालरायेण शृङ्गारमञ्जरीभाणे

तत्तादृग्विविधोपचारभरितं त्यक्तत्रपावग्रहं
पण्यस्त्रीषु रतं, तदप्यनुभवन्, धन्यो न किं काङ्क्षति।
स्निग्धं मृष्टमुदारचित्ररसमप्यन्नं ग्रसन्नन्तरे
किञ्चित्किञ्चिदिवोपदंशशकलं प्रायः परस्त्रीरतम् ॥ इति।

अत एव वेशवाटीसम्बद्धेतिवृत्तेष्वपि वसन्ततिलकादिषु पारदारिकवृत्तान्ताः दृश्यन्ते। यदा च वेश्याः सर्वथा भ्रष्टाः, धनैकार्जनरताश्च जाताः, वेश्यामातरः अपि असाध्याः जाताः, तदैव विटानामपि प्रवृत्तिर्विपरिणता। तदारभ्यैव विटाः कुट्टिन्यादीनां साहाय्येन परदारान् प्राप्तुं प्रायतन्त। मुकुन्दानन्दे एषा स्थितिः स्पष्टमभिहिता। उक्तञ्च तत्र "पणाशयैव परिभूयते गणिकाजनगैरवम्

अशङ्कितनखक्षतं पुनरलज्जमुक्ताधरं
प्रवृत्तकरणक्रमं प्रचुरचुम्बनाडम्बरम्।
सशब्दकरताडनं सपरिहाससम्भाषणं
न कस्य सुरतं मनो हरति वारवामभ्रुवाम्" ॥ इति।

वेश्यारतं कृत्रिमम्। धनार्जनमेव वेश्यायाः प्रवृत्तौ निमित्तम्। परदाराणां न तथा। अन्यदपि कारणं यत् विटानां प्रलोभने परदाराः यथा पतन्ति न तथा कदापि वेश्याः। यतस्ता अपि प्रलोभनचतुराः। अतश्च विटानां धनादिव्ययं विना साध्ये नैसर्गिकरसयुते परदारासङ्गे एव प्रवृत्तिर्जाता। तदेव स्पष्टं कथयति तत्रैव–

किमालापः स्वैरं क्षणमपि किमेकत्र वसतिः

In Public domain. Digitization Muthulakshmi Research Academy

किमाश्लेषो गाढं किमु हृदयतृप्तिः किमथवा ।
रतान्ते विश्रान्तिः किमिह परकीयासु घटते
तदप्याश्चर्यं नः परिपतति तास्वेव हृदयम् ॥

रसोल्लासभाणे श्रीनिवासार्योऽपि पारदारिके स्वप्रवृत्तिविषये विटानां चिन्तनप्रकारमित्थं वर्णयति– अकुशलापि कुलस्त्री वारविलासिनीतोऽपि सुखदायिनी। यद्यपि सा चाटूनि न वक्ति, परेङ्गितानि न वेत्ति, गुरुजनभयात् विशृङ्खलापि न, धृष्टापि न, बन्धकरणेषु नैव कुशला, विभ्रमनिबन्धविधौ दक्षापि न, अथापि –

हृदयमनितरस्थं प्रेमपूर्णं, विलासः
सहजहृदयहारी, मुग्धता कापि मुग्धा ।
अबहुजनविभक्तग्लानिरर्थानि रक्षा
कुलयुवतिषु सन्ति श्लाघनीया गुणाष्षट् ।। इति ।

अस्मिन् समये प्रलोभनेन परदाराः विटेषु नितरामासक्ताः सर्वमपि शीलकुलधनादिकं त्यक्त्वा विटैस्सह रन्तु प्रस्थिताः स्म । ताः विटार्थं प्राणानपि त्यजन्ति स्म । तदुक्तं मुकुन्दानन्दे–

शीलं नाद्रियते कुलं न मनुते नैवावरुन्धे गुरून्
नारीणां कुलदेवता किल पतिस्तञ्चाप्यहो मुञ्चति ।
किं ब्रूमः परयोषितः पुनरसावन्योऽनुरागक्रमः
स्वप्राणानपि जातुचिन्नगणयत्येषा विटार्थे यतः ॥ इति ।

एवं हि सिद्धं नायिकाद्वैविध्यम् । प्राचीनेषु केरलीयेषु च भाणेषु सप्तदशशतकपर्यन्तं रचितेषु प्रायशः वेश्या एव नायिका । तदनन्तरेषु प्रसिद्धेषु अनेकेषु नायिका अन्यैव । अर्वाचीनेष्वपि केषुचित् वेश्यापि नायिकास्ति, अथापि ते नात्यन्तं प्रसिद्धाः । केषुचित्स्वीयापि नायिकास्ति ।

In Public domain. Digitization Muthulakshmi Research Academy

1.9 सहायकाः

प्राचीनेषु भाणेषु नायिकानायकयोः सङ्गमाय भाणनायकः विट एव प्रयत्नमकरोत्। तस्य सहायाः कथिनी, परिव्राजिका (लिङ्गिनी) नटी (रङ्गोपजीवा) सखी, दासी, कुमारी, पाषण्डिनी, ईक्षणिका, चेटी, चेटः, इत्यादयोऽवर्तन्त। कामसूत्रेषु 1–4 पादे पीठमर्दविदूषकादयोऽपि सहायकत्वेनोक्ताः। एते च सहायकाः दूतकार्यं कुर्वन्ति स्म। एते च मधुरवचस्काः, चतुराः, समयज्ञाः, समुचितोपायप्रदर्शकाश्च। एते कामुकान् प्रोत्साहयन्ति। तेषां गुणान् स्तुवन्ति। सत्यं वृत्तान्तं ज्ञापयन्ति गोपयन्ति च। कुलधनरक्षां कुर्वन्तः कामुकयोः परस्परं वार्ताः प्रेषयन्ति। उत्सवेषु, रात्रिषु, उद्यानेषु, आप्तमित्रगृहेषु, शून्यगृहेषु, शिथिलमन्दिरादिषु च रोगादिमिषया कामुकयोः सङ्गमं कुर्वन्ति। अर्वाचीनभाणेषु एतत्कार्यकर्तारः गृहदासदासीजना एव। तत्र दासीजनस्यैव प्रामुख्यम्। तदुक्तं सुन्देरेशशर्मणा शृङ्गारशेखरभाणे–

गृहमार्जनकारिण्यः प्रायः कुर्वन्ति दूतिकावृत्तिम् ।
तण्डुलमपि तैलादीन् रहसि लभन्ते येन कुलवध्वाः ॥

एतासां वशीकरणोपायाश्च तत्रैवेत्थं वर्णिताः–

दारिद्र्येण निपीडितां धनचयैः मुग्धां च चाटूक्तिभिः
वीरां कामकलासु धीरपुरुषं संयोजयन्त्यस्स्वयम् ।
पुत्र्यास्तूद्भवकारणेन तनयाहीनां चिरायाङ्गनां
तोकौघाकुलितान्त्वपुत्रजनकं ख्यात्वा वशीकुर्वते ॥ इति।

1.10 भाणेषु अवान्तरभेदौ

रचनापद्धतिमनुसृत्य भाणाः द्विधा विभक्तुं शक्याः। शुद्धभाणाः, मिश्रभाणाश्चेति। केवलं संस्कृतभाषैव यस्मिन्नुपयुक्ता स शुद्धभाणः। प्राचीनं

In Public domain. Digitization Muthulakshmi Research Academy

भाणचतुष्टयं, वसन्ततिलकादिकं च एतद्विभागान्तर्गतम्। यत्र संस्कृतेन सह तत्र तत्र अनुवादेषु प्राकृतमपि उपयुक्तं स मिश्रभाणः। अत्र स्त्री-वचनानि प्राकृतभाषायां भवन्ति। मिश्रभाणेषु आदिमः वत्सराजरचितः कर्पूरचरितभाणः। अत्रैव प्रसिद्धाः मुकुन्दानन्दादयः। प्रचीनकाले भाणेषु प्राकृतप्रयोगः निषिद्धः। परन्तु द्वादशत्रयोदशशतकयोर्मध्ये भाणेषु प्रा-कृतमपि स्थानमभजत्। भाणेषु कैशिक्याः प्रवेशं कल्पयता विश्वनाथेनैव प्रथमतया प्राकृतस्य भाणेषु प्रवेशः दत्त इत्यूह्यते। अत एव तत्समका-लीनेन वत्सराजेन रचिते कर्पूरचरितभाणे प्राकृतप्रयोगः दृश्यते। एव-मितिवृत्तनायकनायिकादिकं चानुलक्ष्य विभागः कर्तुं शक्यः अथापि स नात्यन्तमुपयुज्यत इत्युपेक्ष्यते।

1.11 भाणेषु प्रस्तावना

सर्वेषु भाणेषु नान्द्यन्ते सूत्रधारः प्रविश्य प्रस्तावनामारभते। भाण-स्यैकपात्रप्रयोज्यत्वात् सूत्रधारः एक एव आकाशभाषितेन सूच्यार्थसूचनं कृत्वा निष्क्रामति। एतादृशी प्रस्तावना प्राचीनभाणेषु वर्तते। कर्पूरचरि-तपर्यन्तमेतादृश्येव प्रस्तावना अनुसृता। परं तदनन्तरेषु भाणेषु प्रस्ता-वनायां सूत्रधारेण सह पारिपाश्वकस्य वा नट्याः वा प्रवेशोऽपि कारितः। यथा नाटकादिषु द्वयोः परस्परवार्तालापेन कवेः, काव्यस्य, प्रविश्यमा-नपात्रादीनां च परिचयो भवति तथैवैष्वपि। परन्तु भाणस्यैकपात्रप्रयो-ज्यत्वरूपो नियमः वत्सराजादनन्तरैः प्रस्तावनायां परित्यक्तः। प्राचीन-भाणचतुष्टये प्रस्तावनापर्यायतया स्थापनाशब्दः प्रयुक्तः।

किञ्च प्राचीनेषु भाणेषु प्रस्तावना अत्यल्पा। केषुचित् कविपरिचय एव न दृश्यते। केषुचिद्वर्ततेऽथाप्यत्यल्पमात्रया। प्राचीनभाणेषु प्रस्तावना केवलं सूच्यार्थसूचनार्थमेव स्वीकृता तथैवोपयुक्ता च। परं वसन्ततिलकमारभ्य

वर्तमानेषु भाणेषु अर्वाचीनेषु प्रस्तावना सुदीर्घा वर्तते यस्यां कवेः, तद्वंशस्य, तद्गुरोः, तत्कवितायाः तदाश्रयप्रदायकभूपस्य, अन्येषां च वर्णनं, अन्ते सूच्यार्थसूचनम् च भवति। एवं प्रस्तावनायाः दीर्घीभावे हेतुः कवेस्तात्कालिकी प्रसिद्धिः, यशःकांक्षा च। सर्वोऽपि भाणकर्ता प्रसिद्धपण्डितः राजाश्रितो वा आसीत्। अनेके कवयः राङ्भिः सम्मानिताः वर्तन्ते। कनकाभिषेकादिना सम्मानिता अपि भाणकर्तृषु वर्तन्ते। तेन ज्ञायते यत् भाणरचना नात्यन्तसरला न वा निम्नस्तरिका।

1.12 भाणस्वरूपविवेकः

नान्दीप्रस्तावनयोरनन्तरं प्रस्तावनायां सूचित एव विटः रङ्गे प्रविश्य स्वनैशिकानुभवं[13][14] स्मरन्, आत्मनोपभुक्तां[15] वनितां वर्णयन्, अथवा अलब्ध[16] स्त्रीविषयकचिन्तां नाटयन् चन्द्रास्तमयं वर्णयति। तात्कालिकीं लोकवृत्तमपि सूचयति। एतादृशे उषः काले एव स्वगृहादात्मनः प्रस्थानस्य हेतुमपि कथयति। (स च हेतुः परस्परवियोगखिन्नयोः[17] युवतियुवकयोः एकत्रसङ्गमाय प्रयत्नः स्यात्। मित्रे देशान्तरगते[18] सति तत्प्रियायाः सहायीभवनं स्यात्। [19]विवाहार्तव[20] प्रथमरङ्गा[21] धिरोहणोत्सवदर्शनोत्सुकता वा स्यात्। कदाचित् स्वानुरक्त[22] स्त्रीसङ्गमप्र-

13 Kavi Rakshasa (Muddu Rama) court poet of Sahaji, author of Rasikatilaka Bhana.
14 रसिकरञ्जनभाणः
15 वसन्ततिलकभाणः
16 मुकुन्दानन्दभाणः
17 प्राचीनाः केरलीया भाणाः
18 रससदनभाणः(कालीकेलियात्रा)
19 शृङ्गारशेखरभाणः
20 शृङ्गारभूषणम्
21 पञ्चबाणविजयभाणः
22 मुकुन्दानन्दः

In Public domain. Digitization Muthulakshmi Research Academy

यत्नः स्यात्। तस्य प्रिया युवतिः वेश्या वा अन्यकान्ता वा भवति। ततः प्रभातसूर्योदयादिवर्णनमाचरति। वेशवाटीं प्रविशति। अत्र स्वमित्रैः वेश्याभिश्च वार्तालापं करोति। एष सर्वोऽपि वार्तालापः उक्तिप्रत्युक्तिरूपः आकाशभाषितेन निर्वाह्यते। अयं मार्गे दृष्टेन सर्वेण समालपन् तद्वचांसि स्वोक्तिभिस्सह अनुवदति। एवमयं परिचितानां असारजीवितं, कामुकानां साहसक्रियाश्च वर्णयति। अस्य परिचिताः चोराः, वेश्याः, धूर्ताः नागरिकाश्च। मध्ये मेषकुक्कुटमल्लयुद्धादिकं, सर्पनर्तनं, द्यूतक्रीडां, इन्द्रजालं, कलायननृत्यं, कन्दुकक्रीडां, नृत्यगृहविलासमन्दिरादिकं च दृष्ट्वा वर्णयति। अयं अक्षिसात्कृताः सर्वाः वेश्याः समालपन्, तासां सौन्दर्यादिकं, तासां गर्ह्यां वृत्तिं, ताभिः सह आत्मनः सम्बन्धं च वर्णयति। वेश्याविटयोर्मध्ये प्रवृद्धकलहादिकेषु कलत्रपत्रमाधारीकृत्य न्यायनिर्णयं करोति। वीणादिवाद्यवादनं श्रुत्वा गायकानभिनन्दति। नृत्यमन्दिराणि प्रविश्य तत्र नर्तनमभ्यस्यन्तीनां बालानां नर्तनकौशलमभिनन्दति। अयं च परिहासनिपुणः। अतः मार्गे सङ्गतैः सह सपरिहासं जल्पति। मध्याह्नसमये आतपबाधोपशान्त्यै सः स्वप्रियवेश्यायाः भवनं प्रविशति। अथवा उद्यानं प्रविश्य तत्र विश्रान्तिमनुभवति। दिनान्ते अयं स्वीयं मुख्यं नियोगं सफलीकरोति। स च स्वप्रियासङ्गमः स्यात्। प्रथमरङ्गाधिरोहणोत्सवदर्शनार्थं गत्वा, तामभिनन्द्य, कलत्रपत्रिकादानेन तस्याः प्रथमतया कलत्ररूपेणस्वीकरणं स्यात्। विवाहोत्सवे वधूवरयोः अभिनन्दनं वा स्यात्। अथवा प्रियावियुक्तस्य मित्रस्य तत्प्रियया सह संयोजनं स्यात्। प्रथमार्तवमहोत्सवे ऋतुस्नाताया अभिनन्दनं वा स्यात्। अन्ते च चन्द्रोदयवर्णनेन भाणः समाप्यते। मध्ये सूर्योदय – मध्याह्न – सूर्यास्तमयवर्णनानि स्युः। चन्द्रास्तमयेनारभ्य चन्द्रोदयेन समाप्तिः भाणेषु प्रायशः दृश्यते। एवं सम्पूर्णतया एकाहसम्बद्धम् इतिवृत्तं भाणेषु वर्ण्यते।

In Public domain. Digitization Muthulakshmi Research Academy

एतादृशस्य स्वरूपम् अभिनवभट्टबाणेन वामनेन स्वीये शृङ्गारभूषणे विटमुखेन इत्थं वर्णितम्–

प्रणयकलहं कोपोद्वेगं नियम्य विलासिनः
प्रकृतिमधुरं नर्मालापं विधाय वधूजनैः ।
दिवसमखिलं नीत्वा तां तां विलोक्य चमत्कृतां
मुदितहृदयस्सायं गन्ता सखीमहमीक्षितुम् ॥

एतादृशानां भाणानाम् अभिनयः प्रसिद्धेषु नगरेषु जातः । पाटलिपुत्रम्, उज्जयिनी, काञ्ची, श्रीरङ्गं, तिरुनारायणपुरी, तञ्जापुरी, भद्रपुरी, नवीनपुरी (होसूर) भद्राचलं, विजयनगरम् (हम्पी), तिरुपति, तिरुवनन्तपुरम् इत्यादि प्रसिद्धेषु पट्टणेषु एतेषाम् अभिनयः कृत इति भाणेषु दृश्यते । केषुचित् भाणेषु तीर्थवर्णनमेव प्रधानमितिवृत्तं भवति । तादृशेषु श्रीनिवासाचार्येण लिखितः रसिकरञ्जनभाणः[23] एकः । अस्मिन् श्रीरङ्गपट्टणं, महीसुरपुरी, तोण्डनूरू, तिरुनारायणपुरी, गरलपुरी इत्यादिषु प्रसिद्धेषु क्षेत्रेषु विटः स्वमित्रमन्विष्यति । असम्पूर्णे अमुद्रिते च वेङ्कटाध्वरिरचिते शृङ्गार[24] दीपकेऽपि यात्रावर्णनमेव प्रधानतया वर्तते । एवं केषुचिद् भाणेषु[25] कोलाहलपुर्यादि ऊहापट्टणानि वर्णितानि । ते च भाणाः उत्सवेष्वेव अभिनीताः ।

एषु प्रासङ्गिकरूपेण आक्षेपगर्भकविता, संक्षिप्तकविता च निबद्धा । पौराणिकाः, वृद्धाः श्रोत्रियाः, ज्यौतिषिकाः, जङ्गमशैववैष्णवादयश्च परिहसिताः । एषु पात्राणि सर्वाणि यथोचितं कल्पितानि । एषु वर्णनानि सर्वाण्यपि शृङ्गारभावपूर्णानि, कवेः प्रतिभायाः निकषोपलाः । कानिचन

23 By Srinivasarya. 1820-1900 AD. printed in Teluguscript in Mysore.
24 incomplete. S.V. oriental M.S. Library, Tirupati.
25 शारदातिलके

In Public domain. Digitization Muthulakshmi Research Academy

वर्णनान्यसभ्यान्यपि सन्ति। एषु सर्वमपि वस्तुजातं प्रायशः शृङ्गाररसम्बद्धमेव।

अथ केषुचिद्भाणेषु द्वयोः मित्रयोः संभाषणमेवेतिवृत्तम्[26]। तावुभौ नगरे पर्यटन्तौ, अथवा एकत्र स्थितौ स्वानुभवं हास्योचितवर्णनेन परस्परं प्रकाशयतः। वसन्ततिलकादिभाणाः प्रायशः समानरूपाः। अतश्च किञ्चिदिव अरुचिजनका एव। प्राचीनभाणेषु तादृशारुचेः स्थानं नास्ति। ते च रुचिं वर्धयन्तः, सहजत्वं प्रकाशयन्तः, आक्षेपगर्भव्यवहारादिभिः हास्यं पोषयन्तः, अतिमृदुलपदबन्धबन्धुराः, तात्कालिके व्यावहारिकसंस्कृते निबद्धाः। एषु प्राचीनेषु भाणेषु चोल–चेर–केरल–नेपाल–घूर्ज–आन्ध्र–पुलिन्द–कलिङ्ग–द्रविड–कर्णाटकादिदेशीयाः स्त्रियः, तासां वेषभूषादिकं, तासां विशिष्टसौन्दर्याकर्षणादिकं च सम्यग् वर्णितम्। एवं शकाः, यवनाः, तुषाराः, पारशीकाः, मागधाः, किराताः, कलिङ्गाः, वङ्गाः, काशाः, माहिषिकाः, चोलाः, पाण्ड्याः, केरलाः, यौधेयाः, रोहितकाः, बाह्लीकाः, कोङ्कणाः, लाटाः, शौर्पारिकाः, सिंहलेशाः, हूणाः, आभीराः, गार्ग्याः, निषधाः, आवन्तिकाः, सौवीराः, दाशेरकाः, काम्भोजाः, बर्बराः, कारूशमलदाः इत्येवमनेके जातिविशेषाः वर्णिताः। प्राचीनभाणेषु बौद्धभिक्षूणाम् आक्षेपो वर्तते। अर्वाचीनेषु नास्ति। अर्वाचीनेषु भाणेषु केषुचित् कवयः समकालिककवीनां दुष्टत्वं, जारत्वं च वर्णयित्वा, स्वीयं तद्विषयकद्वेषं प्रकाशितवन्तः। शैवस्मार्तवैष्णवादिभेदानां दक्षिणदेशे अतीव प्राबल्यात् दक्षिणदेशीयाः कवयः स्वीयमन्यमतद्वेषम् अन्यमतावलम्बिषु जारत्वचोरत्वाद्यारोप्य प्रकाशयामासुः। पञ्चबाणविजयभाणे श्रीरङ्गार्यकविः नीलकण्ठदीक्षितपुत्रं गणेश्वरशास्त्रिणं[27] स्त्रीलम्पटं

---

26 धूर्तविट संवादः, कर्पूरचरितं च

27 पञ्चबाणविजये द्र. गणेश्वरशास्त्रिणः वृत्तम्–यथा–अयं खलु, नीलकण्ठशास्त्रिणः पुत्रो गणेश्वरशास्त्री नाम विप्रविटः। (उपसृत्य) सखे गणेश्वरशास्त्रिन् भवत्पित्रा स-

In Public domain. Digitization Muthulakshmi Research Academy

वेश्यालोलं च अकरोत्। एवं च मतद्वेषप्रदर्शनेऽपि भाणवाङ्मयमिदं साधनमासीदिति ज्ञायते।

1.13 भाणनामानि

साधारणोऽयं विषयः यद्यस्य कस्यापि ग्रन्थस्य नाम तदितिवृत्तमाधारीकृत्य क्रियते। नायिकानायकयोर्वा इतिवृत्तस्य केन्द्रबिन्दुरूपघटनायाः वा सूचनं तत्तन्नामसु क्रियते। यथा अभिज्ञानशाकुन्तलवेणीसंहारादिषु एतादृशी परिपाटी अनुभूयत एव। एषा च परिपाटी प्राचीनभाणेषु अनुसृता। प्राचीनभाणानां नामानि सर्वाण्यपि इतिवृत्तसम्बद्धान्येव। उभयाभिसारिकायां नायिकानायकौ उभावपि परस्परयोः भवने उद्दिश्य प्रयातौ मध्येमार्गं कस्यचित् गृहसमीपे मिलतः। पद्मप्राभृतके अङ्गीकारसूचकपद्मदानं इतिवृत्तस्य सफलतां द्योतयति। धूर्तविटसंवादः संवादरूप एव। पादताडितकमपि वेश्यापादताडनभ्रष्टस्य विष्णुनागस्य प्रायश्चित्तप्रतिपादकेतिवृत्तपरमिति अन्वर्थनामतैव तस्य। अर्वाचीनभाणेष्वपि कर्पूरचरितम्, कालीकेलियात्रा (रससदनं), विटराजविजयः, मदनगोपालविलासः, मुकुन्दानन्दः, शृङ्गारकेतुलीलाचरितादिभाणाः, इतिवृत्तसम्बद्धं नाम वहन्ति। परन्तु केषाञ्चित् भाणानां नामानि नेतिवृत्तसम्बद्धानि। अपि तु कालसम्बद्धानि। यथा–वसन्ततिलकम्, वसन्तमित्रं, वसन्तभूषणमित्यादि। अपरे च भाणाः प्रधानं रसमनुरुध्य नाम वहन्ति। यथा–शृङ्गारशेखरः, शृङ्गारभूषणम्, शृङ्गारतिलकम्, शृङ्गारसर्वस्वम्, शृङ्गारजीवनम्, शृङ्गारमञ्जरी, शृङ्गारसुधार्णवः, शृङ्गारदीपः, शृङ्गा–

म्पादितं कोशजातं बहुकमस्तीत्यश्रौषं, तदिदानीं किंकृतम्; किं ब्रवीषि – मत्कुणविहारभूमिभिः केलीगृहाङ्गणनिरोधिभिः शिथिलीभवद्भिस्तालपत्रैः किमस्तीति श्रोत्रियबेतालेभ्यो विक्रीय भूरिधनमादाय कमलावत्याः दुहितुः कनकमञ्जर्याश्शाश्वते कनककर्णपत्रेऽकरवमित्यादि। P. 26 Madras Telugu edition.

In Public domain. Digitization Muthulakshmi Research Academy

ररसभृङ्गारः, शृङ्गाररसोदयः, शृङ्गारसञ्जीवनम्, शृङ्गारकोशः, शृङ्गारतरङ्गिणी, शृङ्गाररत्नाकरः इत्यादि बहवः सन्ति। एवं शृङ्गारसाम्राज्याधिपतेः मन्मथस्य नाम्नाङ्किताः केचन। यथा अनङ्गभूषणम्, अनङ्गजीवनम्, मनोजविजयः, कामविलासः, अनङ्गतिलकं, कन्दर्पविलासः, मदनविजयः, मदनविलासः, पञ्चायुधप्रपञ्चः, पञ्चबाणसिद्धान्तः, मदनमहोत्सवः, पञ्चबाणविजयः, कन्दर्पदर्पणम्, मन्मथाभ्युदयः इत्यादि। केषांचित् भाणानां नामानि तान् पठितुं द्रष्टुं च योग्यान् अधिकारिणः बोधयन्ति। यथा-रसिकरञ्जनं, रसिकजनरसोल्लासः, रसिकराजीवः इत्यादि। केचन भाणाः सरस्वत्याः सारस्वतस्य च नाम्ना सम्बद्धं नाम भजन्ते। यथा-शारदातिलकं सारस्वतोल्लासः इत्यादि। अपरे च भाणाः तत्कर्तृनामभिरपि व्यवह्रियन्ते। यथा-महिषमङ्गलभाणः, अय्याभाणः, अम्माभाणः, वेङ्कटभाणः इत्यादि। एवं नाम्नि अनेकतापि भाणवाङ्मयस्य वैशिष्ट्यमेव।

1.14 भाणः-प्रहसनम्

समाजे स्थितानां दुराचाराणां प्रकाशनेन समाजस्य समुचिते मार्गे प्रेरणमेव उभयोरपि मुख्योद्देशः। अत एव उभयत्र धूर्तव्यवहारयुतानि पात्राणि। उभयत्र हास्यस्य प्रवेशः वर्तते। अत एव उभौ अपि समानयोगक्षेमौ इति अभिनवभारत्यां[28] स्पष्टमभिहितम्। परन्तु द्वयोः भेदोऽपि महान् वर्तते। भाणे इतिवृत्तं एकाहसम्बद्धं, वेशवाटीसम्बद्धं, एकपात्रप्रयोज्यम्। इतिवृत्तमपि अत्यल्पम्। वर्णनासम्भाषणादिकं अधिकम्। प्रहसने तु अनेकपात्राणि, निम्नवर्गाणां नीचवर्गाणां च सम्बन्धि इतिवृत्तं, हास्यरसः, मूलकथापि नात्यल्पा। प्रहसने हास्यरसः प्रधानः। भाणेषु[29] अद्भुत-

28 ना० शा० अध्यायः 18(Gayakwad Oriental Series publication P 449)

29 उत्सृष्टिकाङ्कप्रहसनभाणास्तु, करुणहास्यविस्मयप्रधानत्वात् - रञ्जकरसप्रधानाः अभिनव० भा०

In Public domain. Digitization Muthulakshmi Research Academy

रसश्च। भाणेषु चमत्कारकारिसम्भाषणेन हास्यं नागरिकं भवति। अस्मिन् हास्ये व्यङ्ग्यस्य, अवहेलनस्य च समुचितं स्थानं विद्यते। असभ्यपदप्रयोगमन्तरेणैव लोकोक्तीनां, देशीयानां च प्रयोगेण श्रेष्ठः हास्यरसः भाणेषु लभ्यते। प्रहसने तु बाहुल्येन ग्राम्यहास्यं लभ्यते। यथा कथञ्चित् हासोत्पादनमेव प्रहसनस्योद्देशः। असभ्यपदप्रयोगे वा, असभ्यचेष्टासु वा, असभ्यवर्णने वा निषेधस्य अभावात् प्रहसनेषु कानिचित् वचनानि सीमामतिक्रान्तानि हास्यं न जनयन्ति किन्तु जुगुप्सामेव। यथा लम्बोदरप्रहसनम्। भाणेषु जुगुप्साकरं वर्णनं नास्तीत्येव वक्तुं शक्यम्। कदाचित् अवहेलनेषु ग्राम्यहास्यस्य सत्वेऽपि तन्न तथा जुगुप्सावहम्। उदाहरणार्थं पादताडितके वृद्धवेश्यानां शृङ्गारवर्णने अयं श्लोकः –

> चुम्बनसक्तस्सोऽस्या दशनं च्युतमूलमात्मनो वदनात्।
> जिह्वामूलस्पृष्टं खाडितिकृत्वा निरष्ठीवत्॥

अयं च श्लोकः क्षेमेन्द्रेण औचित्यविचारचर्चायां अनुचितहास्यस्य उदाहृतः। यद्यप्ययं श्लोकोक्तः विषयः किञ्चिज्जुगुप्साकर एव। अथापि दुराचारस्य बहिः प्रकाशनरूपमुख्योद्देश्यपरिपालनाय अयं विषयोऽपि वर्णितः। वस्तुतः एतादृशवर्णनादिकं भाणेषु अल्पमेव। प्रहसने तु न तथा।

1.15 भाणः–वीथी

उभावपि एकाङ्कौ कल्पितेतिवृत्तौ च। परन्तु भाणे एकमेव पात्रं रङ्गे तिष्ठति। वीथ्यां तु द्वे, त्रीणि वा पात्राणि भवन्ति। वीथ्यामपि अप्रविष्टपात्रैः सह आकाशभाषितं वर्तते। अधिकतया शृङ्गाररसूचनमेव। भाणस्येतिवृत्तम् एकाहसम्बद्धम्। वीथ्यास्तु न तथा। दिनद्वयदिनत्रयसम्बद्धमपि तत्रेतिवृत्तं भवितुमर्हति। एवं भाणेतिवृत्तं वेश्यादिनीचजनसम्बद्धम्। वीथ्यास्तु उत्तममितिवृत्तम्। यथा नाटकेषु।

In Public domain. Digitization Muthulakshmi Research Academy

1.16 भाणः–भाणिका

उपरूपकेषु भाणिका इत्येकं रूपकमस्ति। अस्यैव भाणकमिति, भाण इति च नामनी। अत्रापि एक एव अङ्कः। सन्धी च मुखनिर्वहणे एव। भारती अथवा कैशिकी वृत्तिः प्रयोज्या। एतावत् पर्यन्तं भाणतुल्यतैव भाणिकायाः। इतिवृत्तं तु उदात्तं भवति। उदात्तनायिकानायकौ भाणिकायां भवतः। मुद्रिता भाणिका एका उपलभ्यते रूपगोस्वामिना रचिता दानकेलीकौमुदी इति। राधामाधवौ अत्र नायिकानायकौ। एकपात्रप्रयोज्यता भाणिकायां न भवति।

1.17 सिंहावलोकनम्

भाणरचनारम्भः कदा आसीदिति वक्तुमशक्यम्। केचन विमर्शकाः रूपकेषु प्रथमप्रक्रियां भाणमेवामन्यन्तेति प्रत्यपादयम्। तेषां मतमनुसृत्य नाटकादिरूपकरचनायाः पूर्वमेव भाणरचना आरब्धेति बहुप्राचीनताऽस्याः सिद्ध्यति। अत्यन्तं प्राचीने भरतनाट्यशास्त्रे एवास्य भाणस्य सम्यक् निरूपणात् ततः पूर्वमेव भाणरचना सर्वाङ्गपूर्णाभिवृद्धेति निश्चप्रचम्। परन्तु तावत्प्राचीनभाणग्रन्था अद्य नोपलभ्यन्ते।

इदानीमुपलभ्यमानेषु भाणेषु शूद्रकस्य पद्मप्राभृतकमेव प्रथमः। अयं शूद्रकः शालिवाहनवंशजं स्वातिं हत्वा राजाभूदिति ऐतिहासिकाः कथयन्ति। अयं क्रिस्तुशके प्रथमद्वितीयशतकयोर्मध्ये आसीदिति ज्ञायते। ततः वररुचिरचिता उभयाभिसारिका द्वितीया। अयं वररुचिः विक्रमादित्यस्यास्थानकवीश्वरेष्वेकः। अयं विषयः ज्योतिर्विदाभरणस्थेनानेन श्लोकेन ज्ञायते–

धन्वन्तरिक्षपणकामरसिंहशङ्कु बेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेस्सभायां रत्नानि वै वररुचिर्नवविक्रमस्य॥

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकेऽस्मिन् नव पदं न सङ्ख्यावाचकं, किन्तु नूतनार्थकं विक्रमस्य-विशेषणमिति केचन। तथा च गुप्तराट्सु एकः चन्द्रगुप्तविक्रमादित्य एवायं नवविक्रमो भवति। (अन्यथा रत्नपदेनैव नवत्वेसिद्धे नवपदं व्यर्थमेव।) ऐतिहासिका अपि एतदङ्गीकुर्वन्त्येव। नकेवलमेतत्। उभयाभिसारिका-पादताडितक-धूर्तविटसंवादेषु गुप्तयुगसंस्कृतिः प्रतिफलितेति टि. बरो[30] यस्. के. डे[31] मोतीचन्द्रादयः[32] सोदाहरणं निरूपयन्ति। एतद्विक्रमा-दित्यादनन्तरस्य कुमारगुप्तस्यकाले धूर्तविटसंवादपादताडितके उत्पन्ने। अनयोः धूर्तविटसंवादः भरतनाट्यशास्त्रस्थवैशिकाधिकरणस्य व्याख्यारूप इति विमर्शकानां भावना। उभयाभिसारिकादिभाणत्रयं गुप्तयुगसम्बन्धेन प्रायशः समसामयिकम्।

गुप्तयुगात्परं पञ्चषट्शताब्दान् यावत् रचिताः भाणाः नोपलभ्यन्ते। प-रन्तु पत्रलेखा, ललितनागरः, वीणावतीति भाणत्रयं सागरनन्दी स्वीये नाटकलक्षणरत्नकोशे, तथा शारदातनयः भावप्रकाशे नन्दिमती, शृङ्गार-मञ्जरी, वीणावती इति भाणत्रयं, भोजः शृङ्गारप्रकाशे मुकुटताडितकं चो-ल्लिखितवन्तः। एवमन्येऽपि कालगर्भे निलीनाः स्युः।

अथ त्रयोदशशताब्द्यां स्थितः विश्वनाथः स्वकीये साहित्यदर्पणे ली-लामकरन्दनामकं भाणमुदाजहार। अयमपि भाणः इदानीं नोपलभ्यते। अस्मिन्नेव काले कालञ्जननराधीशस्य मन्त्री वत्सराजः कर्पूरचरितभाण-मरचयत्। अयं च बरोडायां रूपकषट्कनाम्निग्रन्थे प्राकाश्यं नीतः। चतु-र्दशशतके आन्ध्रकविश्रेष्ठस्य जक्कन्नाख्यस्य पितामहः पेद्दयामात्यः भा-

---

30 J.R.A.S . 1946 P. 46-53

31 S.K.De. Some aspects of Skt Literature-Bhana-A Monologue play.

32 श्रृङ्गारहाट् (चतुर्भाणि) भूमिका-मोतीचन्द्रस्य

In Public domain. Digitization Muthulakshmi Research Academy

णादिग्रन्थानरचयदिति ज्ञायते[33]। परन्त्विदानीं तेऽपि नोपलभ्यन्ते। काकतीयप्रतापरुद्रसामन्तस्य रेचर्ल सिङ्गमनायकपुत्रस्य अनपोतनायकस्यास्थानकविः पशुपतिनागनाथः मदनविलासभाणमरचयत्। अयमिदानीं असमग्रः मद्रपुर्यां प्रभुत्वतालपत्रग्रन्थालये रक्षितः। अनपोतनायकस्य पुत्रः रसार्णवसुधाकरकर्ता सर्वज्ञसिंगभूपालोऽपि भाणमेकमरचयदिति ज्ञायते। परन्त्वेषोऽपि नोपलभ्यते। एवं केरलेषु रविवर्मदेवस्यास्थानकविना रचितो भाणः कश्चित् त्रिवेण्ड्रस्थतालपत्रग्रन्थालयेऽस्ति। परं तत्कर्तृनाम न ज्ञायते।

पञ्चदशशतके रचितेषु भाणेषु केचित्प्राकाश्यं नीताः। तेषु प्रसिद्धः वात्स्यवरदाचार्यस्य वसन्ततिलकभाणः। अयं भाणः मुंबईनगरे प्रकाशितः। वेमभूपालेनापि कश्चन भाणः रचित इति ज्ञायते परन्त्वेतावदवधि नोपलब्धः। अन्यश्चाभिनवकालिदासकृतः शृङ्गारशेखरः। आन्ध्रप्रदेशसाहित्यअकादमीद्वारा प्राकाश्यं नीतोऽयम्। अभिनवकालिदासस्य पुत्रेण श्रीकण्ठेन कन्दर्पदर्पणभाणो रचितः। अयन्त्वमुद्रित एवास्ते।

षोडशशतके रचिताः उपदश उपलभ्यन्ते परन्तु तेषु द्वित्रा एव मुद्रिताः। महिषमङ्गलभाणः केरले सव्याख्यः प्राकाश्यं नीतः तथा लिङ्गमकुण्ट रामकविना रचितः शृङ्गाररसोदयभाणोऽपि प्रकाशितः। अन्ये सर्वे अमुद्रिताः तेषु केचिदसंपूर्णाश्च। सप्तदशशतकमारभ्य भाणरचनायां पुनरुन्मेषो जातः। बहवः प्रसिद्धाः कवयः भाणग्रन्थान् अरचयन्। अस्मिन् शतके भाणरचयितारः प्रायशः महाकविरूपेण प्रसिद्धा एव। वेङ्कटाध्वरिः, श्रीरङ्गाचार्यः, रामभद्रदीक्षितः, नल्लाबुधः, चोक्कनाथः, कविराक्षसः, अप्पाध्वरीन्द्रः इत्यादयः बहवः अस्मिन् शतके भाणवाङ्मयं महोज्ज्वलञ्चक्रुः। एतच्छतकीयाः पञ्चषाः भाणाः मुद्रितास्समुपलभ्यन्ते।

33 द्र० विक्रमार्कचरितम्—जक्कनकवेः आन्ध्रप्रबन्धे प्रथमाश्वासे 20 पद्यम्

In Public domain. Digitization Muthulakshmi Research Academy

एवं अष्टादशशतकेऽपि दक्षिणदेशे महाराष्ट्रप्रभूणां पालने भाणरचना सम्पन्ना। तथा केरलेष्वपि ईश्वरवर्मरामवर्मनामानौ शृङ्गारसुन्दरशृङ्गारसुधाकरभाणौ अरचयताम्। कर्णाटकप्रान्ते प्रसिद्धेषु काशीपतेः मुकुन्दानन्दः एकः। अस्मिन्नपि शतके महाकविरूपेण प्रसिद्धैर्बहुभिः भाणवाङ्मयं पुनरुज्जीवितम्। सरस्वत्यपरावतारो घनश्यामः, श्लेषचक्रवर्ती श्रीधरवेङ्कटेशः, अष्टभाषाबहिरीत्यादिबिरुदभाक् गोपालरायः, महाकविः काशीपतिः, महीसुरप्रधानामात्यः वेङ्कटभूपतिः इत्यादयः बहवः अस्मिन्शतके भाणरचनायां सिद्धहस्ताः आसन्। एवम् एकोनविंशेऽपि शतके भाणग्रन्थाः बहवः उत्पन्नाः तत्र केरलदेशीयाएवोपदश वर्तन्ते। तेषु रससदनम्, विटराजविजयः, रसिकभूषणमिति त्रयः प्रसिद्धाः। द्रविडदेशोत्पन्नेषु नावल्पाकं वेङ्कटाचार्यस्य कन्दर्पदर्पणं, ईचंबाडि श्रीनिवासार्यस्य शृङ्गारतरङ्गिणी, प्रतिवादिभयङ्करं श्रीनिवासार्यस्य रसिकरञ्जनं, सुब्रह्मण्यसूरेः मन्मथमन्थनम्, सुब्रह्मण्यशास्त्रिणः मन्मथमोदनञ्च प्रसिद्धाः। एवमान्ध्रेषु बेल्लंकोण्ड रामरायकवेः कन्दर्पदर्पणं, शिष्टुकृष्णमूर्तिशास्त्रिणः मदनाभ्युदयवल्लरीपल्लवोल्लासौ, कोराडरामचन्द्रशास्त्रिणः शृङ्गारसुधार्णवः प्रसिद्धाः। शिवाजीवंश्यस्य साहुराजस्य आस्थानज्यौतिषिकः कविश्च चिन्तामणिः श्यामलाभाणमरचयत्। तथा विंशतितमे शतकेऽपि भाणरचना अनुस्यूततया प्रावर्तत एव। तञ्जापुरीयः सुन्दरेशशर्मा शृङ्गारशेखरभाणं, केरलीयः राघववर्मा कृत्तिकाभाणं, श्रीनिवासाचार्यः श्रीनिवासविलासभाणं, जीवन्यायतीर्थः पुरुषपुङ्गवभाणं, महालिङ्गशास्त्री मर्कटमर्दलिकाभाणं, शिरिशनगल् कृष्णमाचार्यः मनोजविजयं, कपिष्ठलं कृष्णाचार्यः रसार्णवतरङ्गिणीं, गदाधरविद्याभूषणः रसिकशेखरभाणं चारचयन्। एते प्रायशः मुद्रिताः। अन्ये च केचन अमुद्रिताः अज्ञाताश्च भवेयुः। एवमत्यन्तप्राचीनकालादारभ्यैतावत् पर्यन्तं अनुस्यूततया

In Public domain. Digitization Muthulakshmi Research Academy

प्रवर्तमानमिदं भाणवाङ्मयम् इतः परमपि तथैव वर्धिष्यते इत्यत्र न कोऽपि सन्देहः। अन्योऽस्त्यत्रावधेयोंऽशः। प्रथमं भाणवाङ्मयमिदम् उत्तरभारते उत्पन्नम्। परन्तु प्रायशः दशमशतकमारभ्यैकोनविंशतिशतकपर्यन्तं दक्षिणभारते एव नितरां व्याप्तं समृद्धं चासीत्। विंशे शतके तु तद्वाङ्मयसंरक्षणे तस्याभिवृद्धये च सर्वत्र भारते यत्नः कृतः। जीवन्यायतीर्थगदाधरविद्याभूषणादयः उत्तरभारतेऽप्यस्य पूर्वतनवैभवं सम्पादयितुं प्रयतितवन्तः।

प्रायशः अनेके भाणाः कालगर्भे लीनाः केवलमल्पसङ्ख्ययैवेदानीं उपलभ्यन्ते तेष्वपि अत्यल्पा एव प्रकाशिताः। अप्रकाशितेष्वपि भाणेषु उत्तमाः अनेके वर्तन्ते। इतः परम् आगामिषु अध्यायेषु तत्तद्भाणानां तत्तत्कविवराणां च परिचयः यथोपलब्धि प्रस्तोष्यते।

In Public domain. Digitization Muthulakshmi Research Academy

अध्यायः 2

प्राचीनाः भाणाः

भाणरचनारम्भः कदा आसीदिति वक्तुमशक्यम्। के. एच्. ध्रुव, डा. घोष् इत्यादिविमर्शकाः दशरूपकेषु भाण एव प्रथममुत्पन्न इति रूपकपरिणामक्रमे भाणस्यैव प्राथम्यम् अदुः । ततश्च सर्वरूपकादिभूतस्य भाणस्य अत्यन्तं प्राचीनता सिद्ध्यति। भरतेनैव स्वनाट्यशास्त्रे भाणस्य सम्यङ्निरूपणात् भरतस्य समयात् पूर्वमेव भाणवाङ्मयं सम्यक् प्रचारे आसीदिति तु निश्चप्रचम्। परन्तु भरतात् पूर्वतनानां भाणाः इदानीं नोपलभ्यन्ते। तेषां विषये कुत्रापि उल्लेखोऽपि न दृश्यते। इदानीमुपलभ्यमानेषु भाणेषु कालक्रममनुसृत्य अत्यन्तप्राचीनतया परिगण्यमानाः चत्वारः भाणाः 'चतुर्भाणी'तिनाम्ना प्रसिद्धाः। एते च चत्वारः भाणाः श्री मानवल्लि रामकृष्णकविमहोदयेन क्री.श. 1922 वर्षे प्राकाश्यं नीताः। भाणवाङ्मयमितरेभ्योऽन्यूनमिति विश्वे सर्वैरपि विमर्शकैः मुक्तकण्ठं प्रशंसाप्यारब्धा तदारभ्यैव। अत्र च थामस् इति पाश्चात्यविदुषः प्रशंसा प्रमाणतया उल्लेखमर्हति – "It will I think, be admitted that these compositions, inspite of the unedifying character of their general subject and even inspite of occasional

In Public domain. Digitization Muthulakshmi Research Academy

vulgarities have a literary quality. They display a natura humour and a polite, intensely Indian irony which need not fear comparison with that of a Ben Jonson or a Moliere. The Language is the veritable ambrosia of Sanskrit speech. (J.R.A.S. ; centenary supplement 1924. p. 135) " "भाणेषु यद्यपि इतिवृत्तमुदात्तं न, तत्र ग्राम्यव्यवहारा अपि सन्ति, अथापि एते भाणाः भारतीयस्य सहजस्य परिहासस्य, व्यङ्ग्यस्य च प्रतिबिम्बरूपाः सन्ति । अत्रत्या संस्कृतभाषा व्यावहारिकसंस्कृतस्य कश्चन अमृतमयः प्रकारः । आङ्ग्लवाङ्मये प्रसिद्धानां जान्सन्, मोलियर् इत्यादि कवीनां कृतीनां तुलनायां नेदं कथमपि हीनम् ।" इति पाश्चात्य एव प्रशंसां करोति चेत् पुनरेतस्य वाङ्मयस्य उत्कृष्टताविषये किमधिकं वक्तव्यम् ?

चतुर्भाणीनाम्ना प्रसिद्धाश्च शूद्रकरचितः पद्मप्राभृतकभाणः, वररुचिरचिता उभयाभिसारिका, ईश्वरदत्तविरचितः धूर्तविटसंवादः, श्यामिलकस्य पादताडितकं च । एते च चत्वारः भाणाः न केवलमन्येभ्यः रूपकेभ्यः उत्कृष्टाः, अपितु अर्वाचीनभाणग्रन्थेभ्योऽपि विलक्षणाः । अत्र चतुर्ष्वपि इतिवृत्तं परस्परं भिन्नम् । असम्बद्धस्य विषयस्य वर्णनं वा सूचनं वात्र नास्ति । अत्रत्यं प्रतिवाक्यं चमत्कारावहम् । नागरकं हास्यं, अतिशयोक्त्यादिरहितं सहजं चातुर्ययुक्तं च भाषणं पठितॄणां मनांस्यावर्जयति । अत्र आकाशभाषितेन प्रवेशितस्यापि पात्रस्य स्वरूपं पूर्णतया अवगतं भवति । तस्य मानसी स्थितिः, शारीरिकीस्थितिः, स्वभावः इत्यादि सर्वमपि अत्यल्पसन्निवेशेनैव ज्ञापयति कविः । तत्तत्पात्रमुद्दिश्य विहितानि विटवचनान्येव तत्तत्पात्रस्वरूपस्वभावादिकं सम्यक् दर्शयन्ति । एतादृशी च कृतिः साधारणप्रतिभावतः कवेः भवितुं नार्हति । अत एतादृशासाधा-

In Public domain. Digitization Muthulakshmi Research Academy

रणरचनया एतद्भाणचतुष्टयप्रणेतारः कालिदासादिमहाकविभिः स्पर्धन्ते। अत्र इयं जनश्रुतिरेव प्रमाणम्।

वररुचिरीश्वरदत्तः श्यामिलकः शूद्रकश्च चत्वारः।
एते भाणान् बभणुः का शक्तिः कालिदासस्य।। इति।

अयं श्लोकः पद्मप्राभृतकमातृकायाः अन्ते दृश्यते इति तत्सम्पादकैः रामकृष्णकविभिः उक्तम्। अत्र कालिदासस्य तादृशी शक्तिरस्ति वा नास्ति वेति न विचारणीयः विषयः। किन्तु एते चत्वारः कालिदासात् कथमप्यहीना इति तु अङ्गीकर्तव्यमेव। तस्मिन् समये समाजे स्थितस्य मालिन्यस्य साधिक्षेपं परिहासवचनैः बहिः प्रकाशनं यत्तैर्विहितं तदनन्यसाध्यमित्येव वक्तव्यम्।

किञ्चैतद्भाणचतुष्टयपरिशीलनेन तस्मिन् समये कवयः पुराणकवयः, नव्यकवयः इति द्विधा परिदृश्यन्ते। पुराणप्रसिद्धमितिवृत्तं स्वीकृत्य अलङ्कृतभाषया काव्यनिर्माणतत्पराः, ये च वस्तुस्थितेः समकालीनसमाजवृत्तस्य च दूरे भवन्ति ते पुराणकवयः इत्युच्यन्ते स्म। कालिदासः अत्र उदाहरणभूतः। अथ वस्तुस्थितिं, समकालीनसमाजस्थितिं चानुलक्ष्य, सामाजिकमितिवृत्तमाश्रित्य काव्यरचनापराः नव्यविभागे अन्तर्भवन्ति। अत्र एते भाणप्रणेतारः उदाहरणभूताः। एते च पुराणकवीन् पुराणपदच्छेदग्रथनचर्मकारादिशब्दैः अधिक्षिपन्ति स्म। कालिदासोऽपि एतेषामधिक्षेपस्य पात्रमासीत्।

भाणचतुष्टयेऽस्मिन् अत्यन्तप्राचीनकालसम्बन्धिनी संस्कृतिः प्रतिबिम्बिता अस्ति। एषा च संस्कृतिः भारतेतिहासे स्वर्णयुगनाम्ना प्रथितस्य गुप्तयुगस्य सम्बन्धिनीति T. Barrow महाशयस्य आशयः। चतुर्भाणीं हिन्दीभाषानुवादेन सम्पादितवान् मोतीचन्द्रोऽपि एतद्भाणचतुष्टयं गुप्तयुगादर्वाचीनं नेति विश्वसिति। अन्ये च क्रिस्तोः पूर्वं प्रसिद्धस्य विक्रमा-

In Public domain. Digitization Muthulakshmi Research Academy

दित्यस्य शककर्तुः समसामयिकताम् स्वीकुर्वन्ति।

एतेषु चर्तुषु भाणेषु प्रस्तावनापर्यायितया 'स्थापना' शब्दः प्रयुक्तः। पादताडितकं विना अन्येषु त्रिषु कविमुद्दिश्य वा, प्रदर्शनसमयमुद्दिश्य वा न किञ्चिदुक्तम्। धूर्तविटसंवादं विना अन्येषु विटः न नायकः। सः केवलं नायिकानायकयोः मित्रं सन्देशहारकश्च। पद्मप्राभृतके शशः, धूर्तविटसंवादे देविलकः, उभयाभिसारिकायां वैशिकाचल इति च विटस्य नाम दृश्यते। पादताडितके तु विटशब्देनैव स व्यवहृतः। यद्यपि अन्येषु त्रिषु विटस्य नाम दृश्यते, परन्तु तत्रापि विटस्य व्यवहारः नाम्ना न कृतः, अपि तु विटशब्देनैव। पादताडितकं विना शिष्टे भाणत्रये आरम्भः ऋतुवर्णनेन भवति। अर्वाचीनभाणेषु प्रमुखतया लक्ष्यमाणानि अजकुक्कुटमेषादियुद्धवर्णनं, प्रातः–मध्याह्न–सायाह्न–चन्द्रोदयादिवर्णनानि, वेश्यानां अङ्गप्रत्यङ्गसौन्दर्यवर्णनमित्यादि एषु न दृश्यन्ते। यतः एतेषां एतद्वर्णनं मुख्यमुद्देश्यं न, किन्तु तात्कालिकसमाजे स्थितस्य मालिन्यस्य प्रकाशनम्। अतः एतदुद्देश्यानुगुणतयैव वेश्यादिवर्णनं सन्दर्भोचितं दृश्यते।

तस्मिन् काले राजानः, कवयः, पण्डिताः, श्रोत्रियाः, बौद्धाः, श्रेष्ठिनः – किं बहुना वर्णचतुष्टयमपि वेशवाटिकामभजत् इति ज्ञायते। एतेषु डिण्डी, धान्त्रः, चौक्षः, चाक्रिकः, शीफरः, क्षणिकः, पथ्यातिः, पारितोषिकम्, सुखप्राश्निकः, शौण्डीर्यम्, विसंवादनम् इत्यादि पदानि, महामात्र-महाप्रतीहार–कुमारामात्य–अधिकरण–प्राड्विवाक–श्रावणिक–काष्टक-महत्तर–इत्यादि प्रभुत्वाधिकारिणां नामानि, "सुस्वागतं गम्यताम्" "कर्दमेन मां ढोकितुमर्हति" "उन्मुच्यबालभावम्" "आकाशरोमन्थ" इत्यादि संस्कृतभाषाव्यवहारमणिदर्पणानि, साधु, भोः, आँ, अहो, अये, हा, धिक्, हन्त, कष्टं भोः, अंघो, हीही, मा तावत्, अलमलम्, हहह, एवमस्तु, भवतु, सखे, भाव, वयस्य, आर्ये, भद्रमुख, अज्जुक, भदन्त,

In Public domain. Digitization: Muthulakshmi Research Academy

हण्डे इत्यादिसम्बोधनाश्चर्यादिसूचकानि, "कष्टं भोः कोकिलाकौशिकमनुवर्तते" "गोपालकुले तक्रविक्रयः" "कुम्भदासीकृतकरुदितं दुश्चिकित्सं" इत्यादिलोकोक्तयश्च बहुलतया प्रयुक्तानि। अत्र संभाषणेषु प्रयुक्ता संस्कृतभाषापि विलक्षणा, प्राचीना च। हास्यं, चमत्कारः, अधिक्षेपश्च अत्र अन्यभाणग्रन्थापेक्षया उत्तमानि। पद्मप्राभृतिके दत्तकसूत्रं स्मारितम्। धूर्तविटसंवादे "अपुमान् शब्दकामः" इति दत्तकसूत्रमुल्लिखितम्। कामशास्त्रवेत्तायं दत्तकः वात्स्यायनात्पूर्वः। वात्स्यायनः नैषु स्मृतः। अतः एतैः प्रमाणैः एतेषां चतुर्णाम् अत्यन्तप्राचीनता सिद्ध्यति। अथेदानीमेकैकं भाणं, तद्ग्रन्थकर्तारं चाधिकृत्य किञ्चित् परिशीलयामः।

2.1 पद्मप्राभृतकम् – शूद्रकः

प्राभृतकशब्दस्य उपायनम् अर्थः। पद्मम् उपायनम् अधिकृत्य कृतं रूपकं पद्मप्राभृतकम्। अत्र मूलदेवः नायकः। अस्यैव कर्णीपुत्र इति नामान्तरम्। नायिका देवसेना। मूलदेवः देवसेनायाः ज्येष्ठभगिनीम् उपभुञ्जानोऽपि देवसेनायामप्यासक्तः। एषा च देवसेना अनाघ्रातं पुष्पम्। एतां मूलदेवेऽनुरक्तां विधातुं तस्य मित्रं शशनामा विटः रहसि देवसेनां मिलति। सापि मूलदेवेऽनुरक्ता इति ज्ञात्वा तयोः सङ्गमोपायं सूचयति। प्रेम्णा तया दत्तं पद्मं, यत्तया कर्णालङ्काररूपेण धृतं, आनीय मूलदेवाय समर्पयति इति इतिवृत्तमत्र। देवसेनासमीपं गच्छन् विटः मार्गे वेशवाटीं प्रविश्य, तैस्तैस्सह सल्लपति। अन्ते देवसेनासमीपं गच्छति। तया दत्तमुपायनं स्वीकृत्य मूलदेवाय ददाति। यद्यप्यत्र इतिवृत्तं सामान्यमथापि विटद्वारा प्रदर्शितं मृदुपरिहासनैपुण्यं, कविताप्रागल्भ्यं च अनुपमम्। अत्र विटस्य परेङ्गितज्ञानम्, इतरवृत्तान्तज्ञानचातुर्यम्, संभाषणचातुर्यं च पठितॄणां मनांस्याकर्षयन्ति। अत एवायं भाणः सरलशैल्यां सरसभावाविष्करणे, तात्कालिकसमाजसंस्कृतेः प्रतिबिम्बने च अनुपमः भवति। अत्र

In Public domain. Digitization Muthulakshmi Research Academy

भाणे देवसेनां मेलितुं प्रस्थितः विटः मार्गे विपुलामात्यं, कपटभागवतं, पुराणनाटकविटं भावजरद्गवं, दौत्याय समागतां शाक्यभिक्षुकीमेवोपभुक्तवन्तं शैषिलकं, संघिलकं, दिवासुरतपरिश्रान्तौ ताम्बूलसेनेरिमौ, कपटब्रह्मचारिणीं च क्रमशः परिहासपात्राणि विधाय, कविं सारस्वतभद्रं, कातन्त्रव्याकरणपण्डितान् वादे जितवन्तं पाणिनीयानुयायिनं दत्तकलशिं, प्रोषितभर्तृकाव्रतमाचरन्तीं कुमुद्वतीनाम्नीं वेश्यां च प्रशंसति। अत्र च संभाषणं प्रतिपदं चमत्कारावहम् सहजव्यावहारिकसंस्कृतस्य प्रतीकभूतं भवति। वसन्तर्तुवर्णनेनारभ्यतेऽयं भाणः। शिशिरर्तौ वृद्धः संवत्सररूपी विटः हिमरसायनसेवनेन वसन्तकैशोरं प्राप्तवानिति कथं वर्णयति पश्यन्तु – "रमणीयं खलु तावदिदं शिशिरजराजर्जरस्य संवत्सरविटस्य हिमरसायनोपयोगात् पुनरावृत्तं वसन्तकैशोरकमुपोहति"। तात्कालिकसमाजं नर्मोक्त्या विमृशतोऽस्य कविताप्रागल्भ्यमनुपमं किल। तथैवात्र काचित् वेश्या नागरिकायाः पुत्री शोणदासी। एषा च प्रणयकलहकारणेन स्वप्रियेण वियुक्ता विरहसंतप्ता अत्यन्तं दुःखमनुभवन्ती विटेन प्रियसङ्गमशपथेन आश्वासिता। तदा च तां रुदन्तीमेव विटः स्ववचोनैपुण्येन आश्वस्तां सन्तुष्टां चाकरोत्। तदा सा अश्रुमुञ्चन्ती एव हसितवती। तस्य सन्दर्भस्य वर्णनमपि रम्यं– पश्यत– "कथमनवसितबाष्पयैव स्मितमनया, इदं खलु वर्षर्तुज्योत्स्नादर्शनम्" इति। यद्यप्यत्र सर्वे सन्दर्भाः चमत्कारावहाः अथापि उदाहरणरूपेण सन्दर्भद्वयमत्र निदर्श्यते। तत्रैकं विटस्य दत्तकलशिना सह सम्भाषणम्। दत्तकलशिः श्रोत्रियः ब्राह्मणः। सोऽपि वेश्यायामनुरक्तः। सा च अस्मिन् कुपिता इति ज्ञात्वा विटः कोपकारणं ज्ञातुमित्थं तेन सह भाषते – "वयस्य! दत्तकलशे! एवं स्वभावदक्षिणस्य भवतः कथं कामिनी विरक्तेति परं मे कुतूहलं श्रोतुम्। एतदुच्यतां तावद्विस्तरतः।" तदा दत्तकलशिः – "साधु! सा पुंश्चली पूर्वेद्युः पर्वकाले वे-

In Public domain. Digitization Muthulakshmi Research Academy

शकोष्ठकमुपेत्य रिरंसया मां हविर्जुहूषन्तं जिघृक्षतीवोपासीदत्। ततोऽह-मेनामवोचम् – "वृषलि! मा हविर्जुहूषन्तं मा मा स्प्राक्षीः" इति कोपकार-णमुक्तवान्। तदा विटः तं प्रति एवं कथयति – "हन्त! इदं तत् दुष्टगान्धर्वं नाम। सुकुमारः किल कामिनीपरिग्रहः। स्त्रीजनोऽपि त्वया कष्टशब्दनि-ष्ठुराभिः व्याकरणविस्फुलिङ्गाभिः वाग्भिः उत्त्रासयितव्यो भवति। इदमपि न त्वया श्रुतपूर्वम् –

रत्यर्थिनीं रहसि यः सुकुमारचित्तां
कान्तां स्वभावमधुराक्षरलालनीयाम्।
वागर्चिषा स्पृशति कर्णविरेचनेन
रक्तां स वादयति वल्लकिमुल्मुकेन।।" इति।

एवं दुष्टशाक्यभिक्षोः संघिलकस्य तर्जनमपि चमत्कारावहम्। पश्यत – "विहारबेताल! क्वेदानीमुलूक इव दिवा शङ्कितश्चरसि। क्वेदानीं वे-शवीथीदीर्घिकागतो बक इव शङ्कितश्चरसि। ननु सुरतपिण्डपातमनु-ष्ठीयते? ध्वंसस्व। वृथामुण्डन! चित्रदुद्रूणापत्रपते। गच्छ! बुद्धोऽसि।" इति। अथ भाणेषु अवश्यवर्ण्यत्वेन परिणतं कन्दुकक्रीडावर्णनमपि अत्रैव आरब्धम्। परन्तु अत्रत्यः वर्णनाचमत्कारः नार्वाचीनेन केनापि भाणकर्त्रा स्वायत्तीकृतः। स्वभावरमणीयां कन्दुकक्रीडां वर्णयन् महाबलः वायुरेव मोहपरवशः सन् क्रीडापरवशायाः वसनान्तरं प्रवेष्टुं प्रयतते इति वर्णयति इत्थम् – " किं बहुना! शङ्के! परिवर्तनविवर्तनोद्वर्तनपर्याध्मातवसनान्त-रप्रवेशकुतूहलो वायुरप्येनामभिकाम्योऽनुभ्रमति। " एवं प्रतिसन्दर्भं चम-त्कारावहोऽयमवश्यं पठनीयः। अस्य भाणस्य कश्चन श्लोकः हेमचन्द्रेण स्वकाव्यानुशासने, अन्ये च केचन श्लोकाः नीलकण्ठेन स्वकाव्योल्लासे चोदाहृता इति कथयन्ति विमर्शकाः[1]। सुभाषितरत्नावल्यामस्य प्रथम-

---

1 द्र. संस्कृतभाणसाहित्यमु – (तेलुगु) पु.64

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः उदाहृतः।

अथेदानीं तत्कर्तारं शूद्रकमधिकृत्य किञ्चिद्विचार्यते। प्रसिद्धस्य मृच्छकटिकप्रकरणस्य प्रणेता शूद्रक एवास्य भाणस्य कर्तेति एतद्भाणगतैः आन्तरप्रमाणैः निश्चेतुं शक्यते इति विमर्शकाः[2]। तथाहि –

1. अत्र उज्जयिन्याः वर्णनसन्दर्भे –

   "पुण्यास्तावद्वेदाभ्यासाः द्विरदरथतुरगनिनदा धनुर्गुणनिस्वनाः।
   दृश्यं काव्यं विद्वद्वादाः चतुरुदधिसमुदयफलैः कृता विपणिक्रिया।।"

   इति वेदाभ्यासः वर्णितः। मौर्यानन्तरं शुङ्गवंशीयाः राजानः बौद्धमतप्रचारेण नष्टं वैदिकसम्प्रदायं पुनरुज्जीवितवन्त इति, तस्मादेव पुष्यमित्रोऽपि 'गोमिषण्ड' इति दूषित इति ज्ञायते। एते च शुङ्गवंशीयाः भागवतसंप्रदायानुयायिनः विष्णुमन्दिरादिनिर्मातारश्च। एते च क्रीस्तोः पूर्वं 75 वत्सरपर्यन्तं शासनमकुर्वन्निति अयं शूद्रकः तदनन्तरः, तत्समानकालीनो वा भवितुमर्हति। अत्र भाणे दुष्टभागवतनिन्दाकृता[3]।

2. अवन्तिसुन्दरीकथामनुसृत्य संघिलको नाम शाक्यभिक्षुः शूद्रकहननाय प्रयत्नं कृतवानिति, शूद्रकेणैव सः हत इति च ज्ञायते। भाणेऽस्मिन्नपि तन्नामा शाक्यभिक्षुः तर्जितः।

3. अत्र भाणनायकः मूलदेवः चोरशास्त्रप्रणेतृत्वेन मृच्छकटिके वर्णितः। बाणभट्टोऽपि कादम्बर्यां विन्ध्याटवीवर्णने "कर्णीसुतकथेव सन्निहितविपुलाचला शशोपगता च" इति अस्य भाणस्य नायकं विटं च स्मृतवान्। कर्णीसुत इति मूलदेवस्य नामान्तरमिति पूर्वमेवोक्तम्।

---

2 'शृङ्गारहाट' – मोतीचन्द्रस्य प्रस्तावना।

3 'अचौक्षः चौक्षवादितः' – ('चौक्षाः भागवतविशेषाः' इति अभिनवगुप्तः।)

In Public domain. Digitization: Muthulakshmi Research Academy

4. किञ्चास्मिन् मौर्यः राजा इन्द्रसेनः स्मृतः। मौर्यसाम्राज्यपतनात् परमपि तद्वंशीयाः तत्र उपराष्ट्रपालकाः आसन्निति, तत्र सौराष्ट्रस्य पालकोऽयमिति च इतिहासपरिशीलनेन ज्ञायते।

5. स्त्रीणां ब्रह्मचर्यं प्राचीनकाले आसीत्। अत्र काचित् कपटब्रह्मचारिणी वर्णिता।

6. 'भिक्षुः वेशवाटीं प्रविष्टश्चेत् गौरवं नार्हति' इत्यस्य दृष्टान्ततया दत्तकसूत्रस्थ ओङ्कारोऽत्र सूचितः[4]। वात्स्यायनात् पूर्वतनोऽयं कामशास्त्रवेत्ता। अयं क्रिस्तोः पूर्वं प्रथमशताब्देऽवर्ततेति विमर्शकानामाशयः।

7. भारतेतिहासमनुसृत्य शातवाहनवंशीयः शिवस्वातिः शूद्रकेन हत इति ज्ञायते। स च शिवस्वातिः क्रि.श. प्रथमशतके 81 वर्षमारभ्य उपविंशतिः वर्षाणि राज्यमकरोदिति, अतश्च शूद्रकोऽपि तत्समकालीनः भवतीति विमर्शकाः[5]।

8. शालिवाहनसभापण्डितः शर्ववर्मा कातन्त्रव्याकरणमरचयत्। तच्च तस्मिन् काले पाणिनीयमतिक्रम्यावर्तत। ततः परं राज्याधिकारं प्राप्य शूद्रकः पुनः पाणिनीयं प्रचारे आनीतवानिति दत्तकलशिपात्रेण ज्ञायते।

9. एतद्भाणचतुष्टये अयमेव प्रथम इत्यत्र निदर्शनम् अङ्गनाजनस्य प्रियाभिसरणेऽनासक्तेः, तासां तद्विषये वैमत्यस्य च वर्णनमेव[6]। शिष्टभाणत्रये अङ्गनानां प्रियाभिसरणमेव प्रधानतया वर्णितम्। कालिदासोऽपि "गच्छन्तीनां रमणवसतिं" इत्यादिना प्रियाभिसरणं

---

4 वेश्याङ्गणं प्रविष्टो मोहाद्भिक्षुर्यदृच्छया वापि।
न भ्राजते प्रयुक्तो दत्तकसूत्रेष्विवोङ्कारः।। प्र.प्रा.

5 Krishnamachariar, History of classical Sanskrit literature - see 'Śudraka'

6 "स्त्रिया नाम पुरुषोऽनुनेयः, ननु शौण्डीर्यम्" - प.प्रा.

In Public domain. Digitization Muthulakshmi Research Academy

वर्णितवान्। अत एतद्भाणरचनाकालः मेघसंदेशरचनाकालात् पूर्वतन इति वक्तव्यम्।

10. अत्र संघिलकनामदुष्टशाक्यभिक्षोः वर्णनसन्दर्भे "अहो! सारिष्ठता बुद्धशासनस्य। यदेवंविधैरपि वृथामुण्डैरसद्भिक्षुभिः उपहन्यमानं प्रत्यहमभिपूज्यत एव " इति कथनेन बौद्धस्य सम्यक्प्रचारसमये एव अयं भाणः रचितः इति ज्ञायते।

11. अत्र स्मृतं कुमुद्वतीप्रकरणं, सौन्दरनन्देऽपि स्मृतमिति बौद्धकाले एव प्रचारे स्थितस्योल्लेखादपि तत्कालीनता अस्य सिद्ध्यति।

12. अत्र'देवानां प्रिय' इति मूर्खपर्यायत्वेन न प्रयुक्तः। अपि तु आदरार्थे एव। किञ्चात्रत्या भाषा, शैली च मृच्छकटिकमनुसरत इति द्वयोरेककर्तृकत्वं, भाणस्यास्य प्राचीनता, क्रिस्तोः पूर्वं प्रथमशताब्द्यां, क्रि. श. प्रथमशताब्द्यां वा अयमासीदिति च विमर्शकाः।

13. अत्र काव्यव्यसनी कात्यायनगोत्रः सारस्वतभद्रः एवं स्तुतः -

सूर्यं यजन्ति दीपैः समुद्रमद्भिः वसन्तमपि पुष्पैः।
अर्चामो भगवन्तं वयमपि वागीश्वरं वाग्भिः।। प.प्रा.6।।

पतञ्जलिः महाभाष्ये वार्तिकारं दाक्षिणात्यं कथयति[7]। अतः कात्यायनः वररुचिः अवन्तिदेशीयः स्यात्। एतद्गोत्रीयाः सर्वेऽपि कवितादक्षाः स्युः। अथवा भाणकर्ता वररुचिरेव अत्र सादरं स्मृतः स्यात्। अनेनैव प्रमाणेन वररुचेः 'उभयाभिसारिका' भाणेषु प्राचीनेति केचिद्वदन्ति। यदि च तथा स्यात् तर्हि साक्षात् वररुचिरेव स्तुतः स्यात्। अतः शूद्रकाद्वररुचिः भाणकर्ता पूर्वतनः न भवेदेव, वैयाकरणः वररुचिः अन्यः, भाणकर्ता च अन्य इति वदन्ति अन्ये।

7 'प्रियतद्धिताः दाक्षिणात्याः' – महाभाष्यम् – पस्पशाह्निकम्।

In Public domain. Digitization Muthulakshmi Research Academy

2.2 उभयाभिसारिका – वररुचिः

भाणचतुष्टये द्वितीयस्थाने स्थितोऽयं भाणः वररुचिरचिता उभयाभिसारिका। उभयाभिसारिकेति नाम्नैवात्रत्यमितिवृत्तं नायिकानायकयोः परस्पराभिसरणरूपमिति ज्ञायते। अत्रायं कथांशः – सागरदत्तश्रेष्ठिनः पुत्रस्य कुबेरदत्तस्य, तत्प्रियायाः नारायणदत्तायाः च मध्ये प्रणयकलहः जातः। कुपिता नारायणदत्ता कुबेरदत्तमनादृत्य गता। विरहसन्तप्तः कुबेरदत्तः स्वपरिचारकं सहकारनामानमाहूय तन्मुखेन वैशिकाचलं (प्रकृतभाणे विटस्य नाम) प्रति इत्थं सन्देशं प्रेषयति – "नारायणमन्दिरे मदनमहोत्सवमनुलक्ष्य प्रदर्शिते सङ्गीतनाटके रसानुगुणमभिनयन्ती मदनसेना मया प्रशंसिता। तद्दृष्ट्वा नारायणदत्ता, अहं मदनसेनामिच्छामीति भ्रान्त्या कुपिता सती, पादपतितमपि माम् अनादृत्य गतवती। तस्यामनुरागेण परितप्तहृदयोऽहं रात्रौ निद्रां न लब्धवान्। अतः आवयोः सन्धिं विधातुं वैशिकाचलं प्रार्थये" – इति। एवं सन्देशं प्राप्य वैशिकाचलः प्रातरेव प्रस्थितः मित्रकार्यार्थम्। कुसुमपुरराजमार्गान्, विपणिं, प्रासादांश्च वर्णयन् अग्रे गच्छतः तस्य चरणदास्याः वेश्यायाः पुत्री अनङ्गदत्ता सम्मुखम् आगता। सा च प्रणयपरिश्रमेन श्रान्ता, महामात्यपुत्रस्य नागदत्तस्य प्रासादात् आगच्छतीति, सा च वयसा सौन्दर्येण च अनुगुणं निर्धनमपि नागदत्तं वृतवतीति ज्ञात्वा, तामाशीर्वचनेनाभिनन्द्य अग्रे गच्छन् विष्णुदत्तायाः सुतां माधवसेनां मिलति। एषा तु केवलं धनासक्तचित्ता कुरूपिणा धनिना समुद्रगुप्तेन सङ्गता। एतामपि व्यङ्ग्यमर्यादया अभिनन्द्य, विलासकौण्डिनीं परिव्राजिकां नर्मगर्भभाषणेन परिहस्य अग्रे गच्छति। तदा मार्गमध्ये रामसेना दृष्टिपथमागता। इयं च चरणदास्याः माता, धनिकसमीपं गतां चरणदासीं सङ्गीतकव्याजेन ततः आनेतुं प्रस्थितेति ज्ञात्वा, वेश्यामातॄणां दौष्ट्यं वर्णयति। ततः राजस्यालभवनादगच्छन्त्या सुकुमारिकयाभा–

In Public domain. Digitization Muthulakshmi Research Academy

ष्याग्रे गच्छतः दृष्टिपथे निर्धनीकृत्य वेश्याभिः बहिर्निष्कासितः सार्थक-श्रेष्ठिपुत्रः धनमित्रः आगतः। तं च सान्त्वनवचनैः अनुनीय, प्रियङ्गुसेनया सहाभाष्य निर्गतः सः नारायणदत्तायाः चेटीं कनकलताममिलत्। कन-कलताद्वारा "विरहपरितप्ता नारायणदत्ता कुबेरदत्तस्य गृहं प्रति प्रस्थिता। तथा कुबेरदत्तोऽपि विरहमसहमानः नारायणदत्तागृहं प्रति प्रस्थितः। उ-भावपि मार्गे वीणाचार्यस्य विश्वासोः गृहे मिलितौ। वीणाचार्यश्च तावुभौ स्वगृहस्यान्तः नीतवान्। रात्रौ ताभ्यां तत्रैवोषितम्। ततः प्रातः नाराय-णदत्ता वैशिकाचलमानेतुं तां प्रेषितवती"ति ज्ञात्वा, तावाशीर्वचनेनाभि-नन्द्य निष्क्रमते। अत्र सर्वस्यापि इतिवृत्तस्य वेशवाटीसम्बन्धे सत्यपि न क्वापि उदात्तत्वस्य भङ्गः। नायिकानायकयोः उभयोः परस्परमभिसरणेन अयं भाणः उभयाभिसारिकेति अन्वर्थनामा भवति।

अथेदानीमत्रत्यकवितासौन्दर्यं नर्मसम्भाषणं च किञ्चित् परिशीलयामः। विलासकौण्डिनीनाम्न्या परिव्राजिकया सह सम्भाषणे अयं स्वीयशास्त्र-पाण्डित्यं, कविताप्रागल्भ्यं च कथं प्रदर्शयति पश्यन्तु।

'अये! एषा विलासकौण्डिनी नाम परिव्राजिका। अस्याः पटवास-गन्धोन्मत्ताः भ्रमन्तो मधुकरगणाः चूतशिखराण्यपि त्यक्त्वा परिव्रजन्ति खल्वेनाम्। अभिभाषिष्ये तावदेनाम्। यतो नयनश्रवणकुतूहलमपनेष्यामि। भगवति! वैशिकाचलोऽहमभिवादये! किं ब्रवीषि – "न वैशिकाचलेन प्र-योजनम्। भवेद्वैशेषिकाचलेन" इति। अस्त्वेतत्कारणं कुतः–

दृष्टिस्तेऽतिविशालचारुरुचिरा नैकत्र सन्तिष्ठते
ग्लान्या क्लान्ततरं रतिश्रमयुतं शून्याधरोष्ठं मुखम्।
आचष्टे सुरतोत्सवप्रकरणं खेदालसा ते गतिः
व्यक्तं ते कथितं प्रियेण सुभगे रत्यर्थवैशेषिकम्॥" इति।

In Public domain. Digitization Muthulakshmi Research Academy

एवं वेश्यामात्रा रामसेनया सह सम्भाषणमपि सहजं हृद्यं च। यथा – "नमोऽस्त्वस्यै कामुकजनमहाशनये। बाले! रामसेने! दुहितृसङ्क्रान्त–यौवनसौभाग्ये! कतरस्य कामिनः कुलोत्सादनार्थमभिप्रस्थिता भवती। भोः। त्वद्दर्शनेन शपथ एव नः प्रतिवचनम्। किं ब्रवीषि – "त्वच्छीलमेव त्वामाक्रोशयति" इति। अलमत्र बहुभाषित्वेन। त्वद्गमनमेव तावदुच्यताम्। किं व्रवीषि – " दुहिता मे चरणदासी व्यतीतेऽहनि गता धनिकोदवसितम्। एनां सङ्गीतकव्यपदेशेन आकर्षितुमभिप्रस्थितास्मि।" इति। "अहो नु खलु चरणदास्याः प्रमादः। कुतः कामुकजनसर्वस्वग्रहणकुशलायाः, नि–ष्पीतसारपरित्यागसामर्थ्ययुक्तायाः तवापि नाम दुहिता भूत्वा शास्त्रोपदे–शाग्रहणेन शोच्या खलु सा तपस्विनी। " इति।

एवं तृतीयप्रकृत्या सुकुमारिकया सह सम्भाषणमपि चमत्कारावहम्। राजस्याले रामसेने अनुरक्ता एषा 'कुपितः रामसेनः सङ्गमविमुखः जातः' इति विटं प्रति कथयति। तदा विटः एनामित्थं परिहसति – "अहो! रामसेनस्य प्रमादः। कुतः –

व्याक्षेपं कुरुतः स्तनौ न सुरते गाढोपगूढस्य ते
रागघ्नस्तव मासि मासि सुभगे! नैवार्तवस्यागमः।
रूपश्रीनवयौवनोदयरिपुर्गर्भोऽपि नैवास्ति ते
त्वामेवं सुगुणां विहास्यति स चेत् रत्युत्सवं त्यक्ष्यति।।" इति।

एतादृशनर्मगर्भालापानामाकरोऽयं भाणः। अत्र प्राचीनं संस्कृतभाषायाः व्यावहारिकं रूपं पठितृनाश्चर्यचकितान् करोति।

एतद्भाणकर्ता **वररुचिः** व्याकरणशास्त्रवार्तिककारत्वेन प्रसिद्धः वररु–चिरेवेति, अतः अयमेव भाणः चतुर्षु प्राचीन इति केचन[8] अभिप्रयन्ति। एते च स्वीयमभिप्रायमित्थं समर्थयन्ति– "कथासरित्सागरे वररुचेः च–

8 द्र० – संस्कृतभाणसाहित्यमु – (तेलुगु) पृ. 59

In Public domain. Digitization Muthulakshmi Research Academy

रितमित्थं वर्णितम्। अयं पाणिनिसमकालिकः, पाणिनेः सहाध्यायी च। व्याडिः अमुम् उपवर्षोपाध्यायसमीपं नीतवान्। अयं बाल्ये एव पितृवियोगं प्राप्तवानिति, अस्य जन्मस्थानं गोदावरीतीरमिति, माता सात्रायणीति, अवन्तिसुन्दरीकथासारात् ज्ञायते। अयं व्याकरणशास्त्रे वार्तिकानि, ज्योतिशास्त्रे धर्मशास्त्रे च ग्रन्थान्, कण्ठाभरणकाव्यं चारचयदिति राजशेखरः कथयति। अतः एतद्भाणकर्तापि वैयाकरणः वररुचिरेव। शूद्रकेनापि पद्मप्राभृतकभाणे कात्यायनगोत्रः सारस्वतभद्रः वर्णितः। स च प्रायः अयमेव स्यात्। अतः अयं क्रिस्तोः पूर्वं तृतीयशतकप्रथमशतकयोः मध्ये आसीदिति विमर्शकाः वदन्ति। अतः नायं कालिदाससमकालिकः। विक्रमसभायां नवरत्नेषु कालिदासेन सह अयमप्यासीदिति किं वदन्ती सत्यदूरा।" इति

अन्ये तु आन्तरैः प्रमाणैः अयं वैयाकरणवररुचेः भिन्न इति कालिदाससमकालिक इति, विक्रमस्य आस्थाने कालिदासेन सह अवर्ततेति चेत्थं निरूपयन्ति –

1. भाणेऽस्मिन् नारायणमन्दिरवर्णनमस्ति। नारायणमन्दिराणि शुङ्गवंशीयराजैः निर्मितानीति विमर्शकानामाशयः।
2. भाणोऽयं भरतनाट्यशास्त्रादर्वाचीन इत्यपि ज्ञायते। यतः भरतनाट्यशास्त्रे गणिकासु आदरभावः प्रदर्शितः। परन्त्वत्र "अविश्वसनीयानि गणिकाजनहृदयानि" इति गणिकाजनदूषणं विहितम्।
3. पद्मप्राभृतके प्रियाभिसरणं निन्दितम्। परन्त्वत्र एतदेवेतिवृत्तम्। अनन्तरेष्वपि तदेव वर्णितमप्यस्ति। अतः पद्मप्राभृतकादयम् अर्वाचीन एव। किञ्च पद्मप्राभृतके कात्यायनगोत्रः सारस्वतभद्रः स्तुतः। यदि वररुचिः ततः पूर्वः स्यात् तर्हि तस्यैव स्तुतिः कृता स्यात्।

In Public domain. Digitization Muthulakshmi Research Academy

4. "धन्वन्तरिक्षपणकमरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः ।
खयातो वराहमिहिरः नृपतेः सभायां रत्नानि वै वररुचिः नव विक्रमस्य ।।"
इति ज्योतिर्विदाभरणश्लोकः प्रमाणभूत एव भवितुमर्हति, न किंवदन्तीरूपः । यतः विक्रमादित्यसभायां नवरत्नानां स्थितिः बहुभिर्वर्णिता । अतः कालिदाससमकालीनोऽयं पाणिनिसहाध्यायितः भिन्न एव ।

अथात्र कालिदासस्य समयः क इत्यत्रापि विमर्शकेषु भिन्नाभिप्रायाः दृश्यन्ते । केचन शककर्तुः विक्रमादित्यस्य सभायां कालिदास आसीदिति अमुमेव श्लोकमाधारीकृत्य कथंयन्ति । तेषां मते क्रिस्तोः पूर्वं प्रथमशतकं कालिदासस्य अस्य च कालः भवति । अन्ये तु 'नवविक्रमस्य' इति स्वीकृत्य नवविक्रमसभायां गुप्तवंशीयस्य द्वितीयविक्रमादित्यस्य सभायां कालिदासस्य अस्य च स्थितिं वदन्तः क्रिस्तोः परं चतुर्थं शतकमस्य समय इति कथयन्ति । यतः चरित्रकाराः चन्द्रगुप्तविक्रमादित्यस्य समयं क्रि. श. 351–413 मध्ये स्वीकुर्वन्ति । अतः कथमपि कालिदाससमकालीनोऽयं क्रि.पू. प्रथमशतकात् पूर्वतनः न भवति इति तेषामाशयः । तथा चेदयं वररुचिः शूद्रकसमकालीनः अपि भवेत् । वररुचिरीश्वरदत्तः श्यामलकः शूद्रकश्चेति चत्वारः भाणकर्तारः किञ्चिदितस्ततः समीपकालस्था एव भवेयुः । एतद्भाणचतुष्टयेऽपि भारतस्य अत्युत्कृष्टा वैदिकसंस्कृतिः प्रतिबिम्बिता इति, अतः वैदिकमतपुनरुद्धारकाल एव एतेषां काल इत्यपि समुचितं भवति इति अन्येषामाशयः[9]।

9 'शृङ्गारहाट' (चतुर्भाणी) मोतीचन्द्रस्य भूमिका

In Public domain. Digitization Muthulakshmi Research Academy

2.3 धूर्तविटसंवादः – ईश्वरदत्तः

अयं भाणः इतरभाणापेक्षया विलक्षणः दृश्यते। अत्र विटः देविलकः द्यूते नष्टसर्वस्वः वर्षासमये केवलं कालयापानार्थं बहिरागतः वेशवाटिकायां सञ्चरति। अन्यभाणेष्विव अस्य मित्रकार्यं वा स्वकार्यं वा सम्पादनीयं नास्ति। वेशवाटिकायां प्रविष्टोऽयं श्रेष्ठिपुत्रेण कृष्णिलकेन, बन्धुमत्या, वारुणिकया, रामदास्या रतिसेनया च सम्भाष्य, प्रत्यग्रसम्भोगचिह्नां प्रद्युम्नदासीं परिहस्य सुनन्दाविश्वलकयोः गृहं प्रविष्टः। तत्र च विश्वलकः कामतन्त्रे अनेकान् विषयान् पृच्छति। देविलकश्च सर्वेषां शास्त्रीयं समाधानं यच्छति। एतावुभावपि वीथीषु अटन्तौ प्रथमसमागमः, स्त्रियाः अनुनये पद्धतयः, स्त्रीवशीकरणं, दक्षिणनायकस्य स्वभावः, वेश्योपचाराः, गोत्रस्खलनानि, अभिसारिकाः इत्यादिकामतन्त्रविषयेषु अनेकेषु विस्तरेण चर्चां कुरुतः। अयं च संवादः प्रश्नोत्तररूपो भवति। अत्र विश्वलकः प्रष्टा। व्याख्याता च भाणनायकः विटः देविलकः। अत्र द्वयोः संवाद एव मुख्यमितिवृत्तमिति कृत्वा 'धूर्तविटसंवाद' इति नाम सार्थकम्। भरतनाट्ये स्थितस्य वैशिकाधिकरणस्य व्याख्यारूपोऽयं भाण इति विमर्शकाः मन्यन्ते। अत्रापि नर्मगर्भसंभाषणं मनोहरम्। भाणेऽस्मिन् कुसुमपुरमित्थं वर्णितम् –

> दातारः सुलभाः कलाः बहुमताः दाक्षिण्यभोग्याः श्रियः
> नोन्मत्ता धनिनो न मत्सरयुता विद्याविनीता नराः।
> सर्वः शिष्टकथः परस्परगुणग्राही कृतज्ञो जनः
> शक्यं भो नगरे सुरैरपि दिवं सन्त्यज्य लब्धुं सुखम् ।।

नगरेषु एतादृशं वैशिष्ट्यं गुप्तराजशासनकाले आसीदिति विमर्शकाः। अतोऽयं भाणः गुप्तराजशासनकाले रचितः स्यादित्यभ्यूहः।

In Public domain, Digitization Muthulakshmi Research Academy

चमत्कारावहसम्भाषणे, नर्मगर्भभाषणे च सिद्धहस्तोऽयं कविः। अत्र विटानां स्वपितृभिः जन्यमानाः बाधाः सचमत्कारं वर्णिताः। 'यौवनं प्राप्तस्य पुरुषस्य पिता नाम शिरोवेदनम्। परंस्परजिगीषया विविधपणबन्धेन च तेजस्विनः पुरुषस्य निकषोपलरूपं द्यूतं द्रष्टुमपि अवसरो न लभ्यते। किमुत क्रीड़ितुम् ? कामिनीनिःश्वासतरङ्गितस्य मयूराकारपात्रस्थस्य मद्यस्य गन्धमपि आघ्रातुं नास्त्यवकाशः। वेशावाटीषु प्रवर्तमानानि कुक्कुटादियुद्धानि द्रष्टुं वा, तेषु पणबन्धादिना भागं ग्रहीतुं वा नास्त्यवरसरः। भवतु एते निन्द्याः। परन्तु अनिन्द्येष्वपि कार्येषु प्रवृत्तेरपि अवरोधं कल्पयन्ति एते। यथा मित्रस्य कृते साहाय्यादिषु। एते च पितरः किं सर्वथा शुद्धचारित्रा वा ? नैव। एतेऽपि स्वयौवने वेशवाटीं प्रविष्टा एव। पुत्राणां समये आसन्ने तु तान्निवारयन्ति। यथा परशुरामः लोकमक्षत्रियमकरोत् तथा लोकमपैतृकं कर्तुं मतिर्भवति।' इति श्रेष्ठिपुत्रः कृष्णलकः विटं प्रति इत्थं कथयति–

"पिता नाम खलु सयौवनस्य पुरुषस्य मूर्तिमान् शिरोरोगः। न च किल भो पितृमता शक्यं परस्परामर्षविवर्धितपणरागस्य साधिक्षेपवचनालङ्कृतस्य तेजस्विपुरुषनिकषोपलस्य द्यूतस्य दर्शनमात्रमप्युपलब्धुम्। न च किल शक्यं समुचितोत्पलखण्डकानां सहकारतैलोद्गतचन्द्रकानां कामिनीनिश्वासविक्षोभिततरङ्गाणां प्रवृत्तबर्हिणाकाराणां वारुणीचषकाणां गन्धमात्रमपि विज्ञातुम्। न च किल शक्यं द्विधाभूतगोष्ठीजनेषु वयस्यार्धासनोपविष्टगणिकाजनेषु कामिनीसान्निध्यादमीमांसितपणेष्वासक्तमण्डलेषु पक्षियुद्धेषु प्राश्निकंत्वमपि कर्तुम्। न च किल शक्यं वातायनाभोगविनिष्पतितपीनपयोधराभिः ससम्भ्रमोद्धूतललिताग्रहस्ताभिः पौरवधूभिः सबहुमानमवेक्ष्यमाणस्य मदरभसस्य गजपतेः पन्थानमनुसर्तुम्। न च किल शक्यमर्धोरुकपरिहितेनाकृष्टखड्गमात्रसहायेनाकृपणां वृत्तिमाकाङ्क्षता मि–

In Public domain. Digitization Muthulakshmi Research Academy

त्रार्थे बन्धनच्छेदोद्यतेन प्रज्वलितोल्कापिङ्गलासु वीररात्रिषु नरपतिमार्गमवगाहितुम्। न च किल शक्यं प्रत्युपकारचिन्तोपहितचित्तेन सनिवृत्तश्लाघादोषेण प्रत्युपकारपीडितेन मित्रार्थं सर्वस्वत्यागं कर्तुम्। सर्वं चैतत्सह्यम्। यत्तु दासीपुत्राः पितरः स्वयमप्यननुभूतयौवना इव धनकुप्यार्थं वेशवधूभ्यः पुत्रान् धारयन्ति। अत्र मे गृहीतपरशोः जामदग्न्यस्य रामस्य क्षत्रियवधोद्यतस्येव लोकमपैतृकं कर्तुं मतिर्जायते। अथवा यौवनमतिलङ्घितं नु कुवृद्धैः। न चैतद्विजानन्ति तपस्विनः यथा विकचकमलान्तर्गतसलिलसुरभिः अमृतरससदृशास्वादो मृतमपि पुरुषं संजीवयेद्वेश्यामुखरस इति। अपि च –

काञ्चीतूर्यमसक्तपीनजघनं विस्रम्भदत्ताधरं
श्वासोत्कम्पितनर्तितस्तनतटं भ्रूभेदजिह्मेक्षणम् ।
सीत्कारानुविषक्तरोमपुलकं कालेन कोपाञ्चितं
वेश्यानां क इहास्ति भोः मदवशादाज्ञारतं विस्मरेत् ।। इत्यादि।"

इयं च यद्यपि पितृणां निन्देव दृश्यते। परन्तु तस्मिन् काले कथं ते स्वपुत्रान् दुर्व्यसनेभ्यः रक्षन्तीति स्पष्टं भवति। अतः इयं पितृणां विषये निन्दास्तुतिरेव। एवमेव चमत्कारावहसम्भाषणस्य हास्यस्य च अयं सुनन्दागृहप्रवेशः निकषोपलः। तस्याः गृहे प्रविष्टो विटः तत्रस्थानित्थमाह्वयति – "अयमाक्रन्दः क्रियते। कोऽत्र धरते। भोः प्रयातस्येवाश्वस्य खुरपुटनिपातध्वनिः पादोत्क्षेपसमये काष्ठपादुकाशब्दः श्रूयते। सन्निहितेनात्र विश्वलकेन भवितव्यम्। हन्त! स एवैष विरौति। किं ब्रवीषि – "क एष गर्दभव्रतमनुतिष्ठति।" इति। अहं यमदूतः सुनन्दार्थमागतः। कथमस्मत्स्वरमभिज्ञाय तूष्णीं भूतः ? अंघो न प्रयच्छसि द्वारम्। तेन हि स्थिरीक्रियतामात्मा। एष शापाग्निमुत्सृजामि।

लीलोद्यतस्य कलहे नूपुरसंक्षोभनिनदमुखरस्य।

In Public domain. Digitization Muthulakshmi Research Academy

दूरीभवतु शिरस्ते विलासिनीवामपादस्य।।

एतदपावृतं द्वारम्। प्रविशामस्तावत्। किं ब्रवीषि –"किं न दयिताः स्मो भावस्य। युक्तं नामेदृशं शापोत्सर्गं कर्तुम्।" इति। सम्यगभिहितम्। ईदृशो हि शापः ब्रह्मलोकमपि कम्पयेत्। किं पुनर्भवन्तम्। तदिदानीमस्य शापस्य प्रतीकारार्थं प्रायश्चित्तम्। कुतः –

विकचनवोत्पलतिलका ससम्भ्रमोत्क्षेपचञ्चलतरङ्गा।
तस्यै देया मदिरा या हृदयकुटुम्बिनी भवतः।।" इति।

अयं च कविः प्राप्तकालज्ञः। हस्ते यदस्ति तदनुभोक्तव्यं भाविफलप्रतीक्षामकृत्वेति अस्य सिद्धान्तः। भाविनि मरणात्परं जायमानाप्सरस्सम्भोगाय हस्तमुपगतः वेश्यासङ्गः त्यक्तुं न युक्त इति अस्य आशयः। विरहरहितः अप्सरःप्रणयः न मधुरः। विरहेण असूयादिभिश्च युक्तः वेश्यासङ्गः अप्सरस्समागमादधिकः इति अस्य सिद्धान्तः। "विप्रलम्भेन विना सम्भोगः पुष्टिं नाश्नुते" इति आलङ्कारिकवचनमेवायं समर्थयति किल।

अथास्य भाणकर्तुः विषये किञ्चिद्विचारयामः। अयं च **ईश्वरदत्तः**। यतोत्रेतिवृत्तं पाटलिपुत्रसम्बन्धि अतोऽयं पाटलिपुत्रवासीति वक्तुं शक्यम्। उभयाभिसारिका – धूर्तविटसंवाद–पादताडितकेषु प्रियानुनयविषये कश्चन क्रमः दृश्यते। तदनुसारं उभयाभिसारिकानन्तरः एवायं भाण इति ज्ञायते। अयं चन्द्रगुप्तविक्रमादित्यस्य काले आसीदित्यस्य प्रमाणं किञ्चिदत्र इत्थमुपलभ्यते। ईश्वरदत्तः स्वीये भाणे रामिलकं[10] स्मरति। तत्रत्यसन्दर्भमनुसृत्य रामिलः अस्य विरोधीति ज्ञायते। अयं राजशेखरेण[11] सं–

---

10 अथ भवत्या कोऽनुगृहीतः। किमाह भवती – 'रामिलकस्योदवसितादागच्छामी' ति।

11 तौ शूद्रककथाकारौ वन्दे रामिलसोमिलौ। ययोर्द्वयोः काव्यमासीदर्थनारीश्वरोपमम्।।

In Public domain. Digitization Muthulakshmi Research Academy

स्तुतयोः रामिलसोमिलयोः अन्यतरः स्यात्। किं चात्र नग्नश्रमणकस्य[12] उल्लेखः वर्तते। अयं च विषयः जैनमतसम्बन्धि। जैनं च गुप्तयुगे प्रचारे आसीदिति विमर्शकाः। अत्र भाणे सम्यक् गुप्तसंस्कृतिः प्रतिफलिता। अयं पाटलीपुत्रं स्वर्गादपि श्रेष्ठं मन्यते, यथा कालिदासः उज्जयिनीं मन्यते। अतः चन्द्रगुप्तविक्रमादित्यस्य कालेऽयं रचितः स्यात्। अत्र वर्षर्तुवर्णनसमये "अद्य पार्थिवानामप्यन्योन्यबद्धवैरिणां प्रतिनिवृत्ताः कलहाः" इति कथनेन तस्मिन् कालेऽसकृत् युद्धानि आसन्निति ज्ञायते। अयं च चन्द्रगुप्तविक्रमादित्यस्यैव समयः इति अभ्यूहः युक्त एव भवेत्। किञ्चात्र दत्तकसूत्रमुल्लिखितम्। वात्स्यायनस्तु नोल्लिखितः। अतः वात्स्यायनात् पूर्वतनोऽयं क्रि. श. पञ्चमशतकात् पूर्वमासीदिति शक्यमुन्नेतुम्। भोजः शृङ्गारप्रकाशे, हेमचन्द्रः स्वकाव्यानुशासने च भाणममुमुल्लिखितवन्तौ। काव्योल्लासे नीलकण्ठः अत्रत्यान् बहून् श्लोकानुदाजहार।

2.4 पादताडितकम् – श्यामिलकः

अत्रेतिवृत्तमतीव विचित्रम्। चतुर्ष्वपि भाणेषु केवलमस्मिन्नेव प्रस्तावनायां कविप्रशंसा वर्तते। पात्रसूचनमपि अस्ति। अतः अयं भाणः चतुर्षु अन्तिमः अर्वाचीन इति च वक्तुं शक्यम्। अथात्रेतिवृत्तं पश्यामः। विष्णुनागः प्रणयकुपितया मदनसेनाख्यवेश्यया शिरसि पादेन ताडितः। तेन कुपितः सः "हाधिक्! पुंश्चलि! अनात्मज्ञे! यया त्वया ममास्मिन्–

प्रयतकरया मात्रा यत्नात् प्रबद्धशिखण्डके
चरणविनते पित्राघ्राते शिशुर्गुणवानिति।
सुकुसुमलवैः शान्त्यम्भोभिः द्विजातिभिरुक्षिते
शिरसि चरणो न्यस्तो गर्वान्न गौरवमीक्षितम्॥"

---

12 विश्वलको हि भक्षितसर्वस्वो नग्नश्रमणक इव शरीरमात्रावशिष्टः।

In Public domain. Digitization Muthulakshmi Research Academy

इति तां विनिन्द्य, तस्याः क्षमाप्रार्थनामपि तिरस्कृत्य ब्राह्मणाग्रहारं गत्वा "असावहं भोः। एवं कर्मा। तं मां वृषल्याः पादावधूतशिरस्कं त्रातुमर्हन्ति त्रैविद्यवृद्धाः" इति प्रायश्चित्तं प्रार्थयति। तदा ते "भोः साधो! अवलोकितान्यस्माभिः मनुयमवशिष्टगौतमभरद्वाजशङ्खलिखितापस्तम्बहारीतप्रचेतोदेवलवृद्धगार्ग्यप्रभृतीनां महर्षिणां धर्मशास्त्राणि। नैवंविधस्य महतः पातकस्य प्रायश्चित्तमवगच्छामः" इत्यवोचन्। तेन पुनः पुनः कृतां प्रार्थनामङ्गीकृत्य तेष्वेकः परिहासचतुरः भवस्वामी "विष्णुनाग! न भेतव्यम्। देशजातिकुलतीर्थाद्यनुसारेण वेदाविरुद्धानि प्रमाणान्युच्यन्ते। अतः विटसमूहमेकत्र मेलयित्वा तान् पृच्छ" इति अवोचत्। तदा विटसमावेशाय प्रस्थितः दुद्रुणमाधवः के के आह्वातव्याः इति भाणनायकं विटं पृच्छति। स च तेषां नामान्युक्त्वा वेशवाटिकां प्रस्थितः। मार्गे विष्णुदासं, मधुपानमत्तं बाष्पं, स्थाणुमित्रस्य प्रियां प्रोषितयौवनां सरणिगुप्तां च परिहासविजल्पनैः संभाव्य, वेशवाटिकां प्रविष्टः। तत्र च काकायनहरिश्चन्द्रनामानं वैद्यं, भट्टिमघवर्माणं, महाप्रतीहारकं भद्रायुधं, प्रियुङ्गवीथिकां च दृष्ट्वा, तैस्सहाभाष्य विटसमाजमगच्छत्। तत्र च विष्णुनागस्य प्रायश्चित्तविषये विचारः प्रवृत्तः। तत्र केचन "एतादृशस्य शिरसि स्वपादन्यासेन तया एव प्रायश्चित्तं विधेयम्" इत्यवदन्। तत्र परस्परं चमत्कारावहः वाग्विवादोऽपि जातः। तत्र विटमहत्तरः तस्य प्रायश्चित्तमित्थमकथयत् –

"तस्याः मदालसविघूर्णविलोचनायाः
श्रोण्यर्पितैककरसंहतमेखलायाः।
सालक्तकेन चरणेन सनूपुरेण
पश्यत्वयं शिरसि मामनुगृह्यमाणम् ।।" इति।

In Public domain. Digitization Muthulakshmi Research Academy

सर्वे एतदङ्गीकुर्वन्ति। भाणः समाप्तो भवति। केवलं कल्पितेयं कथा। अत्रैव प्रायश्चित्तनिर्णयसमये सर्वैरपि विटप्रमुखैः एवं प्रतिज्ञा कृता। यदि केनापि अयुक्तं प्रायश्चित्तमुक्तं तर्हि सः वेशवाटीतः गोष्ठीभिश्च बहिष्कृत एव स्यादिति। पश्यन्त्विदं प्रतिज्ञावचनं चमत्कारावहम् –

"द्यूतेषु मा स्म विजयिष्ठ पणं कदाचित्
मातुः श्रृणोतु पितरं विनयेन यातु।
क्षीरं श्रुतं पिबतु मोदकमत्तु मोहात्
व्यूढापतिर्भवतु योऽत्र वदेदयुक्तम्।।

अपरञ्च–

परिचरतु गुरून् अपैतु गोष्ठ्या
भवतु च वृद्धसमो युवा विनीतः।
पलितमभिसमीक्ष्य यातु शान्तिं
य इदमयुक्तमुदाहरेन्निषण्णः।।"

अतीव चमत्कारावहं किलेदम्। किञ्चात्र मद्याय काव्यविक्रयिणः कवयः रुग्णस्त्रीणां रोगनिदानव्याजेन अङ्गाङ्गस्पर्शसुखमनुभवन्तः वैद्याः, लाटडिण्डिमाः, अपगतेऽपि वयसि धनार्जनाय पुरुषाणामाकर्षणार्थं प्रयतन्त्यः गणिकाः, भागवताश्च विनिन्दिताः। शक–यवन–तुषार–पारसीक–मागध–यौधेय–रोहितक–बाह्लीक–कोंकण–लाट – शौर्पारिक–सिंहलेश–हूण – आभीय – गार्ग – निषध – आवन्तिक – सौवीर – दाशेरुक – काम्भोज – बार्बर – कारूशमलदादयः बहुदेशीयाः वर्णिताः। भाणस्येतिवृत्तमेव विचित्रमिति कृत्वा अयं भाणः आद्यन्तं रुचिरः भवति।

In Public domain: Digitization Muthulakshmi Research Academy

अथैतद्भाणकर्तुः श्यामिलकस्य विषये किञ्चित् जानीमः। अयं श्यामिलकः उदीच्यः। विश्वेश्वरदत्तः अस्य पिता[13]। अयं भाणः सुभाषितावली–काव्योल्लास–अभिनवभारती–औचित्यविचारचर्चादिग्रन्थेषु उल्लिखितः। अयं महिमभट्टस्य गुरुः इति केचन वदन्ति। क्रि. श. 800–900 मध्ये अयमासीदिति कथयन्ति चतुर्भाणीसम्पादकाः रामकृष्णकवयः। अत्रत्यैरान्तरैः प्रमाणैः अयं गुप्तकालसम्बन्धीति सुनिपुणं निरूपयति T. Burrow महाशयः[14]। अयमेवाशयः युक्ततम इति प्रतीयते। अतः तैः प्रदर्शितानि प्रमाणान्येवात्र निर्दिशामः।

1. अयं भाणः सार्वभौमनगरे प्रदर्शितः। द्वितीयचन्द्रगुप्तस्य सार्वभौम इति नामान्तरम्। शकानां हूणानां च प्रस्तावः भाणेऽस्ति। चन्द्रगुप्तस्य विजयेन शकवंशः नष्टः। हूणप्रवेशोऽपि तदैव जातः। क्रि. श. चतुर्थशतके स्कन्दगुप्तादयः हूणेभ्यः भारतं रक्षितवन्तः। इदं च सार्वभौमनगरं पश्चिमे भारतेऽस्तीति ज्ञायते। अवन्ति–मालव–अपरान्त–सौराष्ट्रदेशाः अत्रोल्लिखिताः। किञ्च

   शकयवनतुषारपारशीकैः मगधकिरातकलिङ्गवङ्गकाशैः।
   नगरमतिमुदा युतं समन्तान्महिषकचोलकपाण्ड्यकेरलैश्च।।

   इति श्लोकेन भारतस्य पूर्वदक्षिणदेशीयाः विदेशीयत्वेन परिगणिताः। अत्र निर्दिष्टानि नगराणि आनन्दपुरादीनि पश्चिमभारतीयानि। पश्चिमभारतीयराजान् जित्वा चन्द्रगुप्तः पश्चिमभारतीयनगरं स्वराजधानीमकरोत् इति ऐतिहासिकाः। अतः सार्वभौमनगरपदम् उज्जयिनीमपि परामृशेत्।

2. अत्र महाप्रतीहारः भद्रायुधः कारूषमलद–बाह्लीकयोरधिपतिरूपेण वर्णितः। लाटदेशीयः सः 'य' कारस्थाने 'ज' कारमुच्चारयति

---

13 कवेरुदीच्यस्य विश्वेश्वरदत्तपुत्रस्य श्यामिलकस्य कृतिः – प्रस्तावना

14 J. R. A. S. 1946. P. 46-53.

In Public domain. Digitization Muthulakshmi Research Academy

स्म। इदं च लाटदेशीयमुच्चारणम्। शकमालवापरान्तान् जित्वा सः भद्रायुधः गङ्गातीरे मगधराज्यस्य वृद्धिं कृतवान् इति अत्र वर्णितम्। अतोऽयं विक्रमादित्यस्य सेनापतिरिति वक्तुं शक्यते।

3. आनन्दपुरकुमारस्य भट्टिमघवर्मणः प्रस्तावोऽत्रास्ति।
4. इन्द्रस्वामी अथवा इन्द्रदत्तः इति नाम्ना प्रसिद्धः कोङ्कणप्रभुः क्रि. श. पञ्चमे शतके आसीत् इति त्रैकूटशासनात् ज्ञायते। इन्द्रदत्तकुलं दक्षिणगुजरातप्रान्तम् अपालयत् इति क्रि. श. 456 वर्षीय दहरदहरशासनेन ज्ञायते।
5. अत्र हरिश्चन्द्रनामा वैद्यः वर्णितः। एष हरिश्चन्द्रः कालिदाससमकालिक इति राजशेखरः काव्यमीमांसायाम् उक्तवान्। "गौडवहो" नाम्नि काव्ये भासकालिदासादिभिः समम् हरिश्चन्द्रोऽप्युक्तः। महेश्वरोऽपि स्वीयविश्वप्रकाशकोशे 'चरकटीकाकारः हरिश्चन्द्रः चन्द्रगुप्तविक्रमादित्यस्य समयेऽवर्तत' इति अवदत्।
6. शुङ्गयुगमारभ्य गुप्तयुगपर्यन्तं यक्षचित्रलेखनं भारते आसीत्। गुप्तयुगसंस्कृतेः अयं कश्चिद्विशेष इति ऐतिहासिकाः। भाणेऽस्मिन् "आलेख्ययक्ष इव दर्शनमात्ररम्य" इति यक्षचित्रप्रशंसापि वर्तते।
7. बौद्धधर्मपरिहासवाक्यान्यत्रस्थानि वज्रयानबौद्धसम्बद्धानि।
8. अत्र वर्णिताः सुवर्ण–माषक–माषकार्थ–काकिणीत्यादि मुद्राः सर्वाः अपि गुप्तयुगसम्बन्धिन्य एव।

एतत् परिशीलनेन अयं भाणः गुप्तराजधानीपरिवर्तनसमये कुमारगुप्तस्य पट्टाभिषेकात् पूर्वं क्रि. श. 405–414 मध्ये रचित इवाभाति।

In Public domain. Digitization Muthulakshmi Research Academy

2.5 मेघदूतस्य मूलम्

चतुर्भाण्यां प्रतिबिम्बितायाः संस्कृतेः परिशीलनेन, तत्तद्वर्णनपरिशीलनेन च तस्मिन् काले भवनद्वारसमीपस्थकुड्येषु यक्षादीनां चित्राणि चित्रितानीति श्रूयते। एतादृशचित्रदर्शनेन प्रभावितः कालिदासः मेघसन्देशे यक्षमेव नायकं कृतवान् स्यात्। यतः कालिदासः शककर्तुः विक्रमादित्यस्य, चन्द्रगुप्तविक्रमादित्यस्य वा समकालिकः भवतु नाम। परन्तु तदानींतनी संस्कृतिस्तु एकरूपा एव। अन्यथा हनूमत्सन्देशेन सन्देशकाव्यरचनायां प्रेरितोऽपि किमर्थं यक्षमेव नायकं कुर्यात्? अतः असंशयं कालिदासः यक्षचित्रेण प्रभावितः एवमकरोत् इति विभावनीयम्। एवं प्राचीनसंस्कृतेः, अमृतमयव्यावहारिकसंस्कृतस्य, प्राचीनवाङ्मयस्य च दर्पणभूतमेतद्भाणचतुष्टयमद्वितीयमिति नातिशयोक्तिः। उपलभ्यमानेष्वपि भाणेषु एतद्भाणचतुष्टयसमः कोऽपि नोपलभ्यते।

पूर्वोक्तेन निरूपणेन एते चत्वारः अपि भाणाः क्रि. श. पञ्चमशतकादर्वाचीनाः न भवन्त्येव। एतद्भाणचतुष्टयात्परं द्वादशशतकपर्यन्तं भाणग्रन्थानां रचनाविषये किमपि न ज्ञायते। यतः क्रि. श. पञ्चमशतकैकादशशतकयोः मध्ये रचिताः भाणग्रन्थाः नोपलभ्यन्ते। परन्तु क्रि. श. दशमशतके स्थितः सागरनन्दी स्वीये नाटकलक्षणरत्नकोशे पत्रलेखा, ललितनागरः, वीणावती इति भाणत्रयमुदाजहार। क्रि. श. 1172–1250 मध्ये स्थितः शारदातनयः स्वीये भावप्रकाशे नन्दिमती, शृङ्गारमञ्जरी, वीणावती इति भाणत्रयमुदाजहार। भोजः स्वीये शृङ्गारप्रकाशे मुकुटताडितक भाणमुदाहृतवान्। ततश्च पत्रलेखा, ललितनागरः, वीणावती, नन्दिमती, शृङ्गारमञ्जरी, मुकुटताडितकमिति षट् भाणग्रन्थाः एतन्मध्यकालीनाः ना–

In Public domain. Digitization Muthulakshmi Research Academy

ममात्रावशिष्टाः[15]। अतश्चोपलभ्यमानेषु एतद्भाणचतुष्टयात्परं कालं रचनावैशिष्ट्यं चाश्रित्य उल्लेखनीयः वत्सराजविरचितः **कर्पूरचरितभाणः**।

2.6 कर्पूरचरितम् – वत्सराजः

सर्वेष्वपि भाणेषु अल्पकायोऽयं भाणः। एकपात्रप्रयोज्यत्वेन अल्पकायत्वे एव भाणस्य प्रदर्शनयोग्यता भवति। अतः प्रदर्शनयोग्यतया रचितोऽयं भाणः परमर्थिदेवस्य आध्वर्यवे प्रदर्शितः। **भाणस्तु धूर्तचरितमिति**लक्षणमत्र सुसङ्गतं भवति। शृङ्गारः – वञ्चना – द्यूतं – मद्यापणः – चौर्यमित्यादिविषयाः अत्र प्रधानाः। एते सर्वेऽपि नायकस्य धूर्तत्वसूचकाः।

अत्र इयं कथा। अत्र नायकः कर्पूरकः द्यूतशालार्थमभिप्रयातः मार्गे मित्रं चन्दनकं मिलति। तस्मै स्वीयप्रेमोदन्तमित्थं वर्णयति–विलासवत्यां नायिकायां कर्पूरकः अनुरक्तः। सापि कर्पूरके अनुरक्ता। विलासवत्याः माता कलावती स्वपुत्रीम् कर्पूरकाय दातुं नेच्छति। अपितु धनिकाय मञ्जीरकाय दातुम् इच्छति। कलावत्याः प्रयत्नं विघटयितुं कर्पूरकः स्वेन चन्द्रसेनागृहात् अपहृतं चीनांशुकद्वयं नीत्वा मञ्जीरकस्य गृहं गत्वा 'विलासवती भवति अनुरक्ता विरहबाधामनुभवति। अतोहं तस्या मात्रा प्रेषित' इति मञ्जीरकमुक्त्वा, तस्मै चौर्यादानीतं चन्द्रसेनायाः चीनांशुकद्वयं विलासवत्या प्रेषितमित्युक्त्वा अदात्। उक्तवांश्च कर्पूरकस्तं– 'विलासवती एतत्परिधाय आगन्तुमुक्तवती' ति। मञ्जीरकः तत्सर्वं सत्यमिति विश्वस्य अतीव सन्तुष्टः कर्पूरकाय स्वीयमङ्गुलीयकं पारितोषिकरूपेण दत्त्वा, तद्वस्त्रद्वयं परिधाय विलासवत्याः समीपं प्रस्थितः आसीत्। अत्रान्तरे कर्पूरकः चन्द्रसेनागृहं गत्त्वा मञ्जीरकस्योपरि चौर्यमारोपयितुं तां प्रेरितवान्। तया तथा कृते सति मञ्जीरकः कारागारे बद्धः आसीत्। अनन्तरं कर्पूरकः

---

15 संस्कृतभाणसाहित्यमु –(तेलुगु) P. 183

In Public domain. Digitization Muthulakshmi Research Academy

मञ्जीरकस्य गृहं गत्त्वा तेन दत्तम् अङ्गुलीयकं प्रदर्श्य तस्य मञ्जीरकस्य धनं सर्वमपाहरत्। मञ्जीरकस्य मित्रं चन्दनकः चन्द्रसेनायामनुरक्तः आसीत्। सापि चन्दनकं धनहीनं कृत्वा परित्यज्य अन्यधनिकेन हरदत्तेन सङ्गता आसीत्। अतश्च चन्दनकः चन्द्रसेनायाः तद्प्रियस्य च सर्वनाशनमिच्छति स्म। ततश्च कर्पूरकः मणिभद्र इति मान्त्रिकस्य समीपं गतवान्। तत्समये हरदत्तस्य सेवकः मणिभद्रसमीपमागत्य, तस्मै किञ्चिद्धनमुपायनीकृत्योक्तवान् – 'भवत्साहाय्येन हरदत्तः द्यूते जयं प्राप्तवान्। तदर्थमिदमुपायनम्' इति। यदि हरदत्तस्य भ्राता कनीयान् देशान्तरगतः आगच्छेत्, तर्हि इतोऽपि उपानयानि प्राप्स्यति भवान्' इत्यप्युक्त्वा गतवान्। ततश्च कर्पूरकः हरदत्तकनिष्टभ्राता निपुणक इव नटन्, हरदत्तस्य गृहं गत्वा तस्य धनं सर्वमपहृतवान्। ततश्च स्वमित्रस्य मणिभद्रस्य साहाय्येन विलासवत्या सह स्वस्य समागमे विघ्नभूतां विलासवतीमातरं मातादुहित्रोर्मध्ये कलहमुत्पाद्य विलासवत्या स्वगृहात् निष्कास्य विलासवतीमात्मीयामकरोत्।

अयं च भाणः प्राचीनभाणैः सह तोलयितुमर्हः चमत्कारसन्निवेशनिर्वहणे। अत्रापि प्रस्तावनायां सूत्रधारः प्रविश्य आकाशभाषितं करोति। अस्य नायकः कर्पूरकः द्यूतकरः। अयं रङ्गं प्रविश्य स्वमित्रेण सह भाषमाण इव स्वीयं साहसचरितं वर्णयति। अतोऽयमन्वर्थनामा भाणः। वार्तालापे प्राकृतप्रयोगमपि स्वेच्छया करोति। अतोऽयं मिश्रभाणः। मिश्रभाणेषु उपलभ्यमानेषु अयमेव प्रथमः। अत्र द्यूतम्, अनुरागः, मद्यपानं च प्रधानानि। मध्ये मध्ये सहृदयेषु आसक्तेः वर्धनाय हास्यरससन्निवेशाः अपि योजिताः। अत्र शैली सरसा, सरला च। दीर्घसमासप्रयोगः दुरूहपदानां प्रयोगो वा नास्त्येव। आलङ्कारिकनियमशृङ्खलां भित्त्वा नूतनः पन्थाः भाणरचनायामत्र दृश्यते। अनन्तरभाणानां चायमेव मार्गदर्शक इत्यपि वक्तुं

In Public domain. Digitization Muthulakshmi Research Academy

शक्यम्। अत्र कवितारीतिः अत्यन्तं हृद्या। सन्निवेशोचिताः भावाः, भावोचितः शब्दगुम्फः च सहृदयहृदयाकर्षकाः। अत्र वर्णनान्यपि अत्यन्तं मधुराणि। उषःकालस्य, सूर्यस्य, चन्द्रास्तमयस्य वर्णनानि अत्यन्तं मनोहराणि। द्यूतेन, मद्यपानेन च या हास्यास्पदा स्थितिर्जायते सा चेत्थमत्र विटवर्णनव्याजेन प्रदर्शिता।

ग्रन्थिच्छटाविकटजीर्णपटैकवित्तः
स्कन्धार्पितद्विगुणवाहयुगोत्तरीयः।
क्रोधोपमुक्तकठिनीधवलाधरश्रीः
धूर्तप्रभोरहमभूवमतिप्रसादी।।

अत्रत्यः नान्दीश्लोकोऽपि चमत्कारावहः –

दास्येऽहं परिरम्भणानि कितव ! द्यूते जितानि त्वया
मिथ्यौत्सुक्यमिदं यतः शतमहोरात्राः तदीयावधिः।
इत्युक्तः शिवया निशादिवसकृज्ज्योतिर्मयाक्षिद्वय-
द्रागुन्मेषनिमेषकोटिघटनव्यग्रो हरः पातु वः।।

धूर्तान् दृष्ट्वा देवा एव बिभ्यति। मानवानां का कथा। पश्यन्तु कथं देवा अपि बिभ्यति इति–

उत्सङ्गे सिन्धुभर्तुर्वसति मधुरिपुः गाढमाश्लिष्य लक्ष्मी-
मध्यास्ते वित्तनाथो निधिनिवहमुपादाय कैलासशैलम्।
शक्रः कल्पद्रुमादीन् कनकशिखरिणोऽधित्यकासु न्यधासी-
द्धूर्तेभ्यस्त्रासमित्थं दधति दिविषदो मानवाः के वराकाः।। (कर्पूरचरितं-6)

पश्यन्तु विष्णोः दशा शोचनीया। मध्ये समुद्रं लक्ष्मीः स्थापिता चेदपि तां चोरयिष्यन्तीति भीत्या सर्वदा आलिङ्ग्यैव तिष्ठति। वित्तनाथोऽपि धूर्तभयात् स्वनिधीन् सर्वान् स्वीकृत्य सूदूरे कैलासे, तथा इन्द्रः क-

In Public domain. Digitization Muthulakshmi Research Academy

ल्पद्रुमादीन् विन्ध्यपर्वतसानुषु गोपायेते इति कियान् चमत्कारः। यदा च स्वानुरागविघ्नभूता माता गृहाद्बहिष्कृता विलासवत्या, तदा विलासवती इत्थं वर्णिता –

पीयूषसिन्धुरजनिष्ट विनष्टनक्रः
प्रोच्छिन्नदुर्जनकथाजनि काव्यगोष्ठी।
जाताद्य चन्दनलता भुजगीवियुक्ता
यत्कुट्टिनीविरहिता गणिका बभूव।।

एवं कर्पूरकस्य विप्रलम्भवर्णनपरोऽयं श्लोकोऽपि हृदयङ्गमः।

अहरहरनुभूता अप्यपूर्वायमाणा
निरुपधिमधुरास्तास्सुभ्रुवः प्रेमलीलाः।
कृतनिविडसमाधिर्भावयन्नन्तरात्मा
परिशिथिलितवृत्तिर्वर्ततेऽन्यक्रियासु।।

अत्रैव चन्द्रकलङ्कवर्णनमपि मनोहरम्।

इहास्ति नूनं तुहिनांशुबिम्बे कलङ्कधूमानुमितो हुताशः।
अस्यांशुपूरः कथमन्यथासौ ज्वालावलीडम्बरमातनोति।।

अत्र नायकः कर्पूरः। प्रतिनायकः मञ्जीरकः। विलासवती मञ्जीरकं तिरस्कृत्य कर्पूरं स्वीकृतवती। तत्सन्दर्भे श्लिष्टोऽयं श्लोकोऽपि हृद्यः।

In Public domain. Digitization Muthulakshmi Research Academy

वाचालत्वं पदालग्नः मञ्जीरः कुरुतां चिरात् ।
कर्पूर एव सर्वाङ्गसङ्गसौभाग्यभाजनम् ।।

एवं प्रतिपदं चमत्कारः अत्र दृश्यते।

भरतः स्वनाट्यशास्त्रे भाणे लास्याङ्गानां प्रयोगमुक्तवान्। सुकुमारः अभिनयः लास्यम्। लास्यम् अङ्गं यस्य अभिनयविधेः तत् लास्याङ्गम्। लास्याङ्गानि दश अभिनवगुप्तेन सूचितानि। तत्र कानिचन लास्याङ्गानि अत्र कर्पूरचरिते उपलभ्यन्ते [16]। यथा –

1. गेयपदम् – वीणावादनेन सहितं नायिकायाः गीतम् –

रतिरमणप्रियसुहृदा शशाङ्कसुभगेन निर्वृतिकरेण।
कर्पूरेण वियोगो भगवति ! रुद्राणि ! मा भवतु ।। (11)

2. प्रच्छेदकम् –कुपितापि नायिका चन्द्रातपादिभिः बाधिता लास्यम् अभिनयति।

अन्योन्यं करताडनेन हसतु स्वच्छन्दमालीजन-
स्त्यक्ता मानकथा कृताञ्जलिरसावङ्गीकृतं लाघवम् ।
आगश्शल्यपरम्परा सुभग याश्चित्ते मम त्वत्कृताः
सर्वास्ताश्शशिबिम्बचुम्बकशिलालोकेन दूरीकृताः ।।(3)

3. स्थितपाठ्यम् – वाक्याभिनयपूर्वकं नायिकावचनम्।

अर्हति न तत्र धूर्ते व्यापारः कोऽपि इतरदूतीनाम् ।

16 संस्कृतभाणसाहित्यमु – (तेलुगु) P. 74-75

In Public domain. Digitization Muthulakshmi Research Academy

आनय स्वप्ने तं मा निद्रे निर्दया भव ।। (10)

4. त्रिमूढकम् – समवृत्ते कथितं पुरुषभावाख्यम्।

उच्चैर्गाथापठनमशुभं श्रोत्रयोरात्मगीतं
हस्ताघातैरुरसितरलैः मौरजी वाद्यविद्या ।
भूयोभूयः कररुहपदोत्सङ्गिते दृष्टिरङ्गे
कर्तुं शक्तः क इव यदि वा तस्य दुश्चेष्टितानि ।। (36)

एतादृशस्य चमत्कारावहस्य भाणस्य कर्ता **वत्सराजः**। अयं परमर्धि–देवस्य अमात्यः । संस्कृतसाहित्ये भासात् परं विविधरूपकाणि प्रयो–गार्हाणि अनेनैव रचितानि। रूपकेषु यानि विरलतया आदृतानि तानि प्रचारे आनेतुम् अनेन प्रयासः कृतः। अनेन एतानि षट् रूपकाणि र–चितानि[17] –(1) **किरातार्जुनीयव्यायोगः**, (2) **कर्पूरचरितभाणः**, (3) **रुक्मि-णीपरिणयेहामृगः**, (4) **त्रिपुरदाहडिमः**, (5) **हास्यचूडामणिप्रहसनम्**, (6) **समुद्रमन्थनसमवकारः** ।

एतानि सर्वाणि रूपकाणि प्रदर्शितान्यपि। किरातार्जुनीयव्यायोगं विना अन्यानि **परमर्धिदेवस्य** आध्वर्यवे प्रदर्शितानि । किरातार्जुनव्यायोगस्तु तस्य कुमारस्य त्रैलोक्यवर्मदेवस्य आध्वर्यवे प्रदर्शितः । परमर्धिदेवस्य राज्य–पालनसमयः क्रि. श. 1163–1203 मध्ये इति, परमाल इति तस्यैव नामान्तरमिति, तस्यैव आज्ञया कर्पूरचरितभाणः रचित इति च ज्ञायते[18]। अतोऽयं भाणः क्रि. श. द्वादशे शतके रचित इति ज्ञायते । एतानि रूपकाणि

17 रूपकषट्कम् – Goekwad Oriental series – No 3. Baroda-1918.
18 Introduction – रूपकषट्कम् – P VII.

In Public domain. Digitization Muthulakshmi Research Academy

नीलकण्ठस्य यात्रोत्सवेषु प्रदर्शितानि। मिश्रभाणानां मार्गदर्शकोऽयं वत्सराजः। आलङ्कारिकनियमानुल्लङ्घ्य भाणेषु वैविध्यमानीतमनेन। उषःकालप्रभृति चन्द्रोदयपर्यन्तं पूर्णं दिवसेतिवृत्तं भाणेषु ऐदम्प्राथम्येन अनेनैव प्रवेशितम्। अनन्तरं सर्वेऽपि भाणकर्तारः अमुमेव अनुसृतवन्तः।

क्रि. श. द्वादशशतके रचितं भाणान्तरं न दृश्यते। एवं त्रयोदशशतके रचितोऽपि भाणः नेदानीमुपलभ्यते। अतः क्रि. श. चतुर्दशशतकभाणानितः परं परामृशामः।

In Public domain. Digitization Muthulakshmi Research Academy

अध्यायः 3

क्रि. श. चतुर्दशशतकभाणाः

क्रि. श. चतुर्दशे शतकेऽपि अनेके भाणा रचिताः। परन्तु इदानीं त्रय एवोपलभ्यन्ते। तेऽपि असम्पूर्णाः।

3.1 शृङ्गारमञ्जरी – सर्वज्ञसिङ्गभूपालः[1]

नाममात्रावशिष्टः अयं भाणः सर्वज्ञसिङ्गभूपालेन स्वीये रसार्णवसुधाकरनाम्नि अलङ्कारशास्त्रग्रन्थे उदाहृतः। अयं च आन्ध्रदेशे वेङ्कटगिरिराज्यस्य राजा। अन्नमांबा–अनपोतनायकौ अस्य पितरौ। अस्य राजधानी राचकोंडनगरम्। अयं क्रि. श. 1383–1399 मध्ये राज्यपालनमकरोत्। अस्यास्थाने विश्वेश्वरकविः, अप्पयाचार्यः, विशिष्टाद्वैतसिद्धान्तप्रवर्तकत्वेन प्रसिद्धस्य वेदान्तदेशिकस्य पुत्रः नयनाराचार्यः, इत्यादयः अनेक कविपण्डिता आसन्[2]। अयं राजा संस्कृते महाकविः, पण्डितः, विमर्शकश्च आसीत्। संस्कृते अनेन 'सङ्गीतसुधाकर' नाम्ना सङ्गीतशास्त्रग्रन्थः, नाटकपरिभाषेति नाटकलक्षणग्रन्थः, रसार्णवसुधाकर

1 आन्ध्रविज्ञानसर्वस्वम् – चतुर्थभागः – पृ. 1194
2 H. C. S. L – M. Krishnamachariar, 770-771

In Public domain. Digitization Muthulakshmi Research Academy

इति अलङ्कारशास्त्रग्रन्थः, शृङ्गारमञ्जरीभाणः, कन्दर्पसम्भवरूपकं च रचितानि। अस्य ग्रन्थेषु सङ्गीतसुधाकररसार्णवसुधाकरौ प्रचारे आस्तां, प्रकाशितौ चेतौ। अन्ये च ग्रन्थाः नेदानीमुपलभ्यन्ते। कन्दर्पसंभवः किंरूप इति स्पष्टतया न ज्ञायते। केचन[3] अयमपि भाण इत्येव कथयन्ति। अन्ये रूपकान्तरमित्यभिप्रयन्ति। अस्य रसार्णवसुधाकरस्तु अलङ्कारशास्त्रे श्रेष्ठेषु ग्रन्थेषु अन्यतमः। अस्य राज्ञः 'सर्वज्ञ' इति बिरुदम्। रसार्णवसुधाकरे रञ्जकोल्लासे अनेन कलकण्ठभाणः उल्लिखितः, यश्चेदानीं नोपलभ्यते।

3.2 वसन्तभूषणम् – वरदाचार्यः

मद्रपुरीतालपत्रग्रन्थालये संरक्षितोऽयं भाणः [4] नैतावता प्रकाशितः। अस्य भाणस्य नायकः पल्लवशेखरः। इति वृत्तं तु न ज्ञायते। अत्रत्योऽयं नान्दीश्लोकः।

भद्रं देवो विनिद्रं वितरतु करुणापूरपूर्णायताक्षो
मर्त्यामर्त्यादिसृष्टिस्थितिलयरचनागण्यलीलाविभूतिः।
सूनुर्यस्यातिवीरः त्रिभुवनविजयी पुष्पबाणैर्मनोभूः
जायाऽमेयप्रभावा बलजिदजमहेशानवन्द्याङ्घ्रिपद्मा।।

अस्य भाणस्य रचयिता वरदाचार्यः भारद्वाजगोत्रः, अनन्ताचार्यस्य पुत्रः,

---

3 शृङ्गारशेखरभाणस्य प्रस्तावना – डा. बि. रामराजु –तेलुगु अकाडमी. सर्वज्ञसिंहभूपालेन स्वीये रसार्णवसुधाकरे द्वितीयोल्लासे स्नेहस्योदाहरणतया दत्तः स्वीयकन्दर्पसम्भवादयं श्लोकः–

उभे तदानीमुभयोरस्तु चित्ते कदुष्णनिश्वासचरिणुकेन।
एकीकरिष्यन्ननुराशिल्पी रागोष्मणैव द्रवतामनैषीत् ।।

4 GOML-MAS-R No 775

In Public domain. Digitization Muthulakshmi Research Academy

श्रीनिवासाचार्यस्य पौत्रः। अस्य गुरुः वरददेशिकः। अस्य वरददेशिकस्य गुरुः श्रीरामानुजाचार्यश्रीभाष्यस्य श्रुतप्रकाशिकाव्याख्याकारः वेदव्यासभट्टः। अयं वेदव्यासभट्टः श्रीवेदान्तदेशिकमातुलस्य सतीर्थ्यः। अतश्चास्य गुरुः वेदान्तदेशिकसमसामयिकः, अयं च वेदान्तदेशिकपुत्रस्य नयनाराचार्यस्य समसामयिकः। नयनाराचार्यः सर्वज्ञसिङ्गभूपालस्य आस्थाने (सभायां) आसीदिति ज्ञायते। अतश्च अयमपि क्रि. श. चतुर्दश शतके एव स्यादित्यूह्यते।

3.3 अज्ञातनामा भाणः – पेद्दयामात्यः

एवमस्मिन्नेव शतके आन्ध्रभाषायां विक्रमार्कचरितकाव्यरचयितुः जक्कनार्यस्य पितामहेन संस्कृते भाणरचनाकृतेति विक्रमार्कचरिते आरम्भे कृतेन जक्कनस्य स्ववंशवर्णनेन ज्ञायते[5]। परन्त्वयं नोपलभ्यते। न वा नामापि ज्ञायते। एतद्भाणकर्ता पेद्दयामात्य इति प्रथितः आन्ध्रदेशे नेल्लूरुराज्यपालकस्य मनुमसिद्धेः पुत्रस्य तिरुकालाभिधस्य आस्थानपण्डितः।

3.4 मदनविलासः[6] – पशुपतिनागनाथः[7]

भाणोऽयम् अप्रकाशितः मद्रपुरीतालपत्रग्रन्थालये अपूर्ण एव संरक्षितः। अत्र उपलभ्यमानोऽपि भागः अत्यल्पः। कल्याणनारायणस्य वसन्तोत्सवे प्रदर्शनार्थमयं भाणःरचित इति ज्ञायते। अत्र केवलं वसन्तसूर्योदयवर्णनद्वयमेव सम्यगुपलभ्यते। परन्तु एतद्द्वयपरिशीलनेन अत्र शैली सरसा हृद्या चेति ज्ञायते। पश्यन्तु वसन्तवर्णनम्–

5 विक्रमार्कचरितम् – जक्कनः – प्रथमाश्वासे 20 पद्यम्।

7 (a) भारतीपत्रिका – जनवरी 1959 – काकतीयशासनकवयः (b) आन्ध्रविज्ञानसर्वस्वम् – चतुर्थभागः –P 1194.

In Public domain. Digitization Muthulakshmi Research Academy

सालक्तदामचरणाहतिसत्क्रियाभिः
धन्या इव प्रविकसन्तितरामशोकाः ।
गण्डूषसीधुभिरमी कमलाननानां
सम्भावनेन वकुला मुकुलान्वहन्ति ।।

इतोऽपि हृद्यमत्र सूर्योदयवर्णनम् इदम् –

पादपतनेन भगवान् प्रसादमुपनयति पद्मिनीं भास्वान् ।
प्रालेयबाष्पकणिकापरिवाहमुखाम्बुजं दधतीम् ।।

शोकार्तां पद्मिनीं पादपतनेन भास्वान् सूर्यः अनुनयतीति हृद्या कल्पना किल। अस्य सम्पूर्णस्य अनुपलब्धिः दौर्भाग्यमेव।

अयं कविः नागनाथः पशुपतेस्तनयः चमत्कारचन्द्रिकाकर्तुः विश्वेश्वरस्य शिष्यः। विश्वेश्वरः अनपोतनायकस्य, तत्पुत्रस्य सर्वज्ञसिङ्गभूपालस्य च सभापण्डितः आसीत्। अयमपि तथा। अयमेव अनपोतनायकस्य शासनानि बहूनि रचितवान्। अयमेव विष्णुपुराणम् आन्ध्रभाषायां काव्यरूपेण अनूदितवान् [8]। अनपोतनायकीयमिति रूपकमपि संस्कृतेऽनेनैव रचितमिति केचन वदन्ति। अनपोतनायकः काकतीयवीरभद्रस्य सामन्तः। तेलङ्गाणप्रान्ते इदानीं वरंगल् इति नाम्ना प्रसिद्धे मण्डले, त्रिभुवनगिरिमण्डलं जित्वा क्रि. श. 1369 वर्षे अधिपतिरासीत्। अस्य राज्ञः दानशासनानि बहूनि अनेन कविना नागनाथेनैव रचितानि। तत्रैकं शासनं वरङ्गल् मण्डले 'अय्यनवोलु' ग्रामे मल्लेश्वरालये दृश्यते, यच्च शा.

8 संस्कृतभाणसाहित्यमु – तेलुगु – P.80

In Public domain. Digitization Muthulakshmi Research Academy

श. 1291 वर्षे रचितम्। अनेन च अस्य कालः क्रि. श. चतुर्दशतकमिति सिद्ध्यति [9]।

3.5 अज्ञातनामकर्तृकः भाणः

एवमज्ञातनामा कश्चन भाणः, यस्य रचयितुः नामापि न ज्ञायते, सः अप्रकाशितः उपलभ्यते मद्रपुरीतालपत्रग्रन्थालये। यस्य संख्या R 3693 इति निर्दिष्टा अस्ति। अत्र केरलसुन्दरीकल्याणवर्मणोः प्रणय्यवृत्तान्तः वर्णितः। वसन्तोत्सवसमये प्रदर्शनार्थमुद्दिष्टोऽयं भाणः। कविता सरसा, शैली सरला, मधुरा च। अत्रेतिवृत्तभूतान् वेश्यादुरागतान् तासां प्रेमनटनं, कृतकरोदनं च नान्द्यां कथमयं वर्णयति पश्यत –

मुहुर्मात्रा पुंसः प्रसभविधुतस्याप्यनुपदं
वितन्वानाचित्ते कुसुमशरसाम्राज्यविभवम् ।
सरोजश्रीसारग्रहणनिपुणा नेत्रयुगलात्
गलन्ती वामाक्ष्या नवसलिलधारा विजयते ।।

अत्र नायिकानायकयोः अनुरागसूचकोऽयं श्लोकोऽपि हृद्यः।

कान्तः कल्याणवर्मा सकलगुणमणिश्रेणिरत्नाकरो यः
तस्मिन्नत्यन्तकौतूहलि मम मयि च श्रीयुतस्तस्य चेतः।
कादाचित्कश्च संप्रत्यजनि च तयोर्नौ वसन्तोत्सवेऽस्मिन्
संयोगस्तस्य तावत् द्रढिमनि परं भाव एकःप्रमाणम् ।।

---

9 Contribution of Andhra to Sanskrit literature - B. Ramaraju-S.N0.86 – PP. 296-299 (2002)

In Public domain. Digitization Muthulakshmi Research Academy

अयं च भाणः केरलीयस्य प्रभोः रविवर्मनाम्नः काले रचित इति भरतवाक्ये "वसुमतीमुदन्वत्पर्यन्तामवतु रविवर्मा विमलधीः" इति वाक्येन ज्ञायते। अयं रविवर्मा क्रि. श. 1312-13 वत्सरमध्ये [10] राज्येऽभिषिक्तः।

10 Kerala Contribution to Sanskrit Literature – K. K. Raja.

In Public domain. Digitization Muthulakshmi Research Academy

अध्यायः 4

क्रि. श. पञ्चदशशतकभाणाः

वत्सराजस्य कर्पूरचरितमारभ्य भाणानां स्वरूपं प्राचीनेभ्यः विलक्षणं जातम्। प्राचीनाः घटनाप्रधानाः, चतुरव्यङ्ग्यभाषणप्रधानाः, नागरिक-हास्यस्य, व्यावहारिकसंस्कृतस्य च प्रतीकभूताः आसन्। अर्वाचीनास्तु वर्णनप्रधानाः, शृङ्गारमेवोपजीवन्तः, वेशवाटिकासम्बद्धेतिवृत्ततत्संस्कृ-तिप्रधानाः सन्ति। क्रिस्तोः पञ्चदशशतकादारभ्य विंशतितमशतकपर्यन्तं रचिताः भाणाः केवलं लक्षणग्रन्थानामुदाहरणभूता इव एकविधा एव दृ-श्यन्ते। अतोऽत्र परस्परवैलक्षण्यं मृग्यम्।

वेश्यानां प्रातः प्रियगृहात् स्वगृहं प्रति आगमनमारभ्य स्नानादिकं क्री-डाविहाराश्च वर्णिताः। वेशवाटिकासंस्कृतौ प्रधानभूता उत्सवाः प्रथमार्तव-रङ्गाधिरोहण-कलत्रस्वीकारादिरूपाः अत्र वर्णिताः। वीररससूचनाय अजा-कुक्कुट-मल्लयुद्धादिकं, गजविजृम्भण-सर्पक्रीडादि च वर्णितानि। ए-तेषां वर्णनानामाधिक्येन भाणस्य कायः वर्धितः। इयं च भाणरचना क-विभिः स्वकविताप्रागल्भ्यस्य पाण्डित्यस्य च प्रदर्शनाय उपकरणीकृता न तु चमत्कारावहघटनानिर्वहणाय। अतः एकरूपाणामेतेषां पठने आदरे

In Public domain. Digitization Muthulakshmi Research Academy

च क्रमशः अनासक्तिः प्रवृद्धा येन अनेके भाणाः प्रकाशमेव नाधिगताः तालपत्रग्रन्थालयेषु कारागारेष्विव बद्धाः सन्ति। वस्तुस्थितौ एवं सत्यामपि एतेष्वेव केचिदुत्तमाः सरलाः सरसचतुरसंभाषणादिभिः सहृदयरञ्जका अपि दृश्यन्ते। चतुर्दशशतकमारभ्य भाणग्रन्थान् परिशीलयामश्चेत् सर्वेऽपि भाणाः दक्षिणदेशे एव उद्भूताः। तत्र क्रि. श. सप्तदश शतकपर्यन्तेषु वेश्या एव नायिका। तासां काचित् विशिष्टा उज्ज्वला संस्कृतिः एतेषु भाणेषु प्रतिबिम्बिता। अनन्तरेषु तु परदाराः नायिका। वेशसंस्कृतिरपि क्रमशः हीयमाना एव दृश्यते। अनेके भाणाः भगवतः उत्सवादिकं वर्णयितुं प्रवृत्ताः। उत्सवादिषु समवेतानां जनानां प्रवृत्तिरित्यादिकमपि तत्र सम्यग्वर्णितम्। एकोनविंश–विंशशतकीयभाणेषु वैदेशिकसंस्कृतेः विकृतं रूपं, समाजस्योपरि दुष्प्रभाव इत्यादिकमपि समसामयिकं वर्णितमस्ति।

अथेदानीं क्रि. श. पञ्चदशशतकभाणान् परिशीलयामः। तत्र सरसया शैल्या, सुमधुरवर्णनेन, चतुरसंभाषणेन च हृद्येषु अन्यतमः लघुकायः प्रथमं कीर्तनीयः वरदाचार्यरचितः वसन्ततिलकभाणः।

4.1 वसन्ततिलकभाणः – वरदाचार्यः

अत्र नायकः शृङ्गारशेखरः। नायिका वासन्तिका। तस्याः प्रथमरङ्गाधिरोहणोत्सवाय आहूतोऽयं प्रातरेव प्रस्थितः वेशवाटिकां प्रविश्य तैस्तैः सह सल्लापं कृत्वा, तत्तद्दृश्यमभिवर्णयन्, चतुरसंभाषणेन कांश्चित् परिहसन्, कांश्चिच्चाभिनन्दनादिभिः पुरस्कुर्वन् आसायं तत्रैवाटित्वा, सायं वासन्तिकायाः प्रथमरङ्गाधिरोहणोत्सवे भागं गृह्णाति। अन्ते च कलत्रपत्रिकाद्वारा तां कलत्रत्वेन स्वीकरोति इति इदमितिवृत्तमस्मिन्। अत्र शृङ्गारः प्रधानः रसः। अन्येऽपि रसाः तत्तत्सन्दर्भानुगुणं सूचिताः। वि-

In Public domain. Digitization by Muthulakshmi Research Academy

शिष्य वीरः मल्लयुद्ध–मेषयुद्ध–कुक्कुटयुद्ध–सर्पक्रीडा–मदगजवृत्तान्तादिभिः सूचितः। अत्र च कवित्वं माधुर्यप्रसादगुणभूयिष्टम्। वृत्तिः कैशिकी। स–र्वापि रचना अलङ्कारभूयिष्ठा। "अलङ्कारवती सूक्तिः" इति कविः स्वयं वदति। अत्यन्तं रम्येषु अर्वाचीनभाणेषु प्रथमगण्योऽयं भाणः भावनासु, विशिष्टपदप्रयोगे, वर्णनावैचित्र्ये, संस्कृतभाषावैशिष्ट्यपरिचायकसान्द–र्भिकप्रयोगविशेषे, ध्वनिवैभवे च भाणवाङ्मयस्य तिलकप्राय एव। "भा–णश्चेद्दशरूपकेषु मधुरः" इति वचनं सार्थकं कुर्वाणोऽयं भाणः अलङ्का–रशास्त्रग्रन्थेषु तत्तत्सन्दर्भेषु उदाहृतस्सन् चतुर्भाणीव बह्वादरपात्रमभूत्। सर्वतन्त्रस्वतन्त्रैः अप्पय्यदीक्षितैरेव स्वीये कुवलयानन्दे एतद्भाणश्लो–कद्वयमुदाहृतमिति[1] एतदेवालं अस्य भाणस्य वैशिष्ट्यं प्रतिपादयितुम्। कविरेव स्वकवितामाधुर्यविषये इत्थं वदति–

समुल्लासो वाचां सरसमधुनिष्यन्दलहरी
समुन्मेषद्वेषी सकलरसपोषोपजनकः।
न केषामाधत्ते मनसि परितोषं नवनवैः
विलासै रुन्मीलद्विचकिलमधूलीपरिमलः।।

इदं लक्षणं प्रतिपदं सङ्गतमिति स्पष्टं भवति एतद्भाणपरिशीलकानां सहृ–दयानाम्। पश्यन्तु रम्यमिदं वेश्यावर्णनम् –

---

1 कुवलयानन्दे विषमालङ्कारस्य उदाहरणतया दत्तः श्लोकः–
लोके कलङ्कमपहातुमयं मृगाङ्को
जातो मुखं तव, पुनस्तिलकच्छलेन।
तत्रापि कल्पयसि तन्वि कलङ्करेखां
नार्यः समाश्रितजनं हि कलङ्कयन्ति।। (35)
एवं गूढोक्तेरुदाहरणभूतोऽयं बहुरम्यः श्लोकः–
नाथो मे विपणिं गतो न गणयत्येषा सपत्नी च मां
त्यक्त्वा मामिह पुष्पिणीति गुरवः प्राप्ता गृहाभ्यन्तरम्।
शय्यामात्रसहायिनीं परिजनः श्रान्तो न मां सेवते
स्वामिन्नागमलालनीय रजनीं लक्ष्मीपते रक्ष माम्।। (73)
एवमस्य यतिराजविजयनाटकादपि नान्दीश्लोकः कुवलयानन्दे अपह्नुत्यलङ्कारस्य उ–दाहरणतया दत्तः।

 In Public domain. Digitization Muthulakshmi Research Academy

शशिपदमणिजालं चन्द्रलेखभिरामं
ललितपुलकजालं लक्ष्यबिन्दुप्रवालम् ।
वपुरनघममुष्याः वक्ति कस्यापि यूनः
सुरतकलहलीलासूक्ष्ममार्गाभियोगम् ।।

अस्य भाणस्य वसन्ततिलकनामकरणमपि साभिप्रायम्। अत्र वसन्ततिलकवृत्तप्रयोगः रम्यातिरम्यः। पश्यन्तु वसन्ततिलकवृत्ते एव सुमनोहरम् आतपे गच्छन्त्याः वनितायाः वर्णनम् –

अम्भोजबन्धुरिति भानुमिमां च भूमिं
सर्वं सहेति कथयन्ति मृषैव लोकाः ।
वक्राम्बुजं ग्लपयति प्रथमो वधूनाम्
आसां परा न सहते चरणार्पणं च।। (68)

आतपे गच्छन्त्याः मुखे स्वेदः, ग्लानिः, पादयोः ज्वलनं च भङ्ग्यन्तरेण सचमत्कारं वर्णितमत्र। एवमेव वसन्तर्तुवर्णनमपि बहुहृद्यम्। मदनः स्वीयानायुधान् अङ्गारेषु परितप्य तीक्ष्णान् करोति। तत्र अङ्गाराः के? आयुधानि कानि? कथं तप्यन्ते ? इति स्वयमेव पश्यन्तु–

अङ्गारश्रियमातनोति नितरामापाटलं पल्लवं
धूमश्रेणिविडम्बिनी पुनरसौ निर्याति भृङ्गावलिः ।
पुष्पाण्यत्र च संलुठन्ति कतिचित्सृष्टानि मन्दानिलैः
शङ्के दग्धुमसौ जगन्ति मदनस्सन्तापयत्याशुगान् ।। (18)

रम्या किलेयमुत्प्रेक्षा। परस्त्रीरतिः वेश्यारतितुल्या न भवति। कष्टकरापि। अथापि विलक्षणेति वर्णयत्यत्र।

दिगन्तान् पश्यन्ती दिशति न मुखे चक्षुरमृतं
न विस्रब्धा किंचित् कथयति न चाकर्णयति च।
रतारम्भे भूयो जिगमिषति साशापि सुतरां

In Public domain. Digitization by Muthulakshmi Research Academy

तथाप्येषा भावैस्तरलयति चेतः परवधूः ।।

एवमत्र गद्यमपि हृद्यं दण्डिनं स्मारयति । उक्ति वैचित्र्यं तु अद्भुतम् । विटः कामपि वेश्यामुपगन्तुं गतः, तयाऽहं पुष्पिणीति निषिद्धः सचमत्कारं "पुष्पिणीति परित्याज्या किं माधवी मधुव्रतानाम्" इति पृच्छति । एवं नीचवृद्धवर्धकिन्या भर्सितोऽयम्, अस्याः पुत्री कथमेतत्स्वभावविरुद्धा जातेति सन्दिह्य " अथवा शम्बूकजातिरपि किं न प्रसूते मुक्ताफलं शुक्तिः" इति स्वयं समाहितो भवति । एवं ग्राम्यव्यवहारे उपयुज्यमानानां जातीयानां प्रयोगेऽपि अयं सिद्धहस्तः । शूर्पेण निहत्य, त्वद्भगिनीमेव गच्छ, त्वज्जननीमेव गच्छ, इत्यादि निन्दावचनानि, "अयस्कान्तवाटिकायां सूचीविक्रयः, गोपालकुले तक्रविक्रयः" इत्यादि आभाणकानि च समुचिते सन्दर्भे प्रयुक्तानि भाणममुं भाणवाङ्मये समुन्नते स्थाने स्थापयन्ति । अत्रापि उषःकाल–सूर्योदय–मध्याह्न–सायं–चन्द्रोदयवर्णनानि कृतानि । वेश्यानां कलत्रत्वेन कञ्चित्कालपर्यन्तं स्वीकारः एतद्भाणरचनाकाले अवर्तत । स च स्वीकारः लेखनपूर्वकः आसीत् । पश्यन्तु–"स्वस्तिश्रीसमस्तभुवनैकवीर – हरिहरहिरण्यगर्भवक्षःस्थलवामाङ्गवदनस्थापित – विजयस्तम्भे शम्बरभिदि सार्वभौमपदमनुभवति मकरध्वजे, मधुमासपौर्णिमास्यां, काञ्चीपुरवास्तव्यः शृङ्गारशेखरो वासन्तिकायै कलत्रपत्रमर्पयति" – इत्यादि । अत्र पणबन्धः, समयः, नियमाः, तदति कलत्रक्रमे प्रायश्चित्तादिकं च पत्रिकायामस्यां निर्दिश्यते । काञ्चीपुरे वसन्तोत्सवेषु प्रदर्शितोऽयं भाणः ।

अस्य रचयिता घटिकाशतम् अम्माल् इति प्रसिद्धः । अतोऽयं भाणः 'अम्मा भाण' इति प्रसिद्धिमगात् । अयमेव रामभद्रदीक्षितस्य 'अय्या भाण' रचनायां कारणम् आसीत् । अथैतद्भाणकर्तुः विषये किञ्चिद्विचारयामः ।

In Public domain. Digitization Muthulakshmi Research Academy

अयं [2] च वात्स्यवरदाचार्यः, विशिष्टाद्वैतमतप्रवर्तकाचार्यस्य श्रीमद्रामानुजाचार्यस्य भागिनेयस्य सुदर्शनस्य वंशे समुत्पन्नः, वत्सगोत्रः, काञ्चीपुरनिवासी। सुदर्शनस्य पौत्रः वात्स्यवरदाचार्यनाम्ना प्रसिद्धः निडाधूरियम्माल् इति नामान्तरेणापि प्रथितः वेदान्तदेशिकमातुलस्य आत्रेयरामानुजस्य, श्रुतप्रकाशिकाव्याख्याकर्तुश्च गुरुः आसीत्। अस्य पुनः पौत्रः वरदाचार्यनामा। तस्य पुत्रः घटिकाशतं सुदर्शनाचार्यः भाणकर्तुः वरदाचार्यस्य पिता। अस्य भाणकर्तुः गुरुः वेदान्तदेशिकस्य सूनुः नयनाराचार्यः, तच्छिष्यः वानमामलै इति श्रीवैष्णवमठस्य प्रथमः अधिपतिः वरदाचार्यापरनामा ब्रह्मतन्त्रस्वतन्त्रस्वामी च। वादिभीकरार्य इति प्रसिद्धः 'प्रतिवादिभयङ्करम् अण्णन्' अस्य सतीर्थ्यः। अयं तर्कवेदान्तनिष्णातः [3]। अनेन यतिराजविजयापराभिधं वेदान्तविलास इति नाटकं, वरददेशिकमङ्गलाशासनं, वरददेशिकसुप्रभातं, भाणः च रचिताः। यतिराजविजयप्रस्तावनायां दर्शनस्थापनाचार्ययोः वेदान्ताचार्यरामानुजाचार्ययोः प्रीतिपात्ररूपेण अयमात्मानं प्रपञ्चितवान्। गुरुपरम्परायां तु रामानुजाचार्यः, अनन्तरं वेदान्ताचार्य इति क्रमः दृश्यते। रामानुजाचार्यो नाम वेदान्तदेशिकानां मातुलः आत्रेयरामानुजः। वेदान्ताचार्यो नाम वेदान्तदेशिकः। वेदान्तदेशिकस्य प्रीतिपात्रं कदाचिदयं भवितुमर्हति, प-

---

2 अस्ति खलु भगवद्रामानुजमुनेः पूर्वाश्रमभागिनेयः श्रीवत्सकुलचूडामणिः अखिलसुदर्शनमदकर्शनः सुदर्शनो नाम।

तस्य वेदान्त कूटस्थः पौत्रोऽभूद्वरदो गुरुः।
श्रुतप्रकाशिकाद्याश्च ग्रन्थाः यच्छिष्यसम्पदः।।

तस्य पञ्चमः प्रपञ्चविदितवैदुष्यः काञ्चीपुरवास्तव्यः श्री घटिकाशतसुदर्शनाचार्यसूनुः श्रीवेदान्ताचार्यरामानुजाचार्ययोः दर्शनस्थापनाचार्ययोः प्रसादभूमिः वरदार्यो नाम कविः (यतिराजविजयप्रस्तावना)

3 वेदान्ततर्कविविधार्थविचारदक्षो वात्स्यो वसन्ततिलकं स बभाण भाणम्। – वसन्ततिलकप्रस्तावना –

In Public domain. Digitization Muthulakshmi Research Academy

रन्तु तन्मातुलस्य प्रीतिपात्रं भवितुं नार्हतीति विचिन्त्य एतद्विषये विमर्शनं कुर्वन्तः वीरराघवाचार्याः अनयोः प्रसादः न साक्षात् किन्तु पुत्रशिष्य-द्वारेत्यादिरूपेण, क्रमव्यत्यासे च द्वन्द्वसमासः कारणमित्यादि कथंचित् समाधानमदुः [4]। परन्तु यदि सम्यगालोचयामः तर्हि वेदान्ताचार्यरा-मानुजाचार्ययोरिति क्रमनिर्देश इत्येव वक्तुं शक्यम्। वेदान्ताचार्यः वेदा-न्तदेशिक एव। अस्य चरमशिष्यपरम्परायां कवेः स्थितिः भवितुमर्हति, यतोऽयं तत्पुत्रस्यैव शिष्यः। अथात्र रामानुजाचार्यशब्देन वेदान्तदेशिक-मातुलाः नोद्दिष्टाः। परन्तु रामानुजावताररूपेण सम्भाविताः मणवालम-हामुनिनाम्ना ख्याताः। एते च नयनाराचार्यसमकालिकाः। नयनाराचा-र्यशिष्यः 'प्रतिवादिभयङ्करम् अण्णन्' नयनाराचार्यनिर्याणात्परम् मणवा-लमहामुनेः एव शिष्य आसीदिति सम्प्रदायः। मणवाळमहामुनेः सविधे अष्टदिग्गजाः कविपण्डिता आसन्। अयमेव सम्प्रदायः वैष्णवप्रभुणा कृ-ष्णदेवरायेण अनुसृतः, यस्य सभायामपि अष्टदिग्गजाः कवयः आसन्। यद्यपि भाणकर्ता वरदाचार्यः अष्टदिग्गजान्यतम इत्यत्र प्रमाणं नोपल-भ्यते अथापि यतिराजविजयनाटकरचनामनुलक्ष्य अयं तैः सम्मानितः स्यात्। किंचायं स्वभाणे देवराजभट्टं वर्णितवान् यश्च मणवाळमहामु-निशिष्येषु अग्रगण्यः आसीत् [5]। मणवाळमहामुनेरेव सौम्यजामातृयोगीति नामान्तरम्। डा. यस्. कृष्णस्वामिभिः [6] वेदान्तदेशिकः क्रि. श. 1389 पर्यन्तं, तत्पुत्रः नयनाराचार्यः क्रि. श. 1438 पर्यन्तं च आस्तामिति निरूपितम्। ते एव मणवाळमहामुनिसमयं क्रि. श. 1370–1443 इति अण्णन् समयं क्रि. श. 1380–1470 इति उक्तवन्तः। अतश्च अण्णन्

---

4 Journal of Sri Venkateswara Oriental Research Institute, Tirupati-Vol II, Part I, P91

5 सौम्यजामातृयोगीन्द्रचरणाम्बुजषट्पदम् ।
देवराजगुरुं वन्दे दिव्यज्ञानप्रदं शुभम् ।।

6 Journal of Indian Historical Society – Vol 18, PP 378-83

In Public domain. Digitization Muthulakshmi Research Academy

समकालिकोऽयमपि क्रि. श. 1370 प्रान्ते उत्पन्नः स्यात्। अस्य गुरुः नयनाराचार्यः सर्वज्ञसिंगभूपालस्य, तत्पितुश्च आस्थाने आसीदिति पूर्वमेवोक्तम्[7]। अतोऽयमपि सिङ्गभूपालेन सम्मानितः स्यादिति ऊहितुं शक्यते भाणस्य भरतवाक्येन [8]। अतश्च सिङ्गभूपालसमसामयिकत्वमस्य सिध्यति। भाणेऽस्मिन् कलत्रपत्रिकायां मन्मथसंवत्सरोल्लेखात् [9] अयं भाणः क्रि. श. 1415 वर्षे रचित इति ऊहितुं शक्यम्। बहवः विमर्शकाः अस्य भाणकर्तुः वंशपरम्परामजानन्तः अप्पयदीक्षितैः अस्य श्लोकानामुद्धरणात् तत्समसामयिकतां स्वीकृत्य क्रि. श. षोडशशतकमेव अस्य समयत्वेन सूचितवन्तः। तत्र प्रो. पि. पि. यस्. शास्त्री, सूरं श्रीनिवासुलु [10] प्रभृतयः सन्ति। मल्लादिसूर्यनारायणशास्त्रिणः अमुं रामभद्रदीक्षितसमकालिकं मन्यमानाः क्रि. श. अष्टादशशतकेऽयमासीदिति उक्तवन्तः। एतेषामेवं लेखनस्य मूलं यम्. कृष्णमाचार्यस्य संस्कृतसाहित्येतिहासे 665 पुटे (प्राचीनप्रकाशने) समुल्लिखितः विषयः एव। तत्र कृष्णमाचार्येण अयं रामभद्रदीक्षितसमकालिकत्वेन निर्दिष्टः आसीत्। परन्तु ते एव क्रि. श. 1970 वर्षे तस्य पुनः प्रकाशने 243 पुटे 4 टिप्पण्याम् अस्य भाणकर्तुः नयनाराचार्यशिष्यत्वं प्रतिपादितवन्तः।

कुवलयानन्दे अप्पय्यदीक्षितेन अस्य श्लोकाः उदाहृता इति पूर्वमेव सूचितम्। तत्र भाणादुद्धृतं श्लोकद्वयं तत्रैव टिप्पण्यां योजितम्। अथ यतिराजविजयनाटकस्थः नान्दीश्लोकोऽपि अप्पय्यदीक्षितेन अपह्नुत्यलङ्कारस्य उदाहरणतया दत्तः। स च अयम्–

---

7 आन्ध्रविज्ञानसर्वस्वम् – 4 भागः –PP. 1194.

8 कटकेषु जयन्तु भूपतीनां कवयः काङ्क्षितकल्पपादपानाम्।
वचसां वलमानदिव्यगन्धैः मधुनिष्यन्दमनोहरैः निगुम्फैः।।

9 स्वस्तिश्री......मकरध्वजे सार्वभौमपदमनुभवति ....

10 संस्कृतभाणसाहित्यमु–तेलुगु–P 117.

In Public domain. Digitization Muthulakshmi Research Academy

पद्मे त्वन्नयने स्मरामि सततम्भावोभवत्कुण्डले
नीले मुह्यति किंकरोमि महितैः क्रीतोऽस्मि ते विभ्रमैः।
इत्युत्स्वप्नवचो निशम्य सरुषा निर्भर्त्सितो राधया
कृष्णस्तत्परमेव तद्व्यपदिशन् क्रीडाविटः पातु वः।।(यतिराजविजयः-1.1)

वसन्ततिलकभाणोऽयं गणपवरपु वेङ्कटकविनामधेयेन तेलुगुकविना आन्ध्रभाषायाम् अनूदितः। भाणोऽयं मुम्बय्यां चेन्नपुर्यां च आन्ध्रदेवनागरीलिप्योः प्रकाशितः।

4.2 शृङ्गारभूषणभाणः – वामनभट्टबाणः

वसन्ततिलकभाणसमकालिकोऽयं भाणः भट्टबाणबिरुदाङ्कितेन वामनेन रचितः। वसन्ततिलके नायकः प्रथमरङ्गाधिरोहणमहोत्सवे आहूतः, अत्र तु प्रथमार्तवमहोत्सवे आहूतः। अत्र नायकः विलासशेखरः प्रातरेव प्रस्थाय, वेशवाटीं प्रविश्य, तत्र तैस्तैराभाष्य, सायंकाले कनकमञ्जरीसुतायाः अनङ्गमञ्जर्याः प्रथमार्तवोत्सवे गच्छति। मध्येमार्गं गन्धसारानुरक्तां मलयवतीमाशिषा संभाव्य, कमलवतीं परामृश्य, माधवसूनुना मन्दारकेण सह सल्लप्य, रत्नावल्या सह संवादं कृत्वा, कनकलताकामन्दकौ मिलित्वा, ताभ्यां सरसमाभाष्य, इन्दुमत्याः कन्दुकक्रीडामालोक्य वासन्तिकया सम्भाष्य, कलकण्ठीधनमित्रयोः प्रणयकलहं निवार्य, नाट्याचार्यं गणदत्तं मिलित्वा डोलाक्षक्रीडादि दृष्ट्वा समभिवर्ण्य, मध्याह्ने च विश्रम्य, माधवसेनाचन्द्रसेनयोः कलहे मध्यस्थतां स्वीकृत्य तावुभावनुनीय, वेत्रवतीमाधवदत्तयोः कल्याणपत्रिकामालोक्य, दिनावसाने कामञ्जरीं वर्धापयति आशीर्भिः। अलङ्कारपोषणेन, रमणीयकल्पनायां, सुमधुरशैल्या च प्रथमगणनीये भाणवर्गे स्थानं भजति अयं भाणः। पश्यत वेश्यामातुः वर्णनपरोऽयं श्लोकः –

रसज्ञलोकैरभिनन्दितानां वाराङ्गनाचन्दनवल्लरीणाम्।

In Public domain. Digitization Muthulakshmi Research Academy

मुहुर्वमन्त्यो गरलं मुखेन स्वमातरः कालभुजङ्ग एव ।। (24)

एवमियमुपमापि अनुपमा–

मुग्धे मुखकमलं ते मौक्तिकनासाविभूषणादधरम् ।
अङ्कुरितामृतबिन्दो रिन्दोरिव बिम्बमातनोति मुदम् ।। (65)

कविसमयं शास्त्रविषयं च सङ्गमय्य श्लिष्टया रीत्या रचितोऽयं श्लोकोऽपि चमत्कारावहः । पश्यत–

वाचालमञ्जीरमनोहरेण पादेन पद्मोदरकोमलेन ।
वक्षस्थले ताडनमाचरन्त्या वराङ्गि सोऽयं क्रियतामशोकः ।।

चमत्कारावहसम्भाषणमपि अत्र हृद्यम् । अत्र नायकस्य मित्रं धनमित्रः स्वीये शृङ्गारानुभवे जातमन्तरायमित्थं वर्णयति –

तैस्तैर्वचोभिरनुनीय कथञ्चिदेनां
लीलाकृतिस्तनयुगां तरलायताक्षीम् ।
आलिङ्ग्य गाढमधिकं न पिबामि यावत्
तावच्चकार हतदुर्विधिरन्तरायम् ।। इति ।

तच्छ्रुत्वा विटः वदति– "अहो ! साधुतरे सङ्ग्रामे चापस्य ज्याभङ्गः" इति । एवं वेश्यामातृणां भर्त्सनादिष्वपि विटाः वेश्यासङ्गत्यै प्रयत्नशीला एव भवेयुरिति सन्दर्भे "काकोऽपि रटतु घटीयन्त्रमपि प्रवर्तताम्" इति लोकोक्तेः प्रयोगोऽपि रुचिरः । एवं तत्तत्सन्दर्भोचितलोकोक्तिप्रयोगे निपुणोऽयं कविः आत्मानं कालिदासबाणभट्टाभ्यामधिकं मन्यते । पश्यन्तु–

पद्ये पटीयान् किल कालिदासः गद्ये पटीयान् किल भट्टबाणः ।
पद्ये च गद्ये च परं पटीयान् वत्सान्वयो वामनभट्टबाणः ।।

अस्य भाणस्य प्रस्तावनायामपि–

सौभाग्यस्य निधिः श्रुतस्य वसतिः विद्यावधूनां वरो
लक्ष्म्याः केलिगृहं प्रसूतिभवनं शीलस्य कीर्तेः पदम् ।

In Public domain. Digitization Muthulakshmi Research Academy

निस्सामान्यविकासया कवितया जागर्ति वत्सान्वयः
श्रीमान् वामनभट्टबाणसुकविः साहित्यचूडामणिः ।।

इति आत्मानं साहित्यचूडामणिबिरुदभाजं प्रस्तौति। भाणेऽस्मिन् सूत्र-धारेण सह पारिपार्श्विकोऽपि प्रविष्टः । अत्र प्रस्तावनायां कृता इयं प्ररोचना-

वाचस्तस्य कवेः प्रसन्नमधुराः दक्षा प्रयोगे वयं
वैदग्ध्याः प्रथमावतारसरणिः सामाजिकानां मनः ।
कालः कोकिलकण्ठरागविलसत्कन्दर्पदर्पोदयः
शृङ्गारोऽपि रसः स एष मिलितो दिष्ट्या गुणानां गणः ।। इति

श्रीहर्षस्य नागानन्दीयप्ररोचनां "श्रीहर्षो निपुणः कविः" रिति स्मारयति किल। एवं बाणकालिदासादिमहाकवीनामनुसरणमपि स्थाने स्थाने अत्र समुपलभ्यते। अस्य भाणस्य नाम्नैव अत्र शृङ्गारस्य प्राधान्यमवगम्यते। वीरसूचनमपि मेषयुद्ध-कुक्कुटयुद्ध-मल्लयुद्धवर्णनैः कृतम्। अत्र गेय-पदस्य लास्याङ्गस्य सन्निवेशः कृतः । धनवती वेश्या वसन्तमासे स्वप्रियेण सह डोलाविहारमनुभवति। तदा तां डोलां नोदयन्तीभिः वेश्यासखीभिः गीयमानं प्राकृतगीतमत्रोपनिबद्धं सुन्दरम्। पश्यत तस्य संस्कृतच्छायाम्

जयति मधुमासलक्ष्मीः जयत्यनङ्गस्य बाहुदर्पश्रीः ।
जयति निशाकरबिम्बं जयति च मलयाद्रिसम्भवः पवनः ।
जयति च मध्यमपि कृशं जघनमपि घनं स्तनमप्युत्तुङ्गम् ।
नयनयुगलमपि दीर्घं तत्तादृशमङ्गनानां सौभाग्यम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

एवमत्र सूर्योदयकेशप्रसाधनवीरायितादि[11] वर्णनानि रम्याणि। अत्र मन्दारकः इति कश्चित् यज्ञार्थं पित्रा निक्षिप्तं धनमादाय वेश्यां काञ्चित् कलत्रीकर्तुमुद्युक्तः विटेन अभिनन्दितः। एवं लघुकायोऽपि भाणः चमत्कारावहसन्दर्भैः रम्यः।

एतद्भाणकर्ता वामनभट्टबाणनाम्ना प्रसिद्धः। वामन इति अस्य व्यावहारिकं नाम। वत्सवंशः ब्राह्मणः। वरदाग्निचित् अस्य पितामहः। कोमटि यज्वा अस्य पिता। विजयनगरस्थापनाचार्यः विद्यारण्यः अस्य गुरुः। एतत्सर्वमनेन स्वयमेव शब्दचन्द्रिकाशब्दरत्नाकरयोः उल्लिखितम्[12]। आन्ध्रदेशे कोण्डवीडु प्रान्तस्य अधिपस्य रेड्डिकुलजस्य पेदकोमटि वेमारेड्डि इत्याख्यस्य आस्थाने अयमासीदिति कृष्णमाचार्याः संस्कृतसाहित्येतिहासेऽलिखन्[13]। अयं वेमारेड्डिः[14] वेमभूपालनाम्ना प्रसिद्धः कविपण्डितपोषकः स्वयमेव पण्डितः आसीत्। अनेन साहित्यचिन्तामणिरित्यलङ्कारशास्त्रग्रन्थः, अमरुशतकस्य व्याख्या शृङ्गारदीपिका च रचितौ। अयं वामनः आन्ध्रवाङ्मये प्रसिद्धस्य कवेः श्रीनाथस्य समकालिकः। श्रीनाथोऽपि वेमभूपालेन सम्मानितः। वेमभूपालस्य राज्यपालनसमयः क्रि. श. 1403–1420। अयं वामनः वेमभूपालसभायां त्रिंशे वयसि प्रविष्ट इति

---

11 हृद्यं वीरायितवर्णनम् इदम्–
ताराजालकचुम्ब्यमानकमलं धौतप्रवालाधरं
शङ्खान्तर्गतकूजितं शशिकलासंसक्तकालाम्बुजम्।
शैलक्षोभवलन्मृणाललतिकं सन्त्रस्तविद्युल्लतं
वेलोल्लङ्घिमनोभवं विजयते वीरायितं योषिताम्॥ (श्रृ.भू. 2)

12 विद्यारण्यगुरून् सार्वभौमाद्यखिलसत्कवीन्।
नमस्कृत्याथ बाणेन क्रियते शब्दचन्द्रिका॥
वरदाग्निचितः पौत्रः पुत्रः कोमटि यज्वनः।
जागर्तिवामनो बाणो वत्सवंशशिखामणिः॥

13 History of Classical Sanskrit literature – M. Krishnamachariar. P-215 (1970)

14 Contribution of Andhra to Sanskrit Literature – B. RamaRaju P. 498-513;

In Public domain. Digitization Muthulakshmi Research Academy

कृष्णमाचार्याः [15]। श्रीविद्यारण्यचरणानामन्तिमः कालः क्रि. श. 1369 वर्ष इति ऐतिहासिकाः। अयं च भाणकर्ता श्रीविद्यारण्येभ्य एव सर्वा विद्याः जग्राहेति क्रि. श. 1340 प्रान्ते एव अयमुत्पन्नः स्यात्। श्रीसागि नरसिंहमहोदयाः क्रि. श. 1441 वर्षे वामनभट्टबाणनाम्ना लिखितः शिलालेखः उपलभ्यते इति अलिखन्[16]। भाणस्य कलत्रपत्रिकायां मन्मथ-संवत्सरस्य उल्लेखः वर्तते[17]। अयं च वर्षः क्रि. श. 1415 भवति। अयं वामनः वेमभूपालस्य चरितं गद्यकाव्यरूपेणावर्णयत्। तेनैवायं भट्टबाण इति गौरवोपाधिना सम्मानितः। ततश्च अस्य वामनभट्टबाणस्य कालः क्रि. श. 1340–1441 इति वक्तुं शक्यते। अयं च अभिनवभट्टबाण-षड्भाषावल्लभ–कविसार्वभौम–साहित्यचूडामणीत्यादि बिरुदभाक् बहून् ग्रन्थान् अरचयत्। तेषु इदानीमुपलभ्यमानाः – (1) नलाभ्युदयम्,(2) रघुनाथचरितम्, (3) हंससन्देशः इति काव्यत्रयं, (4) कनकलेखा-नाटकम्, (5)पार्वतीपरिणयनाटकम्, (6) शृङ्गारभूषणभाणः इति रूपकत्रयं, (7) बृहत्कथामञ्जरी, (8) वेमभूपालचरितम् इति गद्यकाव्य-द्वयम्, (9) शब्दार्थचन्द्रिका, (10) शब्दरत्नाकर इति निघण्टुद्वयञ्च। अस्य भाणोऽयं निर्णयसागरद्वारा प्रकाशितः। अयं च भाणः कोण्डवीडु विरूपाक्षदेवस्य चैत्रयात्रोत्सवेऽभिनीतः। अथ वामनभट्टबाणस्य पोषकः वेमभूपालोऽपि भाणमेकं रचितवानिति तस्यैव साहित्यचिन्तामणिग्रन्थात् ज्ञायते[18]। परन्तु तस्य नाम, इतिवृत्तादिकं किमपि न ज्ञायते। नैतावदयमुपलब्धः। यदि कुत्रचित् संरक्षितः उपलभ्यते चेत् भाग्यमित्येव चि-

---

15 History of classical Sanskrit literature -Krishnamachariar – P.213-216 (1970)

16 Reddi Sanchika – Sagi Venkata Narasimham-MA.

17 स्वस्ति समस्तभुवनमोहने मन्मथनामनि संवत्सरे विजयनगरवासी माधवदत्तः नेत्रवतीदुहितुः नवमल्लिकायाः कलत्रपत्रमर्पयति

18 History of classical Sanskrit literature – M. K. - P778-779 (old), P506 (1970)

In Public domain. Digitization Muthulakshmi Research Academy

न्तनीयम्।

4.3 शृङ्गारशेखरभाणः–वेल्लाल उमामहेश्वरः[19]

अस्मिन् शतके अर्वाचीनतां प्रसिद्धिं चानुलक्ष्य अयं भाणः तृतीयमेव स्थानमर्हति। अयं भाणः आन्ध्रसाहित्य–अकाडमी द्वारा बि. रामराजु–महोदयानां सम्पादने 1969 वर्षे प्रकाशितः। यदि च भाणममुं पूर्वतनभाणद्वयेन तोलयामः तर्हि अत्र तदपेक्षया प्रतिभाविलसनं न्यूनमित्येव विमर्शकानाम् आशयः। अथापि रम्याः सन्दर्भा अपि सन्त्येव। अतः न तथोपेक्ष्यः। काञ्चीपुरीय–एकाम्रेश्वरवसन्तोत्सवेऽयं भाणः अभिनीतः।

अत्रेतिवृत्तं पूर्वभाणद्वयसदृशमेव। अत्र नायकः शृङ्गारशेखरः। अयमुत्पलमालादर्पणपरिणयोत्सवार्थमाहूतः प्रातरेव प्रस्थाय सन्ध्यासमये तत्र गत्वा वधूवरौ आशीर्भिरभिनन्दयतीति इतिवृत्तमत्र। मध्येमार्गं बहूनि सत्कार्याणि समाचरति। मित्राणां परामर्शः, वेशवाटिकासौभाग्यवर्णनं, पैतृकं सर्वस्वं व्ययीकृत्य वेश्यासहधर्मचारिण्या सुरतयागमनुतिष्ठतः युवकस्य प्रशंसा, प्रणयकलहे मध्यवर्तित्वं, एकस्याः कृते युद्धमाचरतोः प्रेमिकयोः अभिशंसनं, द्यूतपणबन्धपत्ररचनम्, उज्जयिनीतः कामपि परदारां सम्मोह्य काञ्चीपुरमानीतवतः मित्रस्य अभिनन्दनं, कादम्बर्या सह सल्लापः इत्यादि तस्य तद्दिवसकार्याणि। मध्ये यथावत् मेषयुद्धादिकं वर्णयति। अत्रेतिवृत्तं दर्पणपरिणयोत्सव इति नान्दीपद्येनानेन सूचयति कविः

यमालोक्य स्वस्मिन् मणिमुकुरभासिस्तनतटे
स्फुरद्वक्राकारं कररुहपदाशङ्कितहृदया।
सलज्जा हस्ताभ्यां स्थगयति नवोढा मुहुरुमा
स बालेन्दुः क्रान्तिं हरमुकुटवासी हरतु वः।।

---

19 शृङ्गारशेखरभाणप्रस्तावना – बि. रामराजु–साहित्य–अकाडमी–हैदराबाद (1969)

In Public domain. Digitization Muthulakshmi Research Academy

अत्र शृङ्गारवर्णनं, साम्प्रदायिककविसमयानां सान्दर्भिकप्रयोगः, लोकोक्तीनां चतुरोक्तीनां च यथासन्निवेशमुपयोगश्च हृद्या एव। अयं कविः आत्मानं कालिदासं मन्यते। अतः कालिदासभावानामनुकरणमवश्यकर्तव्यतया भावयतीव दृश्यते। पश्यन्तु 'अनुरागवती सन्ध्ये' ति वाल्मीकिश्लोकानुकरणमिदम्।

विधाय परिरम्भणं विकृतरागया सन्ध्यया
विकृष्य च तमोमयं निवसनं निशा योषितः।
विभातजलदाधरं विकसितारविन्देक्षणं
मुखं किमपि भानुमानिदमहश्श्रियश्चुम्बति।।

एवं – "बहिस्सौधायन्त्यां सविधनिलयत्र्यम्बकशिवश्शशिज्योत्स्नावीचिस्नपितवलभीशेखरभुवि" इति "बाध्योद्यानस्थितशिवशिरश्चन्द्रिकाधौतरम्या" इति मेघसन्देशश्लोकस्य, तथैव "वंशीश्यामा वरतनुरियं चन्दनालिप्तगात्री" इति "तन्वीश्यामा" इति तत्रस्थस्यैव श्लोकस्य अनुकरणमिति तु स्पष्टमेव। अत्र चतुरोक्तिसन्दर्भा अपि हृद्याः सन्त्येव। पश्यन्तु–

अपि यौवनपुष्पितां मुमुक्षुः गणिकां मातृमतीति को नु कामी।
अपयाति किमन्यपुष्टपोतो वृतिगुप्तेति विहाय चूतयष्टिम् ।।

अत्र वसन्ततिलकभाणानुकरणमपि दृश्यते। वरदाचार्यः स्वीयं भाणं सकलरसपोषोपजनकत्वेन वर्णितवान्। अयं तु स्वीयं भाणं प्रतिपदमुद्भिन्नरसममूखभरत्वेन वर्णयति। 'अयस्कान्त क्षेत्रे सूचीविक्रय' इति लोकोक्तिस्त्रापि उपयुक्ता। वसन्ततिलके कन्दुकक्रीडावर्णने 'हारावलि ! मुखकमलमाघ्रातुमनवरतमुत्पन्नं कन्दुकं किमर्थं ताडयसि? किं ब्रवीषि? भवादृशोचितं वदनकमलमाघ्रातुं कोऽसौ पतित' इति" . इत्ययं भावः भाणेऽस्मिन्

In Public domain. Digitization Muthulakshmi Research Academy

करपल्लवताडितः पदान्ते पतितः कान्त इवैष कन्दुकस्ते ।
मुहुरुत्पतनं करोति तूर्णं मुखमाघ्रातुमिवोत्सुको भवत्या ।।

इत्यनुसृतः । अस्मिन्नेव काले अभिनवबाणेनापि भाणः रचितः । अतः अभिनवकालिदासेनापि भाणः रचनीय इति भावनैव अस्य कवेः भाणरचनायां प्रेरिकेत्यपि ऊहितुं शक्यम् । अस्यैव भाणस्य शृङ्गारकोशः, शृङ्गाराद्वैतभाण इति नामान्तरे ।

एतद्भाणकर्ता वेल्लाल उमामहेश्वरः मोक्षगुण्डं अक्कय्यसूरिशिष्यः । कविः पण्डितः विमर्शकश्च । अनेन रचितं चम्पूभागवतमतीव प्रसिद्धम् । चम्पूभारतकर्ता अनन्तभट्टः अस्य प्रतिस्पर्धीति कश्चन वादः प्रचारेऽस्ति । अयमपि भारतचम्पूं लिखितवान् । अथापि अनन्तभट्टस्यैव चम्पूभारतं प्रायः सर्वैरादृतम् । अस्य शिष्यः कविकुञ्जरनामा स्वीयराजशेखरचरितप्रबन्धे स्वगुरुं विद्यानगराधीशराजशेखरास्थानस्थितमुक्तवान् । विजयनगरेतिहासे सङ्गवंशीयः राजशेखरः एक एव मल्लिकार्जुनरायस्य पुत्रः । अस्य कालः क्रि. श. 1446–1465[20] । अस्य भागवतचम्पूबन्धस्य व्याख्या अस्य गुरुणैव रचिता । तत्र अस्य गुरुः अमुं 'वेल्लालकुलवाराशिं' कथयति । अनेन रचिते अडयार् तालपत्रग्रन्थालये संरक्षिते तत्त्वचन्द्रिकाग्रन्थे मोक्षगुण्डम् अक्कय्यसूरिशिष्यवेल्लाल उमामहेश्वरकर्तृत्वं निर्दिष्टम् । यद्यपि अयं स्वग्रन्थे कुत्रापि स्वीयनामनिर्देशं न कृतवान् अभिनवकालिदासनाम्ना एव आत्मानं ख्यापितवानथापि उपलब्धैरेतैरन्तरङ्गसाक्ष्यैः अस्य नाम वेल्लाल उमामहेश्वर इति निश्चीयते । अयं च बहुग्रन्थकर्ता अद्वैतमतानुयायी । (1) तत्त्वचन्द्रिका, (2) विरोधवरूथिनी, (3) प्रसङ्गरत्नाकरः, (4) अद्वैतकामधेनुः, (5) वेदान्तसिद्धान्तसारः, (6) भागवतचम्पूः, (7) शृङ्गारशेखरभाणः, (8) अभिनवभारतचम्पूः,

20 शृङ्गारशेखरभाणप्रस्तावना–बि.रामराजु. 1969

In Public domain. Digitization Muthulakshmi Research Academy

(9) भगवत्पादस्तुतिः, (10) कलिविडम्बनम्। कृष्णमाचार्यैः[21] स्वीये संस्कृतसाहित्यचरिते अयं क्रि. श.एकादशशतके आसीदिति उक्तम्। परन्तु अयं निर्णयः अन्तरङ्गसाक्ष्यविरुद्धः। अनेन रचितः विरोधवरूथिनीग्रन्थः मध्वसिद्धान्तखण्डनपरः। अतश्चायं मध्वाचार्यात्पर इति निश्चयः। अतः त्रयोदशशतकात्पर एव। केचन अमुं क्रि. श. चतुर्दशशतके वर्तमानं कथयन्ति [22]। तदपि न युक्तम्। राजशेखरस्य सभापण्डितत्वेन अस्योल्लेखात् तस्य पञ्चदशशतके एव वर्तमानत्वाच्च। किञ्च वसन्ततिलकानुसरणमप्यस्य वरदाचार्यानन्तरभावित्वमेव सूचयति। अस्य पुत्रः श्रीकण्ठः। अयमपि 'कन्दर्पदर्पण' भाणं रचितवान्। अथ तञ्जापुरतालपत्रग्रन्थालयमातृकापरिचयग्रन्थात् तत्त्वविवेककर्ता उमामहेश्वरः क्रि. श. 1547 प्रान्ते आसीदिति, अयं पुरुषोत्तमपुरवासीति, नृसिंहाश्रमशिष्य इति, भास्करदीक्षितस्य पितेति च ज्ञायते। अयं तु भाणकर्ता नेति स्पष्टमवगम्यते। अतः तञ्जापुरतालपत्रग्रन्थालयस्थतत्त्वविवेकग्रन्थविवरणमादृत्य अस्य क्रि. श. षोडशशतकीयत्वकल्पनमपि न युक्तम्। अतः अयं क्रि. श. पञ्चदशशतकवर्ती एव। अतोऽयं क्रि. श. 1415–1490 मध्ये आसीदिति ऊह्यते।

4.4 कन्दर्पदर्पणभाणः – श्रीकण्ठः

अयमपि भाणः शृङ्गारभूषणभाणवत् काञ्चीपुरे एकाम्रेश्वरस्य वसन्तोत्सवे एवाभिनीतः [23]। तञ्जापुरतालपत्रग्रन्थालये अस्य लिखितप्रतिकृतिद्वयं संरक्षितं ययोरेका देवनागर्याम् अपरा च तेलुगुलिप्यां च लिखिते।

---

21 History classical Sanskrit literature – M. K. P. 596 (1970)

22 संस्कृतभाणसाहित्यमु–सूरं श्रीनिवासुलु– पृ.78.

23 कम्पानदीतटवास्तव्यस्य कात्यायनीस्तनमुद्रितोरःस्थलस्य भगवतः श्रीमदेकाम्रनाथस्य वसन्तोत्सवयात्रासमागतानां ...Tanjore DC. No . 4581

In Public domain. Digitization Muthulakshmi Research Academy

अयं सम्पूर्ण एवोपलभ्यते[24]। न प्रकाशितः। अत्रेतिवृत्तमपि न ज्ञायते। अस्य भाणस्य शैलीपरिचायकः अयं नान्दीश्लोकः

यस्य घ्राणसुखाः शराः श्रुतिसुखी मौर्वी रसज्ञप्रियं
कोदण्डं नयनोत्सवं प्रियसखः स्पर्शाभिनन्द्यो रसः।
चेतः प्रीतिकरी जनिस्त्रिजगती हृद्यञ्च बाह्वोर्बलं
सोऽयं पञ्चशरस्तनोतु भवतां सौभाग्यमव्याहतम् ।।

एतद्भाणकर्ता श्रीकण्ठः, आत्मानं कलियुगकालिदाससूनुं कथयति[25]। अयमभिनवकालिदाससूनुरिति भावयितुं शक्यते, यतः उभयोरपि एकाम्रेश्वर एवेष्टदैवम्। विमर्शका अपि तथैव अभिप्रयन्ति इति पूर्वमेवोक्तम्। अयमपि काश्यपगोत्रः। अनेन मालविकाग्निमित्रस्य व्याख्यापि रचिता[26]। यतोऽस्य पिता क्रि. श. पञ्चदशशतके आसीत्, अतोऽयमपि तथेति वक्तुं शक्यम्।

4.5 कन्दर्पविजयभाणः – उद्दण्डकविः

बरोडा हस्तलिखितग्रन्थालये संरक्षितः असम्पूर्णः एष भाणः उद्दण्डकविरचितः[27]। अयं च कविः दाक्षिणात्यः वाधूलगोत्रः रङ्गाम्बारङ्गनाथयोः पुत्रः। काञ्चीसमीपस्थलाटनगराभिजनः। अयं च केरलीयस्य मलबारमानविक्रमस्य सभाविद्वत्सु अग्रगण्यः आसीत्। नल्लाबुधः सुभद्रापरिणये उद्दण्डममुं स्मृतवान्, अस्य जन्मस्थलं कण्डरमाणिक्कग्राममुक्तवान्। अतोऽयं तस्मिन् ग्रामे उत्पन्नः स्यात्। अस्य पितापि कविः पण्डितश्च आसीत्। अनेन कविना कोकिलसन्देशः, मल्लिकामारुतप्र-

24 Tanjore DC. No. 4581, 4582
25 अस्ति खलु प्रशस्तमहिमा समस्तविद्यापारदृश्वा काश्यपकुलललामभूतः कलियुगकालिदाससूनुः....
26 Triennial catologue II 820, 2520.
27 Contribution of Sanskrit literature – K. K. Raja -P73-80

In Public domain. Digitization: Muthulakshmi Research Academy

करणम्, कन्दर्पविजयभाणश्च रचितानि। अस्य भाणं विना अन्यत् द्वयं प्रकाशितं सहृदयैरादृतं च। मलबारमानविक्रमः पञ्चदशशतके आसीदिति कुञ्जुण्णिराजामहाशयः स्वीये केरलसंस्कृतसाहित्यचरिते उक्तवान्।

4.6 शृङ्गारजीवनभाणः – अवधानसरस्वती

अस्मिन्नेव पञ्चदशे शतके रचितः अप्रकाशितः तञ्जापुरसरस्वतीमहल–हस्तलिखितग्रन्थालये संरक्षितः शृङ्गारजीवनभाणः[28] काञ्चीनगरसमीपस्थ–मक्षिकारण्यवासिना अवधानसरस्वतीनामधेयेन रचितः। अयमात्रेयगोत्रः। सायनाचार्यस्य आज्ञया आयुर्वेदसुधानिधिं रचितवतः एकाम्रनाथपुत्रस्य कामेशनाथस्य जामाता। अनेन वेदान्तशतश्लोकी, औषधसङ्ग्रहः, वैद्यशतश्लोकी, शृङ्गारजीवनभाण इति ग्रन्थाः रचिताः। अस्य पुत्रः वेङ्कटेशोऽपि भेषजकल्पव्याख्या–प्रश्नोत्तरमाला–वृत्तरत्नावल्यादिग्रन्थकर्ता।

4.7 हरिविलासभाणः – हरिदासः

अस्मिन्नेव पञ्चदशशतके रचित इति अभ्यूहितः हरिविलासभाणोऽयमपि अप्रकाशितः मद्रपुरीहस्तलिखितग्रन्थालये संरक्षितः[29] वर्तते। अस्य रचयिता हरिदासः। अस्मिन् भाणे मदनमञ्जरी–माधवयोः प्रणयवृत्तं वर्णितम्। अयं च प्रौढदेवरायपुरस्थलक्ष्मीनारायणदेवस्य वैशाखोत्सवेषु प्रदर्शित इति भाणे स्थितप्रस्तावनया ज्ञायते। अस्य कवेः विषये किमपि स्पष्टं न ज्ञायते। परन्तु प्रौढदेवरायपुरोल्लेखात् अयं प्रौढदेवरायस्य काले आसीदिति ऊह्यते। अस्य कविता सरला सरसा च। पश्यत नान्दीमिमाम्–

---

28 Des. cat. of Skt. M.S. Tanjore-No 4612

29 GOML-Madras – R. No. 12733.

In Public domain. Digitization Muthulakshmi Research Academy

कल्याणं कलयन्तु वो मृदुहृदावालप्ररोहत्कृपा-
वल्लीपल्लवतल्लजव्रजमहस्सन्देहसान्दायिनः ।
गाढाश्लिष्टमुरारिकौस्तुभमणीरोचिर्विशङ्काकराः
श्रीलक्ष्मीकुचमण्डलीमकरिकासिन्दूरबिन्दूत्कराः ।।

श्रीलक्ष्म्या वदनग्रीवासाम्यं द्रष्टुमिवादरात् ।
पद्मशङ्खौ वहन् दोर्भ्यां मुकुन्दः श्रेयसेऽस्तु वः ।।

___***___

In Public domain. Digitization Muthulakshmi Research Academy

अध्यायः 5

क्रि. श. षोडशशतकभाणाः

षोडशे शतकेऽस्मिन् पञ्च भाणाः रचिताः। एतेषु पञ्चसु भाणद्वयं प्रकाशितम्। एकः नाममात्रावशिष्टः। अन्यौ द्वौ हस्तलिखितग्रन्थालये संरक्षितौ। कालक्रममनुसृत्य आदौ रचितः वेदान्ताचार्यरचितः शृङ्गारसर्वस्वभाणः।

5.1 शृङ्गारसर्वस्वभाणः – वेदान्ताचार्यः

तिरुमलश्रीवेङ्कटेश्वरस्य कलियुगदेवस्य वसन्तोत्सवे प्रदर्शितः अयं भाणः अप्रकाशितः तञ्जापुरहस्तलिखितग्रन्थालये सुरक्षितः[1]। अयं च भाणः वेदान्ताचार्येण रचितः। अयं कविः भारद्वाजगोत्रः। पिता वेङ्कटरामाचार्यः[2]। अस्य पितुः गुरुः वाधूलश्रीनिवासाचार्यः। भाणकर्तुः पिता अष्टावधानी। अयं कविरप्यष्टावधानी। मधुरापुरनिवासी। अस्य गुरुः सूर्यनारायणाभिधः[3]।

---

1 D. C. Tanjore VIII – No 4626 – Written in Gramtha Script.

2 अस्तिखलु भारद्वाजकुलतिलकः खलवादिकुलवातूलवाधूलश्रीनिवासगुरुकरुणाकङ्कटो वेङ्कटरामार्यनामा सुधीसुत्रामा – भाणप्रस्तावना

3 श्रीपत्यन्वयपद्मतिग्मकिरणः श्रीसूर्यनारायणः।
भ्राता कोविदगन्धसिन्धुरततेः यज्वा यदीयो गुरुः।।

In Public domain. Digitization Muthulakshmi Research Academy

सर्वतन्त्रस्वतन्त्रेति बिरुदेन सम्मानितोऽयं पाण्ड्यराज्यपरिपालकस्य पट्टाभिरामस्य प्रियमित्रम्। अयं पट्टाभिरामः कृष्णदेवराय (क्रि. श. 1509-1529) सेनानायकस्य रामभद्रनायकस्य सहोदरः। अत्र भाणे रामभद्रनायकः स्मृतः[4]। अतोऽयं षोडशशतकस्य प्रथमभागे आसीदिति ऊहितुं शक्यम्। अस्य कविताशैल्या उदाहरणभूतोऽयं श्लोकः –

मुक्तागुच्छमिषाद्यशो वहति यो मूर्ताविरुद्धैर्गिरा-
मष्टासु प्रथितो दिशासु विभवैरष्टावधानी कविः।
तस्यायं तनयश्चतुर्नयपथोद्दामस्फुरन्निर्णयो
वेदान्तार्यसुधीमणिर्विजयते विद्वत्कवीन्द्राग्रणीः॥

5.2 शृङ्गारसर्वस्वभाणः – राजचूडामणिदीक्षितः

अयं च भाणः नाममात्रावशिष्टः विद्वत्कवितल्लजराजचूडामणिदीक्षितविरचितः। राजचूडामणिदीक्षित एव स्वयं स्वीये काव्यदर्पणाख्येऽलङ्कारग्रन्थे भाणममुमुल्लिखति। अस्यैव राजचूडामणिदीक्षितस्य यज्ञनारायणदीक्षित इत्यपि नामान्तरम्। अयं रत्नखेट श्रीनिवासदीक्षितस्य तृतीयः पुत्रः। माता कामाक्षी। पितामहः लक्ष्मीवल्लभः। प्रपितामहः कृष्णभट्टः। विश्वामित्रगोत्रः। अर्धनारीश्वरवेङ्कटेश्वरदीक्षितयोः शिष्यः। अनयोः वेङ्कटेश्वरदीक्षितः गोविन्ददीक्षितस्य द्वितीयपुत्रः। गोविन्ददीक्षितः अस्य सतीर्थ्यः। रामभद्रदीक्षितस्य श्वशुरः चोक्कनाथोऽपि अस्य सहाध्यायी। अयं भाणकर्ता सर्वतन्त्रस्वतन्त्रस्य अप्पय्यदीक्षितस्य स्यालः। रत्नखेटश्रीनिवासदीक्षितः शताधिकग्रन्थकर्ता सूरप्पनायकस्य (क्रि. श. 1465-1550) सभापण्डितः आसीत्। केशवदीक्षितः, अर्धनारीश्वरः इति राजचूडामणेः द्वौ सोदरौ। अयमपि राजचूडामणिः पितेव बहुग्रन्थकर्ता।

4 स हि (पट्टाभिरामप्रभुः) समधिकवितरणविभवविजितकर्णः सकलबुधावनलब्धवर्णः सद्गुणसमुद्ररामभद्रसेनानाथसोदरः.......

In Public domain. Digitization: Muthulakshmi Research Academy

त्र्यर्थिकाव्यरचनादक्षोऽयं न्यायमीमांसालङ्कारशास्त्रेषु ग्रन्थकर्ता बहुकाव्यनिर्माता च आसीत्। अमुमधिकृत्य टि. आर्. चिन्तामणिमहोदयेन रुक्मिणीपरिणयमहाकाव्यप्रस्तावनायां विस्तरेण प्रतिपादितम्[5]। रुक्मिणीपरिणयमहाकाव्यमनेन राजचूडामणिना रचितं मद्रपुर्याम् अडयार् ग्रन्थालयद्वारा प्रकाशितम्। तत्रोल्लिखिता एतद्रचिताः ग्रन्थाः – उपनिषद्व्याख्या, यजुर्वेदव्याख्या, प्रायश्चित्तप्रदीपिका, तन्त्रशिखामणिः – सङ्कर्षमुक्तावलि–शास्त्रदीपिकाव्याख्येति त्रयः मीमांसायां, मणिदर्पणः, न्यायचूडामणिः इति न्याये द्वौ, राघवकृष्णपाण्डवीयमिति त्र्यर्थिकाव्यम्, रत्नखेटविजयः, रामायणचम्पूपूरणम्, भारतचम्पूः, शङ्कराचार्यतारावलिः, शङ्कराभ्युदयम्, कान्तिमतीपरिणयः, कंसध्वंसनम्, चित्रमञ्जरी, रुक्मिणीपरिणयः, रघुनाथभूपविजयः, रामकथा इति काव्यानि, वृत्ततारावलिः इति च्छन्दः, कमलिनीकलहंसनाटिका, आनन्दराघवनाटकम्, शृङ्गारसर्वस्वभाणः, साहित्यसाम्राज्य–काव्यदर्पणाख्यौ अलङ्कारग्रन्थौ। एते सर्वेऽपि अनेन स्वीये काव्यदर्पणे स्वयमेवोल्लिखिताः। महत् दौर्भाग्यमेव यदेतादृशस्य कवेः भाणोऽयं नाममात्रावशिष्ट इति। कालेन कुत्रापि संरक्षितः प्रकाशे आयास्यति चेत् संस्कृतलोकस्य तत्सौभाग्यमेव भविष्यति।

5.3 महिषमङ्गलभाणः – नारायणन् नम्बूतिरिः

महिषमङ्गलमिति ब्राह्मणवंशः केरलेषु प्रसिद्धः। अयं च पण्डितवंशः। अस्मिन् वंशेऽनेके ग्रन्थकर्तारः आसन्। ज्योतिश्शास्त्रेऽपि अयं वंशः प्रसिद्धिमगात्। अस्य भाणस्य तद्वंश्येन रचितत्वात् अस्य महिषमङ्गलभाण इति व्यवहारः। इतिवृत्तेन सह अस्य नाम्नः सम्बन्धो नास्ति अपितु कर्त्रा सहैव। केरलेषु अत्यन्तं प्रसिद्धः केरलीयेन रचितोऽयं भाणः। अयं च

5 See Introduction to Rukminiparinaya Mahakavyam by TR. Chintamani. PXXIV-XXVI. Adayar-1929.

 In Public domain. Digitization Muthulakshmi Research Academy

मलयाललिप्यां, देवनागर्यां च द्विवारं प्रकाशितः[6]। कैक्कुलण्णर् रामवारियर्, पुनश्शेरि नम्बियन् (नीलकण्ठशर्मा) इत्येताभ्यां अस्य भाणस्य द्वे व्याख्ये रचिते। अनङ्गपताका–अनङ्गकेत्वोः शृङ्गारः अत्र वर्णितः। अर्वाचीनभाणा इव अत्रापि प्रातरारभ्य सायं पर्यन्तं नायकस्य सञ्चारः, विविधव्यक्तिभिस्सह सल्लापाः, विविधवर्णनानि च प्रायः समानानि। कविता सरसा मधुरा च। अत्रत्याः श्लोकाः केरलेषु बहुतरं प्रचारं प्राप्ताः। तेष्वन्यतमोऽयं श्लोकः –

कुटिलमसितमेघच्छायमाभोगभारं
चिकुरमधिकदीर्घं लम्बमानं वहन्ती।
परिलघयति पश्चाद्भागकान्त्यापि धैर्यं
न हि गुलगुलिकायाः क्वापि माधुर्यभेदः।।

एवमेव भाणेऽस्मिन् स्नातुं वापीं प्रति प्रस्थितायाः बालायाः वर्णनमपि रम्यम्। पश्यन्तु –

अर्धालक्ष्यमनोहरोरुयुगलं नात्यायतं बिभ्रती
वासःप्रोषितभूषणैरवयवैः कान्तिं किरन्ती पराम्।
तैलाभ्यक्ततनुर्निबद्धचिकुरा ताम्बूलगर्भानना
वापीं स्नातुमितो निजान्निलयनान्निर्याति शातोदरी।।

एवमत्र भरतवाक्यमपि अरसिकाय कवित्वनिवेदनं शिरसि मालिखेति सूक्तिं स्मारयति।

वीतासूयैर्विपश्चिद्भिः साधुसाधितरीतयः।
असम्प्राप्तखलश्रोत्राः सन्तु काव्यकृतां गिरः।।

---

6 देवनागर्यां पालक्काडनगरात् 1880 वर्षे प्रकाशितः। मलयाललिप्यां मलयालव्याख्यया सह त्रिशूरनगरात् प्रकाशितः।

In Public domain, Digitization Muthulakshmi Research Academy

एतादृशेऽस्मिन् भाणे भाणकर्तुः नामोल्लेखः नास्ति। भाणकर्ता क इत्यत्र विमर्शकेष्वेव मतभेदः वरीवर्ति। डा. कुञ्जुण्णिराजामहोदयाः[7] स्वीये संस्कृतसाहित्यं प्रति केरलीयानां योगदानमिति ग्रन्थे कर्तृविषये एवं कथयन्ति – " अस्य भाणस्य कर्ता शङ्करकविः। अन्ते भरतवाक्ये[8] "राजत्कीर्तिविभूषितत्रिभुवनः श्रीराजराजाह्वयो राजेन्दुः" इत्युक्तत्वात् कोच्चिन् पालकस्य राजराजस्यास्थाने अयमासीदिति ज्ञायते। तथैव 'उरकं' देवालयस्थिता कामाक्षी कुलदेवतेति ज्ञायते। एवं भाणे

ज्योतिश्शास्त्रविदां पुरस्सरसुरस्रोतस्विनीवीचिका
गर्वोन्मीलनकर्मठोद्भटवचःसन्दोहवारांनिधे।
विद्वन् विश्वजनाभिराम चिररात्राय क्षितौ जेजिहि
ध्वस्तामङ्गल माषमङ्गलमहीगीर्वाणचूडामणे।।

इति अस्य प्रशंसाश्लोकः वर्तते। अतोऽयं कविः ज्योतिश्शास्त्रविदिति ज्ञायते। महिषमङ्गलवंशे द्वावेव ज्योतिश्शास्त्रे प्रसिद्धौ शङ्करः नारायणश्च। एतावुभावपि पितापुत्रौ। प्रायश्चित्तविमर्शनीग्रन्थे नारायणः आत्मानं महिषमङ्गलवंश्यं, शङ्करात्मजं वर्णयति। पितरं च ज्योतिर्विदं ख्यापयति। शङ्करोऽपि बहुग्रन्थकर्ता। अयं कालदीपकमिति ज्योतिश्शास्त्रग्रन्थस्य मलयालभाषायां व्याख्यां रचितवान्। संस्कृतव्याकरणे रूपानयनपद्धतिं रचितवान्। तस्य ग्रन्थस्यान्ते आत्मनः नाम शङ्कर इति, वल्लीनदीतीरे पुरुवनग्रामः स्वस्य जन्मस्थलमिति, स्वजन्मकालश्च 1678168 कलियुगवर्ष इत्युल्लिखति। अयं च वर्षः क्रि. श. 1494. अयं कालदी–

---

7 Contribution of Kerala to Skt. Literature-K.K. Raja-P. 258-260

8 राजत्कीर्तिविभूषितत्रिभुवनः श्रीराजराजाह्वयो
राजेन्दुः क्षितिमायुगान्तसमयं पायादपेतापदम्।
वामार्धार्चितपुण्यपूरलहरीसोमार्धचूडामणेः
कामाक्षी कुलदेवता मम च सा कामप्रसूः कल्पताम्।।

In Public domain. Digitization Muthulakshmi Research Academy

पकव्याख्यां क्रि. श. 1540 वर्षे, मुहूर्तपदवीव्याख्यां क्रि. श. 1554 वर्षेऽरचयदिति ज्ञायते। शङ्करस्य गुरुः परमेश्वरः, अयं परमेश्वरः चेण्णन्नूर् (शोणाचल) वास्तव्यः, महान् ज्योतिर्वित्। एनं भाणं विहाय अन्येऽपि ग्रन्थाः एतद्वंशे समुत्पन्नाः सन्ति। तत्रैकः भाषानैषधचम्पूप्रबन्धः मलयालचम्पूनाम्ना प्रसिद्धः। भाषानैषधचम्पूश्लोकाः भाणेऽस्मिन्नपि दृश्यन्ते। एतद्भाणव्याख्याता रामवारियर् भाणकर्तारं बृहस्पतीति सम्मानोपाधिधारिणं प्रसिद्धं पण्डितं च वर्णयति। अतः शङ्कर एव भाणकर्ता स्यात्' इति।

परन्तु केरलीयसंस्कृतसाहित्यचरितकर्ता उळ्ळूर् यस्. परमेश्वरन् अय्यर्[9] महोदयस्तु शङ्करपुत्रं नारायणमेव भाणकर्तारं मन्यते। कोच्चिन् महाराजप्रस्तावः भरतवाक्यस्थः न प्रमाणभूत इति अस्य आशयः। अत्र वर्तमानज्योतिर्विदः प्रशंसा भाणकर्त्रा कृता आत्मनः प्रशंसेति कथनापेक्षया स्वपितुः प्रशंसेति कथने औचित्यमधिकमिति एतेषाम् आशयः। पितापुत्रावुभावपि एककालीनावेवेति कोच्चिन्राजसान्निध्यमुभयोरपि सममिति एतेषामभिसन्धिः। मलयालचम्पूप्रबन्धः पित्रा रचितश्चेदपि तत्रत्यश्लोकाः भाणे पुत्रेण सादरं योजिता इत्यपि वक्तुं शक्यते। अतः शङ्करपुत्रः नारायण एव भाणकर्तेति तेषामाशयः।

एवं मतभेदे सत्यपि शङ्करनारायणाभ्यां पितापुत्राभ्यां विना अन्यः कोऽपि एतद्भाणकर्ता न भवति, किन्तु तयोरन्यतर एवेति तु सिद्ध्यत्येव। अतः यदि शङ्करः भाणकर्ता तर्हि क्रि. श. षोडशशतक पूर्वार्धे, नारायणः भाणकर्ता चेत् क्रि. श. षोडशशतकस्य पश्चिमार्धे अयं भाणः रचित इत्यूह्यम्। संस्कृतभाणसाहित्यमिति[10] नाम्ना तेलुगुभाषायां प्रकाशिते ग्रन्थे नारा-

9 केरलसंस्कृतसाहित्यचरितम् – पृ. 234.
10 संस्कृतभाणसाहित्यमु–तेलुगु–पृ. 116.

In Public domain. Digitization Muthulakshmi Research Academy

यणकविः एतद्भाणकर्तेति प्रतिपादयद्भिः शङ्करकृतग्रन्था सर्वेऽपि नाराय-णीयत्वेनोल्लिखिताः। कुञ्जुण्णिराजामहोदयोक्तयुक्तीः प्रदर्शयद्भिः नाराय-णकर्तृत्वं साधितवन्तः। अतश्च तेषाम् एतद्भाणकर्तुः विषये महान् भ्रम एव वर्तते।

5.4 शृङ्गाररसोदयभाणः – लिङ्गमगुण्ट रामकविः

अयं मिश्रभाणः। काशीपतेः मिश्रभाणात् मुकुन्दानन्दात् अयं प्राचीनः। आन्ध्रदेशे नेल्लूरुमण्डले चदलवाडग्रामे आराध्यमानस्य श्रीरामचन्द्रस्य वसन्तोत्सवे अयं प्रदर्शित इति भाणप्रस्तावनातः ज्ञायते। अत्र नायकः सरसशेखरः पद्मगन्धिनीं कलत्रपतिकामाध्यमेन कलत्रीकरोति। सन्दर्भे च कलत्रपत्रिका रचिता। अस्यां भावनामसंवत्सरवैशाखबहुलद्वितीया-तिथिः उल्लिखिता। ततश्च अयं कालः क्रि. श. 8–5–1574 भवतीति रामराजमहाभागाः[11]। अयं च कालः भाणस्य प्रदर्शनसमयः स्यादिति, तत्प्रान्तवर्ती एव भाणरचनाकालोऽपि स्यादिति तेषामभ्यूहः।

अत्र कविताधारा निरर्गला प्रवहति। अत्र इदं मणिकन्दुकविहारवर्णनमेव प्रमाणम्। पश्यत–

मणिकन्दुकखेलनमातनुते
नटते कुटिलं वलते वलयम् ।
हसनेन सुधाधवलेन धर-
त्कुचपालिमलङ्कुरुते वनिता।।

अत्र सन्दर्भोचिततोटकवृत्तेन कन्दुकक्रीडां कुर्वन्ती वनिता सहृदयाक्षि-गोचरी कृता। समयोचितजातीयप्रयोगैः रचना अत्र हृद्या। अत्र विविध-देशस्त्रियः वर्णिताः। न केवलमेतत्। ताभिः शृङ्गारे सुरतानुभवे वर्तमानं

11 Contribution of Andhra to Sanskrit literature – B. Ramaraju-P. 424-426

In Public domain. Digitization Muthulakshmi Research Academy

परस्परवैलक्षण्यमपि अत्र वर्णितम्। अत्र गद्यं कादम्बरीमनुसरति। अस्मिन् मिश्रभाणे भाषात्रयमुपयुक्तमिति अनेन कविवचनेन ज्ञायते-

सकविर्बभाण भाणं शृङ्गाररसोदयाख्यमन्वर्थम् ।

भाषात्रयभूषितमतिगुणतोषितमवशोषितोक्तिभिः सहितम् ।।

अयं भाणः यद्यपि प्रकाशितः अथापि इदानीं नोपलभ्यते।

एतद्भाणकर्ता रामकविः, रामकृष्णपुत्रः, हनुमत्सूरिपौत्रः, पेद्दनार्यनप्ता, काश्यपगोत्रः लिङ्गमगुण्टग्रामाभिजनः। अयं लिङ्गमगुण्टग्रामः आन्ध्रदेशे नेल्लूरुमण्डले वृद्धकुण्डिका (गुंड्लकम्म) नदीतीरे अस्ति। अत्रैव समीपे वर्तमानः चदलवाडग्रामः। अत्र हि श्रीरामचन्द्रदेवालयः अत्यन्तं प्राचीनः, यत्रत्यः श्रीरामः लिङ्गमकुण्टाभिजनानां सर्वेषामाराध्यदैवमस्ति। अस्य रामकवेः भ्राता श्रीवेङ्कटार्यः। एतत्सर्वं भाणे स्वयमेवेत्थं तेनोक्तम्-

आसील्लिङ्गमगुण्टपट्टणवरे श्रीरामनामा कविः

नप्ता पेद्दनधीमतो गुणनिधेः पौत्रो हनूमत्स्तुतः ।

पुत्रः काश्यपगोत्रिणः स्थिरमतेः श्रीरामकृष्णस्य सद्-

वाक्याबद्धकवित्वपद्धतिचणः श्रीवेङ्कटार्यानुजः ।।

एतद्भाणान्तगद्येन[12] अयं राजशेखरयतीश्वरशिष्य इति, श्रीविघ्नेश्वरप्रसादेन अष्टभाषाकवित्ववैभवं प्राप्तवानिति ज्ञायते।

यदि कविः कुशलः तर्हि सर्वेषु रूपकेषु भाण एव समुज्वल इति कथयतीत्थम् -

कविश्चेत्कुशलो भाणो रूपकेषु समुज्ज्वलः ।

सौलभ्येन रसज्ञो हि सभादेवोऽपि मामकः ।।

12 इति राजशेखरयतीश्वरप्रसादासादितसाहित्येन श्रीविघ्नेशचरणारविन्दवन्दन प्राप्ताष्टभाषाकवित्ववैभवधुरन्धरेण, हनुमत्पण्डितपौत्रेण, रामकृष्णपुत्रेण लिङ्गमगुण्ट रामसुकविशेखरेण विरचितः.....

In Public domain. Digitization Muthulakshmi Research Academy

अयं च रामकविः आत्मनः कवितायाः वैशिष्ट्यं स्वयमेवेत्थं वर्णयति –

वाचां विलासो मधुपूरहारी
शृङ्गाररसागमनानुसारी ।
केषां न दत्ते मनसि प्रहर्षं
कस्तूरिकामोदसरित्प्रवाहः ।।

अस्य मातृका मद्रपुरीतालपत्रग्रन्थालयेऽस्ति[13]। अस्य पुनः प्रकाशनाय यत्नस्तु अपेक्षितः ।

5.5 मदनगोपालविलासभाणः – गुरुरामकविः

राधाकृष्णयोः प्रेमवृत्तमत्रेतिवृत्तम् । वेङ्कटगिरिशृङ्गसौधाधिरूढस्य भगवतो गरुडध्वजस्य भाद्रपदोत्सवेषु अभिनीतोऽयं भाणः । अप्रकाशितोऽयं भाणः शिथिलश्च मद्रपुरीतालपत्रग्रन्थालये वर्तते[14]। अत्राग्राम्यं हास्यं वर्तत इति, इतिवृत्तं च हरिकथाश्रितं नातिसंक्षिप्तं नातिविस्तृतमिति कविवचनात् ज्ञायते[15]। अत्र कविता प्रौढैव । आनन्दवर्धनस्य "स्वेच्छाकेसरिण" इति श्लोकस्य अनुवादरूपेण श्लोकेन नान्दी अत्रारब्धा । पश्यन्तु –

लक्ष्मीकुचालङ्कारकारिणो दैत्यदारिणः ।
नृहरेः पान्तु शृङ्गारवीरोद्गारिशिखाः नखाः ।।

एवं भाणेतिवृत्तसम्बद्धोऽयं नान्दीश्लोकः –

स्निग्धच्छायतमालतापशमन स्वस्त्यस्तु ते सम्भवो
भूयस्स्यादिति धात्रिकानुगयाप्यामन्त्रितो राधया ।
अव्यादञ्जलिमञ्जरीमुपहरन् कुञ्जान्तरे माधव-

---

13 GOML-No 12707
14 GOML-Vol. XXI No. 12576.
15 अद्वैतपात्रमग्राम्यहास्यं हरिकथाङ्कितम् ।
तद्दिदृक्षामहे दृश्यं नातिसंक्षेपविस्तरम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

स्तद्व्याजात्कमले निमीलति पुनः सङ्केतमस्यै दिशन् ।।

कलत्रपत्रकुक्कुटयुद्धादिवर्णनमत्र नास्ति। कन्दुकक्रीडा तु वर्णिता। डोलाविहारोऽपि वर्णितः । रम्यश्चायम् –

प्रतिभाति विभ्रमनदीप्लवनमिव मुदाधिरूढफलकेयम् ।
आनीतेव तुलाघटम् अमरीभिः तुलयितुं मनोजेन ।।

अत्र भाणे भाणान्तरेभ्यः कश्चिदन्यः विशेषः अन्तर्नाटकम्। यथा भाणान्तरेषु कन्दुकक्रीडादयः मनोविनोदनार्थं वर्णिताः तथात्रैकमन्तर्नाटकमपि मनोविनोदनाय कल्पितम्। अत्रत्यं चन्द्रवर्णनमपि हृद्यम्। पश्यन्तु –

कन्दर्पप्रणिधिः मुखप्रतिनिधिः कान्ताजनस्याब्जिनी-
सौभाग्यव्यवधिः सुधाजलनिधिः श्यामारथीसारथिः ।
उन्मीलत्ययमोषधीकुलनिधिः ध्वान्तप्रबन्धावली-
सौन्दर्याभिविधिश्चकोरपरिषत्पर्वातिथिः चन्द्रमाः ।।

एतद्भाणकर्ता गुरुरामकविः अघोरशिवाचार्य–प्रसादवल्लभ–ढक्कासभापति-भास्कराचार्यादिभिः अलङ्कृते वंशे उत्पन्नः, तमिलनाडु राष्ट्रे 'मुयिलाण्डरम्' ग्रामाभिजनः[16], स्वयंभूनाथदेशिकपुत्रः, त्यागराजपौत्रः, राजनाथदौहित्रः, काश्यपगोत्रः। अस्य श्वशुरः चिदम्बरेश्वरः। अस्य मातामहस्य मातामहः डिण्डिमकविसार्वभौमः विजयनगराधिपेन सालुव नरसिंहरायेण (क्रि. श. 1456) सम्मानितः। सुभद्राधनञ्जयनाटकम्, रत्नेश्वरप्रसादनाटकम्, हरिश्चन्द्रचरितचम्पूः, विभागरत्नमालिका[17], च अस्य कृत्यन्तराणि। एतेषु हरिश्चन्द्रचरितचम्पूः 4709 कलिवत्सरे रचिता। अयं च वर्षः क्रि. श. 1609. मदनगोपालविलासभाणे सुभद्राधनञ्जय-

16 मूलाण्डरनगरभागधेयनिधेः भगवतः स्वयंभूनाथदेवस्य यात्रायामुपस्थिताः सभास्ताराः (रत्नेश्वरप्रसादन प्रस्तावना)

17 इयं पूर्वकवीनां जीवनविशेषवर्णनपरा कृतिः

In Public domain. Digitization: Muthulakshmi Research Academy

नाटकमेवोल्लिखितम्[18]। अतश्च भाणरचना रत्नेश्वरप्रसादनाटकात् चम्पूप्रबन्धात् विभागरत्नमालिकातश्च पूर्वमेवेति अयं भाणः षोडशशतकस्यान्ते रचित इत्यूह्यते। अस्य भाणस्य हस्तलिखितप्रतिकृतेः अन्ते गुरुरामकविप्रशंसापरः अयं श्लोकः उपलक्ष्यते –

नटनारभटी चटुलस्मरजिन्मकुटीतटिनीसमवाग्विहृतेः ।
गुरुरामकवेः पुरतो विनुतौ गुरुरामकविः कविरामगुरुः ।। इति ।

5.6 विलासभूषणभाणः[19] – वेङ्कटकृष्णय्य

अमुद्रितः हस्तलिखितग्रन्थालये मद्रपुर्यां संरक्षितोऽयं भाणः। अयं च भाणः आन्ध्रप्रदेशे भद्राचलनाम्ना ख्याते श्रीरामचन्द्रक्षेत्रे भद्रगिरीशस्य श्रीरामचन्द्रस्य भगवतः परिणयोत्सवे चैत्रमासे प्रदर्शितः। वसन्तशेखरस्य वसन्तकलिकायाश्च प्रणयवृत्तान्त एव अत्र प्रधानमितिवृत्तम्। परन्त्वस्य भाणस्य मुख्यमुद्देश्यं तु भगवतः परिणयोत्सववर्णनम्, तत्र सज्जीकृतस्य मण्टपयस्य, तत्समये जायमानोत्सवानां च वर्णनम्, तथा उत्सवे समवेतानां विविधानां वनितानां वर्णनम् च। अत्र च नान्द्यां श्रीरामचन्द्रः पुष्पधन्वा च इत्थं स्तुतौ –

यस्योत्सङ्गनिवासशीलमहिषी विश्लेषवन्ध्या ध्रुवं
गाढालिङ्गनतत्परा चिरतरं कारुण्यवारांनिधिः ।
भद्रे भद्रमहीध्रचारुशिखरे भद्रासनेऽधि (हि ?) स्थितः
स स्याद्दुत्तममत्तवारणनिभाः चित्ते मदीये सदा ।।
यस्याज्ञया हरिगिरीशचतुर्मुखाद्याः
वक्षोऽर्धगात्रवदनादिधृतस्वदाराः ।

18 ख्यापितं च सुभद्राधनञ्जयनाम्नि नाटके तस्य कवेः सङ्कल्पितम् – (भाणप्रस्तावना)
19 GOML – R No. 1576 (b) Tr. cat. Vol II-Part I c.

In Public domain. Digitization Muthulakshmi Research Academy

स्पेऽयं समस्तजनहृत्सु लसत्स्वमूर्तिः
पुष्पायुधो जयतु सुन्दरचक्रवर्ती ।।

अत्रहि उत्सवेषु सञ्चरतां रक्षकभटानां वर्णनं हृद्यम्–पश्यन्तु –

पटीरपङ्करूषितप्रकोष्ठबद्धकङ्कणं
कचोल्लसद्दलक्षवस्त्रखण्डलम्बिताञ्चलम् ।
चलत्कृपाणपाणिकं प्रबद्धमध्यवन्धनं
भटाग्रगण्यबृन्दमत्र भाति दृश्यतामितः ।।

अस्य भाणस्य रचयिता वेङ्कटकृष्णः, वेङ्कटरायपुत्रः, भारद्वाजगोत्रः, श्रीनिवासपौत्रः, शिवसूर्ययज्वशिष्यः, आन्ध्रदेशे गोदावरीतीरवासी। प्रायः भद्राचलवासी एव स्यात्। अनेन रामचन्द्रविजयकाव्यमपि[20] रचितम्, यच्च असम्पूर्णं मद्रपुरीतालपत्रग्रन्थालये सुरक्षितम्। अस्य काव्यस्य प्रथमसर्गान्ते अयं स्वपरिचयं दत्तवान्। तत्र अस्य गुरोः डिण्डिमसार्वभौमेन सह सम्बन्धं वर्णितवान्। अत्र वर्णितः डिण्डिमः द्वितीयडिण्डिमः स्यात् यश्च विजयनगराधिपस्य द्वितीयदेवरायस्य (क्रि. श. 1422-1448) आस्थानपण्डितः आसीत्। अस्य गुरोः शिवसूर्यस्य अनेन डिण्डिमेन सम्बन्धोऽपीत्थं सूचितः। शिवसूर्यस्य पिता स्वयम्भूनामा द्वितीयडिण्डिमस्य पुत्रीमुद्वाह्य तस्य डिण्डिमस्य जामाता आसीत्। अयं शिवसूर्यः पाण्डवाभ्युदयकाव्यमरचयत् यश्च क्रि. श. षोडशे शतकेऽवर्ततेति कथयन्ति बि. रामराजुमहाभागाः[21] स्वीये संस्कृतसाहित्यं प्रति आन्ध्राणां योगदानमिति ग्रन्थे। ततश्च शिवसूर्यशिष्यः प्रकृतभाणकर्ता वेङ्कटकृष्णोऽपि क्रि. श. षोडशतके स्यादिति शक्यमभ्यूहितुम्।

---

20 GOML -Tr. Cat. Vol VI – R No. 5360 (C)

21 Contribution of Andhra to Sanskrit literature – B. Ramarajan – P. 541.

In Public domain, Digitization Muthulakshmi Research Academy

5.7 चातुरीचन्द्रिकाभाणः – वेङ्कटार्यः

अयमपि भाणः अप्रकाशित एव मद्रपुरीयतालपत्रग्रन्थालये[22] वर्तते। अयं च भाणः तिरुपति वेङ्कटेश्वरस्य चैत्रोत्सवेषु अभिनीतः। चमत्कारमञ्जरीचतुरशेखरयोः प्रणयवृत्तमेवेतिवृत्तमत्र। भाणेषु प्रायः सर्वेषु वर्ण्यमानाः कुक्कुटयुद्ध–वृषभक्रीडा–आहितुण्डिकादिविषयाः अत्रापि सन्ति। कलत्रपत्रिकाद्वारा कलत्रीकरणादिकमपि समानम्। परन्तु सन्दर्भानुसारम् अनेन वेङ्कटेश्वरे भक्तिः सम्यक् प्रदर्शिता। अत्र वेङ्कटेश्वरस्तोत्ररूपं दण्डकं हृद्यम्। अत्र हि नान्दी–

जयं दिशतु नः कामजननीवदनं सदा।
कौस्तुभोपलसङ्क्रान्तनाभीपङ्कजबुद्धिकृत् ।।

अपि च–

तल्पेऽनल्पभुजङ्गवल्लभमये किञ्चित्तदा फूत्कृते
पद्माभूरपि वेपमानमनसौ तत्रासतुर्भीतितः।
ते संवीक्ष्य रसादसावपि हसन्मन्दं मुकुन्दः करै
रालिङ्गन्निजदोश्चतुष्टयफलं मन्वं स्तनोतु श्रियम् ।।

अत्र भुजङ्गशब्दः साभिप्रायं प्रयुक्तः। रमणीया खलु कल्पना। अत्रैव प्रस्तावनायां वेङ्कटार्यस्य अस्य भाणकर्तुः परिचयः दत्तः। भाणस्यास्य वैशिष्ट्यमपि अत्रेत्थं प्रतिपादितम् –

रसालयरसालभूरुहकिसालपालीगल-
न्मरन्दरसमाधुरीगुणधुरीणवाक्कल्पनम् ।
ततान वरतोल्लसत्कविवितानसंमोदकं-
ततान स तु रूपकं किमपि चातुरीचन्द्रिकाम् ।।

[22] GOML – R No. 1646 Tr. Cat. Vol II – Part I-c

 In Public domain. Digitization Muthulakshmi Research Academy

अत्रहि विप्रविनोदवर्णनं हृद्यम् इदम्–

मेरूकरोति तृणमेव करे गृहीत्वा
सङ्गृह्य मेरुगिरिमेव तृणीकरोति ।
निष्कीकरोति नवतालसुवर्णखण्डं
लोके निमेषमपि पश्यति विप्रनन्दी ।।

एवमेव नट्याः कवितायाश्च अभेदवर्णनपरोऽयं श्लोकोऽपि हृद्यः ।

सुवर्णालङ्कारा सुभगपदविन्यासचतुरा
महारागोन्मेषा महितरससौकर्यरुचिरा ।
लसद्वृत्त्यायत्ता ललितगुणरीतिप्रकटिता
कवेश्चेयं सूक्तिः कलयति यथा सम्प्रति नटे ।।

अयं च भाणकर्ता चिलकमर्रिवंशीयः, यस्य वंशस्य नाम्नः संस्कृतीकरणं "शुकबहुपाद" इति कविनैव कृतम् । अस्य वेङ्कटार्यस्य पिता शरण्यपादः, माता सरस्वती, कन्दाल रङ्गवर्यस्य (रङ्गाचार्यस्य) शिष्यः, पितामहः धर्मः, प्रतितामहः शरण्यः । अस्य गुरुः कन्दाल रङ्गाचार्यः आन्ध्रप्रदेशे रायलसीमक्षेत्रे विशिष्टाद्वैतप्रचारकस्य भावनाचार्यस्य पुत्र इति, अयं कृष्णदेवरायाष्टदिग्गजेषु अन्यतमस्य तेनालि रामकृष्णकवेः अनुजस्य गुरुरिति च प्रतिपादयन्ति डा. बि. रामराजुमहोदयाः[23] । ततश्च अयं कृष्णदेवराय समसामयिकः, किञ्चित्तदनन्तरो वा क्रि.श. षोडशशतके आसीदिति वक्तुं शक्यम् । अयमपि उभयकवितानिपुणः । उभयभाषयोः आन्ध्रसंस्कृतभाषयोः कविः ।

---

23 Contribution of Andhra to Sanskrit literature – B. Ramaraju-P. 589-91.

In Public domain. Digitization Muthulakshmi Research Academy

अध्यायः 6

क्रि. श. सप्तदशशतकभाणाः

क्रि. श. सप्तदशशतकमारभ्य एकोनविंशशतकान्तं यावत् भाणरचनायां प्रसिद्धेषु कविषु स्पर्धैव जाता। प्रायः सर्वेऽपि प्रसिद्धाः विद्वत्तल्लजाः भाणकर्तारः आसन्। वेङ्कटाध्वरी, रामभद्रदीक्षितः, नल्लाबुधः, रङ्गाचार्यः, अप्पाध्वरी, गोर्वाणेन्द्रदीक्षितः, गोपालराय इत्यादि प्रसिद्धाः कवयः सप्तदशशतके भाणान् विरचय्य संस्कृतसाहित्यसेवाम् अकुर्वन्। तत्र कालेन प्रथमः अनङ्गजीवनभाणः वरदार्यकृतः।

6.1 अनङ्गजीवनभाणः – आत्रेयवरदाचार्यः

अयं च भाणः अप्रकाशितः तञ्जापुरमद्रपुर्यादिनगरस्थतालपत्रग्रन्थालयेषु सुरक्षितः[1]। अस्य अनेकाः प्रतिकृतयः अपि उपलभ्यन्ते। अयं च काञ्चीनगरस्थवरदराजस्वामिनः वसन्तोत्सवेषु प्रदर्शितः। अत्र वासन्तिका – वसन्तशेखरयोः प्रणयवृत्तमितिवृत्तम्। शृङ्गारः प्रधानः। कविता सरसा सरला हृद्या च। अत्र नान्दी –

[1] Tanjore Vol VIII No. 4572, 4573, 4574, 4575. GOML – Vol. XXI (kāvyas) No. 12429 NCC. Vol I. P290-See-Appāyarya.

 In Public domain. Digitization Muthulakshmi Research Academy

कृष्णस्य व्रजयोषिदम्बरमुषः कुन्दद्रुमालङ्कृतेः
पायाद्वः प्रतिबिम्बमम्बुनिधृतं भानोर्दुहित्रा चिरम् ।
व्यातेनुः पवनच्छलाद्विवसना यस्योपरि प्रस्फुरत्-
वेगोत्क्षिप्तनितम्बबिम्बसुशुभं वीरायितं गोपिकाः ।।

कीदृशी कल्पना? अस्ति च प्रसिद्धमाभाणकमान्ध्रेषु भगवता सूर्येणापि यद्द्रष्टुमशक्यं तत्कविना द्रष्टुं शक्यते[2] इति । तद्वचनं यथार्थयति इयं कल्पना । एवं नान्द्याः श्लोकान्तरमपि हृद्यम्–

बिम्बोष्ठे तव नाञ्जनं पुनरयं भृङ्गस्त्वदास्याम्बुजा-
स्वादाय स्तिमितोऽथवा जतुमयीमुद्राकृतो नीलया ।
इत्थं राधिकयोदिते सुमुखि ते दृक्कान्तिसङ्क्रान्तिजं
नैल्यं नान्यदिहेति तां सरभसं चुम्बन् हरिः पातु नः ।।

अनया सरसया अत्यन्तं हृद्यया नान्द्या एव ज्ञायते अयं भाणः आन्तं सहृदयरञ्जक एव स्यात् इति । अतोऽवश्यमस्य प्रकाशनाय प्रयासः कार्यः ।

एतद्भाणकर्ता वरदाचार्यः आत्रेयगोत्रः विश्वगुणादर्शन प्रथितकीर्तेः वेङ्कटाध्वरिकवेः पितुः रघुनाथस्य साक्षात् ज्येष्ठभ्राता[3] । अस्य पिता अप्पयार्य इति प्रसिद्धः श्रीनिवासाचार्यः । पितामहः वरदगुरुः । काञ्चीवास्तव्यः । तर्कवेदान्तनिष्णातः । अस्य पितुः मातुलः अप्पय्यदीक्षितस्य प्रतिस्पर्धी विजयनगराधिपस्य कृष्णदेवरायस्य (क्रि. श. 1509–1531) अध्यात्मगुरुः ताताचार्यः । अस्य कृत्यन्तराणि कारिकादर्पणः, कृष्णाभ्युदयः, श्रीस्तुतिव्याख्या, जानकीराघवम्, रुक्मिणीपरिणयनाटकञ्च ।

---

2 "रवि काननिचो कवि कांचुने कदा" – तेलुगुसूक्तिः ।

3 सीताप्राणसखस्य लक्ष्मण इव भ्रातास्य विद्वन्मणेः ।
शौर्यासेवनसाधुरत्र रघुनाथाध्वरीति श्रुतः ।। (शृङ्गारदीपभाणप्रस्तावना)

In Public domain. Digitization Muthulakshmi Research Academy

अनेन च अयं भाणः स्वीयवयसः उत्तरार्धे रचित इति तस्यैवानेन श्लोकेन अवगम्यते –

पौत्रो यज्वोत्तमश्रीवरदगुरुकवेः वाजपेयाग्निचित्या-
सर्वस्तोमोऽतिरात्रप्रमुखमखशुचिःश्रीनिवासार्यसूनुः ।
तारुण्ये चाग्निहोत्री दिशिविततयशाः सर्वतन्त्रस्वतन्त्रः
स्वाधीनो वाचि धीमान् वरदकविवरो भाणमेतं व्यतानीत् ।।

अयं च कविः तिरुपतिसमीपे आन्ध्रदेशे वर्तमानस्य वेङ्कटगिरेः नगरस्य अधिपेन वेलुगोटिवंश्येन सिङ्गभूपालेन सम्मानित इति तस्यैव रुक्मिणी-परिणयनाटकप्रस्तावनातः[4] अवगम्यते। पश्यन्तु-

"शिरसा धार्यत एष मया वेलुगोटिकुलतिलकवीरसिङ्गभूपालदेवादेशः। यथा अस्मत्कुलदैवतस्य भगवतः कोदण्डपाणेः महोत्सवयात्रायामस्याम् अस्मत्सौहृदशेवधेः आत्रेयचूडामणेः अखिलकलानटनविलासरङ्गस्य ता-तगुरुभागिनेयाप्पयार्यभागधेयस्य तरुणाग्निहोत्रिणो वरदकवेः कृतिं रुक्मि-णीपरिणयाभिधानं नाटकं प्रयुज्यमानं द्रष्टुमिच्छामि।"

अयं च राजा क्रि. श. सप्तदशशतकमध्ये आसीदिति विमर्शकाः[5]। अस्य पितुः मातुलस्य ताताचार्यस्य कालः क्रि. श. 1509–1591 इति कृष्णमाचार्यः[6]। अतश्चायं भाणः सप्तदशशतकपूर्वार्धे रचितः स्यात्।

---

4 इदं नाटकं निर्णयसागरद्वारा प्रकाशितमिदानीं नोपलभ्यते।Tanjore-Vol. VII-No 4493.

5 Contribution of Andhra to Sanskrit literature – P495-496.

6 History of classical Sanskrit literature – M.K. P513.

In Public domain. Digitization Muthulakshmi Research Academy

6.2 शृङ्गारदीपभाणः – वेङ्कटाध्वरी

अस्यैव भाणस्य मदनदीप इति, काञ्चीभाण इति नामान्तरे[7]। अयं भाणः सम्पूर्णः नोपलभ्यते। तिरुपतौ श्रीवेङ्कटेश्वरप्राच्यसंशोधनालये अ-प्रकाशितोऽयं सुरक्षितः। अयं भाणः काञ्च्यां यथोक्तकारिणः उत्सवेषु प्र-दर्शितः[8]। यथोक्तकारीति काञ्चीवरदराजस्वामिनः नामान्तरम्। अत्रत्याः श्लोकाः श्लेषालङ्कारभूयिष्ठाः तिरुमल वेङ्कटेश्वरस्य माहात्म्यं वर्णयन्ति। पिनाकिनीनद्याः दक्षिणतीरे स्थिते तिरुक्कोयिलूर ग्रामे स्थितस्य श्रीदे-हलीशस्वामिनः उत्सवविशेषाः भाणेऽस्मिन्नभिवर्णिताः।

अत्र नायकः स्ववृत्तान्तं वर्णयन् प्रथमं तिरुमलश्रीवेङ्कटेश्वरोत्सववि-शेषान् वर्णयति। ततः विविधदेशीयस्त्रीवर्णनं करोति। तत्र आन्ध्रयुवती-वर्णनं पश्यन्तु –

आपादलम्बिवसना निस्तुलवक्षोजनम्रमध्यलता।
आन्ध्री भाति वधूटी ताशीदलक्लृप्तमुग्धताटङ्का॥

अनन्तरमेकां सुन्दराङ्गीं संवर्ण्य, तामनुसृत्य, सा यत्र यत्र गतवती तत्र तत्र गच्छति। सा च वेङ्कटेश्वरं संसेव्य चन्द्रगिरिं गच्छति। चन्द्रगिरिवर्णनप-र्यन्तमेव अयं भाणः उपलभ्यते। अत्र इदानीमुपलभ्यमानग्रन्थान्ते स्थितः शरत्कालवर्णनपरोऽयं श्लोकः हृद्यः।

प्रासादाग्रप्रचुरविलसत्पद्मरागेन्द्रनील-
च्छायास्रोतश्शबलिततनौ शारदे नीरदेऽपि।
सन्तुष्यन्तस्तटिदभिवृतश्यामजीमूतबुद्ध्या
चञ्चत्पिञ्च्छास्तरूणशिखिनो नृत्तरीतिं भजन्ते॥

---

7 Essay on the Bhana- by Sri. D.T. Tatacharya, in the journal of S.V.O. Research Institute, Tirupati-Vol.II. part. I, P69-71.

8 यथोक्तकारिणो मुरवैरिणो यात्रोत्सवसेवौत्सक्यसङ्गतैः....

In Public domain. Digitization Muthulakshmi Research Academy

वेङ्कटाध्वरीन्द्रस्य कवितावैलक्षण्यं जगद्विदितम् । अतः तद्विषये बहुवक्तव्यं नास्ति । अथापि हृद्योऽयं नान्दीश्लोकः अवश्यमेवास्वाद्यः ।

कल्याणी मयि दृष्टिमर्पय मयि क्रोधं जहीहि प्रिये
नोपेक्षाबहुकन्धरागमदशास्वर्हेति सान्त्वोदितम् ।
शृण्वत्या बहुकन्धरागमभयतृट्यद्रुषा पद्मया
संश्लिष्टो दृढमस्तु वेङ्कटपतिः सौख्याय मुख्याय नः ।।

एवमत्र जलक्रीडावर्णनमत्यन्तहृद्यम्। जलक्रीडां कुर्वन्तीं नायिकां सरः (पुमान्) निस्सपत्नमनुभवतीति वर्णयत्यत्र ।

तीरोत्सृष्टनिचोलचेलमुदके लीलाजुषां सुभ्रुवां
सर्वाङ्गातिनिगूहनं रतिकथाप्रायोत्कराकर्णनम् ।
आमृष्टस्तनकुङ्कुमादिवहनं वीचीभुजास्फोटनं
स्वच्छं सम्प्रति निस्सपत्नमखिलं लीलासरः सेवते ।।

एवमत्र मदनलेखायाः वीणावादनं वर्णितम्। गेयपदलास्याङ्गसूचनाय प्राकृतभाषागाथा योजिता। सा च मदनलेखा नायके अनुरागं प्रकटयन्ती ताम्बूलं दत्तवती। तदा नायकः इत्थं चिन्तयति–

कर्पूरसुरभिवीटीद्विगुणितसौरभ्यमाननाम्भोजम् ।
आचुम्बितं मया चेदिदमपि ताम्बूलसेवनं सफलम् ।।

अत्र उपदेशोऽपि कश्चन समाजस्य कृते इत्थं विहितः ।

वेश्याजनेभ्यो द्रविणं वितीर्णम्
ऋणं च दत्तं निरपत्रपेभ्यः ।
दत्ता च तप्तायसि वारिधारा
पुनर्ग्रहीतुं पुरुषैर्नशक्यम् ।।

एतच्चास्माकं दौर्भाग्यं यदयं सम्पूर्णः नोपलभ्यते ।

In Public domain. Digitization Muthulakshmi Research Academy

वेङ्कटाचार्याभिधः वेङ्कटाध्वरीतिनाम्ना प्रसिद्धोऽयं भाणकर्ता आत्रेयगोत्रः। सीताम्बारघुनाथयोः सुतः। अस्य पितामहः श्रीनिवासाचार्यापराभिधः अप्पयाचार्यः। अस्य पिता रघुनाथः अनङ्गजीवनभाणकर्तुः वरदार्यस्य साक्षात् अनुजः। अस्य पितामहः कृष्णदेवरायस्य (क्रि. श. 1509-1591) कुलगुरोः पञ्चमतभञ्जनं ताताचार्यस्य भागिनेयः। एतत्सर्वमेतद्भाणगतप्रस्तावनातः अवगम्यते। तथाहि –

अत्रेगोत्रे समजनि सुधीरागमान्तैकसीमा
श्रीमान् भूमावतुलमहिमा श्रीनिवासार्यनामा।
हारान् भूमेरिव बहुगुणान् अग्रहारान् वितन्वन्
वारं वारं वरदमधिनोद्वाजपेयादिभिर्यः।।

नेता यः कवितासुधारसभुजां जेता चतुर्वादिनां
दाता सम्यगभीप्सितस्य विबुधव्रातस्य जातादरः।
त्राता लक्ष्मणदर्शनस्य सततं त्रेतां कलावप्यव-
ख्यातानन्तगुणस्य यस्य जननीभ्राता स ताताध्वरी।।

आसीत् ख्यातो वरदगुरुरित्यात्मजस्तस्य यज्वा
दर्पोदग्रप्रतिकथकदुस्तर्कधिक्कारधीरः।
काव्यैर्भव्यैर्य इह विविधैः कारिकादर्पणाद्यैः
ग्रन्थैश्चान्यैः श्रुतियुगसुखं ज्ञानिनामानिनाय।।

सीताप्राणसखस्य लक्ष्मण इव भ्रातास्य विद्वन्मणेः
शौर्यासेवनसाधुरत्र रघुनाथार्याध्वरीति श्रुतः।
ज्यायांसं चतुराननं सुमनसां सम्प्राप्तपद्मोदयं
सम्प्रीणाति सरस्वती स्फुरदलङ्कारा सदाश्लेषतः।।

तत्तनयो दत्तनयो भूरिषु शिष्येषु वेङ्कटार्यमखी।
श्रृङ्गारदीपमभणद्भाणं परितोषितप्रसवबाणम्।।

In Public domain. Digitization: Muthulakshmi Research Academy

अनया प्रस्तावनया अस्य पितापि कवितार्किकसिंह इति, श्लिष्टकाव्यर-चनाधुरंधर इति, अयमपि तथेति, स्वपितृसविधे एवानेन सर्वविद्याभ्यासः कृत इति च ज्ञायते।

अयं च वेङ्कटाध्वरी बहुग्रन्थकर्ता। अस्य विश्वगुणादर्शचम्पूप्रबन्धः च-म्पूवाङ्मये एव विलक्षणः अमुमत्युन्नते कीर्तिशिखरे स्थापयामास। अयं लक्ष्मीसहस्रम्, श्रीनिवाससहस्रम्, यादवराघवीयद्व्यर्थिकाव्यम्, उत्तर-चरितचम्पूः, वरदाभ्युदयचम्पूः, आचार्यपञ्चाशत्, श्रवणानन्दः, प्रद्युम्ना-नन्दनाटकम्, सुभद्रापरिणयनाटकम्, सुभाषितकौस्तुभः इत्यादि ग्रन्थान् अरचयत्। प्रद्युम्नानन्दनाटकान्तर्गतसाक्ष्येण नाटकमिदं क्रि. श. 1671 वर्षे रचितमिति ज्ञायते इति कृष्णमाचार्याः[9] कथयन्ति। भाणस्य अनेन श्लोकेन अस्य भाणस्य मदनदीपनाम्नापि व्यवहारोऽस्तीति ज्ञायते।

साम्राज्यमादिमरसस्य चकास्ति यत्र
धूर्तात्मनः स्फुरति यत्र हरेः विलासः।
यस्मिन् कविर्नवपयोजरविः प्रसिद्धः
तद्रूपकं मदनदीपकमानयेति।।

अयं वेङ्कटाध्वरी नीलकण्ठदीक्षितस्य समसामयिकः। अयं किञ्चित्कालं 'प्रलयकावेरी' इति राज्ञः आस्थानपण्डितः आसीत्।

6.3 शृङ्गाररस्तबकभाणः– नृसिंहः

अस्मिन् भाणे चेतिवृत्तं विचित्रमिति, असूयापरान् लक्ष्यीकृत्य विसृज्यमाना शरपरम्परैवायं भाण इति च कविरेव वक्ति। मधुरानगर्यां विराजमानस्य सीतालक्ष्मणसमेतश्रीरामचन्द्रस्य ग्रीष्मसमययात्रासमये अयं भाणः प्र–

9 History of Classical Sanskrit literature - P. 515.

In Public domain. Digitization Muthulakshmi Research Academy

दर्शितः[10]। अत्रापि शृङ्गाररस एव प्रधानः। अप्रकाशितोऽयं भाणः तञ्जापुरतालपत्रग्रन्थालये सुरक्षितः[11]। अत्र कविता प्रौढा ओजःपूर्णा च। पश्यन्त्वत्रत्यनान्दीश्लोकममुम्।

भद्रं स वो दिशतु भक्तजनासपक्ष-
शिक्षाकृते सपदि पञ्चमुखायमानः।
लक्ष्म्याः पयोधरतटीपरिरम्भलोभा-
दूरीचकार मुखमात्रमृगेन्द्रतां यः॥

अत्र गद्यमपि ओजःपूर्णम्। पश्यन्तु मधुरानगरवर्णनम् इदम्। "आदिष्टोऽस्मि भर्ममयनिर्मलहर्म्यतलनिर्मितसुदतीगीतिरीतिनिशमनसमयपरवशविरिञ्चिविषमीकृतप्रपञ्चविधानां..."

एतद्भाणकर्ता नृसिंहः हारीतकुलतिलकः वैदिकसार्वभौमः। अस्य 'नृकण्ठीरव' इति प्रसिद्धिरस्ति[12]। अत्र भरतवाक्ये 'श्रीरामचन्द्रसदृशः नरेन्द्रः विश्वम्भरां रक्षतु' इति आशंसते कविः [13]। अत्र वर्णितस्य रामचन्द्रसादृश्यकथनेन अयं प्रभुः तञ्जापुरपालकः रघुनाथनायकः एव स्याद्यस्य राज्यपालनकालः क्रि. श. 1614-1633 मध्ये भवति। अतः अनेन कविना अयं भाणः रघुनाथनायकस्य पालनकाले एव रचित इत्यूहितुं शक्यते। अस्मिन्नेव विषये उपोद्बलकं प्रमाणान्तरमपि उपलभ्यते। तञ्जापुरे संरक्षितयोः अस्य भाणस्य मातृकयोः अन्यतरान्ते "सर्वविद्यानिधानश्रीकवीन्द्राचार्यसरस्वतीनां शृङ्गारस्तबकभाणः संवत् 1740 चैत्र

---

10 मधुरा नाम नगरीं सनाथीकुरुतो मैथिलीलक्ष्मणसततपरिभूषितपार्श्वयुगलस्य रामभद्रस्य ग्रीष्मसमययात्रा-

11 Tanjore. 4623, 4624.

12 प्राप्तसाहित्यसौहित्यसूनुः सानुजमण्डलः।
नृकण्ठीरव इत्याख्या यस्य प्रख्यातिमश्नुते॥

13 श्रेयः प्रदैरिहसुखैः धरणीसुरेन्द्राः संप्रीणनं क्रतुभुजां मुहुराचरन्तु।
श्रीरामचन्द्र इव सान्द्रगुणो नरेन्द्रो विश्वंभरामवतु विश्रुतदानकीर्तिः॥

In Public domain. Digitization Muthulakshmi Research Academy

शुद्ध" इति वर्तते। अयं वर्षः क्रि. श. 1682 भवति। अस्मिन् समयेऽयं कविः, अस्य भाणश्च प्रचारे आस्तामिति, एतत्समयात् पूर्वमेव भाणरचना कृतेति वक्तव्यम्। भरतवाक्ये रामचन्द्रसदृशप्रभुवर्णनात् रघुनाथनायक-स्यैव उल्लेखः तत्रेति चिन्तयितुं शक्यत इति तद्राज्यपालनकाले एवायं रचित इति, अतोऽयं सप्तदशशतकस्य पूर्वभागे आसीदिति च वक्तुं श-क्यम्।

6.4 अनङ्गब्रह्मविद्याविलासभाणः – वाधूलवरदाचार्यः

अयमपि भाणः अप्रकाशितः हस्तलिखितमातृकारूपेण मद्रपुरीयह-स्तलिखितग्रन्थालयेऽस्ति[14]। मद्रपुर्याः ट्रिप्लिकेन् प्रान्ते विराजमानस्य भगवतः पार्थसारथेः उत्सवेषु अयं भाणः प्रदर्शित इति भाणप्रस्तावनातः अवगम्यते। अन्यभाणेतिवृत्ततुल्यमेवेतिवृत्तमत्रापि। वीररससूचनाय क-लभकलकलः, मेषयुद्धं, सर्पनर्तनमित्यादि वर्णितम्। वेश्यासङ्गमस्य अ-युक्ततामुपदिशति इत्थमयं भाणः –

धनमानपरित्यागी प्रवादनिरपत्रपः।
ऐहिकामुष्मिकभ्रष्टो वारस्त्रीसङ्गमीहते।। इति।

अत्र नान्द्यां त्रयःश्लोकाः इष्टदेवतास्तुतिपराः। तेष्वन्यतमोऽयम्-

अगणितगुणधाराश्रीराजिताम्बुदमेचका
दिनमणिघृणिश्रेणीश्लेषोन्मिषज्जलजेक्षणा।
फणिमणिफणारत्नच्छायापिशङ्गकिरीटिनी
वितरतु वचोवेणीं नाणीयसीं मम देवता।।

नान्द्यन्ते सूत्रधारः प्रविश्य मन्मथं वर्णयति –

आचामन्ति यदीयमार्गणगणाः धैर्यश्रियं कामिनां

14 GOML-Vol. No. 21. No.12430; HCSL – M.K. P660. (1970)

In Public domain. Digitization Muthulakshmi Research Academy

येनाकारि जगत्त्रयं चलदृशामेकाधिपत्यास्पदम् ।
स्वानन्यं जगदेकवीरपदवी यस्मिन् विजेजीयते
ते नैवेक्षुधनुष्मता वसुमती भूयात्सुराजन्वती ।।

अत्र गद्यमपि मधुरम्। परन्तु प्रौढा शैली। अत एवायं भाणः प्रकाशं न प्राप्त इति विभावनीयम्।

अस्य भाणस्य रचयिता वाधूलगोत्रः वरदाचार्यः। अस्य वंशस्य मूलपुरुषः 'दाशरथि मुदलियाण्डान्' इति प्रसिद्धः श्रीमद्रामानुजाचार्याणां भागिनेयः। अस्मिन्नेव उत्पन्नः श्रीरङ्गाचार्यनामा कविः श्रीकृष्णदेवरायेन सम्मानितः। तस्य पौत्रः रामानुजाचार्यः। अस्य रामानुजाचार्यस्य वरदाचार्यः, शरण्याचार्यः (शरणम्माचार्यः) इति द्वौपुत्रौ। अनयोः प्रथमस्य द्वौ पुत्रौ कुमारवेङ्कटाचार्य श्रीनिवासाचार्य नामानौ। अनयोः कुमारवेङ्कटाचार्यस्य पुत्रः भाणकर्ता वरदाचार्यः[15]। अस्य पितामहस्य वरदाचार्यस्य अनुजस्य शरण्याचार्यस्य पौत्रः रामानुजाचार्यः रामानुजचम्पूप्रबन्धकर्ता। अस्य रामानुजस्य अनुजः रङ्गाचार्यः पञ्चबाणविजयभाणकर्ता। अयं पञ्चबाणविजयभाणः प्रचारं प्राप्तः प्रकाशितश्च। अयं वरदाचार्यः स्वपितृव्यस्यैव शिष्यः। अनेन बहवः ग्रन्थाः रचिता इति भाणप्रस्तावनया ज्ञायते। परन्तु अमुं भाणं विना अन्येषां विषये न किञ्चित् स्पष्टतया ज्ञायते। अनेन पूर्वोक्तवंशवृक्षवर्णनेन अयं क्रि. श. 17 शतके आसीदिति पञ्चबाणविजयकर्तुः रङ्गाचार्यस्य समकालिक इति च ज्ञायते।

15 द्र. भाणन्तगद्यम् – इति श्री वाधूलवंशपयःपारावारराकचन्द्रस्य, श्रीनिवासगुरुवंशमुक्तामणेः, श्रीनिवासगुरुवरचरणारविन्दमिलिन्दस्य, श्रीकुमारवेङ्कटसूरितनयस्य, वरदाख्यस्य कृतिषु अनङ्गब्रह्मविद्याविलासो नाम भाणः समाप्तः ।HCSL – M.K P660 (1970) ; GOML-DC. Vol-21-No 12430.

In Public domain. Digitization Muthulakshmi Research Academy

6.5 मदनमहोत्सवभाणः – श्रीकण्ठः (नञ्जुण्डः)

काञ्चीनगरसमीपस्थबालव्याघ्रपुरे (सिरुपुलियूर्) विराजमानस्य भगवतो विश्वेश्वरस्य कल्याणोत्सवेषु अयं भाणः प्रदर्शितः। बालव्याघ्रपुरे शिवः रामभद्रेन सह विराजते स्म। अयमपि भाणः अप्रकाशितः मद्रपुरीहस्त-लिखितग्रन्थालये सुरक्षितः[16]। अत्र नान्दी–

कल्याणवसनोऽनन्तकल्याणगुणसागरः।
कल्याणवेङ्कटाधीशः कल्याणानि करोतु नः।।

एकां वक्षसि लालयन् प्रियतमामन्यां स्वपार्श्वस्थिताम् -
आमोदोत्पुलकां ह्रिया नतमुखीमालिङ्ग्य मन्दं हसन्।
आलोकैरनुषज्यमानकरुणैराह्लादयन् वै पराम्
आस्ते यः सततानुभूतविभवो देवो मुदे वोस्तु नः।।

सजयति सकलसुरासुरमणिमुकुटाराध्यशासनो वीरः।
यस्येषुपातभीतो वामाङ्गे वहति कामिनीमीशः।।

काव्येषु विरहतप्तैः वसन्त–मन्मथ–चन्द्र–मलयानिलाद्युपालम्भः क्रि-यमाणः उपलभ्यते। सूर्योपालम्भस्तु न। परन्त्वस्मिन् भाणे सूर्योपाल-म्भोऽपि कृतः। पश्यन्तु –

त्वं पद्मबान्धव इति प्रथितो हि लोके
हृष्यन्ति पङ्कजकुलानि भवत्करास्त्या।
सत्यं कुतस्सरसिजायतलोचनानां
सन्तापयस्यतितरां मुखपङ्कजानि।। इति।

वसन्ततिलकभाणेऽपि एतादृश एव सन्दर्भोऽस्ति। अत इदं तस्यानुक-रणमिति युज्यते। एतद्भाणकर्ता श्रीकण्ठः। अस्यैव नञ्जुण्ड इति नामा-न्तरम्। शामयार्यपुत्रः। प्रथमात्रेयगोत्रः। अस्य गुरवः चत्वारः – परमेश्व-

16 GOML-De. XXI – 8442.

 In Public domain. Digitization Muthulakshmi Research Academy

राध्वरी, रामस्वामिमखी, सङ्गमेश्वरविद्वान्, चिदम्बरः इति। अत्र चिदम्बरकविविषये एव किञ्चित् ज्ञायते। "श्रीमच्चिदम्बरकवेः कृपयाभिपन्नसत्साहितीवरकलासुहितान्तरात्मा" इति कविः आत्मनोविषये उक्तवान्। संस्कृतकविषु चिदम्बरनाम्ना द्वौ स्तः। तत्रैकः राघवयादवपाण्डवीयत्र्यर्थिकाव्यम्, भागवतचम्पूः, पञ्चकल्याणचम्पूः, इत्यादिग्रन्थकर्ता विजयनगराधिपेन वेङ्कटेन (क्रि. श. 1586–1614) सम्मानितः[17]। अथ मदनभूषणकर्तुः अप्पयज्वनः पिता चिदम्बरदीक्षितः अपि कविः, पण्डितश्च। अनेनापि ग्रन्थाः रचिताः। अप्पयज्वा शहाजीमहाराजस्य (क्रि. श. 1683–1711) सभापण्डितः आसीत्। अतः अयं श्रीकण्ठः अनयोर्मध्ये कस्यापि शिष्यः क्रि. श. सप्तदशशतकवर्तीति तु निश्चप्रचम्। कृष्णमाचार्याः[18] अस्य गुरुं चिदम्बरं विजयनगराधिपेन वेङ्कटेन सम्मानितं मन्यन्ते। नान्द्यां 'कल्याणवेङ्कटाधीश' इति साभिप्रायमिति स्वीकुर्मश्चेत् कृष्णमाचार्याणामभिप्रायः युक्त एव भवति। अनेन अभिनवभारतकाव्यमपि रचितम्। रसकौमुदीति कश्चन अलङ्कारग्रन्थः श्रीकण्ठकर्तृकत्वेन कश्चन कृष्णमाचार्यैः सूचितः। एतद्रसकौमुदीकर्ता क्रि. श. 17 शतकपूर्वभागे आसीदित्यपि तैरेव सूचितम्। अतः सोऽपि अयमेव स्यात्। अयं बालव्याघ्रपुरवासी। बालव्याघ्रपुरं सर्वेभ्यः नगरेभ्यः उत्कृष्टमिति कथयतीत्थं भाणे–

सा मधुरा सा काञ्ची सापि च दृष्टा मनोरमा काशी।
बालव्याघ्रपुरीव क्वापि न दृष्टा न श्रुता नगरी।।

17 HCSL-MK. P. 512.
18 HCSL - MK -P. 791

In Public domain. Digitization: Muthulakshmi Research Academy

6.6 शृङ्गारकोशभाणः – गीर्वाणेन्द्रदीक्षितः

काञ्ची नगराधिदैवतस्य वरदराजस्य वसन्तोत्सवेषु प्रदर्शितोऽयं भाणः तञ्जापुरहस्तलिखितग्रन्थालये सुरक्षितः अप्रकाशितः[19]। अत्र नायकः शृङ्गारशेखरः । अत्र विटेन सायं निर्वत्यं कार्यं किमपि न सूचितम्। अयं कालक्षेपार्थमेव आसायं वेशवाटिकायामटति । प्रातरेव सः स्वमित्रं वसन्तकं मिलति । उभावपि मिलित्वैव वेशवाटीं प्रविश्य तैस्तैराभाष्य, तत्तद्वृत्तान्तं विज्ञाय, मनोविनोदनाय कुक्कुटमेषादियुद्धादिकं वीक्ष्य सायं स्वप्रियागृहं गच्छतः । अत्र रुद्रभट्टवृत्तान्तः हास्यास्पदः । अयं कस्यैचित् वाराङ्गनायै प्रतिश्रुतं धनं न दत्तवान्। अतस्तया गृहीतः दुर्भाषणैः भर्त्सितो भवति । अन्यभाणेष्विव अत्रापि तत्तत्क्रमेण सर्वं वर्णितम्। अत्र वृद्धा अपि वेश्याः कथं ग्रामीणान् जनान् वशीकुर्वन्ति इति वर्णितम्। एताः केशानां पलितताम् अञ्जनादिभिः गूहयन्ति । गलितौ वक्षोजौ बन्धनादिभिः अगलिताविव कृत्वा मुखेऽपि अञ्जनादिभिः वार्धक्यं निगूह्य ग्रामीणान् वशीकर्तुं प्रयतन्ते इति कथं वर्णितमिति पश्यन्तु –

> कृत्वान्तर्हितमञ्जनैः कचगतं पालित्यमत्युन्नतौ
> वक्षोजौ विरचय्य कञ्चुलिकया क्षौमाहृताकुण्ठनाः ।
> भाले कुङ्कुममाकलय्य तिलकं श्यामोचितैश्चेष्टितैः
> ग्रामीणानिह कापि वारजरती वश्यान् विधत्ते जनान् ।।

एतद्भाणकर्ता गीर्वाणेन्द्रदीक्षितः सुप्रथितस्य नीलकण्ठदीक्षितस्य तृतीयः पुत्रः । भारद्वाजगोत्रः । अप्पय्यदीक्षितभ्रातुः अच्चादीक्षितस्य नप्ता । नारायणदीक्षितस्य पौत्रः । नीलकण्ठदीक्षितः नीलकण्ठविजयचम्पूप्रबन्धं क्रि. श. 1637 वर्षे रचितवान्। तस्य पुत्रः तच्छिष्यश्चायं सप्तदशशतके आ–

---

19 Tanjore – VIII No 4611 ; Sagar uni. library.

 In Public domain. Digitization Muthulakshmi Research Academy

सीदिति सिद्ध्यति। अन्यापदेशशतकं[20], कार्तिकेयविजयकाव्यं[21] च अस्य कृत्यन्तरे। अयं स्वपितरं नीलकण्ठदीक्षितमित्थं भाणे स्तौति–

अस्त्यस्तोकगुणो हिमाद्रिशिखरोत्सङ्गापतज्जाह्नवी-
साहङ्कारतरङ्गसङ्गसहजश्रीहारिसूक्तिक्रमः।
किञ्चोन्मूलयितुं पुनश्च सुदृढीकर्तुं कलासु प्रभुः
सर्वज्ञो हरिदन्तविश्रुतयशाः श्रीनीलकण्ठाध्वरी।।

अयं स्वीयभाणान्तपुष्पिकायां स्ववंशपरम्परामित्थं कथयति– "इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिकप्रबन्ध-निर्वाहकश्रीमदप्पय्यदीक्षितसोदर्यश्रीमदच्चादीक्षितपौत्रस्य श्रीनारायणदीक्षितात्मजस्य कैयटव्याख्यानशिवतत्त्वरहस्याद्यनेकप्रबन्धनिर्मातुः नीलकण्ठदीक्षितस्य तृतीयनन्दनेन गीर्वाणेन्द्रदीक्षितेन विरचितः शृङ्गारकोशो नाम भाणः" इति। अस्य कविता सरसा हृद्या च। अत्र इदं सारङ्गिका-वर्णनमुदाहरणं भवितुमर्हति।

आगुल्फायतवेणिकां स्मितमुखीमाकर्णपूर्णेक्षणां
भारात्किञ्चिदुरोजयोरवनतां सन्दिग्धमध्योज्ज्वलाम्।
तन्वीमुन्मुदमल्लिकाक्षगमनां सन्त्यज्य सारङ्गिकां
वर्ते जीवनमात्मनो विफलयन् दीनो विधेर्व्यत्ययात्।।

एवमेवेदं वनवर्णनमपि हृद्यम्।

विकस्वरपिकस्वरं विवलमानमन्दानिलं
विवृद्धनवचम्पकं विकचमल्लिकाकोरकम्।
विनिद्रनवमालिकामधुमदान्धपुष्पन्धयं
सखे हरति योगिनां मनो मनोज्ञं वनम्।।

20 Published in the Bulletin of GOML-Vol. 7. HCSL-P. 237
21 H.C.S.L. - MK-P. 307.

In Public domain. Digitization Muthulakshmi Research Academy

एवमस्य गद्यमपि हृद्यम्। पश्यन्तु – "अद्य खलुसमादिष्टोऽस्मि सकल-सामन्तराजचक्रमौलिमाणिक्यकिरणपुञ्जकिञ्जिल्कितचरणारविन्दस्य प्रतिशरदनेहसंप्रवर्तमाननिजजैत्रयात्राप्रवृत्तजयकाहलीनिनादकर्ण – निर्वासितनिखिलारातिधरापतेः धारावलयशासितुर्विशेषस्य अवन्तिपतेः गुणलुब्धैः अखिलकलाविलाससदनैः काञ्चीपुरनेतुर्भगवतो वरदराजस्य वसन्तोत्सवयात्रासमागतैः।" एवं सरसकविताहृद्योऽप्ययम् अप्रकाशित एव ग्रन्थालये संरक्ष्यमाणोऽस्तीति खेदावहो विषयः।

6.7 कन्दर्पविजयभाणः – श्रीकण्ठः

गीर्वाणेन्द्रदीक्षितस्य पुत्रः श्रीकण्ठः कन्दर्पविजयभाणमरचयदिति कृष्णमाचार्यैः उक्तम्। तञ्जापुरग्रन्थालये अप्रकाशित एवायं संरक्षित इत्यपि तैरेवोक्तम्[22]। एतद्विषये एतावदेव ज्ञायते।

6.8 अनङ्गमङ्गलभाणः – श्रीनिवासाचार्यः

अयमपि भाणः नाममात्रावशिष्टः। एतद्भाणकर्तुः नप्ता वेङ्कटवरदः स्वीये कृष्णविजयडिमे स्वप्रपितामहस्य विषये उक्तवान्। तदनुसृत्य तमिलनाडु राज्ये आर्काट् मण्डले श्रीमुष्णं ग्रामवासी अयं श्रीनिवासाचार्यः कौण्डिन्यगोत्रः रामानुजसिद्धान्तानुयायी श्रीवैष्णवः। अयं महाकविः, पण्डितश्च। अयं श्रीरङ्गेऽपि न्यवसत्। अनेन श्रीनिवासाचार्येण बहवो ग्रन्थाः रचिताः। ते च – अम्बुजवल्लीपरिणयः, भूवराहविजयः, अनङ्गमङ्गलभाणः, अष्टपदी, वृत्तालौकिकसारमालिका, वराहचम्पूः, वकुलमालिनी, गीतापरिणयः, सीतादिव्यचरितम्, अम्बुजवल्लीदण्डकं, श्रीवराहचूर्णिका, ध्यानचूर्णिका, श्रीरङ्गदण्डकं, चूर्णिकावर्तनं, श्रीरङ्गराजचरितं, गानपदमित्यादिग्रन्थाः। अस्य प्रपौत्रः वेङ्कटवरदः क्रि. श. 18

22 H. C. S. L. -MK-P. 705 (Tanjore VIII 3575)

In Public domain. Digitization Muthulakshmi Research Academy

शतके आसीदिति कथयन्ति श्रीरामजी उपाध्यायाः[23]। अतोऽयं श्रीनिवासाचार्यः क्रि. श. सप्तदशतके आसीदिति वक्तुं शक्यते।

6.9 रसविलासभाणः – चोक्कनाथः

अयमपि भाणः नाममात्रावशिष्टः। अस्य भाणस्य रचयिता तिरुविशनल्लूरु इति ग्रामाभिजनः, यश्च ग्रामः पश्चात् शाहमहाराजपुरनाम्ना ख्यातः। शहजी (क्रि. श. 1684–1711) बहुभ्यः पण्डितेभ्यः अग्रहारदानं कृतवान्। तद्दानप्रतिग्रहीतृषु चोक्कनाथस्य पिता तिप्पाध्वरीन्द्रोऽप्यन्यतमः। तिप्पाध्वरिपण्डितस्य पुत्रेषु पञ्चमः अयं चोक्कनाथः सेवन्तिकापरिणयनाटकं,[24] रसविलासभाणं, कान्तिमतीपरिणयनाटकं च रचितवान्। अस्य चत्वारः भ्रातरः क्रमशः कुप्पाध्वरी, तिरुमलः, स्वामिशास्त्री, सीतारामशास्त्री च। अस्य अनुजः यज्ञेश्वरः। माता नरसाम्बिका। सेवन्तिकापरिणयनाटके नायकः इक्केरीराज्यपालकः केलदि बसवभूपालः। अयं 'हिरियबसवप्पनायक' इति प्रसिद्धः। अयं बसवप्पनायकः शा. श. 1576 तः 1594 पर्यन्तं राज्यपालनमकरोत्। तथाचायं क्रि. श. 1654 तः 1672 पर्यन्तं राज्यपालनमकरोत्। अनेन राज्ञा अयं सम्मानितः[25]। अस्य द्वितीये नाटके शहजीमहाराजः नायकः। अस्य राज्यकालः क्रि. श. 1684–1711. कान्तिमतीपरिणयप्रस्तावनायामेव कविना अस्य भाणस्योल्लेखः कृतः। अतोऽयं भाणः क्रि. श. सप्तदशशतके एव रचित इत्यत्र न सन्देहः। अयमेव रामभद्रदीक्षितस्य

---

23 आधुनिकसंस्कृतनाटक–Part I – P. 395.

24 See- Introduction to 'Sevantikāparinaya' – by S. Narayana Sastri, University of Mysore-1958. and See also- Introduction to 'Sahendra vilasa' – by Dr. V. Raghavan, Govt. of Madras-1952.

25 तिप्पाध्वरीन्द्रतनयो ननु चोक्कनाथनामा विपश्चिदयमद्भुतनाटकेन।
सन्तोष्य 'सद्गुणनिधिं वसवक्षितीन्द्रं लब्ध्वाधिकां बहुमतिं स्वपुरं प्रयातः।। (से. प. 1-7)

In Public domain. Digitization Muthulakshmi Research Academy

गुरुः श्वशुरश्चेति केचन नेति च केचन। परन्तु उभावपि शहजी सभापण्डितावेव।

6.10 रसोल्लासभाणः – श्रीनिवासाचार्यः

कामशेखरोऽत्र नायकः। मुक्तावली नायिका। मुक्तावलीप्रथमरङ्गाधिरोहणोत्सवाय आहूतः विटः सायं तत्र गत्वा कलत्रपत्रिकां दत्त्वा तां कलत्रीकरोति इति इतिवृत्तमत्र वसन्ततिलकादिभाणतुल्यमेव। अन्यभाणेष्विव प्रातरेव प्रस्थितः विटः तत्र तत्र अटित्वा, तैः तैः सम्भाष्य सायं स्वकार्यार्थं गच्छति। ताम्रचूडनिन्दा, कन्दुकक्रीडा, मल्लयुद्धवर्णनम्, सूर्योदयादिवर्णनं, कलत्रपत्ररचनेत्यादि सर्वं वसन्ततिलकादिभिः समम्। परन्त्वत्र वर्णनेषु कवितायां स्वीयां विशिष्टां मुद्रां प्रदर्शयति अयं कविः। तत्र तत्र प्राचीनकवीनां भावनाः स्वीकृत्य तत्र काञ्चिदात्मीयतामापाद्य नव्यरीत्या तासां प्रतिपादने अयं कविः सिद्धहस्त इति विमर्शकाः। उदाहरणार्थं भवभूतेः श्लोकस्य अनुवादरूपं सन्दर्भमित्थमुदाहरन्ति[26]। तत्र भवभूतेरयं श्लोकः–

अलसललितमुग्धान्यध्वसंपातखेदा-
दशिथिलपरिरम्भैर्दत्तसंवाहनानि।
परिमृदितमृणालीदुर्बलान्यङ्गकानि
त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता।। (उत्तरराम.1–24)

अत्रत्यां भावनामाश्रित्य भाणे रचितोऽयं हृद्यः श्लोकः–

मुकुलितनयनार्धा मुक्तचैतन्यचित्ता
मृदितनवमृणाली कोमलाङ्गी रतान्ते।
मदुरसि शयिता त्वं यत्क्षणं प्राप्तनिद्रा

26 संस्कृतभाणसाहित्यमु–तेलुगु– पृ. 159

 In Public domain. Digitization Muthulakshmi Research Academy

नहि मम हृदयं तत् जातु मुक्त्वा प्रयाति ।।

निरर्गलः प्रवाह इव सुमधुरा शैली, हृदयसंस्पर्शिभावनाप्रपञ्चः, लोक-व्यवहारेऽत्यन्तं प्रचुरैः अर्थसुलभैः लघुलघुशब्दविन्यासैः प्रदर्शितमर्थ-गौरवं, प्रसादगुणः इत्यादि अस्य कवितासुवर्णस्य सुगन्धमापादयन्ति। अत्र प्रस्तावे "श्रीनिवासकविर्यस्य वाणी विद्वन्मनोहरा " इति सूत्रधार-मुखेन कविः स्वपरिचयं सम्यगेव करोति । एतच्च नातिशयोक्तिरिति एत-द्भाणपरिशीलनेन ज्ञायते । अत्रत्यकवितावैशिष्ट्यं द्वित्रैः सन्दर्भैः अत्र प-रिशीलयामः । तत्रादौ उदयसमयसूर्यकिरणानां वर्णनमिदं हृद्यम्।

पादेऽलक्तकपङ्कतां प्रतिगताः कट्यां कुसुम्भारुणाः
शाट्याः पीनपयोधरेषु सुदृशां रक्ताङ्गरागायिताः ।
गण्डे कुङ्कुमरेणवोऽधरपुटे ताम्बूलरागायिताः
बालार्कस्य करा विभान्ति सकलालङ्कारभूता इमे ।।

वेशवाटिकायां वेश्यानाम् आतपसेवनं नित्यकृत्यम्। तत्सन्दर्भमाश्रित्य कीदृशी कल्पना। अत्र सूर्यः स्वकरैः सुन्दरीणां सर्वाण्यङ्गानि परामृशति अलङ्करणव्याजेनेति व्यङ्गमपि हृद्यं किल। एवमन्यत्र जगति ते कथं स-न्तीत्यपि अनेन श्लोकेन प्रतिपादितम्।

किञ्जल्कतामुपगताः सरसीरुहेषु
सिन्दूरतां हरिदनेकपमस्तकेषु ।
शाखासु पल्लवपुटत्वमुपेयिवांसः
क्रीडाचलेन्द्रशिखरेष्वपि धातुभावम् ।।

एवमुषसि स्वीयेनारावेण कुक्कुटाः जनान् कथं जागरयन्ति? स्वीयेन ध्वनिना किं बोधयन्तीति सचमत्कारं वर्णनमत्र अवश्यमास्वाद्यम्। प-श्यन्तु -

राजाऽपलायत वसूत्करमस्य हत्वा

In Public domain. Digitization: Muthulakshmi Research Academy

व्यावृण्वते जगदमीहि तमःकिराताः ।
अभ्यैत जाग्रत जना इति ताम्रचूडाः
कूजन्ति पक्षपटहानभिनादयन्तः ।।

अतीव हृद्या किल कल्पना । एवमल्पाल्पपदैः शिखरिण्यां रचितमिदं सुन्दरीवर्णनं पठितॄन् आनन्दशिखरमेवाधिरोहयति ।

सुधा वा ज्योत्स्ना वा किमु शशिकला वा वरतनुः
खगौ वा कुम्भे वा किमु कनकशैलौ किमु कुचौ ।
लते वा माले वा किमु कनकयष्टी किमु भुजौ
तमो वा बर्हो वा किमु जलधरः किं कचभरः ।।

एवमिदं निशान्तवर्णनमपि अत्यन्तं हृद्यम् ।

फुल्लाम्भोरुहनिस्सरन्मधुझरीपारम्परीमाधुरी
स्वादोत्पादितहर्षझङ्कृतिपरीवाहो मधूलीभुजाम् ।
त्रैलोक्यस्य जयैषिणोरतिपतेस्सन्नाहभेरीरव-
भ्रान्त्युत्पादनचातुरीकृतपरीरम्भो जरीजृम्भते ।।

एवं प्रतिपदं चमत्कारावहभावनामयमिदं रूपकम् इदानीमपि अप्रकाशितावस्थायामेव हस्तलिखितग्रन्थालयेषु निद्रातीति शोचनीय एव विषयः । अस्य भाणस्य अनेकाः प्रतिकृतयः अपि उपलभ्यन्ते[27] ।

एतद्भाणकर्ता श्रीनिवासाचार्यः, आत्रेयगोत्रः, वेङ्कटाचार्यपुत्रः, श्रीनिवासपौत्रः, वेङ्कटाचार्यनप्ता । अस्य भाणकर्तुः पितामहः वेदान्तचार्य इति प्रसिद्धः । मातामहः भक्तार्तिहरः । अस्य पिता वेङ्कटेशः क्रि. श. 1596 वर्षे उत्पन्न इति, रामचन्द्रोदयकाव्यं क्रि. श. 1635 वर्षे, रामयमकार्ण–

27 Adayar-Des. cat. No.1506; Tanjore-Vol VIII-No 4589; Andhra University, waltair (AP)-Parvati Collection No.90 and 104; HCSL-Mk-P238.

In Public domain. Digitization Muthulakshmi Research Academy

वकाव्यं क्रि. श. 1656 वर्षे च अरचयदिति कृष्णमाचार्याः[28] कथयन्ति। अतोऽस्य सुतः प्रकृतभाणकर्ता श्रीनिवासाचार्यः क्रि. श. सप्तदशशतके आसीदिति निश्चीयते। अयं क्रि.श. एकोनविंशे शतके आसीदिति कथयन्ति केचन[29]। परन्तु प्रमाणं किमपि न प्रदर्शयन्ति। अतः तेषां कालनिर्णयः निष्प्रमाणत्वादुपेक्ष्य एव। भाणेऽस्मिन् कलत्रपत्रिकायां आनन्दवर्षः उल्लिखितः। अतोऽयं भाणः क्रि. श. 1674 वर्षे रचित इति ज्ञायते। तमिलनाडु राज्ये श्रीपेरुम्बूदूरुक्षेत्रे आदिकेशवदेवस्य उपवनयात्रासन्दर्भे प्रदर्शनार्थं रचितः अयं भाणः।

अस्य पित्रा वेङ्कटाचार्येणापि शृङ्गारमञ्जरीभाणः[30] रचित इति भाणप्रकरणे कृष्णमाचार्यैः उक्तम्। परन्तु आकरः न प्रदर्शितः। अतोऽयं भाणः अद्य नोपलभ्यत इत्येव चिन्तनीयम्।

6.11 रसिकतिलकभाणः–कविराक्षसः (मुद्दुरामकविः)

अयं भाणोऽपि अप्रकाशितः तिरुवनन्तपुरहस्तलिखितग्रन्थालये सुरक्षितः[31]। अन्यभाणेष्विवात्रापि इतिवृत्तं समम्। अत्र कवितायाः उदाहरणभूतोऽयं नान्दीश्लोकः–

आनन्दामृतवर्षसूरसुमतामापाटलैः पल्लवैः
आविर्भूतकलस्वनैः परभृतैरामन्थरैर्मारुतैः।
उत्कूलैर्मधुनिर्झरैः सुमनसामुच्चावचैः सौरभैः
श्रेयो मन्मथहर्षणं प्रथयतु श्रीमान् वसन्तोदयः।।

---

28 HCSL-MK. P. 238
29 संस्कृतभाणसाहित्यमु–तेलुगु–पृ. 159
30 H.C.S.L – MK. P. 702.
31 Des. Cat. of Skt. M.S. ; curater's office, Trivendram No.1328

In Public domain. Digitization Muthulakshmi Research Academy

एतद्भाणकर्ता कविराक्षसबिरुदेन प्रथितः मुद्दुरामकविः। 'मुद्दु' इति पदं तेलुगुभाषापदं प्रीतिविषयसूचकम्। अस्य नाम रामकविः। स्वबन्धुभिः प्रीत्या 'मुद्दुराम' (अभिराम) इत्याहूतः अनन्तरं 'मुद्दुराम' नाम्ना ख्यातः, शहजीमहाराजेन कविराक्षसबिरुदेन सम्मानितः, अनन्तरं च कविराक्षसनाम्नैव ख्यातः। अयं विषयः भाणगतकविप्रशंसापरेणानेन श्लोकेन ज्ञायते।

जात्यश्वदन्तिशिबिकाकनकाभिषेक
हाराग्रहारकविराक्षसनामधेयैः।
राजाद्दतो नृपसभे भवता न किं स्वित्
अश्रावि रामकविरार्यगृहीतनामा।।

एतद्भाणान्तपुष्पिकया[32] अयं 'मुद्दुराम' इति. कौण्डिन्यगोत्र इति, जानकीरघुनाथाध्वरिदम्पत्योः पुत्र इति ज्ञायते। एतद्वंशीयाः आन्ध्रदेशीयाः तमिलनाडुराज्ये तिरुविशनल्लूरुग्रामे स्थिरनिवासम् अकुर्वन्। शहजराजपुराग्रहारदानग्रहीतृषु अयमप्यन्यतमः स्यात्।

एतद्भाणस्थभरतवाक्यं[33] शाहजीमहाराजस्य आशीर्वादभूतम्। पूर्वम् उदाहृते कविपरिचयश्लोके अस्य सम्माननादिकं शहजराजकृतं वर्णितमिति शहजराज (क्रि. श. 1684–1711) कालेऽयं भाणः सप्तदशशतकान्ते रचितः स्यादित्यूह्यते। पूर्वोक्तकविपरिचये शाहजीनाम नास्ति अथापि भरतवाक्ये तस्यैव उल्लेखात् सम्मानादिकं शहजीमहाराजादेव प्राप्तमिति विभावनीयम्। शाहेन्द्रविलासस्य सम्पादकाः डा. वि. राघवन् महोदयाः

32 इति श्री कौण्डिन्यकुलतिलक.....रघुनाथाध्वरि वरतनयस्य जानकीगर्भजन्मनः कविराक्षसापरनामधेयस्य मुद्दुरामकवेः कृतौ रसिकतिलकभाणः समाप्तः।

33 लोकानन्दममन्दमाकलयतामेकाधिपस्यात्मजः
श्रीशाहक्षितिपालशेखरमणिः श्रृङ्गारिणामग्रणीः।
राज्यं धीसचिवादिसंभृतगुणोत्कर्षं तदस्यैधताम्
अच्छिन्नैः कुलमस्य तन्तुभिरनुस्यूतामुपैतु श्रियम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

स्वीयप्रस्तावनायां शाहजीसभापण्डितानां कवीनां च सर्वेषां परिचयमदुः[34]। तत्र तैः सप्रमाणमस्य सम्मानादिकं शाहेन्द्रकृतमेव उपपादितम्। अस्य कृत्यन्तराणि भवेयुरेव। परन्तु तेषां विषयेऽपि अन्वेषणमपेक्ष्यते।

6.12 शृङ्गारमञ्जरीभाणः–अष्टभाषाबहरी गोपालरायः

अयमतीव विस्तृतः मिश्रभाणः। 349 श्लोकाः सन्ति। अत्र नायकः लीलावतंसः। वसन्तकलिकाशृङ्गारतिलकयोः प्रथमसम्भोगशोभनमहोत्सवे आहूतोऽयं प्रातरेव प्रस्थाय मध्येमार्गं वेशवाटीं प्रविश्य बृन्दारिका काश्मीरमञ्जरीभ्यां सल्लाप्य, शृङ्गारवल्लीचम्पकमाले सरससम्भाषणेन सन्तोष्य, मध्ये विनोदादिकं दृष्ट्वा सायं वसन्तकलिकागेहं गच्छति। तत्रोत्सवे स्वप्रियां मञ्जुभाषिणीं मिलति। अत्र धनव्ययं विना क्रियमाणानि आशीर्वचनानि बहूनि। कुक्कुटमेषयुद्धादिकमन्येष्विव अत्रापि समम्। परन्तु महिषयुद्धमपि अत्र वर्णितम्। एतद्भाणकर्ता आन्ध्रदेशीयः। अतः आन्ध्रदेशे प्रसिद्धा वृषभक्रीडा अत्र वर्णिता या च प्रायः अन्येषु भाणेषु नास्ति। अत्र कविता सरला सरसा भावगाम्भीर्यपूर्णा। चमत्कारावहमिदं पुष्पलाविकाभिः सम्भाषणं परिशीलयन्तु।

कुन्दालिं दर्शयालि ! प्रथयितुमुचिता नाग्रतः सामधुश्च्यु-
द्बन्धूकच्छादिता, तद्दिश किमसुलभं तत्प्रकामार्थलभ्यम्।
क्रीणे तद्बोरुमूल्यं दिश तदपि ददे नैव पुष्पेषु दास्यं
पुष्पाणि क्रीणतेऽमूर्युवजनमिति नर्मोक्तैर्मोहयन्त्यः।।

अत्रेदं पुष्पलाविका–युवजनयोः सम्भाषणम्।

युवा : कुन्द पुष्पाणि दर्शय! (हासेन दन्त पङ्क्तिं प्रदर्शय) पुष्पलाविका – कुन्दपुष्पाणि मधुस्रवयुक्तबन्धूकानां पृष्ठतः सन्ति। (विम्बोष्ठच्छादिता

---

34 Sahendravilasa-Introduction by DR. Raghavan, Govt of Madras publication 1952.

In Public domain. Digitization Muthulakshmi Research Academy

दन्तपङ्क्तिः)

युवा : तत्प्रदर्शयितुं न शक्नोति किं ?

पुष्पलाविका : बहुमूल्यं तत् न सुलभम्।

युवा: तद् उरुमूल्यं दास्यामि वद। (तवोरुमूल्यं दास्यामि वद)

पुष्पलाविका : पुष्पविषये दास्यं नास्ति (मन्मथदास्यं न शक्यम्)

एवं नर्मोक्तिभिः युवजनान् आकृष्य पुष्पविक्रयं कुर्वन्तीति हृद्यं चमत्कारावहं चेदं वर्णनं किल। एवं साहाय्यं विना उद्यानं प्रविष्टया विरहिण्या सह सम्भाषणमिदमपि हृद्यम्।

आस्थानी मदनस्य काननमिदं हन्त त्वमेकाकिनी
मुग्धे निर्दयतद्बलाभिचरितामेनां प्रविष्टा कथम् ।
प्राणेशानुपगूहितामिहरहस्त्वां प्रेक्ष्य कोपात्परं
सोढारः कथमाततायिन इमे क्षुद्राः पिकाल्यादयः ।।

अत्र क्षुद्रशब्दः साभिप्रायः वञ्चकान् ध्वनयति। नवनवभावनाभावितान्तःकरणोऽयं कविः चमत्कारावहभावव्यक्तीकरणे अत्यन्तं समर्थः। पश्यन्तु। काचित् स्त्री पुष्पाणि चिनोति। मन्मथः तया अपचितानि पुष्पाण्येव आयुधीकृत्य युवंजनानुद्वेजयति इति वर्णयत्यत्र।

यदा यदा सा कुसुमानि यानि
द्रुतं लतानामबला व्यलावीत् ।
तदा तदा हन्तमनो मनोभूः
तैरेव मे जर्जरितं व्यतानीत् ।। (122)

एवमत्र स्नुषानां पीडनानि वर्णितानि। सूर्यास्तचन्द्रोदयादिकमपि यथावद्वर्णितम्। अत्र सर्वत्र अतिशयोक्त्युत्पेक्षाद्यलङ्कारा: रसवत्तराः। स्त्रीणामसत्यवचनस्य पुरुषाणामसत्यवचनस्य च यत्तारतम्यं तदित्थं भाणेऽस्मिन् वर्णितम्।

In Public domain. Digitization Muthulakshmi Research Academy

यदि वदन्ति मृषागिरमङ्गनाः मतिमतामपि सा भुवि भित्तिवत् ।
यदि पुनः पुरुषाः प्रवदन्त्यमूं यवनिकेव भवेदियमामृतिः ।।

आन्ध्रभाषायामेतदनुवादरूपम् आभाणकं प्रसिद्धम् । एवं प्रपावर्णनमपि अत्र कृतम् । अत्र न केवलं पद्यमेव हृद्यम् अपि तु गद्यमपि । इदं चन्द्रास्तमय-वर्णनं गद्यपद्यमिश्रमत्यन्तं हृद्यम् । अवधारयन्तु ।

"आः कष्टम् ! महत्पापं दृष्टम् । यादृशं द्विषतामपि नो भूयात् । हन्त ! महतामपि दुरतिक्रमो दुरतिक्रमः प्राचीनः । यतः –

सन्मार्गे चरितं बुधाश्च वसुभिस्सन्तर्पितास्सर्वतः
पादो मूर्धसु भूभृतामपि कृतः प्रह्लादिताश्च प्रजाः ।
राज्ञानेन विदीर्णमप्यरिकुलं सम्प्रत्यसौ केनचित्
कालेनाङ्कमिषाद्गले पृथुशिलां बद्ध्वाम्बुधौ पात्यते ।।

हन्तैष पीयूषभानुः निजराज्यभ्रंशविषादादिव प्रक्षीणमुखकान्तिः, प्रत्यासन्नप्रत्यगम्बुधिशयनं रमादयितं प्रेक्ष्य प्रणन्तुमिव मुकुलितकरः, समुदयिष्यमाणतिग्मतेजोभयादिव पश्चिमाचलकन्दरं प्रवेष्टुं पलायमानः, पथि सविधचरैः अमरशबरैः प्रगृह्य परिचूषिताशेषपीयूष इव विगतरुचिबिम्बः-" इत्यादि। कीदृशीयं कल्पना। चन्द्रस्य कलङ्कविषये अनेके अनेकविधोत्प्रेक्षां कृतवन्तः परन्त्वेवं न केनापि कृता। तथैव गद्यमपि हृद्यम्। तत्रत्यभावाः अपि नूतनाः चमत्कारावहाः। अतः अन्वर्थनामायं भाणः वनपर्तिसंस्थानात् क्रि. श. 1895 वर्षे प्रकाशितः। इदानीं नोपलभ्यते। अतः पुनः प्रकाशनमर्हति। अस्य लिखितप्रतिकृतिः आन्ध्रविश्वविद्यालयेऽस्ति[35]।

---

35 Andhra University Collection – No. 29184

In Public domain. Digitization Muthulakshmi Research Academy

एतद्भाणकर्ता गोपालरायः[36] आन्ध्रदेशीयः रेड्डिवंशप्रभुः । आन्ध्रदेशे कडपमण्डले जनुम्पल्लिग्रामः अस्य पूर्वजानां स्वग्रामः आसीत्। कृष्णदेवरायस्य सेनानायकेष्वेकः वीरकृष्णारेड्डिः कडपमण्डलजनुम्पल्लिग्रामात् कृष्णातीरमागत्य तत्रत्यकिरातान् जित्वा स्वीयं राज्यमस्थापयत्। तद्वंशे सप्तमः अयं गोपालरायः। अस्य पिता इम्मडि वेङ्कटरेड्डिः। अस्यैव वेङ्कटराय इति नामान्तरम्। अयं गोपालरायः अष्टभाषापण्डितः। अस्य जननी वीरमाम्बा। अस्यैव राज्यं वनपर्तिसंस्थाननाम्ना प्रसिद्धम्। अयं यतः पराक्रमी अतः बहरीति बिरुदेनायं सम्मानितः। ततश्च अयं अष्टभाषाबहरी गोपालरायः जातः। अयं तीर्थयात्रायै तिरुपति-काञ्ची-श्रीरङ्गादिदिव्यदेशान् गत्वा, प्रत्यागमनसमये तत्र तत्र प्रसिद्धान् पण्डितान् आनीय स्वीयसंस्थाने संस्थाप्य पोषितवान्। स्वीयराज्ये श्रीरङ्गपुरं निर्माय, तत्र रङ्गनाथदेवालयनिर्माणं कृतवान्। रङ्गसमुद्रनाम्ना एकं बृहत्सरः अपि खानितवान्। अयं न केवलं पण्डितपोषकः। अपि तु स्वयं कविः उद्दण्डपण्डितश्चासीत्। अस्य षड्दर्शिनीवल्लभेतिबिरुदं अस्य सर्वदर्शनसार्वभौमतां व्यक्तीकरोति। अयं संस्कृते रामचन्द्रोदययमककाव्यमरचयत्। तस्य काव्यस्य स्वयमेव व्याख्यामपि रचितवान्। इदं काव्यं अडयारपत्रिकायां क्रि. श. 1896 वर्षे प्रकाशितम्। अस्य द्वितीया कृतिः इयं शृङ्गारमञ्जरी। अस्यैव भाणस्य शृङ्गारराजमित्यपि नामान्तरम्। अयं क्रि. श. 1648 वर्षे श्रीरङ्गनाथदर्शनार्थं श्रीरङ्गं गतवानिति ऐतिहासिकाः। अतोऽयं क्रि. श. सप्तदशशतके आसीदिति सिद्धम्।

6.13 पञ्चबाणविजयभाणः – वाधूलरङ्गाचार्यः

"भाणनामस्मरणेनैव स्मृतिपथे प्रत्यक्षीभवतः वसन्ततिलकपञ्चबाणभाणाविति, तादृशं वैशिष्ट्यमनयोर्द्वयोरिति" कथयन्ति मल्लादिसूर्यनारा-

---

36 आन्ध्रविज्ञानसर्वस्वम् – तेलुगु संस्कृति – द्वि.भा. पृ.1177-1178

In Public domain. Digitization Muthulakshmi Research Academy

यणशास्त्रिणः[37] स्वीये संस्कृतवाङ्मयचरिते। अस्मिन् सप्तदशे शतके प्रवृत्तायां भाणरचनस्पर्धायां प्राथम्यसन्देहमापादयत्सु भाणेषु अयमेकः। अत्र प्रस्तावनायामयं भाणः शृङ्गाररसभूयिष्ठ इति, रसिकानन्दजनक इति चोक्तम्। अयं सुदीर्घवसन्तर्तुवर्णनेन आरब्धः। प्रवृत्तकेन[38] पात्रप्रवेशः अत्र सूचितः। अत्र नायकः रसिकशेखरः। रसमञ्जरीप्रथमरङ्गाधिरोहणोत्सवे आहूतः तदर्थं प्रातरेव प्रस्थितः, सायं तत्र गत्वा कलत्रपत्रिकां दत्वा तां कलत्रीकरोति इति इतिवृत्तमन्यैः समानम्। प्रविष्टः नायकः चन्द्रास्तमय-सूर्योदयादिवर्णनं कृत्वा श्रीरङ्गनाथस्य रथयात्रार्थमागताः सीमन्तिनीः संवर्ण्य, रथस्थं रङ्गनाथं वर्णयित्वा, वेशवाटीं प्रविशति। सायंपर्यन्तं तैस्तैराभाष्य सायं रसमञ्जर्याः प्रथमरङ्गाधिरोहणोत्सवे भागं गृह्णाति। तां कलत्रीकरोति च। अत्रायं नीलकण्ठदीक्षिततनयत्वेन प्रवेशितस्य गणेश्वरशास्त्रीति पात्रस्य दुर्वृत्तं, रामभट्टकुमारेण अनन्तभट्टेन सह जरत्याः कलहं, वसन्तसोमयाजीति विप्रवटोः वृत्तं, कविकुञ्जरप्रियायाः रमणीमणेः साहित्यवैभवं, च वर्णयति। अनेन एतद्भाणकर्तुः नीलकण्ठदीक्षितपुत्रैः, अनन्तभट्टेन कविना च विरोधोऽस्तीति ज्ञायते। स च द्वेषः भाणे तेनेत्थं प्रकाशित इति वक्तव्यम्। तथा च नीलकण्ठदीक्षितः, अनन्तभट्टः, वसन्तः, कविकुञ्जरः एते अस्य समकालिकाः। एते सर्वेऽपि सप्तदशे शतके प्रसिद्धाः कविपण्डिताः। सर्पक्रीडा–मेषयुद्ध–मल्लयुद्ध–कुक्कुटस्पर्धादयः भाणान्तरेष्विव वीरसूचकाः अत्रापि वर्णिताः। तथा शृङ्गाररसवर्णनपराः डोलाविहारकन्दुकक्रीडादयोऽपि। अत्र ऐदम्प्राथम्येन पारदारिकवृत्तं वर्णितम्।

---

37 संस्कृतवाङ्मय चरितम्– मल्लादिसूर्यनारायणशास्त्री – पृ.422

38 कालसाम्यसमाक्षिप्तप्रवृत्तिस्स्यात् प्रवृत्तकम्–दशरूपकम्

In Public domain, Digitization Muthulakshmi Research Academy

एवं कायेन महानपि अयं भाणः प्रतिपदं सहृदयरञ्जक एव। कविता च शृङ्गारवर्णने सरला सरसा च, उत्सवादिवर्णने गम्भीरा च। शय्या-सौभाग्यमत्र अनुपमम्। अत्र वृद्धवेश्यया तर्ज्यमानयोः वसन्तानन्तभट्टयोः वृत्तान्तौ रसगुलिकाप्रायौ। अनन्तरं वर्तमानेषु अनेकेषु भाणेषु अत्रत्याः भावाः श्लोकाश्च अनूदिताः। अत्र नान्दीश्लोक एवाद्भुतभावबन्धुरः। रुक्मिणी एकान्ते श्रीकृष्णम् अद्रिभरणं मृषेति कथयति। तदा श्रीकृष्णः एकः किम्, इदानीं द्वयं धारयामि पश्येति ताम् कथं रञ्जयतीति कविः इत्थं भावयति। पश्यन्तु-

श्रीमद्गोपशिशो तवाद्रिभरणं मिथ्येति लीलोत्कया
रुक्मिण्याभिहितो वहामि शिखरिद्वन्द्वं प्रिये लोकय।
इत्युक्त्वा तदुरोजशैलयुगलं गृह्णन् कराभ्यां तया
लज्जानम्रमुखाब्जया सरभसं श्लिष्टो हरिः पातु वः।।

अत्र कविः स्वयमेव स्वीयकवितां "प्रभातभास्करप्रभाप्रबुद्धपङ्कजव्रजक्षरन्मरन्दसन्निभां" कथयति। अत्र वसन्तसूर्यवर्णने अतीव रुचिरे। पश्यन्त्विदं सूर्यवर्णनम् –

कल्हारन्ति कचान्तरे किसलयस्तोमन्ति कर्णान्तरे
सिन्दूरन्ति च नीलनीरजदृशां सीमन्तसीमान्तरे।
काश्मीरन्ति कुचान्तरे कुरवकन्त्येते कराभ्यन्तरे
यावन्ति प्रपदान्तरे कमलिनीजानेस्त्विषामङ्कुराः।। (13)

तमःकान्तातारधिपयोः विवाहमहोत्सवाय सर्वाः पुरन्ध्रीः आह्वातुं दिनश्रीः (युवतिः) सूर्यरूपमक्षतपात्रं गृहीत्वा प्रस्थितेति सूर्योदयभानुबिम्बस्य अक्षतपात्ररूपेण कृता कल्पनात्यन्तं रुचिरा। (द्र. 25 श्लोकः) अत्र रथस्थः रङ्गनाथोपीत्थं सरसं स्तुतः।

रङ्गालङ्करणं दयाधिकरणं लोकत्रयीकारणं

 In Public domain. Digitization Muthulakshmi Research Academy

माणिक्याभरणं विपन्नशरणं सेवानतोत्तारणम् ।
लक्ष्मीसादरणं सरोजचरणं वेदण्डरक्षाचरणं
वन्दे भव्यगुणं महोमहदहं साहंक्रियोत्सारणम् ।। (42)

रथस्य देवाधिष्ठितस्य मन्दगमनस्यकारणं तस्य मित्रं विश्वंभरेण तदधिष्ठानादिति वदति। तदा नायकस्तु गिरिसदृशकुचभारधराभिः वारकामिनीभिः अधिष्ठितत्वादिति उत्प्रेक्षते। एवं डोलाविहारमनुभवन्त्याः चन्दनवत्याः वर्णनमपीदं सुन्दरम्।

कालिकातुलितचूलिकाकलितमल्लिकासरमतल्लिका
पालिकास्रुतमधूलिकारसकणालिका समुदितालिका ।
आलिका भुजमृणालिका चरितदोलिका तरुणमालिका
जालिकागमनकेलिका जितमरालिका विधुकलालिका ।। (117)

एवं शशिकरवर्णनमिदमपि हृद्यम्।

चेतोभूजयकेतवः परिचितप्राग्भूमिभृद्धातवो
ध्वान्ताखुप्रकरौतवः सुरतृषोदन्वन्महासेतवः ।
सङ्गीतोद्यतगातवो दधतु वः क्षेमं नभो यातवः
सिन्धूदञ्चनहेतवश्शशिकराः कल्हारजीवातवः ।। (159)

एवं रसमयसन्दर्भाः अनेके। अत्र नीलकण्ठदीक्षितप्रशंसापरं गद्यमपि हृद्यम्। "कदाचन पवनोदम्भरिपरिबृढसूक्तिशुक्तिमौक्तिकनिकरैः कणाचरभारतीकलुषकल्लोलिनीकतकक्षोदसन्दोहैः, अपुरुषेयभाषायोषाभूषाविशेषायमाणैः जैमिनीफणितिकलशकल्लोलिनीवल्लभकल्लोलजालैः काव्यनव्यकुमुदकेदारसुधाकरकिरणकलापैः नाटकनवरत्नकरहाटकैः अलङ्कारागमसुमनोभरैः सुर्वदुर्वादिधूर्वहदुर्वाराखर्वगर्वसर्वस्वनिर्वापणपटीयोभिः वचोभिः व्यवहरतो भवत्पितुः..." इत्यादि। अत्र नीलकण्ठदीक्षितस्य सर्वतोमुखं पाण्डित्यमुपवर्णितं किल। एवमत्र चाटूक्तयः, अतिशयोक्त्युत्प्रे-

In Public domain. Digitization Muthulakshmi Research Academy

क्षादि अलङ्काराः भावचमत्काराश्च अत्यन्तं हृद्याः। अत्रैव विटः कुपितां कथमनुनयति इति पश्यन्तु–

काचं काञ्चनसन्निधौ कमलिनीधौरेयविम्बान्तिके
खद्योतः कलहंसिकापरिसरे लोला बलाकावलिः।
काकानां निकरः कुहूमुखकुलोपान्ते सरोजोक्षणे
त्वद्वाचां पुरतः शुकस्य फणितिः न श्लाघ्यतां विन्दति।।

भाणरचना आङ्ग्लभाषायां प्रसिद्धेन 'सेटायिर्' (Satire) इत्यनेन तुल्यमिति, तत्रायं भाणः उदाहरणभूत इति विमर्शकाः। एवमत्र नायिकानायकयोः आशीर्वचनरूपमिदं भरतवाक्यमपि हृद्यम्।

अद्वैतं युवयोरस्तु कुचयोरिव सर्वदा।
माभूद्भ्रुवोरिव द्वैतं कदाचिदपि चेतसोः।।

अयं च भाणः तेलुगुलिप्यां वाविल्लरामस्वामिशास्त्रिद्वारा क्रि. श. 1915 वर्षे प्रकाशितः।

अथैतद्भाणकर्तारमधिकृत्य किञ्चिज्जानीमः। अनङ्गब्रह्मविद्याविलासभाणकर्तुः वरदार्यस्य पितामहस्य वरदार्यस्य अनुजस्य शरण्याचार्यस्य पौत्रः अयं रङ्गाचार्यः[39]। अयं शरण्याचार्यः श्रीकृष्णदेवरायेन सम्मानितस्य श्रीरङ्गाचार्यकवेः नप्ता। अस्य शरण्याचार्यस्य चत्वारः पुत्राः। तत्र ज्येष्ठः रामानुजाचार्यः रामानुजचम्पूप्रबन्धकर्ता। पूर्वोक्तनीलकण्ठदीक्षितवर्णनेन अयं नीलकण्ठदीक्षितपुत्रसवयस्क इति ज्ञायते। नीलकण्ठदीक्षितपुत्रेण गीर्वाणेन्द्रदीक्षितेनापि भाणः रचितः। अयं च पाण्ड्यदेशाधिपतिना सम्मानितः। अत्र श्रीरङ्गक्षेत्रवर्णनात् अयं श्रीरङ्गनिवासीति ऊह्यते। अयं कविः स्वीये भाणे स्वसमसामयिकान् चतुरः कवीन्द्रान् उल्लिखितवान्। ते च (1) नीलकण्ठदीक्षितः, (2) कविकुञ्जरः, (3) वसन्तः, (4) अ–

39 द्र – अत्रैव – अनङ्गब्रह्मविद्याविलासभाणसन्दर्भः।

In Public domain. Digitization Muthulakshmi Research Academy

नन्तपण्डितः। नीलकण्ठदीक्षितः क्रि. श. 1637 वर्षे नीलकण्ठचम्पूप्रबन्धमरचयत्। अस्य शिष्यः रामभद्रदीक्षितः शृङ्गारतिलकं, पुत्रः गीर्वाणेन्द्रदीक्षितः शृङ्गारकोशं च रचितवन्तौ। 17 शतके कश्चन कविकुञ्जरः[40] प्रसिद्धः। अयं मैसूरुपरिसरे यालण्डूरुग्रामे शा. श. 1536 (क्रि. श. 1614) वर्षे अजायत। कर्णाटकप्रभोः चिक्कदेवरायस्य सभायामासीत्। अस्यैव षडक्षर इति नामान्तरम्। अयं संस्कृतकर्णाटकभाषयोः प्रसिद्धः विद्वान्। अयं रसार्णवरत्नावलीकविकोट्यादिबहुग्रन्थकर्ता। अयं अल्पे वयसि द्वाविंशे एव वर्षे क्रि. श. 1636 वर्षे एव दिवं गतः। अथ चतुर्भुजकविकृतकविरसकल्पद्रुमे समकालिकानां पूर्वेषां च कवीनां श्लोकाः सङ्गृहीताः यस्मिन् वसन्तकवेः श्लोकाः अपि सन्ति। अयं ग्रन्थः क्रि. श. 1689 वर्षे रचितः[41]। अयमेव वसन्तकविः अनेन भाणकर्त्रा उल्लिखितः स्यात्। अथ अनन्तपण्डितनामा गोदावरीतीरवासी रसमञ्जर्याः व्याख्यां क्रि. श. 1636 वर्षे रचितवानिति कृष्णमाचार्याः[42]। अतः अयं सप्तदशशतके आसीदिति ज्ञायते। अथात्र भाणे कलत्रपत्रिकायां विजयाख्यवर्षः उल्लिखितः[43]। अयं च शा. श. 1575, क्रि. श. 1653 वर्षः भवति।

6.14 शृङ्गारतिलकभाणः – रामभद्रदीक्षितः

अर्वाचीनेषु भाणेषु वसन्ततिलक–पञ्चबाणविजयभाणाभ्यां समकक्षमपि इतिवृत्तवैलक्षण्येन उक्तिवैचित्र्या च प्राथमिककोटीमाटीकमानमिदं रूपकं शृङ्गारतिलकाख्यमन्वर्थम्। अत्रत्यः नान्दीश्लोक एव अस्य भाणस्य वैशिर्ट्यमुपवर्णयति –

पाणिग्रहावसर एव दृढोपगूढा

40 HCSL-MK-P. 308 (1970)
41 HCSL-MK-P. 785 (1970)
42 HCSL-MK- P. 775 (1970)
43 विजयनाम्नि संवत्सरे चैत्रमासे पौर्णिमास्याम् ......

In Public domain. Digitization Muthulakshmi Research Academy

रागस्पृशा रघुपतेर्नयनाञ्चलेन।
लज्जावशान्नववधूरिव सङ्कुचन्ती
दृष्टिर्महीदुहितुरस्तु विभूतये नः ।।

पाणिग्रहणमण्टपे एव आलिङ्गनमित्यारभ्य सहृदयान् किञ्चित्कालं सम्भ्रमे निवेश्य, अन्ते शनैः शनैः नयनाञ्चलेनेति वदतोऽस्य भाणकर्तुः चातुर्य-मत्रभाणे पदे पदे अनुभोक्तुं शक्यम्।

भाणोऽयं मधुरानगरे मीनाक्षीकल्याणमहोत्सवेषु प्रदर्शितः। नायकः भु-जङ्गशेखरः। नायिका हेमाङ्गी अत्र न वेश्या। किन्तु परकीया कुलवधूः। अस्याः श्वशुरगृहं श्रीरङ्गे। अस्य भुजङ्गशेखरस्य स्वग्रामः हालास्यपुरी। तस्याः अपि मातृगृहं हालास्यपुरी एव। अयं नायकः कदाचित् मित्रेण कलहंसेन सह रङ्गनाथस्य उत्सवेषु श्रीरङ्गं गच्छति। तत्र रङ्गनाथं से-वितुमागतां हेमाङ्गीं पश्यति। सापि अमुं दृष्ट्वा अस्मिन् अनुरक्ता भवति। ततः नायकः तामनुसृत्य तस्याः गृहं गच्छति। अन्तः प्रविष्टा नायिका द्वारि स्थितं नायकं प्रति स्वसखीमुखेन सन्देशममुं प्रेषयति –

लब्धव्या रसिकेन चन्दनलता सा चेन्नलब्धुं क्षमा
द्वीपे भीमभुजङ्गमावृततया किं तस्य हीनं ततः।
सारङ्गैरुपलालनीयमनघं सौरभ्यमभ्येयुषी
मोघा दुर्विधिना कृता परिणतौ सा केवलं निन्द्यते ।।

अनेन सन्देशेन आत्मनि अनुरक्तां तां विज्ञाय, सखीमुखात् तस्याः वृत्तं सर्वमवगत्य तामपि हालास्यपुर्यभिजनां ज्ञात्वा मातृगृहमागन्तुं सन्दिश्य स्वयमपि हालास्यपुरं गच्छति। ततः सापि तस्य भ्रात्रा मातृगृहमानीता। ततः केषुचित् दिनेषु गतेषु एकस्यां रात्रौ नायकः वेशवाटीं गच्छन् मार्गे राजशार्दूलेन अवरुद्धः समीपस्थगृहप्राकारमुल्लङ्घ्य अन्तः प्रविष्टः अक-स्मात् हेमाङ्गीं पश्यति। तस्यां निद्रापरवशायां सत्यां तां बाहुभ्यामुत्थाप्य

In Public domain. Digitization Muthulakshmi Research Academy

समीपस्थमुपवनं नयति। स्वीयं परिचयमुक्त्वा तस्यां रात्र्यां तामनुभवति। कथाप्रसङ्गे परस्मिन्नेव दिने तया श्वशुरगृहं गन्तव्यमिति ज्ञात्वा, तस्याः श्वशुरगृहगमने विघ्नमाचरितुं निश्चित्य, स्वमित्रस्य ज्यौतिषिकस्य साहाय्येन मासत्रयपर्यन्तं शुभदिनं नास्तीति सूचयित्वा तस्याः श्वशुरगृहगमनं स्थगयति। रात्रौ पुनः तया सह सङ्गच्छति इति पारदारिकमेवेतिवृत्तम्। मध्ये नायकस्य वेशवाटीप्रवेशः, तैस्तैः सम्भाषणम्, उपालम्भः, विनोददर्शनम्, व्यङ्ग्यभाषणं, कुक्कुटयुद्धादि सर्वं समानमेव अन्यैः। अयमपि भाणः कायेन विपुलः अथापि पञ्चबाणभाणापेक्षया सरसः। अत्र उक्तिवैचित्री अन्यादृशी। "को वा प्रादुर्भावसमये एव भग्नवान् दधिस्थालीम्" "अहोविधिः पुनर्व्याहतमेव व्याहन्तुमेवेक्षते" इत्यादि आभाणकानि स्थाने स्थाने प्रयुक्तानि सहृदयहृदयाकर्षकानि। अत्र प्राचीनकवीनां श्लोकाः भावाश्च अनुकृताः। पश्यन्तु कालिदासानुकरणम्–

गच्छन्तीनां तटभुवि नदीमारुतः पद्मगन्धी
पान्थः स्त्रीणां सुखयति वपुः सीकरासारवृष्ट्या।
छायादानात्क्षणमभिनवास्तोयवाहा लभन्ते
धन्यांस्तासां कुवलयदलप्रेक्षणीयान् कटाक्षान्॥ (169)

एवमत्र वृद्धायाः वेश्यायाः वर्णनं स्वभावोक्तिरपि चमत्कारावहम्।

पादौ दुष्प्रचलौ पृथूदरबलादेषोऽप्यलाबूफल-
द्राघीयान् हृदि लम्बते कुचभरः श्वेता वलन्ते कचाः।
दृश्यन्ते च मुखान्तरे त्रिचतुराः दन्ताः शलाकोपमाः
किं वक्ष्ये विधिनैव कापि रचिता कृत्या जरत्यात्मना॥

अत्र गद्यमपि ओजोगुणभूयिष्ठम्। बाणादयः अनुसृताः गद्यरचनायाम्। वर्णनानि मधुराणि। अत्र अधिकः भागः चमत्कारवर्णनपर एव। पश्यन्त्विदं सुन्दरीवर्णनम् –

In Public domain. Digitization Muthulakshmi Research Academy

आस्ते कुत्रचिदम्बरे हिमकरः कादम्बिनी च क्वचि-
द्वापी क्वापि चकास्ति मीनमिथुनं कोकद्वयं चान्यतः ।
किञ्चाधःपुलिनोच्चयस्य कदलीकाण्डाववाग्रोपितौ
तन्मन्ये चतुरस्य पुष्पधनुषः सर्गोऽयमन्यादृशः ।। (228)

रामभद्रदीक्षितस्य सर्ग एवायमन्यादृशः किल। एवमिदं प्रभातवर्णनमपि बहुरम्यम्।

चक्रद्वन्द्वं चटुलनलिनीनालडोलाधिरूढं
गाढाश्लिष्टं त्यजति रजनीजातविश्लेषदुःखम् ।
नक्तं भुक्त्वा नवकुमुदिनीं विश्रमार्थी विभाते
गङ्गागेहं विकचकमलं गाहते चञ्चरीकः ।।

"स्मरसि सखे वेगवत्यां स्नास्यावः, तत्र चास्यै शाकिनीं बदरीफलानि च दास्यावः", "श्रुतिलुण्टाक–अलङ्कर्मीण" इत्यादिविशिष्टप्रयोगाः शास्त्र–ज्ञानपि रञ्जयन्ति। भाणेऽस्मिन् रसिकानुद्दिश्य सन्देशोऽयं विहितः।

रतक्षमायाः प्रौढायाः वरं मुग्धा रताक्षमा ।
यतो भोगः क्रमाल्लभ्यः प्रौढामध्यमयोरपि ।। (123)

वसन्ततिलकभाणस्य अम्माभाण इति, अस्य शृङ्गारतिलकस्य अय्याभाण इति च व्यवहारः। अयं भाणः निर्णयसागरद्वारा प्रकाशितः[44]। अस्य भाणस्य 'अय्या भाण' इत्येव प्रसिद्धिः।

कौण्डिन्यगोत्रोद्भवः रामभद्रदीक्षितः[45] दक्षिणदेशे कुम्भकोणनगरप्रा–न्तस्थ 'कण्डरमाणिक्क' ग्रामाभिजनः चतुर्वेदयज्वनः वंशे उत्पन्नः। अस्य पितामहः नल्लादीक्षितः। पिता यज्ञरामदीक्षितः व्याकरणे निष्णातः। अस्य अग्रजः रामचन्द्रः सुप्रसिद्धः कविः विश्वगुणादर्शचम्पूमनुसरन् केरला–

44 काव्यमाला–44, निर्णयसागरप्रेस, मुम्बई.
45 HCSL-MK-P. 242 ; Introduction to 'Sahendravilasa' – by Dr. V. Raghavan (TSMS-54)

In Public domain. Digitization Muthulakshmi Research Academy

भरणमरचयत्। अयं बालकृष्णचोक्कनाथपण्डितयोः सकाशे व्याकरणध्ययनं कृतवान्। चोक्कनाथस्य पुत्रीमुद्वाह्य चोक्कनाथस्यैव जामाता जातः। अपरसरस्वतीतिख्यातस्य नीलकण्ठदीक्षितस्य शिष्यः। अयं शहजी (क्रि. श. 1684–1711) महाराजेन तिरुविशनल्लूर् परिसरे शाहराजपुराग्रहारेण सम्मानितेषु अन्यतमः। तत्रैव निवासं कृत्वायं बहून् च्छात्रानध्यापितवान्। अस्य शिष्याः अमुम् 'अय्या' इति आह्वयन्ति स्म। अन्ये च अय्यादीक्षितनाम्ना आह्वयन्ति स्म। अयं रामभद्रदीक्षितः रामभक्तः। अस्य कृतयः अपि रामस्तुतिपराः एव। अनेन (1) रामकर्णरसायनस्तवः, (2) वर्णमालास्तवः, (3) रामप्रसादस्तवः, (4) रामाष्टप्रासस्तवः, (5) विश्वगर्भस्तवः, (6) रामचित्रस्तवः (यमकालङ्कारेण), (7) रामचापस्तवः, (8) रामबाणस्तवः, (9) आचार्यस्तवराजभूषणम्, (10) जानकीपरिणयनाटकम्, (11) शृङ्गारतिलकभाणः, (12) पतञ्जलिचरितम्, (13) रामायणसङ्ग्रहस्तोत्रम्, (14) रामतूणीरस्तवः, (15) परिभाषावृत्तिव्याख्या, (16) उणादिमणिदीपिका, (17) षड्दर्शनसिद्धान्तसङ्ग्रहः, (18) शब्दभेदनिरूपणम् च। अयं पण्डिताग्रगण्यः स्वाध्यायप्रवचनरूपं कर्तव्यं निर्वहन् ऐहिकेष्वनासक्तः रागद्वेषादिरहितः रघुवरचरणारविन्दस्मरणनिरन्तरप्रवणचेतस्कः हनूमानिव रामभक्तः इति तस्य कृतिविशेषैरेव ज्ञायते। एतादृशोऽयं शृङ्गारविषयकभाणरचनायां कथं प्रवृत्त इति समेषामेव जिज्ञासाविषयः। अस्य प्रश्नस्य समाधानं तेनैव स्वयं विहितं भाणेऽस्मिन्नेव। शिष्यस्य रघुनाथस्य प्रार्थनया अयं भाणः रचित इति। तस्मिन् काले रामभद्रदीक्षितस्य मित्राणि, सहाध्यायिनः, समकालिकाश्च भाणरचयितारः आसन्। अस्य शिष्या अपि एतादृशं प्रयासम् अकुर्वन्। अतः शिष्याः अमुं भाणरचनार्थं प्रार्थितवन्तः। किञ्च तस्मिन् काले वसन्ततिलकभाणस्य सम्यक् प्रचारः

In Public domain, Digitization Muthulakshmi Research Academy

आसीत्। तस्य 'अम्मा भाण' इति प्रसिद्धिः। रामभद्रदीक्षितः 'अय्या' इति शिष्यैराहूत इति प्रसिद्धिः। अतः शिष्याः सर्वे वसन्ततिलकसमकक्षं भाणं निर्मातुम् आग्रहमकुर्वन्। तत्र रघुनाथः मुख्यः। शिष्याणां प्रार्थना सफला। अय्यार्येण रचितः ' अय्या भाणः'। किञ्च 'अम्मा' 'अय्या' शब्दौ दक्षिणदेशे मातापितृबोधकौ। भाणवाङ्मये एतद्भाणद्वयं तथैवोत्कृष्टमिति कथने नातिशयोक्तिः। "तावद्भाभारवेर्भाति यावत् माघस्य नोदयः" इतिवत् पञ्चबाणादिभाणाः सर्वेऽपि अस्य भाणस्य प्रसारात्परं निष्प्रभाः जाता इति नातिशयोक्तिः। अस्य भाणस्य समकक्षतया स्थितस्तु 'अम्मा भाण' एव। ध्वनिमार्गमनुसृत्य शब्दाडम्बरं परित्यज्य ललितया शैल्या गम्भीरार्थप्रतिपादने सरसहृद्यशृङ्गारवर्णने च अयं भाणः अद्वितीयः। अत्र भाणे कलत्रपत्रिकायां मन्मथवर्षः उल्लिखितः। स च क्रि. श. 1655 वर्षः, क्रि. श. 1715 वर्षो वा भवेत्। यतोऽयं नीलकण्ठदीक्षितशिष्यः, नीलकण्ठदीक्षितः क्रि. श. 1637 वर्षे नीलकण्ठचम्पूग्रन्थमरचयत् इति ज्ञायते। अतस्तच्छिष्योऽयं क्रि. श. 1655 वर्षे एव अमुं भाणं रचितवान् स्यात्। रङ्गाचार्यस्य पञ्चबाणविजयभाणोऽपि क्रि. श. 1653 वर्षे रचितः। अस्य समकालिकाः विद्वांसः अस्य शिष्याश्च स्वीयग्रन्थेषु अमुमतीवादरेण प्रस्तुतवन्तः। अस्य शिष्यः भगवन्तरायमखिनामा स्वीये राघवाभ्युदयकाव्ये अमुं "प्रत्यग्रपतञ्जलिः "इति" द्वितीयप्राचेतस" इति च स्तुतवान्। अस्य शिष्येषु नल्लादीक्षिताभिधः भूमिनाथः, पतञ्जलिचरितव्याख्याता वेङ्कटेश्वरः, रामभद्रदीक्षितस्य भागिनेयः वैद्यनाथमखी, तस्य पुत्रः सीतारामश्च प्रसिद्धाः पण्डिताः कवयश्च। वैद्यनाथमित्रं नल्लाबुधः स्वीये विंशतितमे वयसि एव शृङ्गारसर्वस्वभाणमरचयत् यत्रेतिवृत्तं पारदारिकम्। अतः अस्य भाणस्य मार्गदर्शकः भाणः शृङ्गारतिलकः भवेत्। अतश्चायं शृङ्गारतिलकभाणः क्रि. श.

In Public domain. Digitization Muthulakshmi Research Academy

1655 वर्षे एव रचितः स्यात्। रामभद्रदीक्षितस्तु शहजिमहाराजेन अग्रहारादिना सम्मानित इति कृत्वा क्रि. श. 1720 पर्यन्तं जीवितः स्यादिति अस्य समयः क्रि. श. 1620–1720 मध्ये स्यात्।

6.15 मदनभूषणभाणः – अप्पाध्वरी

वसन्ततिलकादिष्विव अत्रापि इतिवृत्तं वेशवाटीसम्बद्धमेव। अयं भाणः कावेरीतीरस्थमायवरग्रामदैवतस्य गौरीमायूरनाथस्य वसन्तोत्सवे अभिनीतः। अत्र नायकः मदनभूषणः मदनमञ्जरीसुतायाः वकुलमञ्जर्याः प्रथमरङ्गाधिरोहणमहोत्सवायाहूतः सायं तत्र गच्छतीति इतिवृत्तमत्र। यथावत् प्रातरेव प्रस्थाय तत्र तत्र अटित्वा, तैस्तैः सम्भाष्य, मध्ये कुक्कुटयुद्धेन्द्रजालादिविनोदान् पश्यन् अन्ते गन्तव्यस्थानं गच्छति। अत्र कविता सरसा सरला च। पश्यन्त्वत्र नान्दीम्–

भजन्तु लोका भुवमम्बुजाक्षं पद्मासनं वा पुरुषार्थहेतोः।
वयं वयोरूपगुणाभिरामं रामाङ्कमाश्रित्य सुखं भजामः।।

एवमन्योऽपि नान्दीश्लोकः –

येनैवोपमितिं गतास्त्रिजगतामादर्शपद्मेन्दवो
वर्ण्यन्ते कविभिर्वरेण्यमहिमप्रस्कन्दितान्यश्रियः।
येनानङ्गदशां गतोऽपि मदनः पट्टाभिषिक्तः पदे
तत्तादृग्वदनं तनोतु सुदृशामानन्दमव्याहतम्।।

अत्रनायकः वेशवाटिकायां सञ्चरन् वृद्धविटं प्राप्य निर्विण्णां वसन्तमालिकां दृष्ट्वा कथमस्ति भवतीति पृच्छति। तदा सा तस्याः निर्वेदमित्थं वदति –

स्त्रीणां जन्मैव कष्टं जगति पुनरियं वारनारीप्रसूतिः
तत्राप्यत्यन्तदुःखं वसति जरतिका यद्गृहे दीर्घकालम्।

In Public domain. Digitization Muthulakshmi Research Academy

खेदस्तत्रापि घोरः स्मरनिगममहातन्त्रसारार्थवित्त्वे
यत्स्वेच्छाधीनभोगे भवति बहुविधा प्रायशो विघ्नपङ्क्तिः ।।

अत्र शृङ्गारेण सह हास्यरसस्यापि प्राधान्यमस्तीति कविः स्वयमेव वदति। अत्र हास्यस्योदाहरणं ब्रह्मचारिणां दण्डनम्। अत्र च विटकृता द्यूतनिन्दा अवधानार्हा। पश्यन्तु –

नलो नष्टश्रीकः सपदि सपुनर्धर्मतनयो
वियुक्तस्त्रीपुत्रैरपि च सहजैर्बन्धुनिकरैः ।
कलेः रक्षास्थानं कमलभवनेनैव विहितं
ततो निन्द्यं सद्भिर्विटजनविलासास्पदमिदम् ।।

समयेऽस्मिन् अन्यकान्तानुरक्तैः भर्तृभिः अपत्यवत्यः गतवयस्का इति उपेक्षिताः जायाः तेनैव व्याजेन गतभयाः विटानां प्रलोभेन अन्यसङ्गता भवन्तीति भाणस्थवृत्तान्तपरिशीलनेन ज्ञायते। अस्मिन् काले प्रवृत्तायां भाणस्पर्धायां शृङ्गारतिलकादिभिः स्पर्धितुमसमर्थः अयं भाणः प्रकाशं न प्राप्तः तञ्जापुरतालपत्रग्रन्थालये[46] इदानीमपि संरक्ष्यमाणः तिष्ठति।

एतद्भाणकर्ता अप्पाध्वरी चिदम्बरदीक्षितस्य[47] पुत्रः। किल्लियूरग्रामवासी। अयं ग्रामः तञ्जापुरसमीपस्थमायावरग्रामसमीपेऽस्ति। अस्यैव अप्पादीक्षितः, अप्पयज्वा, अप्पाशास्त्री इति नामान्तराणि। अयं बहुयज्ञकर्ता। श्रीवत्सगोत्रः। अस्य भ्राता विश्वनाथः। अप्पयज्वा तञ्जापुरपालकेन शहजिमहाराजेन (क्रि. श. 1683–1711) सम्मानितः। तस्य महा–

---

46 Tanjore D.C. No.4585

47 (a) तातो यस्य चिदम्बरेश्वर इति प्रख्यातनामा मखी
यद्रात्रिन्दिवदत्तहव्यनिवहादानैककृत्याः सुराः ।
श्रीवत्सान्वयवारिधीन्दुरवसद्यः किल्लियूर्नामनि
श्रीमान्विस्तृतकीर्तिरार्द्रहृदयः पुण्येऽग्रहारे सुधीः ।। (मदनभूषणम्)
(b). See Introduction to Sahendravilsa – Dr. Raghavan.

In Public domain. Digitization Muthulakshmi Research Academy

राजस्य पोषणे स्थितः आचारनवनीतादिग्रन्थान्[48] अरचयत्। आचारनवनीतमिति धर्मशास्त्रं, गौरीमायूरचम्पूः, मदनभूषणभाणश्च अस्य कृतयः। शहजराजमन्त्री त्र्यम्बकरायमखी कुम्भकोणपरिसरे स्वामिमलै पर्वते धातृवत्सरे (क्रि. श. 1696) एकं यज्ञमन्वतिष्ठत्। तस्मिन् यज्ञे अप्पाध्वरी भागमगृह्णात्। तदा अस्य पाण्डित्यप्रकर्षमवगम्य शाहजी अमुं तञ्जापुरमाहूय धर्मशास्त्रग्रन्थरचनार्थं प्रार्थयामास। भाणेऽस्मिन् अयं स्वीयकृत्यन्तराणि नोल्लिखितवान्। किञ्चात्रत्यनान्दीश्लोकपरिशीलनेन अयं भाणः अनेन यौवनावस्थायामेव रचित इत्यूह्यते। रामभद्रदीक्षितशृङ्गारतिलकादपि पूर्वमेव अयं भाणः रचितः स्यात्। अस्य समकालिकाः गङ्गाधरमखी[49], रामभद्रदीक्षितः[50] भूमिनाथः[51] चोक्कनाथः[52] कविराक्षसः[53] इत्यादयः।

6.16 शृङ्गारसर्वस्वभाणः – नल्लाबुधः

सरसया शैल्या सहृदयहृदयरञ्जकैः भावैः मनोहरोऽयं भाणः शृङ्गारतिलकश्रेणीमर्हति। शृङ्गारसर्वस्वमिति चान्वर्थं नाम। अयं 'नल्लाभाणः' इति प्रसिद्धिमाप्तः स्यात्। द्रविडभाषायां 'नल्ल' इत्यस्य 'सम्यग्' इत्यर्थः। अयं च भाणः कविना स्वबाल्ये एव सख्युर्वचनगौरवात् लिखित इति, विंशतेः वयसः पूर्वमेव अयं रचित इति च भाणप्रस्तावनातः[54]

---

48 श्रीशाहक्षितिपालनायकदयादत्तान्नभोगोल्लस-
द्बुध्यत्कर्षविभावितश्रुतिबहुस्मृत्यर्थसारोदयः ।।(आचारनवनीतम्)

49 शाहजीमन्त्रिवर्यस्य त्र्यम्बकरायमखिनः पिता

50 शृङ्गारतिलकादिग्रन्थकर्ता

51 भूमिनाथ इति ख्यातः नल्लाबुधः।

52 रामभद्रदीक्षितगुरुः श्वशुरश्च

53 रसिकतिलकभाणकर्ता मुद्दुरामकविः

54 सभाणं प्राणयद्बाल्ये सख्युर्वचनगौरवात्; प्रागेवविंशद्वयसः प्रबन्धा नल्लाकवीन्द्रेण.....

In Public domain. Digitization: Muthulakshmi Research Academy

ज्ञायते। अथापि परिणतवयोभिः रचितानां भाणानां श्रेणीमेवार्हत्ययमिति ज्ञायत एव पठितृभिः। अस्य भाणस्य रचनायां प्रेरकः सुहृच्च रामभद्रदीक्षितस्य भागिनेयः वैद्यनाथः। अतश्चायं भाणः शृङ्गारतिलकसमकालिक एव, किञ्चिदिव तदनन्तरकाले उत्पन्नः स्यात्, यतः अत्रापि इतिवृत्तं पारदारिकम्। कविः स्वकविताविषये भाणेऽस्मिन्नेव एवं वक्ति –

निबध्नन्ति स्वैरं कृतिमिह कियन्तो न भुवने
रसं किन्तु व्यङ्क्तुं प्रभवति कविष्वेषु कतमः।
ममश्रीमल्लम्बोदरकृपापाङ्गितगिरः
प्रबन्धेऽस्मिन् चेतः कुतुकमनुबध्नाति तदपि।।

"रसे सारः चमत्कारः" इति चमत्कारचन्द्रिकावचनस्य साक्षात् दृष्टान्तभूतोऽयं भाणः इति, अत्र चमत्कारस्य सारः सम्पूर्णतया अस्तीति च विमर्शकाः[55]। अनङ्गशेखरापराभिधः आनन्दशेखरोऽत्र नायकः। अयं कनकलतायामनुरक्तः, तस्याः वियोगबाधामनुभवन् रङ्गे प्रविशति। कनकलतायाः सख्युः चन्द्रमुख्याः साहाय्येन सायं तां सङ्गच्छतीति इतिवृत्तमत्र। अत्रापि इतिवृत्तं पारदारिकम्। मध्ये च वलयविक्रयिणः वर्णिताः, ये च कुलस्त्रीणां बाहुषु वलययोजनमिषया तासां स्पर्शसुखमनुभवन्ति, दुश्चेष्टाः अपि कुर्वन्ति। विविधक्रीडासु कृतस्य पणबन्धस्योल्लङ्घनेन प्रेयसीप्रिययोः मध्ये जायमाने कलहे सत्यनिर्धारणार्थं, कलहस्य निर्यातनार्थं च रचिताः गोष्ट्यः न्यायस्थानसादृश्यमभिव्यञ्जयन्ति। संस्कृतरचनाः व्यवहारात् अत्यन्तं दूरे भवन्तीति अपवादस्य दूरीकरणार्थम् अत्र व्यावहारिकता बहुत्र सम्भाषणेषु कविना सप्रयत्नमानीता। "कुञ्चितपञ्चाङ्गुलिप्रयोगः, किं वक्ष्ये तन्महाभारतं, जीर्णशूर्पेण सन्ताड्य, किं सर्वोप्प्यऽनङ्गशेखरः" इत्यादिव्यावहारिकप्रयोगाः, "मार्गे गच्छतो मन्दि–

55 संस्कृतभाणसाहित्यमु–तेलुगु– पृ. 128. (शृङ्गारसर्वस्वप्रस्तावना)

In Public domain. Digitization Muthulakshmi Research Academy

रनिर्माणं सुकरं बिभ्रतः खलु भारः" "आलयघण्टामणिनाशेऽपि अर्चकस्य का हानिः" "किमिदानीमापणनारिकेलमध्वविनायकाय प्रहरसि" "अहो कियद्वैदग्ध्यं यत्र क्रीतं तत्रैव विक्रीयते" इत्यादि आभाणकानां समुचि-तस्थाने प्रयोगश्च चमत्कारावहः। अयं च कविः गणपतिभक्तः। स्वीयां भक्तिं प्रदर्शयितुमत्र सन्दर्भमेकमित्थं प्रदर्शयति। ईश्वरः ग्रामोत्सवार्थं ब-हिरागतः। तदुत्सवाङ्गतया भद्रगजः अग्रे सरति, पश्चाद्भगवान् गच्छतीति क्रमः। तदा अकस्मात् तस्य गजस्य विजृम्भणं जातम्। एवं सन्दर्भं प्र-कल्प्य, उत्सवारम्भे गणपतेः अपूजनात् गणपतेः क्रोधेन जातमिदं वैप-रीत्यमिति विचिन्त्य स्वयं गणपतिं स्तौति।

अञ्जलिरयं जनानामातङ्कच्छेदबिरुदाय।
वरदाय दिव्यगन्धद्विरदाय ध्वस्तसर्वदुरिताय।।
जयजय जगतां मूल जयजय भो जन्मकल्मषद्वेषिन्।
गजवक्त्र विघ्नशत्रो सुत्रामस्तुतचरित्र शिवपुत्र।।

अनेन स्तवेन सोऽपि गजः शान्तः। अत्र मणिगुप्तक – चक्षुरपिधान – अम्बरकरण्डक – कन्दुक – द्यूत – डोला – युग्मायुग्मदर्शन – ग-जपतिकुसुमकन्दुक – चतुरङ्गादिक्रीडाः वर्णिताः। अत्र युग्मायुग्मदर्श-नक्रीडासन्दर्भे कश्चन चमत्कारावहः सन्दर्भः अपि अत्र कल्पितः। स चेत्थम्–रत्नचूडः स्वप्रेयस्या सह युग्मायुग्मदर्शनक्रीडां क्रीडति। तत्समये द्वयोः मध्ये कलहः जातः। तत्र न्यायनिर्णयार्थं तौ विटस्य समीपमाग-च्छतः। सा चेत्थं रत्नचूडे दोषमुद्भावयति यत् रत्नचूडः निष्कारणं तस्याः स्तनतटे हस्तं निक्षिप्तवानिति। तदा तद्विषये पृष्टः रत्नचूडः सचमत्का-रमित्थं समाधत्ते–

मुक्ताफलं किरन्त्याः मुग्धदृशः स्तनभरेण मदपाङ्गः।
ग्रस्तस्तामुपदातुं न्यस्तो हस्तो मया तत्र।। इति।

In Public domain. Digitization Muthulakshmi Research Academy

एवमत्र वादिप्रतिवादिदोषारोपादिकं तत्र कृताः निर्णयाश्च अत्यन्तं चमत्कारावहाः। एवमन्यः कश्चन चमत्कारावहः सन्दर्भः। विटशेखरः सारसाक्षीं कलत्रं कृतवान्। तस्मिन् काले तेन नान्योपगन्तव्येति नियमः। परन्तु तस्मिन्नेवकाले तेन तस्याः अनुजा एवालिङ्गिता। सारसाक्षी च ज्ञात्वा बहुविवादमुत्थापितवती। यदा भाणनायकः अनङ्गशेखरः तद्गृहं गतवान् तदा सा निर्णयार्थम् अमुं कलहवृत्तमावेदितवती। तदापृष्टः विटशेखरः इत्थं स चमत्कारं समाधत्ते–

क्रीडासद्मनि हंसतूलशयने निद्रालसोऽहं स्थितः
सा तत्रावसरे समेत्यरभसादुत्सङ्गमध्यास्त मे।
वीटीं तद्वदने मया वितरता किञ्चिन्निपीड्याधरं
वक्षोजे निहितः करः किमियता कामः समाराधितः।। इति।

एवं विनोदेषु दक्षिणदेशे प्रसिद्धः केनचिज्जातिविशेषेणैव प्रदर्श्यमानः इदानीं 'सर्कस्' नाम्ना प्रथितः अपि वर्णितः। शूद्रेष्वेव कश्चिज्जातिविशेषः एतादृशविनोदप्रदर्शनमेव जीविकां कृत्वा ग्रामं ग्रामं गत्वा तत्र चत्वरेषु विनोदममुं प्रदर्शयति। तत्र समवेताश्च यथाशक्तिधनं ददति। तथैव स जातिविशेषः स्वजीवनं यापयति। अत्र विनोदे न केवलं पुरुषा एव साहसकृत्यादिकं प्रदर्शयन्ति अपितु स्त्रियः, बालाश्च। तत्र काचित् स्त्री स्तम्भाग्रमारुह्य कथं विन्यासं करोति – पश्यन्तु–

पादावलम्बकलया सहसाधिरुह्य
स्तम्भाग्रमुन्नतमुरोजभरेण खिन्ना।
तिर्यग्विवर्तिततनुस्तरुणी चिराय
चक्रेपरिभ्रमति चम्पकमालिकेव।।

साहित्यस्थाने ध्वनिप्रस्थानं प्रधानम्। परन्तु तस्य परिपोषणं बहुक्लिष्टम्। परन्तु भाणरचयितुः नल्लाबुधस्य तु अनायाससाध्यम्। औचित्यस्य

In Public domain. Digitization Muthulakshmi Research Academy

अपरित्यागेनैव कथनमस्य सहजम्। पश्यन्तु अर्थान्तरसङ्क्रमितवाच्य-मिदम्।

उत्सङ्गे भवतीं निधाय सरसं सल्लापमभ्यस्य च
प्रेम्णा ते मुखवीटिकाविनिमयव्याजाद्गृहीत्वाधरम् ।
पाणिभ्यामपि ते पयोधरभरामर्शं विधाय स्वयं
कामप्यद्य कृतिं कयापि विधया कर्तुं मनः काङ्क्षति ।।

एवं विप्रलम्भस्य अनुगुणं वैदर्भीं प्रसादं चाश्रित्यरचितमिदमपि पद्यं हृद्यम्

शकलयति मनो मे शम्बरारिः शरौघैः
शिथिलयति शरीरं शीतलो गन्धवाहः ।
प्रबलयति पिकानां पञ्चमः कामरोगं
द्विगुणयति च तापं दारुणश्चन्द्रपादः ।।

कारणमन्यत्र कार्यं चान्यत्रेति सचमत्कारं वर्णयति सूर्योदये।

प्राचीकुचमुदयाद्रिं परिरभमाणैः करैस्तपनः ।
कञ्चन विकासयोगं कुरुते सरसीमुखाब्जेषु ।।

एवं कियदपि वर्ण्यतेऽस्य भाणस्य विषये तदल्पमेव। अन्ते अत्रत्येन स-रस्वत्याः पूर्वकवीनां च नमोवाकेन विषयममुमुपसंहरामः।

करकिसलयराजत्कीरशाबाभिरामां
सरसिजभवदारान् वाचमाराधयामः ।
श्रुतिमधुरमधूलिस्यन्दिसूक्तिक्रमेभ्यः
चिरसरसकविभ्योऽप्यञ्जलिं कल्पयामः ।।

In Public domain. Digitization Muthulakshmi Research Academy

बालचन्द्रदीक्षिततनूभवः[56] अयम् नल्लाबुधः । अस्य पैतृकं नाम भूमि(ति ?) नाथः । नल्ला इति प्रेम्णा पित्रादिभिराहूतः स्यात् । अतः अन्येऽपि तथैव व्यवहृतवन्तः स्युः । छन्दोगोऽयं चोलदेशे कण्डरमाणिक्कं ग्रामे उत्पन्नः यश्च ग्रामः पण्डितप्रकाण्डानां कवितल्लजानां च निवासः आसीत् । अस्य[57] गुरवः रामनाथमखी, परमशिवेन्द्राचार्यः, सदाशिवब्रह्मेन्द्रश्च । रामनाथमखी[58] रामभद्रदीक्षितसमकालिकः षड्दर्शिनीसिद्धान्तसङ्ग्रहरचनायां सहलेखकः । परमशिवेन्द्राचार्यशिष्यः वेङ्कटकृष्णदीक्षितः शहजीमहाराजेन सम्मानितः । रामभद्रदीक्षितस्य भागिनेयः अस्य मित्रम् । अतः वयसि रामभद्रदीक्षितादवरः तत्समकालिकश्च । अद्वैतरसमञ्जरी,[59] चित्तवृत्तिकल्याणम् (प्रबोधचन्द्रोदयतुल्यं नाटकम्), जीवन्मुक्तिकल्याणम्[60] (एतदपि पूर्वनाटकतुल्यम्), शृङ्गारसर्वस्वभाणः[61], सुभद्रापरिणयनाटकं[62] च अस्य कृतयः । भाणेऽस्मिन् कलत्रपत्रिकायां संवत्सरः न निर्दिष्टः । अतः भाणस्य निश्चितः रचनाकालः न ज्ञायते । परन्तु रामभद्रदीक्षतभाणरचनाकालसमीपे एवास्य रचनास्यादित्यूहितुं शक्यते । अतः क्रि. श. 17 शतके अयमासीदिति, भाणोऽपि तदा एव रचित इति निश्चप्रचम् ।

---

56 इति श्री कौशिककुलजलधिराकासुधाकरश्रीबालचन्द्रमखितनूभवश्रीनल्लाबुधकविशेखरविरचितः शृङ्गारसर्वस्वं नाम भाणः सम्पूर्णः

57 Introduction to Srngarasarvasva Bhana – by T.S.Kuppaswamysastri-kavyamala 72.

58 Introduction to Sahendravilasa – Dr. V.Raghavan

59 Printed in Vanivilasapress, Srirangam with his own commentary 'Parimala'

60 Printed in the journal of Sankaragurukuḷam, Srirangam

61 Kavyamala-72-Nirnayaṣagar-Bombay.

62 GOML-R 788

In Public domain. Digitization Muthulakshmi Research Academy

6.17 पञ्चबाणभाणः – भट्टिवेङ्कटेशः

अस्य श्लेषभाण इति नामान्तरम्। श्लोषालङ्कारस्य विश्वरूपमत्र द्रष्टुं शक्यते। श्लिष्टा एव कृतिः रम्या इति अस्य कवेः राद्धान्तः इत्थमत्र प्रतिज्ञातः।

श्लिष्टा सभङ्गा सद्वर्ण्या निर्दोषा सगुणा मृदुः।

नानाभङ्गी मनोज्ञा चेत् कृतिः विकृतिरन्यथा।। इति।

"शास्त्रमिदं न भाणमात्रमेतत्" इत्यपि कविना स्वयमुक्तं पात्रमुखेन। वेदान्तनाटकेषु यथा पात्राणि तत्तत्तत्त्वप्रतीकभूतानि, एवमेवात्रापि प्रधानपात्राणि तत्तत्तत्त्वप्रतीकभूतानि। अत्र नायकः रसिकचन्द्रः भगवतो वेङ्कटेश्वरस्य, भगवती भक्त्याः, चन्द्रकला वैष्णवशक्तेः, बिन्दुमतीकृष्णवेण्यादयः सिद्धेश्च प्रतीकभूताः। भक्तिरूपभगवत्याः साहाय्येन चन्द्रकलारूपां वैष्णवीं शक्तिमाराध्य सिद्धिः प्राप्तव्या इति अत्र सन्देशः।

अत्रेतिवृत्तं पारदारिकम्। वेशवाटीसञ्चारे सत्यपि कुक्कुटादियुद्धवर्णनादिकं पूर्वतनभाणेषु यदवश्यकर्तव्यत्वेन क्रियते स्म, तत् अत्र नास्ति। वीरसूचनाय सान्दर्भिकमदगजविजृम्भणमेव वर्णितम्। इतिवृत्तमप्यत्र विलक्षणम्। अत्र नायकः रसिकचन्द्ररूपी श्रीनिवासः प्रतिष्ठानपुरनगरप्रधानलेखकस्य पत्न्यां कृष्णवेण्यामनुरक्तः, तस्यां चिन्तामणिनगरं प्रत्यागतायां चिन्तामणिनगरमागत्य तां एकस्यां रात्र्यां मिलति। तामनुनीय तया सह रमणाय प्रवृत्ते तस्मिन् आरम्भे एव विघ्नः जातः उषोदयरूपेण।

अथ परस्मिन्नेव दिने पुनः सा पतिगृहं गच्छतीति ज्ञात्वा विषण्णः रङ्गे प्रविशति इत्यनेन सन्दर्भेण भाणस्य आरम्भः। यथावत् चन्द्रास्तमयादिवर्णनं विधाय, स्वमित्रं मधुकरं मिलित्वा, तस्य वृत्तान्तं ज्ञात्वा शुभशकुनानि लब्ध्वा प्रियासमागमं निश्चित्य तदर्थं भगवतीं चन्द्रकलां संप्रार्थ्य

In Public domain. Digitization Muthulakshmi Research Academy

तस्याः साहाय्येन कृष्णवेण्याः पतिगृहगमनं निवार्य रात्रौ पुनः तया सह सङ्गतो भवतीति इतिवृत्तमत्र। अत्र रसिकचन्द्रविरोधी कश्चन ब्रह्मबन्धुनामा विघ्नानि कल्पयति। अथापि भगवत्याः साहाय्येन तान् अवरोधान् अतीत्य इष्टं लभते। अत्र भाणे रसिकचन्द्रस्य नायकस्य द्वे मित्रे मधुकरकलकण्ठनामानौ। तत्र मधुकरः कस्यचित् पुरोहितस्य पत्न्यामनुरक्तः। तस्य वृत्तमत्र प्रथमं वर्णितम्। ततः कलकण्ठस्य प्रेमवृत्तमपि वर्णितम्। इदं तु अत्यन्तचमत्कारावहम्। तदत्र सङ्क्षेपेण स्थाप्यते।

"एकदा कलकण्ठः दक्षिणमधुरातीरे पर्यटन् मध्याह्नसमये ताम्रपर्णीतीरे एकस्मिन् लतामण्टपे विश्रान्तः। चम्पापुरं गच्छत् एकं स्त्रीबृन्दमपि तत्रागतम्। तास्वेका मञ्जुवाणी तत्र लतामण्टपस्थमेनम् अदृष्ट्वा विजनं प्रदेशं मन्वाना कञ्चुकादिकं सर्वं तीरे संस्थाप्य दिग्वसना स्नातवती। वस्त्रधारणात्परं पुष्पापचाय समागता सा लतामण्टपान्तर्हितममुमपश्यत्। चकिता सा तद्वृत्तान्तमपृच्छत्। तदा सः स्वीयं सर्वं वृत्तमाख्याय तस्यां स्वीयमनुरागं प्राकटयत्। तन्निराकृत्य गच्छन्ती सा प्रयत्नं विना कामिनी न सिद्ध्यतीति व्यङ्ग्यमर्यादया संसूच्य सखीभिः सह गता। ततः सा चम्पानगरे स्थितस्य कस्यचित् पौराणिकस्य पत्नीति, ऋतुशान्त्यर्थं पत्युः समीपं नीयते इति ज्ञात्वा कलकण्ठः बालविधवारूपं धृत्वा चम्पानगरं गत्वा 'तीर्थयात्रासु मध्येमार्गं पतिः मृतः' इति कथां कल्पयित्वा तस्याः एव गृहे अवसत्। ततः मञ्जुवाण्याः भर्तारं स्वस्मिन्ननुरक्तमिव कृत्वा रहसि कामपि कुरूपां विधवां तत्सकाशं प्रेषयामास। तत्साङ्गत्येन सा गर्भिणी जातेति तं भीषयित्वा राजदण्डनभयेन तं गृहात् पलायितमकरोत्। ततः सः मञ्जुवाणीं मातृगृहं प्रस्थितां बालविधवारूपेणैव अनुसृत्य प्रथमसमागमोद्यानं प्राप्य, तत्र तां त्यक्त्वा अन्यतो गत्वा बालविधवावेषं परित्यज्य पुनः तत्रैव लतामण्टपे स्थितः। मञ्जुवाणी अपि पुष्पापचयं कुर्वन्ती लता–

In Public domain. Digitization Muthulakshmi Research Academy

मण्टपं समागत्य तमपश्यत्। तत्र स्वस्मिन् अनुरक्तां तां चिन्तामणिनगरं प्रापयामास" इति।

अत्र वेशवाटीपर्यटनमत्यल्पम्। मल्लिकया अब्जिन्या च सम्भाषणमतीव हृद्यं प्रतिपदं श्लेषयुक्तं पठि तृणामुत्साहं वर्धयति। अत्रोदाहरणाय पिशाचस्य वर्णनमिव भ्रमजनकं सुन्दरीवर्णनं पश्यन्तु – "शृणु तावत् भूतवृत्तान्तम्। जानासि किल अस्याः पुर्याः बाह्योपवनस्य नातिदूरे चण्डिकायतनम्। या तु नितम्बिनीसञ्चारस्थली। तत्र पूर्वेद्युः अहं गगनमध्यदेशमलङ्कुर्वति भगवति कर्मसाक्षिणि पुष्पापचयार्थं गतवानस्मि। यदृच्छया तत्र कस्य चित् अतिप्रमाणस्य पलासिनः स्कन्धदेशे सज्जितकरा पीनपयोधराकारा रोहिताक्षी रक्ताकर्षणनिपुणा सुमहास्या काचन व्यक्तिः मामालोक्यैकाकिनं मयि मन्दं कटाक्षगतिं व्यापारयामास। तदनु सा सुन्दरतासुग्रहणरुचिः क्षणमिव ध्यात्वा मत्समीपमागतवती।" इत्यादि। अस्य कविताशैल्या उदाहरणमिदम् पश्यन्तु–

सततसुराजीविन्यः नलिन्य एताः इमेऽलिनो मधुपाः।
दैवायोग्यः सङ्गः शिवशिव विकचा अपीह जातास्ताः।।

एवमत्र विरोधाभासयुक्तं गङ्गावर्णनमपि हृद्यम्।

सदापापिदुरापात्मा चन्द्राभापीनलक्षणा।
प्रौढाप्याख्यातमौग्ध्या साश्चर्यचर्या तरङ्गिणी।। इति।

अत्र सदापा अपि दुरापात्मा, चन्द्राभा अपि इनलक्षणा, प्रौढा अपि आख्यातमौग्ध्या इति भङ्गेन विरोधः। भङ्गान्तरेण सदा–पापि–दुरापात्मा, चन्द्राभा–पीनलक्षणा, प्रौढाप्या–ख्यातमौग्ध्या इति परिहारः। एवं निरोष्ठ्यचित्रविचित्राः श्लोकाः शब्दालङ्काराणां लक्ष्यभूताः सन्त्यनेके। एवमन्यः श्लोकः श्लेषस्य उदाहरणभूतः –

अधरः कुचयुग्मं चाप्यस्याश्चित्तं च राजते।

In Public domain. Digitization Muthulakshmi Research Academy

(8) त्वत्पाणिवन्महाराज ! सुरागोल्लसितं सदा ।।

अत्र सुरागपदं चतुर्णां विशेषणम्। सु+राग इति विभागे रक्तिमा, अनुरागश्च। सुर+अग इति विभागे सुरगिरिः कल्पवृक्षश्च। अधरः रक्तः। कुचयुग्मं गिरितुल्यम्। चित्तम् अनुरागपूर्णम्। हस्तः कल्पवृक्षतुल्यः। अत्र भङ्गेऽपि श्लेषः हृद्यः किल। अत्र भाणे एक एव विषयः औचित्यमतिक्रम्य वर्तते। तच्च नायकस्य मूर्च्छावस्थायामपि परवचनानुवादः। तथा परेषां स्वगतस्यानुवादश्च। अयं भाणः कायेन महान्। अस्य भाणस्य व्याख्यापि अस्य कवेः पौत्रेण कृता। व्याख्यया सह भाणः राष्ट्रियसंस्कृतविद्यापीठग्रन्थालये मातृकारूपेण[63] संरक्षितः। एतद्भाणवाङ्मयचरितकर्त्रा सम्पादितः गैर्वाणीपत्रिकायां[64] धारावाहिकतया प्रकाशितश्च।

एतद्भाणकर्ता भट्टिवेङ्कटेशकविः। महाराष्ट्रमाध्वब्राह्मणः। सर्जापुरनिवासी। बेङ्गलूरुनगरसमीपस्थ कोलार् पट्टणे अयं भाणः रचितः। तत्समीपवर्तिचिन्तामणिग्रामे हनूमन्मन्दिरे उत्सवसमये प्रदर्शितोऽयं भाणः। अस्य गुरुः नृसिंहः। तनयः शेषगिरिरायः। पौत्रः भावुरावुनामा। अयं तिरुपतिसमीपस्थवेङ्कटगिरिराज्याधिपेन वेङ्कटपतिरायेन पोषितः। वेङ्कटपतिरायस्य धर्मपत्नी रमादेवी। अयं राजा चिन्तामणिनगरे उद्यानं सरश्च निर्मापितवान्। अस्य कवेः श्रीनिवासविलासचम्पूप्रबन्धः, यत्र तिरुपतिवेङ्कटेश्वरस्य, स्वपोषकस्य राज्ञश्च वृत्तं श्लेषरूपेण वर्णितं, तच्छिष्यधरणीधरविरचितया व्याख्यया सह निर्णयसावारद्वारा क्रि.श. विंशशतकारम्भे एव प्रकाशितः सहृदयानामादरं च प्राप। अस्य च कृतयः अनेकाः सन्ति। ताश्च – (1) भैमीपरिणयप्रबन्धः, (2) सुभाषामणिमञ्जूषा, (3) श्लेषमालिका, (4) कण्टकोद्धारः, (5) अभिनवभारतच–

63 R.S. Vidyapeetha library – MS. No.14440, 14450, 14456.
64 गैर्वाणी–1996–97

 In Public domain. Digitization Muthulakshmi Research Academy

म्पूः, (6) आनन्दतीर्थविजयश्लेषकाव्यम्, (7) प्रसङ्गरत्नावलिः, (8) भागवतटीका, (9) रामायणटीका, (10) पारिजातापहरणम्, (11) नीतिसप्ततिः, (12) अभिनवभागवतम्, (13) भैमीपरिणयटीका, (14) भागवतसङ्ग्रहटीका, (15) श्रीनिवासनाममाला, (16) गङ्गाप्रशंसा, (17) एकपदीगङ्गास्तुतिः, (18) देवमानुषादिस्तुतिः, (19) अभिनवरामायणचम्पूः, (20) आनन्दतीर्थस्तुतिः, (21) गणपतिस्तुतिः। एषु गणपतिस्तुतेः अस्य पौत्रः क्रि. श. 23-10-1702 दिने, अस्य भाणस्य क्रि. श. 22-1-1705 दिने च व्याख्यां समापयत्। एतत् द्वयमपि राष्ट्रियसंस्कृतविद्यापीठग्रन्थालये हस्तलिखितरूपेणास्ति। अयं वेङ्कटेशः जयसंवत्सरे आनन्दतीर्थस्तुतिं [65] रचितवानिति स्वयमेव इत्थं वक्ति-

जयनाम्नि वत्सरेऽस्मिन् मांधवनीसंपदं तपोपलब्धाम् ।
प्राप्यायं हृष्टमनाः भट्टकविः स्तौतिमध्वांशम् ।।

यतोऽस्य पौत्रः सप्तदशशतकोत्तरार्धे अष्टादशशतकपूर्वार्धे च आसीदिति पूर्वोक्तप्रमाणाभ्यां ज्ञायते। अतोऽयं क्रि. श. सप्तदशशतके आसीदिति निश्चयेन वक्तुं शक्यम्। पूर्वोक्तः जयवर्षश्च क्रि. श. 1654 वर्षे भवति।

—***—

65 R.S.VP Library-MS.No. 14421.

In Public domain. Digitization Muthulakshmi Research Academy

अध्यायः 7

क्रि. श अष्टादशशतकभाणाः

अस्मिन्नपि शतके पूर्वशतकापेक्षया अधिकतयैव भाणरचना प्रवृत्ता। परन्तु स्वरूपे इतिवृत्ते च वैलक्षण्यं तु मृग्यम्। वसन्ततिलकभाण एव एतेषां सर्वेषां मार्गदर्शकः। परन्तु पारदारिकमपि इतिवृत्तं तत्र तत्र दृश्यते। यथाकालमेतेषां तत्कर्तृणां च परिचयोऽथ क्रमशः प्रस्तूयते।

7.1 अनङ्गविजयभाणः – शिवरामकृष्णः

अयमपि भाणः अप्रकाशितः मद्रपुरीहस्तलिखितग्रन्थालये[1] सुरक्षितः। मदनमञ्जरीवसन्तसेनकयोः कलकण्ठीशृङ्गारभूषणयोश्च प्रणयवृत्तमत्रेतिवृत्तम्। अयं च भाणः वालमूरु वीरराघवस्वामिनः भगवतः वसन्तोत्सवेषु अभिनीतः। अस्य भगवतः उत्सवाः मध्ये किञ्चित्कालं स्थगिताः पुनः विजयनगराधिपवंशजस्य चिक्कदेवरायस्य (मैसूर् पालकस्य) पुत्रस्य नरसिंहमहीपालस्य आज्ञया पुनः चेन्नकृष्णपण्डितेन आरब्धाः इति एतद्भाणप्रस्तावनया ज्ञायते। अस्य नरसिंहस्य राज्यकालः क्रि. श. 1704–1714 इति ऐतिहासिकाः। सरसः पदबन्धः, नव्यं व्यङ्ग्यं च भाणममुं

1 GOML – des. cat. Vol. XXI – No.12431

 In Public domain. Digitization Muthulakshmi Research Academy

भाणान्तरेभ्यः विलक्षणं सम्पादयति इति कविरेव वक्ति[2]। अत्रत्यकवितावैभवस्य दृष्टान्तभूतोऽयं गद्यखण्डः कवेः पितृवर्णनपरः।

"पुरा खलु समस्तविद्याविचारणप्रवीणो गौतमान्ववायमहोदन्वत्सम्पूर्णनीहारकिरणो निरन्तरसन्तन्यमानबहुविधसपर्यासन्तोषितपरमेश्वरप्रसादभूमिः, प्रत्यग्रचन्द्रमा इव समस्तजनसंसेव्यमानः, कौस्तुभमणिरिव विश्वम्भरालङ्कारभूतः, चतुरानन इव तत्तादृशसारस्वतरसानुभवजनितानन्दः, सुधांशुशेखर इव सुकुमारवैभवः, सर्वश्रुतिगोचरमहिमातिरेकतया नारायणपदवाच्यतामपि आत्मनः सफलीकुर्वन्, वसिष्ठ इव सत्कर्मानुष्ठानवरिष्ठः, श्रीमान् वैदिकसार्वभौमः कश्चन विपश्चिदाविरासीत्"–अत्रत्यं सरस्वतीस्तोत्रमपि हृद्यम्।

गिरां देवी देवीकरकलितवालव्यजनिका
शिखोदञ्चचञ्चत्पवनपृथुकाकीर्णचिकुरा।
पुरस्तादास्तां मे पटुकवनवेणीकुतुकिनः
पदानां सन्दर्भं परममुपदेष्ट्री भगवती।।

एतद्भाणकर्ता शिवरामकृष्णः गौतमगोत्रः, रङ्गाम्बिकानारायणयोः पुत्रः। अस्य अग्रजः कश्चिदासीत्, यस्मादेव अनेन सर्वा विद्याः अधीताः। यतोऽयं भाणः महीशुरराजस्य च आज्ञया पुनः आरब्धेषु वसन्तोत्सवेषु प्रदर्शितः अतोऽयं नरसिंहरायस्य राज्यकाले एव रचित इति ज्ञायते। तस्य कालः क्रि. श. 1704–1714 इति पूर्वमेवोल्लिखितम्। अतोऽयं भाणोऽपि तस्मिन्नेव समये रचितः स्यादित्यूह्यते। अयं कविः आत्मानं स्वकवितां च प्रशंसतीत्थम्–

चकास्ति घटिकाशतप्रथितगद्यपद्योभय-

---

2 सुकुमारार्थसन्दर्भं सूचितव्यङ्ग्यवैभवम्।
अनङ्गविजयभाणमातनिष्ट मनोहरम्।। (भाणप्रस्तावना)

In Public domain. Digitization: Muthulakshmi Research Academy

प्रबन्धविनिबन्धनः स शिवरामकृष्णः कविः ।
प्रचण्डतरताण्डवत्रिपुरहन्तृमौलिस्फुर-
त्सरिल्लहरिसोदरी विजयते हि तत्साहिती ।।

अनेन घटिकाशते एव एकैकः प्रबन्धः रचित इति ज्ञायते । अनेन च कविना भाणं विना अन्येऽपि ग्रन्थाः रचिता इत्यपि अनेन ऊहितुं शक्यते । परन्तु तद्विषये किञ्चिदपि न ज्ञायते ।

7.2 अनङ्गविजयभाणः – कावल जगन्नाथः

अयमपि भाणः अप्रकाशितः तञ्जापुरहस्तलिखितग्रन्थालये सुरक्षितः[3]। तञ्जापुरे प्रसन्नवेङ्कटेश्वरस्य वसन्तोत्सवेषु प्रदर्शितः । अत्र इतिवृत्तं किमिति न ज्ञायते । अत्र विटस्य नाम रतिशेखरः ।

अस्य भाणस्य रचयिता कावलवंश्यः जगन्नाथः । अस्य पिता श्रीनिवासपण्डितः[4] तञ्जापुरपालकस्य शरभोजी (क्रि. श. 1712–1727) प्रभोः मन्त्रिषु अन्यतमः । माता सोरीबायी । मातुः नाम्ना अयं महाराष्ट्रीय इति ज्ञायते । अस्य पितृव्यः न्यायादिशास्त्रनिष्णातः अघटनघटनाचातुर्यवान् रघुनाथाभिधेयः । अनेन अनङ्गविजयभाणः, शृङ्गारमञ्जरीप्रबन्धः[5] शरभराजविलास इति ग्रन्थत्रयं रचितम् । अत्र शृङ्गारतरङ्गिणी अपि भाण एवेति केचित्[6]। भाणेऽस्मिन् शृङ्गारतरङ्गिणी उल्लिखिता । अतोऽयं भाणः शृङ्गारतरङ्गिणीतः परं, शरभराजविलासकाव्याच्च पूर्वं रचित इति ज्ञायते । शरभराजविलासकाव्यं 4822 कलिवत्सरे अर्थात् क्रि. श. 1722 वर्षे

---

3 Tanjore – Dis. cat. Vol – VIII No. 4577

4 किं तस्य भोसलकुलतिलकसचिवशिखामणेस्तनयेन (भाणप्रस्तावना)

5 इति श्रीमत्कावलवंशालङ्कारभूतस्य सकलविद्याविशारदस्य श्रीमच्छ्रीनिवासपण्डितस्य तनयेन—शृङ्गारतरङ्गिणीसहोदरः——अनङ्गविजयभाणः समाप्तः ।

6 संस्कृतभाणसाहित्यमु–तेलुगु– पृ. 145

In Public domain. Digitization Muthulakshmi Research Academy

रचित इति आन्तरप्रमाणैः ज्ञायत इति कृष्णमाचार्याः[7]। अस्य भाणस्य रचनाकाले शरभोजी महाराजः स्वपितरि सर्वं राज्यभारं संस्थाप्य निश्चिन्तः आसीदिति अत्र भाणे उल्लेखात्[8] अयं भाणः क्रि. श. 1715-1720 मध्ये रचित इति ऊहितुं शक्यते। अस्य कविता मधुरा। उदाहरणार्थं पश्यन्त्वमुं श्लोकम्–

आमग्नोन्नतपीवरस्तनयुगं देह्यङ्कपालीं सकृ-
ल्लज्जां मुञ्च मरालमन्दगमने मा पश्य भूमीतलम् ।
दासे त्वं मयि तावके सविधमायाते विभेषीह किं
गूढस्मेरमिदं मुखं नमयसे कृत्वा करं स्वस्तिकाम् ।।

7.3 मदनसञ्जीवनभाणः – घनश्यामः

घनश्यामरचितोऽयं भाणः[9] पुण्डरीकपुर्यां कनकसभापतेः आर्द्रामहोत्सवेषु प्रदर्शितः। चित्रलेखायाम् अनुरक्तः विटः कुलभूषणः तदर्थं मित्रं प्रेषयति। तदनन्तरं तत्समागमाय प्रस्थितः सः सायं प्रियां मिलति। यथावत् उषःकालवर्णनेन आरब्धोऽयं भाणः सायं चन्द्रोदयवर्णनेन समाप्तो भवति। प्रियासमागमाय प्रस्थितो विटः वेशवाटीं प्रविश्य तत्र वेश्यासक्तान् वैदिकान् परिहसति। माध्वगुरोः जनार्दनतीर्थस्य, ऊर्ध्वपुण्ड्रधारिणां यतीनां च परिहासं करोति। अद्वैतमतानुयायी अयं मतान्तरे स्वीयासूयां तत्तत्पात्रे प्रदर्शयति। मार्गमध्ये च तटाकं प्रति जलाहरणार्थमागताः स्त्रियः वर्णिताः। सायं च द्राविडमल्लस्य पुत्र्याः प्रथमार्तवोत्सवं प्रति गत्वा तामा–

7 H.C.S.L. - MK – P. 246 (1970)

8 त्रेतायां रघुनायकस्समभवद्यः कोसलाधीश्वरः
पश्चादद्य कलौ शरीभजिमहीनाथावतारः स्वयम् ।
आसीद्भोसलवंशमण्डनमणिः सोऽभ्येत्य निश्चिन्ततां
यस्मिन् जाग्रति मन्त्रिणि प्रियतमे नक्तन्दिवं मोदते ।।

9 Published in Tanjore Journal No 21 (1967-68)

In Public domain, Digitization Muthulakshmi Research Academy

शीर्भिः अनुगृह्य, श्रीकण्ठमन्दिरं गच्छति। तत्र भगवतः स्तुत्या भगवत्प्रसादरूपं प्रियासङ्गमं प्राप्स्यति इति कथात्र। अत्र कविता सरसा गम्भीरा च। श्रीकण्ठस्य घण्टानादः जनान् किं बोधयतीति सचमत्कारं वर्णितमत्र पश्यन्तु।

पुत्राः के दयिता च का जनयिता कः कस्य माता च का
त्राता कस्य च कस्तदेतदखिलं हन्तेन्द्रिजालोपमम्।
संसारो जलधिः तमः किल निशा मायाविलं विष्टपम्
साधो जागृहि जागृहीति रणति श्रीकण्ठघण्टामणिः।। (18)

तथैव एतत्सूर्योदयवर्णनमपि हृद्यम्।

मन्देहान् दलयन् नभो विशदयन् प्राचीं दिशं शोणयन्
केकान् सङ्कटयन् सरो विमलयन् विप्रौघमुत्थापयन्।
जीमूताननुरञ्जयन् तिलकयन् काकान् समुद्बोधयन्
आशां प्रोज्ज्वलयन् विटान् कलुषयन् कश्चिज्जरीजृम्भते।। (25)

एवं व्यालग्राहिणो वर्णनमपि अत्रातीव हृद्यम्। "अये! कश्चिदयं बन्धुरस्कन्धसमारोपितभुजङ्गपेटिकावेणुदण्डः, मुहुर्मुहुश्चरणदृढविन्यसनमुखरलोहमञ्जीरः, ग्रन्थिलमलीमसजीर्णवसनः, प्रत्यङ्गबद्धविविधवल्लीवितानः, भुजमूलनिहितपिच्छिकास्तूपः, करचलनशब्दायमानकालायसवलयः, निजमध्यविनिबद्धचटुलमर्कटरज्जुः, उष्णीषावतंसितनैकपक्षिपक्षकः आभुजशिरात् आ च कटितटात् लम्बमाननानाविधौषधिभस्त्रिकः, रेरे बृक्किक भुजङ्गौषधं दीयताम्, दीयते तवाशीराशीः इति ब्राह्मणवार्धकेनानुगम्यमानः, भोः भोः बीजस्तम्भनमणिः कश्चिदर्प्यताम्, अर्प्यते तुभ्यमेतदेव वस्त्रमिति धनिकपुत्रैरनुरुध्यमानः, हन्त भोः स्त्रीवशीकरणमालिकां देहि, दास्यामस्तवकृते निष्कमिति विटशेखरैः चुबुके धार्यमाणः जाङ्गलिः इत एवाभिवर्तते"। एवमत्र क्रीडावृषभवर्णनमपि हृद्यम्–

In Public domain. Digitization Muthulakshmi Research Academy

वल्गद्विषाणशतचामरकोटिगुञ्ज-
द्ग्रीवावराटगुणमध्यगकिङ्किणीकम् ।
निष्कम्पकर्णपुटमुन्नतवक्रवालम्
उक्षा स्वपोषकहृदि प्रकरोति नृत्यम् ।। (74)

एवं चमत्कारजंनकवर्णनैः हृद्यः भाणोऽयं प्रकाशितः तञ्जापुरहस्तलिखितग्रन्थालयपत्रिकायाम् ।

मौनभार्गवकुलोत्पन्नः आर्यक्नामा एतद्भाणकर्ता कमलाकाशीमहादेवयोः पुत्रः, चन्दोबालाजी पौत्रः, तिम्माजी बालाजी दौहित्रः । अस्य मातामहस्य शाकम्भरी परमहंस इत्यपरं नाम । अयं घनश्यामः स्वस्य द्वादशे वयसि एव भोजचम्पूरामायणस्य युद्धकाण्डं पूरयामास। विंशे वयसि अमुं भाणमरचयत्[10]। अयं क्रि. श. 1706 वर्षे जात इति श्रीमहालिङ्गशास्त्रिणः[11]। अयं तञ्जापुरमहाराजस्य तुक्कोजी (क्रि. श. 1728-1735) नाम्नः मन्त्रिषु अन्यतमः । आशुलेखकोऽयमष्टभाषाकोविदः । "सरस्वती घनश्यामः घनश्यामः सरस्वती"ति सरस्वत्याः अवताररूपेण संस्तुतः । अस्य कृतयः अनेकाः । शाकुन्तल - उत्तररामचरित - प्रबोधचन्द्रोदय - चण्डकौशिक - महावीरचरित - वेणीसंहार - हालसप्तशति - विक्रमोर्वशीय - भोजचम्पू- नीलकण्ठचम्पू- भारतचम्पू- कविराक्षस- कादम्बरी-वासवदत्ता-दशकुमारचरितानां व्याख्याः अनेन रचिताः । स्वस्य द्वाविंशे वयसि नवग्रहचरितसट्टकं रचितवान् । संस्कृते 64 ग्रन्थाः, प्राकृते 20 ग्रन्थाः, अन्यभाषासु 25 ग्रन्थाश्च अनेन रचिताः । पद्यकाव्येषु भगवत्पादचरित - वेङ्कटेशचरित - प्रसङ्गलीलार्णव - सन्मुनिमण्डन - अन्यापदेशशतकानि, पञ्चस्थलमाहात्म्यानि, आबोधाकर इति त्र्यर्थिकाव्यं

10 Tanjore Maharaja M.S. Library – No-4587.

11 See a note on Ghanasyama by Sri Mahalinga Sastri- J.O.R.Madras.Jan 1930 P. 71-79

In Public domain. Digitization Muthulakshmi Research Academy

च अस्य कृतिषु उल्लेखार्हाः । आबोधाकरकाव्ये नल–कृष्ण–हरिश्चन्द्रकथाः सम्पुटीकृताः । कलिदूषणं संस्कृतप्राकृततुल्यं काव्यम् । गणेशचरित – कुमारविजय – अनुभवचिन्तामणिनाटकानि, रसार्णव इति अलङ्कारशास्त्रग्रन्थश्च अनेन रचितानि । स्वीयघनश्यामनाम अधिकृत्य स्वयमेवेत्थं कथयति–

तनुरुचि यो न श्यामः कवीनां स यदि घनश्यामः ।
कवने कमनश्यामः किमसूयाभिः मुधैव न श्यामः ।।

अयं स्वजीवने बहूनि सत्कार्याणि कृत्वा, सन्यस्य, शङ्करं ध्यायन्, अन्ते जीवन्नेव स्वशरीरं गङ्गायै समर्पितवान् इति, अयमेतेषां वंशाचार इति च नवग्रहचरितात् ज्ञायते ।

7.4 वेङ्कटभाणः – श्रीधर पेरुसूरिः

अयं भाणः इदानीं नोपलभ्यते । परन्तु कविनानेनैव स्वीये वसुमङ्गलनाटके [12] उदाहृतः । वसुमङ्गलनाटकम् आन्ध्रदेशे अष्टदिग्गजेषु अन्यतमस्य रामराजभूषणकवेः वसुचरित्रप्रबन्धस्य नाटकीकरणम् ।

अयं च पेरुसूरिः[13], वेङ्काम्बा–वेङ्कटेशयोः पुत्रः, पेरुसूरिपौत्रः गौतमगोत्रस्य अण्णाध्वरिणः दौहित्रः पुत्रः । अयं वेङ्कटेशः 'अय्यावाल्' इति नाम्ना प्रसिद्धः शहजी (क्रि. श. 1684–1712) महाराजेन शहजराजपुराग्रहारदानेन सम्मानितेष्वन्यतमः । अयं शरभोजी तुक्कोजी (क्रि. श. 1711–1735) महाराजयोः आस्थानविद्वान् आसीत् । अनेन (1) श्रीरामचन्द्रविजयः, (2) भारताभ्युदयम्, (3) चकोरसन्देशः, (4) वे–

[12] GOML – Madras – D.No. 12659 Vol-XXI.
[13] HCSL-MK-P. 665; Andhras Contribution to Sanskrit literature – K.Sriramamurthy, P. 172; CASL – B. R -P. 338-340.

In Public domain. Digitization Muthulakshmi Research Academy

ङ्कटभाणः, (5) वसुमङ्गलनाटकं च रचितानि[14]। एतेषु वसुमङ्गलनाटकम्, चकोरसन्देश इति द्वयमेवोपलभ्यते। अयं 'पद्यमञ्जरी'मपि रचितवानिति, तस्य अत्यल्पः भागः मद्रपुर्यां संरक्षित इति च ज्ञायते। अयं कविः व्याकरणशास्त्रेऽपि निष्णातः नवीनपतञ्जलिबिरुदेन सम्मानितः इति स्वयं चकोरसन्देशान्तपुष्पिकायां[15] लिखति। अनेन व्याकरणे "औणादिकपदार्णवः[16]" रचितः। अस्य सर्वेऽपि त्रयः ग्रन्थाः उपलभ्यमानाः मातृकारूपेणैव सन्ति।

7.5 शृङ्गारविलासभाणः – साम्बशिवशास्त्री

अयं भाणः[17] अप्रकाशितः मद्रपुरीहस्तलिखितग्रन्थालये विद्यते। अत्रत्यमितिवृत्तं न ज्ञायते। अस्य भाणस्य कर्ता साम्बशिवशास्त्री श्रीवत्सगोत्रः, स्वामिशास्त्रिशिष्यः। तमिलनाडुराज्यान्तर्गतगोपालसमुद्रमस्य निवासः। पिता कनकसभापतिः। अयं च मैसूरु कृष्णराजेन (क्रि. श. 1714–1732) मानविक्रमेण च सम्मानितः। अस्य भाणस्य प्रतिकृतिद्वयमुपलभ्यते यत्र एकस्याम् कृष्णराजः आश्रयदातेति, अन्यस्यां मा–

---

14 श्रीरामचन्द्रविजयो भरताभ्युदयश्चकोरसन्देशः।
वेङ्कटभाणश्चेति भ्रातृकुलं चास्य नाटकस्येति।।
यस्य श्रीधरवंशजस्य जननी साध्वीमणी गौतमी
तातः कौशिकधूर्वहस्तदुभयी श्रीवेङ्कटाख्योज्ज्वला।
तस्य स्वाख्यपितामहस्य सुकवेरण्णाध्वरीन्द्राग्रणी-
दौहित्रस्य कृतिश्चिरं विजयतां श्रीपेरुसूरेरियम् ।।

15 इति श्रीधरवंशशिखावतंसवैदुष्यसिंहासनाधीश्वरपदवाक्य – प्रमाणकूलङ्कषसाहित्यमर्यादाधुरन्धरनवीनपतञ्जलि – बिरुदसम्भावितश्रीपेरुसूरिविरचितेचकोरसन्देशमहाकाव्ये....

16 GOML- Madras D.No 1526, Vol – VIII and Tri. Cat. R No. 5551.

17 GOML – Madras – R. 3340

In Public domain. Digitization Muthulakshmi Research Academy

नविक्रमः आश्रयदातेति च उल्लिखितमिति रामजी उपाध्यायाः[18]। अतोऽयं भाणः कृष्णराजस्य अन्तिमकाले रचितः, अनन्तरं मानविक्रमसभायां प्रदर्शित इत्यूह्यम्। अतः क्रि. श. 1732 प्रान्ते अयं भाणः रचितः स्यात्। कविरयं स्वकविता वैशिष्ट्यमित्थं कथयति –

मनोजधनुराहितस्फुटसरोजगर्भस्फुर-
न्मरन्दझ्झरधोरणी सरसमाधुरीसोदरी।
सुवृत्तिरसरीतिभाक् सरसशब्दवत्युज्ज्वला
कवेर्जयति साम्प्रतं जगति तस्य साहिती।।

7.6 शृङ्गारसर्वस्वभाणः – अनन्तनारायणः

केरलेषु मायाङ्कमहोत्सवे मानविक्रममहाराजाध्यक्ष्ये क्रि. श. 1743 वर्षे प्रदर्शितोऽयं भाणः[19] मानविक्रमप्रेरणया अनन्तनारायणपण्डितेन रचितः। अत्र नायकः रसिकतिलकः। वसन्ततिलकनाम्नः कस्यचित् विटस्य अधीने स्थितां सुन्दरीमयं कामयते। अस्य नायकस्य द्वे मित्रे तां तस्य निर्बन्धात् मुक्तां विधाय रसिकतिलकाधीनां कुरुत इति चमत्कारावहमितिवृत्तमत्र। अत्रत्या नान्दी–

स्रस्तकचं मग्नकुचं श्लिष्टभुजं किञ्चिदुच्चलितनितम्बम्।
उपरिरतं भुवि सुदृशां कलमणितं जयति कामसाम्राज्यम्।।

अत्र कविता सरला सरसा च। उदाहरणार्थमयं दीपावलीपर्वसन्दर्भः दीपावलीवर्णनपरः श्लोकः–

शैलाब्धीश्वर तावकीननगरीपर्यन्तभागार्पिता
लीलानिर्जितकर्णिकारकुसुमा दीपावली राजते।

---

18 आधुनिकसंस्कृतनाटक –Part I – P. 540-541: संस्कृतभाणसाहित्यमु – तेलुगु – P. 144

19 GOML – Madras – R. 5137 ; unpublished.

In Public domain. Digitization Muthulakshmi Research Academy

सन्त्यज्यामृतदीधितिं सुविमलं वक्त्रं तवासेवितुं
प्राप्ता तारपरम्परेति जगतामातन्वती विभ्रमम् ।।

एतद्भाणकर्ता अनन्तनारायणः भारद्वाजगोत्रः, पाण्ड्यदेशे चोरवने न्यवसत्। षड्दर्शिनीपारगस्य वरदराजशास्त्रिणः भागिनेयः शिष्यश्च। अयं केरल-राजेन मानविक्रमेण, त्रिशूररामवर्मणा च सम्मानितः[20]।

7.7 शृङ्गारविलसितभाणः–नारायणः[21]

मैसूरतालपत्रग्रन्थालये[22] संरक्षितोऽयमपूर्णः नारायणकविरचितः । अस्य पिता मण्डोरु नारायणः, गुरुः नृसिंहसूरिः । श्रीरङ्गपट्टणं मैसूर् समीपस्थं निवासः । अनेन कैतवकलाचान्द्रभाणोऽपि क्रि. श. 1750 वर्षे रचित इति ज्ञायते । परन्त्वयं भाणः नाममात्राविशिष्टः । इतः परं किमपि ग्रन्थयोर्विषये वा ग्रन्थकर्तुः विषये वा न ज्ञायते ।

7.8 सरसकविकुलानन्दभाणः – वेल्लाल रामचन्द्रकविः

अयं भाणः मैसूर् नगरात् क्रि. श. 1894 वर्षे तेलुगुलिप्यां प्रकाशितः[23]। श्रीपुरनायकस्य चन्द्रशेखरस्य वसन्तोत्सवे प्रदर्शितः । अयमपि मिश्रभाणः । भुजङ्गशेखरः नायकः । अयं कलानिधिनाम्नः मन्त्रिसत्तमस्य कनिष्ठां सुतां कामलतां कामयते । यदा सा अनिरुद्धोपाध्यायसविधे वीणामभ्यस्यन्ती आसीत् तदा जातः परिचयः क्रमशः अनुरागरूपेण परिणतः । तेनैव कारणेन तत्रैव विद्यामन्दिरे असकृदेकान्ते मेलनेन सा ऋतुमती जाता । अतः ता-मनुभोक्तुं प्रयत्ने कलकण्ठाख्यः नायकस्य मित्रं साहाय्यमाचरति । सायं च तयोः समागमः इतीतिवृत्तमत्र । अयं भाणः अनेन रजनीवर्णनेन आरभ्यते-

20 आधुनिकसंस्कृतरूपक – Part I – P. 540
21 आधुनिकसंस्कृतरूपक – Part I – P. 542
22 Mysore I – P. 285.
23 Published by the Govt M.S. Library, Mysore.

In Public domain. Digitization Muthulakshmi Research Academy

कोके च वावदूके कोकिललोके सकाकलीकेऽस्मिन् ।
रजनी प्रभातकल्पा यस्याः कल्पायते कलाल्पापि ।।

अस्मिन् कविता मधुरा। अत्र शय्या मुद्वी, ललितः पदबन्धः, रम्या वृत्तिः, शृङ्गारः रस इति स्वकविताविशिष्ट्यं स्वयमेव सूत्रधारमुखेनेत्थं कथयति कविरेव–

मृद्वी शय्या ललितललिता व्याहृतौ कापि रम्या
वृत्तिर्मक्ताफलकलितसरश्रीसगन्धोऽपि बन्धः ।
यस्मिन्नाद्यः स जयति रसः प्रौढिमा कोऽप्यसीमा
तत्त्वं यत्नादभिनय जगद्व्यापकं रूपकं नः ।।

अन्यभाणेष्विव अत्रापि वेशवाटीसञ्चारः तत्रत्यानां विविधस्त्रीणां वर्णनं, तत्र सञ्चरमाणानां श्रोत्रियम्मन्यानां परिहासः, कन्दुकक्रीडाक्षद्यूत–जाङ्गलिक–सर्प–कुक्कुट–मेष–मल्लयुद्धादिवर्णनम्, कलत्रपत्रिकासमर्पणं प्रभृतयः विषयाः सन्निवेशिताः। पुष्पापणवर्णनमत्र विशिष्टम्। अत्र श्रोत्रियाः कथं परिहासभाजनं क्रियन्ते इति किञ्चित् परिशीलयन्तु–

उत्थास्यन्ति विनिर्गमाय गणिकागेहादुषस्यन्वहं
स्नास्यन्त्यङ्कमपाकरिष्णव इमें नैशं भिया वैशिकम् ।
लिङ्गं पार्थिवमर्चयन्ति कपिलातीरे च भृत्याशया
हन्त श्रोत्रियमानिनो हरहरेत्युच्चैः पठन्तः परम् ।।

यदृच्छालाभसन्तुष्टाः परिग्रहपराङ्मुखाः ।
प्रत्यग्दृशो वधूयोगेऽप्यक्षशिक्षाविचक्षणाः ।।

साध्यं कर्म न चौर्यतोऽस्ति विधिवद्ध्येयं न गाणिक्यतः
पूज्यं दैवतमङ्गजान्नहि परं जप्यं तथैवानृतात् ।
वैदुष्यान्नहि दूष्यमस्ति किमतो वक्ष्यामि नेमे विदुः

 In Public domain. Digitization Muthulakshmi Research Academy

साक्षात्पक्ष्मलदृक्पयोधरपटीमोक्षान्न मोक्षं परम् ।।

एवं पित्रा यज्ञार्थं सम्भृतं धनं चोरयित्वा कथं सुताः स्मरयागदीक्षिताः सन्तः गणिकार्पणं कुर्वन्तीति सुनिशितं विमृष्टमत्र । अयं च कविः स्वीये भाणे कालिदास–भवभूति–भट्टनारायण–बाणभट्टाननुचकार । एतच्च प्रायः प्रसिद्धकवितासु सर्वत्र सामान्यतया उपलभ्यते । परन्तु यतोऽयमान्ध्र-देशीयः अतोऽस्मिन् आन्ध्रभागवतकर्तुः पोतनामात्यस्य प्रभावोऽपि दृ-श्यते । अत्र विटः स्वमित्रं प्रियासमीपं प्रेषयति । तस्य च प्रत्यागमने वि-लम्बे सति इत्थं मनसि चिन्तयति यच्च भागवते रुक्मिणीसन्देशघट्टं स्मारयति-

तत्सख्याः सविधं गतः किमथवा मध्येऽन्तरायैरयं
रुद्धः सा मनुते तदीयवचनं युक्तं ह्ययुक्तं नु वा ।
सा किं वा दयिताध्यवस्यति विधेः को वा प्रयत्नोऽथवा
का वा स्याद्भवितव्यता किमुभवेन्मद्भाग्यमेवेदृशम् ।।

एवमत्र पुष्पापचयवर्णनमपि आन्ध्रप्रबन्धानुकरणमिव दृश्यते-

पादाग्रचुम्बितधरा समुदस्तहस्त
मुत्तम्भितस्तनमुदस्तमुखारविन्दम् ।
शाखां प्रगृह्य कुसुमापचिचीषयोच्चैः
कैषा समुच्छ्वसिति नीविविभातितन्वी ।।

एवमत्र भावसौन्दर्यमपि हृद्यम् । परन्तु कदाचित् शब्दसौन्दर्यं भावसौन्द-र्यमतिशेते । पश्यन्तु

कलरवकलरवमुखरैः हर्म्ये रम्येऽत्र निवसन्तः ।
कान्ताभिर्न रमन्ते कान्ताः कान्तालकान्ताभिः ।।

एवमनुप्रासाः, मुक्तपदग्रस्तादयश्च शब्दालङ्काराः हृद्याः । अथापि भावदा-रिद्र्यमत्र नास्ति । पश्यन्तु भावसौष्ठवस्य उदाहरणभूतान् कांश्चित् स-

In Public domain, Digitization Muthulakshmi Research Academy

न्दर्भान्।

कूजत्कोकिलजालो निजघनमकरन्दपङ्किलालावालः।
विजयति रसालसालः कूले सरसः कदापचेयफलः।।

एवं हृद्यरसालसालवर्णनमतिशेते मुग्धावर्णनमिदम्–

लोचनयोस्तारल्यं वक्षोरुहयोर्वैरल्यम्
सारल्यमङ्गकेष्वपि चित्ते चापल्यमुन्मिषत्यस्याः।।

एवं चन्द्रवर्णनमपीदं हृद्यातिहृद्यम्।

नायं विधुः स्फटिकभाजनमेव येन
हालाहलं परमशिवेन पुरा निपीतम्।
काकोललेपनमिदं स च लक्ष्म तस्मिन्
नोचेत्कथं न्वमृतदीधितिरीदृशः स्यात्।।

एवमस्य भावनाशक्तेः प्रतिभायाश्च निदर्शनभूतोऽयं श्लोकः–

यः पूर्वं मदनस्स एव समभून्मारः तथैवाशुगो
जातो गन्धवहोऽमृतांशुरभवन्नक्तञ्चरः केवलम्।
मेदस्वी मधुना बभूव सुरभिः पुंस्कोकिलः पञ्चमा-
भिख्यां स्वां प्रकटीकरोति तदितस्तेषां प्रियं मा कृथाः।।

एवमत्र गेयपदादिलास्याङ्गानामपि प्रयोगः दृश्यते। अतः उत्तमेषु भाणेषु अयमन्यतमः। उदयद्यौवनाः विटेभ्यः सप्रयत्नं रक्षणीयाः यतस्तस्मिन् वयसि ताः अनायासेन प्रलोभनभाजनानि भवन्तीति सन्देशः अत्र उद्दिष्टः।

अयं भाणकर्ता रामचन्द्रः[24] चन्द्रशेखरसुतः षड्भाषाकविताविशारदः। पिता चन्द्रशेखरोऽपि महान् कविः। शङ्करगोपालविश्वनाथाः त्रयः अस्य

24 आधुनिकसंस्कृतरूपक–Part-I – P. 541 ; Andhra's Contributation to Sanskrit literature – P. 160 ; सरसकविकुलानन्दप्रस्तावनाः

In Public domain. Digitization Muthulakshmi Research Academy

अग्रजाः भ्रातरः। अयं मैसूर् महाराजस्य द्वितीयकृष्णराजस्य (क्रि. श. 1734-1766) समकालिकः। अयं कविः कृष्णराजस्य सेनानायकेन देवराजेन सम्मानितः। अयं देवराजः तस्य महाराजस्य मन्त्री अप्यासीत्। अन्या कृतिः अस्य कृष्णविजयव्यायोगः। अयं निरुपमतपःप्रभावेन वाग्देवतायाः अनुग्रहं प्राप्तवानिति प्रथा।

7.9 शारदातिलकभाणः - शेषगिरिः

अयं भाणः अप्रकाशितः मैसूर् प्राच्यसंशोधनालये सुरक्षितः[25]। अयं भाणः श्रीरङ्गपट्टणे प्रदर्शितः। अयं शेषगिरिः मैसूर् महाराजस्य कृष्णराजद्वितीयस्य (क्रि. श. 1734-1766) गुरुः[26]। अस्य पितापि शेषगिरीन्द्रः। माता भागीरथी। आन्ध्रप्रदेशे राल्लपल्लिग्रामः अस्य जन्मस्थानम्। कल्पनाकल्पकनाटकम् अस्य अन्या कृतिः। इदमपि नाटकं मैसूर् प्राच्यसंशोधनालये एव सुरक्षितम्।

7.10 अनङ्गसर्वस्वभाणः - लक्ष्मीनृसिंहः

अयं भाणः अप्रकाशितः तञ्जापुरहस्तलिखितग्रन्थालये सुरक्षितः[27]। एतद्भाणकर्ता लक्ष्मीनृसिंहकविः आन्ध्रदेशीयः। कर्नूलुमण्डलान्तर्गतम् अहोबिलं लक्ष्मीनृसिंहक्षेत्रमस्य निवासः। अयं मैसूर् महाराजेन कृष्णराजद्वितीयेन (क्रि. श. 1732-1760) चामराजवडयार् महाराजेन (क्रि. श. 1760-1776) च सम्मानितः[28]। अनेन अनङ्गलतिकाभाणोऽपि[29] रचित इति आन्ध्रविज्ञानसर्वस्वात् ज्ञायते। परन्तु नोपलभ्यते। अस्य

25 आधुनिकसंस्कृतरूपक – P. 542
26 Ibid
27 Tanjore D.C. 4580
28 आधुनिकसंस्कृतरूपक – P. 545 ;आन्ध्रविज्ञानसर्वस्वम् – P-IV-1176
29 A.E. Gough's records – Madras ; आन्ध्रविज्ञानसर्वस्वम्–P-IV-1176

In Public domain. Digitization Muthulakshmi Research Academy

कृत्यन्तरं नलविलासनाटकम्। अयं नृसिंहः श्रीवैष्णवः वसिष्ठगोत्रोद्भवः, स्वातिनरसिंहाचार्यपुत्रः। अस्य कवितायाः परिचायकोऽयं नान्दीश्लोकः–

केलीवने निशि शशिद्युतिरञ्जिताया-
मालीजनैस्सह सहासमुखो मुरारिः।
रासोत्सवैकरसिको रमणीयरूपो-
ल्लासोऽनिशं भवतु वः कुशलाय देवः।।

7.11 शृङ्गारचन्द्रिकाभाणः – वात्स्यश्रीनिवासाचार्यः

अपूर्णोऽयं भाणः[30] मद्रपुरीयतालपत्रग्रन्थालये वर्तते। कविता सरसेवाभाति।

तनोति तरुणाश्लेषं लतामञ्जुलताभृती।
सुतनुश्वसनालोलदलकातनुमालिका।।

इत्ययं श्लोक एव इदानीमुपलभ्यमानग्रन्थान्ते उपलभ्यते।

अयं च कविः वात्स्यश्रीनिवासाचार्यः, वरदार्यपुत्रः, भवभूतेः महावीरचरितस्य व्याख्यातुः वाधूलगोत्रस्य वीरराघवाचार्यस्य दौहित्रः। अयं वीरराघवाचार्यः क्रि. श. सप्तदशशतकान्ते अष्टादशशतकपूर्वार्धे च भवेदिति कृष्णमाचार्यः[31]। अतस्तस्य दौहित्रोऽपि अष्टादशशतकवर्ती एव भवेत्। अस्य श्रीनिवासस्य पुत्रः रङ्गनाथोऽपि भाणकर्ता।

30 GOML-Madras-R 2192.
31 HCSL-MK-P. 623-F No.3.

 In Public domain. Digitization Muthulakshmi Research Academy

7.12 अनङ्गतिलकभाणः – वात्स्यरङ्गनाथः

अयञ्च भाणः[32] यद्यप्यप्रकाशितः अथापि बहुप्रचारे आसीदिति ज्ञायते। अस्य प्रतिकृतयः बहवः बहुत्रोपलभ्यन्ते[33]। श्रीरङ्गे श्रीरङ्गनाथस्य चैत्रोत्सवे प्रदर्शित एष भाणः। अस्य नायकः अनङ्गशेखरः कामलतासुतायाः मदनमञ्जर्याः प्रथमार्तवमहोत्सवायाहूतः प्रातरेव प्रस्थाय तत्र तत्र अटन् सायं तत्र गच्छतीति इतिवृत्तमत्र। कविता सरसा, सरला, मधुरा च। रमणीयभावनाभिः सुमधुरशैल्या, प्रसादगुणेन च सत्यमेव विदुषामामोदाय कल्पतेऽयं भाण इति विमर्शकानां प्रशंसापात्रोऽयं भाणः[34]। कवेरस्य भावनाशक्तेरुदाहरणभूतमिदं सूर्योदयवर्णनम्।

पाकशासनदिगङ्गनामुखं चुम्बति प्रियतमेऽपि भास्करे।
पद्मिनी विकसिताम्बुजानना चित्रमेति मुदमात्तकण्टका।। (18)

मकरन्दघर्मजलबिन्दुसम्पतद्भ्रमरालकाविकचपङ्कजानना।
चलचक्रवाकविलसत्पयोधरा रविणा रतिं कलयतीव पद्मिनी।। (19)

सम्भोगचिह्नाञ्चितसुन्दरीवर्णनमिदमपि बहुरम्यम्।

प्रवालमणिमण्डितामलकपोलभास्वन्मुखं
लसच्छशिकलोन्नतालघुपयोधरालङ्कृतम्।
श्लथालकमनोहरं सुमुखि दष्टबिम्बाधरं
वपुश्शशपदाञ्चितं वदति कस्य भाग्योन्नतिम्।। (34)

एवमापन्नसत्त्वयोपमीयमानमिदं प्रावृड्वर्णनमपि हृद्यम्–

चलद्बलाकावलिहारदीप्यत्समुन्नमन्नीलपयोधरश्रीः।
कालप्रभाकैतवरेणुपाण्डुरापन्नसत्त्वा भवतीव भाति।। (89)

---

32 HCSL-MK-P623-F No.3.

33 A.U. 1261 ; GOML-Madras R No.2308, 3100, SVORI; Adayar 1233.

34 संस्कृतभाणसाहित्यमु – तेलुगु – P.161

In Public domain, Digitization Muthulakshmi Research Academy

इतोऽपि रम्येयं स्वभावोक्तिः आपन्नसत्त्वायाः वर्णने–

गरिमां भजते नितम्बमस्याः
तनिमामञ्चति चारु मध्यभागम् ।
परिपुष्यति पाण्डिमा कपोले
कुचयोरग्रमुपैति नीलिमाञ्च ।। (86)

एवं सुदत्याः केशपाशाद्भ्रश्यमानानि कुसुमानि समालम्ब्य रचितोऽयमपि हृद्यः किल।

आरीढानामपि सुमनसामुत्तमाङ्गे भवत्याः
संसक्तानां जनितरजसां क्लेशभाजां शुचीनाम् ।
सामोदानां भवति पतनं साधुसूत्राश्रितानां
भ्रंशः केषां जगति न भवेदङ्गनासङ्गतानाम् ।।

एवं विधिवञ्चितानां कुत्रापि दुःखमेवेति चन्द्रवर्णनमिषात् बोधयतीत्थम्–

स्वर्भानुपीडनमसह्यमवाचिकीर्षुः
त्वद्वक्रतामभिजगाम सुधाकरोऽयम् ।
अत्रापि नूनमलकाकृतिनैव तेन
सम्पीड्यते क्व नु सुखं विधिविप्लुतस्य ।।(101)

एवमामूलचूडं सहृदयाह्लादजनकोऽयं भाणः अप्रकाशित एवेति दुःखाय कल्पते। अनेन तडिद्वर्णनेन अमुं प्रक्रममुपसंहरामः।

लास्यं विधातुं ध्रुवमभ्ररङ्गे
रसप्रसूः कालनटप्रयुक्ता।
तिरोदधात्यब्दतिरस्करिण्यां
तटित्क्षणालक्ष्यतनुर्नटीव ।।

एतद्भाणकर्ता वात्स्यरङ्गनाथः पूर्वतनशृङ्गारचन्द्रिकाभाणकर्तुः वाधूलवीरं-राघवाचार्यदौहित्रस्य श्रीनिवासाचार्यस्य पुत्रः, वरदाचार्यपौत्रः इति अयमपि

In Public domain. Digitization Muthulakshmi Research Academy

क्रि. श. अष्टादशशतकवर्ती एव भवतीति वक्तुं शक्यम्। अस्य गुरुः वासुदेवः।

7.13 अनङ्गभूषणभाणः – वेङ्कटवरदः

अयं भाणः श्रीवेङ्कटेश्वरप्राच्यपरिशोधनालये संरक्षितः[35] अप्रकाशितश्च। अस्य भाणस्य कर्ता वेङ्कटवरदाचार्यः, श्रीवैष्णवः, कौण्डिन्यगोत्रोद्भवः, तमिलनाडुराज्यार्काटमण्डलश्रीमुष्णं ग्रामाभिजनः। अस्य प्रपितामहः श्रीनिवासाचार्यः महाकविः आसीत्। पितामहः वरदाचार्योऽपि पण्डितः। पिता अप्पयाचार्यः। श्रीरङ्गनिवासी अयम्। अयमप्पयाचार्योऽपि भाणकर्तेति, अनङ्गजीवनभाणः अनेन अप्पयाचार्येण रचित इति कृष्णमाचार्याः[36]। अयमप्पयाचार्यः क्रि. श. सप्तदशशतकान्ते आसीदित्यपि कृष्णमाचार्यैरेवोक्तम्। अयं च वेङ्कटवरदः न केवलं भाणकर्ता, किन्तु श्रीनिवासचरितं, श्रीनिवासकुलाब्धिचन्द्रिका, श्रीनिवासामृतार्णवः, श्रीदिव्यदम्पतीवरस्तोत्रम्, अत्रिकामकल्पवल्ली, श्रीकृष्णविजयडिमः इति ग्रन्थानामपि रचयिता। अनेन कृष्णविजयडिमः क्रि. श. अष्टादशशतकपूर्वभागे रचित इति रामजी उपाध्यायाः[37]।

7.14 रसिकामृतभाणः – शङ्करनारायणः[38]

तिरुवायूर् उत्सवेषु प्रदर्शितोऽयं भाणः। एतद्भाणकर्ता शङ्करनारायणः केरलयुवराजस्य अश्वतितिरुनाल् रामवर्मणः (क्रि. श. 1756–1794) गुरुः आसीत्। अयम् एकादशे वयस्येव कवित्वदक्षः आसीत्।

---

35 SVOR1 – T.4946
36 HCSL – MK – P. 729
37 आधुनिक संस्कृत रूपक – P.I – P. 395
38 Kerala Sanskrit literature – K.K.Raja - P. 172

In Public domain. Digitization Muthulakshmi Research Academy

7.15 शृङ्गारसुधाकरभाणः – अश्वति तिरुनाल् रामवर्मा

अयं भाणः तिरुवनन्तपुरहस्तलिखितग्रन्थालयेन क्रि. श. 1945 वर्षे प्रकाशितः केरलेषु प्रख्यातः। अत्र विटः स्वार्थसाधनाय न यतते। अपि तु पद्मप्राभृतकादिष्विव परोपकाराय। माधवः विटः रतिरत्नमालिकां शृ-ङ्गारशेखरेण योजयति। कविता सरलापि सालङ्कारा चमत्कारावहा। भा-णसाहित्ये उत्तमेषु भाणेषु अन्यतमत्वेन परिगण्यतेऽयं भाणः।

जडानपि चैतन्ययुक्तान् विधाय रसिककल्पान् विधातुं सक्षमोऽयं कविः जलक्रीडायां जलानि कथमङ्गनानामालिङ्गनादिसौख्यमनुभवन्तीति व-र्णयति पश्यन्तु–

आलिङ्गन्ति सलीलमङ्गलतिकां चुम्बन्ति गण्डस्थलीं
नीवीं विश्लथयन्ति कुन्तलमिह व्यामिश्रयन्ति स्फुटम् ।
सीत्कारं रचयन्ति पल्लवकवन्मृद्नन्ति वक्षोरुहा
वुल्लोलल्ललनाजनस्य सलिले व्यातन्वतः खेलनम् ।।

अद्भुतेयं किल कल्पना। एवं हास्योचितवर्णनेऽप्ययं कविः पटुः। परिशी-लयन्त्वमुं पटीरदासश्रेष्ठिपुरोहितम्–

ताम्रः श्मश्रुमुखः प्रकामगडुलः कन्धां दधद्धूसरां,
पाणौ पाण्डिमधूर्वहे परिवहन् दण्डं विलासेक्षणः।
खर्वाटो नतनासिकः प्रतिपदं किञ्चित्प्रजल्पन् स्वयं
काणः कोऽयमलिञ्जरोदरभरो मत्सम्मुखं धावति।।

श्लोकपठनसमनन्तरं तत्पात्रं यथावदक्षिसाद्भवतीव किल अनुभवः। एवं नकेवलमयं कविः पद्यरचनायामेव पटुः। अपितु गद्येऽपि बाणादीनामा-त्मनः एकलव्यशिष्यतामाविष्करोति। पश्यन्त्विदं रतिरत्नमालिकावर्णनम्–

In Public domain. Digitization Muthulakshmi Research Academy

"अखिलभुवनविराजमानयुवजनमनोमोहनैकनीतिविद्यापरिशीलनजागरूकमनोजमहाराजविहारमहीधरौ पयोधरमिषेण, प्रपञ्चैकवीरपञ्चविशिखपञ्चशाखमयनालीकलम्बनिषङ्गयुगलीं शिरीषकुसुमकोमलबाहुयुगलापदेशेन च, तरुणगणहृदयहारगुलिकासमावेधनमनसिजोत्तेजनीकृतवज्रमणिसूचकां श्यामलाविरलरोमराजिव्याजेन, जगत्त्रयविजित्वरशफरध्वज जैत्रयात्रासमुचितसौवर्णस्यन्दनं पृथुलनिस्तुलनितम्बकैतवेन बिभ्राणा....."
इत्यादि।

एतद्भाणकर्ता रामवर्मा[39] अश्वनीनक्षत्रे क्रि. श. 1756 वर्षे जातः। अस्य पिता किळिमानूर् अभिजनः रविवर्मन् कोयिल् तम्पुरान्। अस्य रामवर्मणः मातुलः कार्तीकतिरुनाल् महाराजः। तस्यैव पर्यवेक्षणे रामवर्मा विद्याभ्यासमकरोत्। अस्य गुरू शङ्करनारायणः, रघुनाथतीर्थश्च। अयं क्रि. श. 1785 वर्षे युवराजः जातः। अल्पे वयसि एव क्रि. श. 1794 वर्षे एव अयं मृतः।

अयं रामवर्मा संस्कृते मलयाले च बहुग्रन्थकर्ता, प्रसिद्धश्च। मलयालभाषायां रुक्मिणीस्वयंवरः, पूतनामोक्षः, अम्बरीषचरितं, पौण्ड्रकवधः, नरकासुरवधश्च कथाकलिसाम्प्रदायिकनाट्यरचनाः। संस्कृते च रुक्मिणीपरिणयनाटकम्, शृङ्गारसुधाकरभाणः, काञ्चीमहाराजस्तवचम्पूः, सन्तानगोपालचम्पूः, कार्तवीर्यविजयचम्पूः, दशावतारदण्डकं च अनेन रचितानि। केरलेषु प्रसिद्धेषु कविपण्डितेषु अयमन्यतमः, कार्तिकतिरुनाल् महाराजस्य आस्थानविद्वत्स्वपि अयमग्रगण्यः आसीत्।

---
39 Contribution of Kerala to Sanskrit literature – K.K.Raja P172.

In Public domain. Digitization Muthulakshmi Research Academy

7.16 अज्ञातनामकर्तृकः भाणः

मद्रपुरीयतालपत्रग्रन्थालये R.NO. 3755 एका सम्पूर्णा भाणमातृका उपलभ्यते या च केरलाधिपस्य रामवर्मणः प्रस्तुतिपरा। अयमपि भाणः वसन्तोत्सवेषु प्रदर्शनार्थमुद्दिष्टः। अत्रच वसन्तः विटेनेत्थमुपमितः–

मनोज्ञैः सल्लापैः परवृतवधूना व्यवहरन्
परागैर्भूतानां निबिडमनुलिप्तैः सुरभिलैः।
विलोभ्य द्वन्द्वानां कुलमकलुषाणां घटयिता
वितन्वन्नान्दं विह इव वसन्तो विजयते ॥

रामवर्मपालिता केरलराजधानी अपि इत्थमभिवर्णिता–

रथेभमहसादिभिः क्वचन मोदिभिर्मेदुरा
क्वचित्तिलकिता मुहुर्विभवकीर्तनैः पतनैः।
क्वचिच्च नयनाञ्चलैः चलदृशां युवानः क्षताः
त्रयीपरिचयः क्वचित्खलु पुरी परिभ्राजते ॥

7.17 शृङ्गारसुन्दरभाणः – ईश्वरवर्मा

केरलेषु प्रसिद्धेषु भाणेषु अयमप्यन्यतमः। केरलविश्वविद्यालयद्वारा क्रि. श. 1965 वर्षे प्रकाशितः[40]। अत्रापीतिवृत्तं पराश्रयम्। भ्रमरकः नायकः। केसरमालिका नायिका। एतावुभौ परस्परमनुरक्तौ। अत्र नायिका न वेश्या न वा परकीया। किन्तु स्वीयैव। अतोऽत्र रसः पूर्णः शृङ्गारः, नत्वाभा–सरूपः। नायकस्य मित्रं विटः अभिरामः। भ्रमरके अनुरक्तां केसरमालिकां बृहद्वसुकुमारः महावसुः स्वगृहे अवरुद्धवान्। तां ततः विमुच्य भ्रमरकेण सह योजयितुं क्रियमाणः प्रयास एव अत्र इतिवृत्तम्। महावसोः केस–रमालिकायां वैराम्यमुत्पादयितुं हेममालिकां नियोज्य रङ्गे प्रविशति अ–

40 Published in 1965. Kerala Uni. Sanskrit series No. 214.

 In Public domain. Digitization: Muthulakshmi Research Academy

भिरामः। ततः भाणान्तरेष्विव तत्र तत्र अटित्वा, तैस्तैस्सम्भाष्य, सायं समये महावसोः मन्दिरं गच्छति। तत्र हेममालिकां, केसरमालिकां च मिलित्वा, तस्याः मोचनोपायं विचिन्त्य केसरमालिकां गृहनिर्बन्धात् विमुच्य भ्रमरकसमीपं नयति।

भाणेऽस्मिन्नितिवृत्तं नाटकादिष्विव अनुस्यूतं सत् भाणेषु कथैक्यं मृग्यमिति प्रवादस्य अपवादभूतं वर्तते। सन्निवेशानामेकसूत्रतायां, कथैक्ये च अनेन कविना प्रदर्शिता चातुरी अनितरसाधारणा प्रशंसनीया च। अत्र विटः अन्यव्यक्तिसम्बद्धप्रणयादिविषयान् वर्णयन् पराश्रयकवितानायको भवति। अथापि स्वीयप्रणयविरहादिविषयानपि मध्ये समायोजयति।

अत्र वर्णनान्यपि अत्यन्तं सुन्दराणि। शारिकाप्रसङ्गः, रतिचित्रवर्णनं, लीलाशुकप्रस्तावः, कुमुदामोदिन्याः अभिरामाक्षिबन्धनपूर्वकः प्रश्नः, कोकीशृङ्गारवर्णनमित्यादिमनोहरसन्दर्भाः अनेके। कुमुदामोदिनी अभिरामस्य नेत्रे पिधाय केति यदा पृच्छति तदा अभिरामेण दत्तं चमत्कारावहं समाधानं पश्यन्तु–

तत्सौम्याङ्गि स्मरसि नु रतेः प्रक्रमे तत्र यत्ते
क्षौमं हृत्वा द्रुतमुपवने पुष्पवृक्षे मयास्तम्।
क्रीडाहेतोः तदनु विरतावप्यदानेन तस्य
त्वं मद्वासः पृथुनि जघने यद्दधाना रुषागाः॥ (106)

वैदर्भीरीतिप्रधानार्थव्यक्तिः अतीव रुचिरात्र – पश्यन्तु–

क्षरन्मरन्दान्युरुसौरभाणि
नैवास्य पुष्पाण्यलयो लिहन्ति।
गुणाभिरामा अपि केचिदर्थाः
प्रायेण केषाञ्चन सन्त्यनिष्टाः॥ (91)

In Public domain. Digitization Muthulakshmi Research Academy

अलङ्कारेष्वपि उपमोत्प्रेक्षे एव अत्र अधिकतया लक्ष्येते । पश्यतोत्प्रोक्षामिमाम्–

मनो जनानां मधुराभिरामैर्गुणैर्हरन्त्यो गणिका निकामम् ।
विभान्ति साक्षाद्रतिवल्लभस्य श्रृङ्गारलीला इव मूर्तिमत्यः ।।

एवमत्रानेकाः सूक्तयः लोकोक्तयश्च सन्दर्भानुसारं योजिताः पठितृणां मनांसि रञ्जयन्ति । द्वित्रानत्र तादृशानुदाहरामः ।

उभयोर्गूढमन्योन्यं वदतोर्यो नरोऽन्तिकम् ।
विना कारणमभ्येति तं द्विपादं विदुः पशुम् ।।
मुग्धा योषित् कामिनि! कलिका भ्रमरे च सङ्घटिते ।
अव्यग्रा तिष्ठेच्चेत् पुष्येतामोदमायत्याम् ।।

अन्ते चेदं केसरमालिकायाः विरहवर्णनम् ।

भ्रमरक इति नामन्यस्य सङ्कीर्तितेऽपि
श्रुतिपथमुपयाते तां दिशं वीक्षमाणा ।
अविरतपरिपातामुत्सृजन्त्यश्रुधारां
जनयति जलमुच्चैः पश्यतां चेक्षणेषु ।। (16)

अत्र भाणे स्थितां प्रस्तावनामनुसृत्य अयं ईश्वरवर्मा बिम्बलीग्रामाभिजन इति, व्याघ्रनगरवासी द्विजराजशिरोमणिः नम्बूद्रिः कश्चन अस्य गुरुः इति ज्ञायते । यद्यपि अस्य कवेः कालः इदमित्थमिति रूपेण न ज्ञायते। अथापि अत्र भाणे केरलाधीश्वरस्मरणात् मार्ताण्डवर्मणा त्रिवान्कूर् राज्य प्रतिष्ठापनात्परमेव अर्थात् क्रि. श. 1750 वर्षात् परमेव अयं भाणः रचितः स्यादिति, प्रायः तस्मिन्नेव अष्टादशे शतके कोच्चिन् महाराजेन सम्मानितः स्यादिति के. राघवन् पिल्लैमहोदयाः स्वीयम् अभिप्रायं तद्भाणप्रकाशनप्रस्तावे प्राकाशयन् ।

In Public domain. Digitization Muthulakshmi Research Academy

7.18 कमलाविलासभाणः – नारायणः

रमाविलासापराभिधोऽयं भाणः श्रीवेङ्कटेश्वरप्राच्यसंशोधनसंस्थया क्रि. श. 1971 वर्षे स्वीयपत्रिकायां प्रकाशितः। अयं च मीनाक्षीपुरे रामानुजस्य चैत्रत्सवेषु प्रदर्शितः। अत्र नायकः रसिकशेखरः। कादम्बरीसुतायाः कमलायाः स्वयंवरोत्सवायाहूतः सः प्रातरेव प्रस्थाय, तत्र तत्र अटित्वा सायं तत्र गच्छति, वधूवरौ आशीर्भिः सभाजयतीति इति वृत्तमत्र सामान्यमेव। अन्यभाणेष्विव वेशवाटीसञ्चारादिकं, कुक्कुटयुद्धादिविनोदाश्च सन्त्येव। कवितात्र सरला चमत्कारावहा च। वधूनां स्वभावः इत्थमत्र वर्णितः– पश्यन्तु–

त्वं मेति शब्दं कुरु न प्रमाणं सीत्कारगर्भं वचनं च तस्याः।
अर्थान्तरे सङ्क्रमितस्वभावश्शब्दो वधूनामिति तत्प्रसिद्धिः।।

एवं सम्भोगचिह्नचिह्नितां शारिकां विटः व्यङ्ग्यमर्यादया इत्थं पृच्छति–

बिम्बं धवलिमसहितं म्लानं नीलोत्पलद्वन्द्वम् ।
मणिगणखचितौ मुकुरौ महिमानं कस्य वा प्रशंसन्ति।।

अत्र बिम्बमधरस्य, नीलोत्पलद्वन्द्वं नेत्रयुगस्य, मुकुरौ कपोलयोश्च सूचकानि। एवं सरसम्भाषणेन वर्णनेन च युक्तोऽयं भाणः। एतद्भाणरचयिता नारायणः तञ्जापुरमण्डलस्थ–अनन्तकृष्णपुराभिजनः। पिता श्रीनिवाससूरिः। गुरुः वेङ्कटरङ्गनाथः। सुब्रह्मण्यनामा सङ्गीतविद्वानत्र भाणे संस्तुतः। कर्णाटकसङ्गीते सुप्रसिद्धः सुब्रह्मण्यः क्रि. श. 1760 प्रान्ते आसीदिति आन्ध्रविज्ञानसर्वस्वात् ज्ञायते। भाणेऽस्मिन् कलत्रपत्रिकायां नन्दनवर्षः उल्लिखितः। स च अष्टादशशतके क्रि. श. 1772 वर्षे भवति इति अयं कविः क्रि. श. अष्टादशशतके आसीदित्यूह्यते।

In Public domain. Digitization Muthulakshmi Research Academy

7.19 शृङ्गारसञ्जीवनभाणः – गूटाल शठजित्कविः

आन्ध्रप्रदेशे पश्चिमगोदावरीमण्डले हेलापुरी (एलूरु) पट्टणस्थसन्तानगोपालस्वामिनः वसन्तोत्सवेषु प्रदर्शितोऽयं भाणः अप्रकाशितः अडयार्[41] ग्रन्थालये संरक्षितः। अत्रेदं भरतवाक्यम्–

श्रीमानेलापुरीशो विजयतु भुवि सन्तानगोपालदेवः
तद्भक्तास्सर्ववर्णाः स्थिरतरविभवाः दीर्घमायुर्भजन्तु।
सन्तश्चैते नरेन्द्राः कविरयमपि सन्तूर्जिता एष वाणी
जीयादाचन्द्रतारं वयमपि रसिकाह्लादिनस्तेन साकम् ।।

वेङ्कटपण्डितपुत्रः, वीरराघवस्य पौत्रः भारद्वाजगोत्रः अयं शठजित्कविः आन्ध्रदेशपश्चिमगोदावरीमण्डलगूटालग्रामाभिजनः। रामानुजाचार्यः प्रपितामहः। पितामहपर्यन्तमस्य पूर्वजाः काञ्चीपुरवासिनः। अस्य पिता श्रीवैष्णवमतप्रचाराय आन्ध्रदेशमागत्य गूटालग्रामेऽवसत्। अयं कविः संस्कृतान्ध्रयोः पण्डितः कविश्चासीत्। कृष्णामण्डले नूजिवीडुसंस्थानाधीश्वरेण राजा वेङ्कटनृसिंह अप्पारावु (क्रि. श. 1762–1827) नाम्ना अयं सम्मानितः पोषितश्च[42]। अयं भाणः पिङ्गलसंवत्सरे रचित इति, स च कालः क्रि. श. 24–7–1797 भवतीति च श्रीरामराजुमहोदयः कथयति। अतोऽयमष्टादशशतके आसीदिति ज्ञायते।

7.20 मुकुन्दानन्दभाणः – काशीपतिः

वन्दे वन्दारुमन्दारमिन्दुभूषणनन्दनम्।
अमन्दानन्दसन्दोहबन्धुरं सिन्धुराननम् ।। इति

41 Adayar R.No 2229 ; HCSL-MK-P. 806 ; ACL-P. 151.
42 Contribution of Andhra to Sanskrit literature – B.Ramaraju. P. 597.

In Public domain. Digitization Muthulakshmi Research Academy

अनया गणपतिप्रार्थनया आरभ्यतेऽयं भाणः। पद्यमिदं यथा आन्ध्रेषु प्रसिद्धं तथायं भाणोऽपि आन्ध्रदेशे प्रसिद्ध इति विमर्शकाः। अयं च भाणः क्रि. श. 1896 वर्षे तेलुगुलिप्यां मैसूर् नगरात्, क्रि. श. 1910 वर्षे देव–नागर्यां निर्णयसागराच्च प्रकाशितः अत्यन्तं प्रसिद्धेषु भाणेषु अन्यतमः। अयं च मिश्रभाणः। मिश्रभाणानामल्पीयस्त्वात् सप्रयत्नमयं मिश्रभाणः अनेन रचित इति भाणप्रस्तावनया ज्ञायते। अयं च भद्रगिरिचूडेश्वरस्य वसन्तोत्सवेषु प्रदर्शितः। अत्र चेतिवृत्तं पारदारिकम्। अत्र नायकः भु–जङ्गशेखरापराभिधः मुकुन्दः। स च परदारासक्तः। सा च तस्मिन्नेव दिने पतिगृहं गमिष्यतीति ज्ञात्वा, तत्र विघ्नमाचरितुं सङ्कल्प्य प्रस्थितः मार्गे वसन्तकं मित्रं मिलति। सोऽपि वसन्तकः कमलापीडस्य तरुण्यामासक्तः तद्भवनं गतः, तेन दृष्टः, हन्तुमुद्युक्तात्तस्मात् कथञ्चित् आत्मानं रक्षित्वा प्रत्यागच्छति स्म। वृत्तान्तममुं ज्ञात्वा नायकः वसन्तकेन सह अग्रे गच्छन् कमलापीडस्य गृहपरिसरे कोलाहलं श्रुत्वा, तत्कारणं ज्ञातुं तत्र गतः क–मलापीडपत्न्याः वसन्तकप्रियायाः भर्तृवञ्चनाचातुर्यं दृष्ट्वा आश्चर्यचकितो भवति। ततः स्वीयं वृत्तान्तं स्वमित्राय कस्मैचित् ज्यौतिषिकाय निवेद्य, तत्साहाय्येन स्वप्रियायाः पतिगृहगमने विघ्नमापाद्य, सायं तां सङ्गच्छति इति इतिवृत्तमत्र। वेशवाटीसञ्चारादिकं भाणान्तरेष्विवात्रापि समम्। प–रन्त्वत्र कविता सरला हृद्या च। भाणकर्ता काशीपतिः तर्कालङ्कारशास्त्र–निष्णातः तार्किकत्वेन प्रसिद्धः। तर्ककर्कशस्य तस्य वाणी कथं मृदले–त्याशङ्क्य स स्वयमेवेत्थं समाधत्ते।

तर्के कर्कशवक्रवाक्यगहने या निष्ठुरा भारती
सा काव्ये मधुरोक्तिसारसुरभौ स्यादेव मे कोमला।
या प्रायः प्रियविप्रयुक्तवनिताहृत्कर्तने कर्तरी
प्रेयोलालितयौवते न मृदुला सा किं प्रसूनावलिः॥

In Public domain. Digitization Muthulakshmi Research Academy

अत्रत्या कविता भावगर्भा। पश्यन्तु सौधगताः कपोताः वनितानां कथं शिष्यत्वमाचरन्तीति सचमत्कारं वर्णयत्यत्र–

वीरायितेषु मृगशावविलोचनानां
कण्ठोदितान्यचरमम् कलकूजितानि।
आम्रेडयद्भिरथ सौधगतैः कपोतैः
शङ्के गृहीत इति सम्प्रति शिष्यभावः।।

समसंस्कृतप्राकृतमिदं पद्यमपि हृद्यम्।

इन्दिरा वरविहारमन्दिरे मन्दमन्दमरविन्दकन्दरे।
गन्धतुन्दिलमरन्दबन्धुरे बम्भरा इह चरन्ति सन्दरे।।

अयं न केवलं पद्ये, गद्येऽपि निष्णातः। आलोकयन्त्विदं पाचकवर्णनम्–

"अथ तावदतिशिथिलसकलावयवसन्धिबन्धं, अज्ञातकैतवकथाबन्धं, सिन्धुमिव जडाशयं, जलदमिव पयोवाहं, जलदकालमिव घनमषीमलिनाम्बरं, नारायणमिव भक्तानुकूलव्यापारं, शेषमिवोदग्रदर्वीकरं, गरुडमिवाधिगतमहानसं, कृष्णमिव क्षालितकंसमालिन्यं, राममिव मारीचमथनम्, भीमसेनमिव दलितकीचकशतम्, शक्रमिव पाकशासनम्, मत्तमातङ्गमिव करपिष्टनागरम्, वैयाकरणमिव विदितस्वरव्यञ्जनक्रियं, वैशेषिकमिव द्रव्यगुणक्रियाविशेषतत्समवायाभिज्ञं, मीमांसकमिवार्थभावनास्वरूपज्ञं, सुकविमिव विज्ञातशिखरिणीभेदं, पण्डितमिव परिचितसकलरसपरिपाकं कमपि कज्जलमेचकं पाचकमपश्यम्" –

एवं कन्दकक्रीडावर्णनपरोऽयमर्थान्तरन्यासोऽपि हृद्यः।

गुणिनमपि सुवृत्तं कन्दुकमालोक्य ताडितं तन्व्याः।
परिनृत्यति कुचभारः कर्कशवृत्तस्य कुत्र कारुण्यम् ।।

इदं सूर्योदयवर्णनमपि भावनाशक्तेः निदर्शनम्–

भूयो निपीय लवणाम्बुधिमाप्रभातं

In Public domain. Digitization Muthulakshmi Research Academy

पुञ्जीभवन्नुदयते तपनच्छलेन।
औवाग्निरम्बरपयोनिधिमद्य पातुं
लीनोडुबुद्बुदकदम्बमिति प्रतीमः।।

एवं नायकस्य स्वप्रियाविषयिण्याः रतेः वर्णनमपि सरसम्।

तत्पादाम्बुरुहं तदूरुयुगलं तादृङ्गितम्बस्थलम्
तन्मध्यं सगभीरनाभिवलयस्तावानुरोजक्रमः।
तद्वक्त्रं तदपाङ्गमुग्धवलनं ते नीलनीलालकाः
सा तन्वीति तदङ्गकेषु हृदयं धावन्न विश्राम्यति।। (27)

एवमत्र कालिदासजयदेवलीलाशुकादीनामनुकरणानि तथा सान्दर्भिकाः लोकोक्तीनां प्रयोगाश्च अत्यन्तं हृद्यानि। कायेन महानपि भाणः आन्तं पठितॄनानन्दयति। अयं च भाणः सम्पूर्णः आन्ध्रभाषायामनूदितः। उमापतिपुत्रोऽयं काशीपतिः[43] कौण्डिन्यगोत्रः बेङ्गलूरुनगरसमीपस्थ होसूर् (नूतनपुर) वासी। तत्परिसरे प्रवहन्त्याः दक्षिणपिनाकिन्याः तीरे स्थिते भद्रगिरिपर्वते प्रतिष्ठितस्य ईश्वरस्य चन्द्रचूडेश्वर इति, भवान्याः मरकताम्बेति च व्यवहारः। अयं चन्द्रचूडेश्वरः नञ्जराजस्य कुलदैवतम्। अयश्च काशीपतिः मैसूर् महाराजस्य कृष्णराजद्वितीयस्य (क्रि. श. 1739-1759) सर्वाधिकारिभूतस्य नञ्जराजस्य आस्थानपण्डितः। अयं नञ्जराजः स्वयं कविः पण्डितः, अनेकसंस्कृतग्रन्थानरचयत्। अस्य नवभोजराज इति प्रसिद्धिः। अस्य आस्थानकविः नृसिंहः नञ्जराजयशोभूषणमिति अलङ्कारग्रन्थमरचयत्। तत्र नाटकोदाहरणे काशीपतिं सकलकलाकुशलमतिरिति, सरसकविचक्रवर्तीति च संस्तुतवान्। काशीपतेः पितामहः अय्यलुदीक्षितः। अस्य पूर्वजाः आन्ध्रदेशे कर्नूलुमण्डले आस-

43 Introduction to 'Nanjarajayashobhushana' – Mysore publication ; Contribution of Andhra to Sanskrit literature – P. 105-108

In Public domain. Digitization Muthulakshmi Research Academy

न्निति प्रथा। अयं काशीपतिः नञ्जराजविरचितस्य सङ्गीतगङ्गाधरस्य श्रवणानन्दिनीव्याख्यामरचयत्। अयं च भाणः शा. श. 1700 वर्षे हेविलम्बिवर्षे रचित इति ज्ञायते। ततश्च क्रि. श. 1778 वर्षे रचितः। अस्य गुरुः महादेवेन्द्रयोगी। अयं स्वकवितामित्थं सूत्रधारमुखेन स्तौति–

व्याकोचप्रसवश्रियोऽपि मृदुला वाचामियं प्रक्रिया
मन्दस्यन्दिमरन्दतोऽपि मधुरस्तत्रायमर्थक्रमः।
सौरभ्यादपि सम्मतं पुनरिह व्यङ्ग्यं पिकेभ्योऽप्यमी
मद्वर्ग्याः मधुरस्वराः कविरयं श्लाघ्यो वसन्तादपि।।

7.21 कामकलाविलासभाणः – वेङ्कटभूपतिः

अस्यैव कामविलास इत्यपि नामान्तरम्। अयञ्च भाणः रङ्गपुरे (श्रीरङ्गपट्टणे ?) वसन्तर्तौ अभिनीतः। पारदारिकमेवेतिवृत्तमत्र। पल्लवशेखरः नायकः। चम्पकलता नायिका। तया सह तस्याः पितृगृहे सङ्गतः नायकः सा तस्मिन्नेव दिने पतिगृहं यास्यतीति दुःखितः रङ्गं प्रविशति। मार्गे तस्य मित्रं नूपुरकः मिलितः। सोऽपि परदारास्वासक्तः। सः वीरसेनस्य पत्नीं लवङ्गिकां रहसि मिलति। वीरसेनश्च विषयं ज्ञात्वा अमुं मारयितुमुद्युक्तः। कथञ्चित् तस्मात् आत्मानं मोचयित्वा आगच्छन् नायकेन दृष्टः। अनन्तरं च नूपुरकः नायकस्य निर्विण्णतायाः कारणं ज्ञात्वा, सायं तयोः सङ्गमाय प्रतिज्ञां करोति। सायं च नायकः पुनः चम्पकलतां मिलति इति इतिवृत्तमत्र। मध्ये सूर्योदयादिवर्णनानि, वेशवाटीसञ्चारः, कुक्कुटयुद्ध-इन्द्रजाल–प्रथमार्तवोत्सवादिवर्णनं सर्वं भाणान्तरेष्विव समम्। कविता सरला, सरसा च। वेश्यानां विविधजनाकर्षणरीतिरत्रवर्णिता हृद्या।

एकं भ्रूवलनैः स्मितैस्तदितरं दृष्ट्या परं दीर्घया
वाचान्यं कुचयोस्तटेन च मनाक्सन्दर्शनेनापरम्।
किञ्चित्किञ्चिदुदञ्चितांशुकरुचिप्रत्यञ्चितोरुश्रिया

In Public domain. Digitization Muthulakshmi Research Academy

सम्प्राप्तान् गृहमेकदैव गणिकाः सम्मोहयन्ते विटान् ।। (57)

एवं मणिमञ्जर्याः शरीरे मूर्तित्रयदर्शनवर्णनमपि हृद्यम्।

पादौ पद्मभुवः श्रिया परिणतौ वक्षोरुहावच्युत
स्थेमानौ शशिशेखरत्वकलया सर्वातिशाय्याननम् ।
तत्सर्वस्तरुणीजनैः परिचितः स्पष्टं च तत्त्वं ब्रुवे
त्वय्यैतत् स्फुटतामुपैति दयिते मूर्तित्रयाडम्बरम् ।।

तथैव बालातपवर्णनमपीदं हृद्यम्।

वक्षोजेषु नखक्षतानि सुदृशां लाक्षारसं पादयोः
सीमन्तेषु च कुङ्कुमद्रवभरस्ताम्बूलरागोऽधरे।
लग्नश्चम्पकमालिका कुचतटे रक्तोत्पलं कर्णयोः
वन्धूकद्युतिरेक एव बहुधा बालातपो दृश्यते ।।

अयं च कविः वेङ्कटभूपतिः स्वीयं भाणममुं स्वयमित्थं प्रशंसते –

सम्मर्देन रसस्य सौख्यलहरीमुद्वेलमातन्वतः
ख्यातः कामविलास इत्यभिनवो भाणो धुरीणो गुणैः ।
मान्यन्ते प्रथियोऽपि यत्र च रसास्वादाय सोऽधीयते
मञ्जर्यामिव मञ्जुतायुतमधुस्यन्दान् मिलिन्दा इव ।।

रामभक्तोऽयं वेङ्कप्पाभिधेयः वेङ्कटभूपः[44] सर्वभाषाविशारदः पुंभावसरस्वत्याख्यया समकालिकैः स्तुतः, बाबाम्बिकाहंसाचार्ययोः सुतः। श्रीरामपुरवास्तव्यः। भार्गववंशोत्पन्नः। चिद्धनानन्दः अस्य गुरुः। अयं दाता, ब्रह्मविद्यापारङ्गतः, षड्दर्शिनीवल्लभबिरुदाङ्कितः हनूमद्भक्तश्च। अयं क्रि. श. 1763 तः 1780 पर्यन्तं मैसूर् महाराजस्य कृष्णराजद्वितीयस्य, नञ्जराजस्य, चामराजस्य च प्रधानामात्यः आसीत्। अयम्भाणः अनेन स्वीयप्रौढावस्थायां रचितः। अनेन संस्कृते कन्नडभाषायां च अनेके ग्र–

44 आधुनिकसंस्कृतरूपक – Part I – 449-471

In Public domain. Digitization Muthulakshmi Research Academy

न्थाः रचिताः। कुक्षिम्भरभैक्षिकप्रहसनं, महेन्द्रविजयडिमः, वीरराघव-व्यायोगः, लक्ष्मीस्वयंवर (विबुधानन्द) समवकारः, सीताकल्याणवीथी, रुक्मिणीमाधवाङ्कः, ऊर्वशीसार्वभौमेहामृगः, अलङ्कारमणिदर्पणः (अल-ङ्कारग्रन्थः), जगन्नाथविजयकाव्यम्, सूर्यशतकं, हनूमज्जयं, चिदद्वैतकं भाणश्चास्य कृतयः संस्कृते। भाणोऽयमप्रकाशितः मैसूर् प्राच्यसंशोध-नालये सुरक्षितः।

7.22 शृङ्गारमञ्जरी – विश्वनाथः (दूर्वादि)

आन्ध्रेषु श्रीकाकुलक्षेत्रे वल्लभरायस्य वसन्तोत्सवेषु प्रदर्शितोऽयं भा-णोऽपि अप्रकाशितः मद्रपुरीतालपत्रग्रन्थालये सुरक्षितः[45]। मित्रकार्यं सा-धयितुं प्रस्थितस्य कलकण्ठस्य प्रातरारभ्य सायं पर्यन्तं कृत्यमेवात्रेति-वृत्तम्। कन्दुकक्रीडा – पुत्तलिकाविवाह – चण्डिकायतन – भैरव – दे-वालयद्वार – आपण – पाचकादीनां वर्णनानि अत्र सन्ति। रम्याः भावाः, सुन्दरी शैली, मुद्वी शय्या, सरला च भाषा भाणममुम् उत्तमेष्वन्यतमं कु-र्वन्ति। परन्तु तत्र तत्र कीटदष्टोऽयं ग्रन्थः। अत्र चमत्कारावहप्रसङ्गा अपि अनेके। सर्वेषां भविष्यं वक्तुं समर्थः ज्यौतिषिकः स्वीयं भविष्यं ज्ञा-तुमसमर्थो जातः। यतस्तस्यैव पत्नी अन्यसङ्गता तेनैव न ज्ञाता इति सचमत्कारं वर्णयत्यस्मिन् श्लोके।

> आकाशसीम्नि चरतां ग्रहतारकाणां
> मूढाः कथं न कथयन्ति शुभाशुभानि।
> क्षोणीतले निजगृहे निजधर्मपत्नी-
> मन्याभिसारणरतां न विजानते ये।।

अत्र सकलङ्कस्य चन्द्रस्य सभृङ्गपुण्डरीकरूपेण उत्प्रेक्षणमिदं हृद्यम्।

---

45 . GOML – Madras – R No – 1876

In Public domain. Digitization Muthulakshmi Research Academy

काञ्चनाद्रिकटकेषु चन्द्रमाः
सञ्चरत्यनुदिनं ससम्भ्रमम् ।
पुण्डरीकमिव चन्द्रमण्डलं
मत्तभृङ्ग इव तत्र लाञ्छनः ।।

एवमिदं शृङ्गारमञ्जरीवर्णनमपि हृद्यम्–

चरणकमलकान्त्या देहलीमर्चयन्ती
कनकमयकवाटं पाणिना कम्पयन्ती ।
कुवलयमयमक्ष्णा तोरणं पूरयन्ती
वरतनुरियमास्ते मन्दिरस्येव लक्ष्मीः ।। इति ।

वीरायितवर्णनपरयानया–

स्मितललितवदनमव्यात्किञ्चित्कलमणितचलितगलमूलम् ।
उपरि विहरणं युवतेः उरसिजभरविनमदुन्नमन्मध्यम् ।।

इति नान्द्या आरब्धोऽयं भाणः कोशातकीफलमपि स्तौतीत्थम्–

कोशातकीफलमलं कुशलाय भूयात् आमूलचूडविपुलं मृदुलं सुदीर्घम् ।
आमृश्य वामचरणेन दुरक्षराणि वैधानि येन विधवाः सुखिताः क्रियन्ते ।।

अस्य भाणस्य रचनायामुद्देश्यं समाजे बाल्यविवाहानां स्थगनम् । अतोऽत्र बालवैधव्यं प्राप्तानां दुर्दशा, अन्यैः जनैः तासां प्रलोभनं, यौवने पुरुषसङ्गत्यभावेन ताभिरनुभूयमाना व्यधां, तदुद्वेगशान्त्यर्थं ताभिरुपेता उपायाश्चात्र वर्णिताः ।

एतद्भाणकर्ता दूर्वादि विश्वनाथः आन्ध्रदेशे श्रीकाकुलनगरवासी । अयं रामचन्द्रस्य पुत्रेण वेमयमन्त्रिणा[46] पोषितः इति भाणप्रस्तावनया अवगम्यते । अष्टादशे शतके आन्ध्रदेशे विशाखमण्डले काकर्लपूडिवंश्यः रा–

46 सोऽयं वेमयमन्त्रिणस्समजनि श्रीरामचन्द्रात्मनः
राज्ञस्तत्र महाकविः परिणतः श्रीविश्वनाथाह्वयः ।।

In Public domain. Digitization Muthulakshmi Research Academy

मचन्द्र इति कश्चन प्रभुकल्पः आसीदिति कृष्णमाचार्याः[47]। तस्य सुत एवायं वेमयमन्त्री चतुर्दशे शतके आसीत्। परन्तु अयं भाणकर्ता न तावत् प्राचीनः स्यादित्यूह्यते। अत्र भाणे विकारि संवत्सरः उल्लिखितः स च अष्टादशे शतके 1779 भवितुमर्हति। यदि च चतुर्दशशतकीयः वेमय-मन्त्री एवास्य आश्रयदाता स्यात् तर्हि अयं भाणः क्रि. श.. 1419 वर्षे रचित इति वक्तव्यम्।

7.23 रसोदारभाणः – सुरपुरम् अण्णयार्यः

तिरुपतौ वेङ्कटेश्वरस्य उत्सवेषु प्रदर्शनार्थमुद्दिष्टोऽयं भाणः[48] वस-न्तमञ्जरीशृङ्गारतिलकयोः प्रणयवृत्तेतिवृत्तः एतावता अप्रकाशितः मैसूर् प्राच्यसंशोधनालये सुरक्षितः। अयं भाणः कायेन महान् यस्मिन् 246 श्लोकाः, गद्यातिरिक्ताः सन्ति। सूत्रधारमुखेन अस्य भाणस्य वैशिष्ट्य-मित्थं प्रकाशयति कविः–

भावः स्पष्टानुभावो मृदुपदघटनैरद्वितीया च शय्या
पाको द्राक्षाविपाकः प्रथमरसविदां माधुरी सा धुरीणा।
सर्वं निर्व्याजमेव ग्रथितमभिमतप्रापके रूपकेऽस्मिन्
अस्मत्पुण्यैरगण्यैरहह सुकविना साहितीश्रीहितेन।।

अस्य कवेः कवितायाः परिचायकोऽयं नान्दीश्लोकः –

लक्ष्मीवक्षोजकुम्भस्थलमिलदलघुस्यन्दसिन्दूरदम्भात्
यद्वक्षो रक्ष्यरक्षापरिणतहृदयाभोगरागं व्यनक्ति।
सेवाहेवाकदेवासुरमकुटतटप्रत्नरत्नघुरत्न-
व्याकोचाङ्घ्रिद्वयाम्भोरुहविहतिरसौ श्रीनिधिश्श्रेयसे स्तात् ।।

---

47 HCSL – MK. P 805 ; ACSL – P. 149 ; CASL - BR - P. 523.
48 Mysore I – P. 281 ; Contribution of Andhra to Sanskrit literature – P. 10-17.

In Public domain. Digitization Muthulakshmi Research Academy

कविना अत्रत्यः पाकः द्राक्षापाक इति प्रतिज्ञातमथापि पाकः द्राक्षां परित्यज्य कदलीफलं ग्रहीतुं प्रयतते इव भाति।

आन्ध्रदेशे कडपमण्डले बुक्कपट्टणग्रामाभिजनः सुरपुरसंस्थाने स्थिरनिवासी श्रीवैष्णवः श्रीशैलकुलतिलकः लक्ष्माम्बाश्रीनिवासतातार्यपुत्रः, अण्णयाचार्यपौत्रः, कौण्डिन्यश्रीनिवासाध्वरिशिष्यः, शताधिकग्रन्थकर्ता अण्णयाचार्यः। अयं क्रि. श. 1704 वर्षे उत्पन्नः सुरपुरसंस्थानाधीश्वरेण पामिनायकेन (क्रि. श. 1752-1773) सुरपुरमानीतः। अयं वाजपेयादीष्टीः कृत्वा अण्णय्यदीक्षितनाम्ना ख्यातः। अस्य अग्रजः वेङ्कटार्यः पामिनायकस्य राजगुरुः आसीत्। भाणकर्ता अण्णयार्यः, तस्य अनुजः चिन्नयापरनामा श्रीनिवासदेशिकश्च पामिनायकस्य, तस्य पुत्रस्य वेङ्कटनायकस्य (क्रि. श. 1773-1802) च आस्थानविद्वांसौ आस्ताम्। अण्णयार्यः क्रि. श. 1778 वर्षे स्वर्गस्थः आसीत्। अयं कविः वेङ्कटाध्वरिवर्यस्य विश्वगुणादर्शस्य समकक्षतया तत्त्वगुणादर्शचम्पूप्रबन्धं विरचितवान्। स्वयमेव तस्य व्याख्यामपि कृतवान्। आचार्यविंशतिरिति वेदान्तदेशिकस्तोत्रं, देशिकयशोभूषणं, अभिनवकर्णामृतम्, आनन्दतारतम्यखण्डनं, व्यावहारिकत्वखण्डनसारं च अरचयत्। अयमान्ध्रभाषायामपि अनेकान् ग्रन्थानरचयत्।

7.24 रसिकजनरसोल्लासभाणः – कामसमुद्रं वेङ्कटाचार्यः

अत्र नायकः वसन्ततिलकः। पद्मापतेः अङ्कितः अयं भाणोऽपि अप्रकाशितः मद्रपुरीतालपत्रग्रन्थालयेऽस्ति[49]। अस्य भाणस्य कर्ता वेङ्कटाचार्यः कौण्डिन्यगोत्रः, अक्कमाम्बा-वेदान्तदेशिकयोः पुत्रः, कामसमुद्रवंशयः, सम्पदाचार्यपौत्रः। अहोबलाचार्यः सम्पदाचार्यस्य अग्रजः। अस्य

49 GOML-Madras – DC XXI – No. 827 ; Contribution of Andhra to Sanskrit literature – P. 573-575

In Public domain. Digitization Muthulakshmi Research Academy

अहोबलाचार्यस्य पुत्र एव आचार्यदीक्षितः रसोदारभाणकर्तुः अण्णयार्यस्य गुरुः। अण्णयार्यस्य अनुजः श्रीनिवासार्य एव अस्य वेङ्कटार्यस्य गुरुः। ततश्च श्रीशैलकामसमुद्रवंशयोः निकटं बान्धव्यम् आसीत् इति ज्ञायते। भाणोऽयमनया नान्द्या आरभ्यते।

श्रीमत्पद्माक्षवक्षस्थलनिलयपयस्सिन्धुकन्यानवाङ्गात्
जन्योच्छ्वासच्छटाञ्चत्पवनपरिमलैः शेषशैलाधिपस्य।
नाभ्यम्भोजाहृतोद्यन्मधुरमधुकरीडिम्भशङ्कां वहन्ती
कान्तिः श्रुत्यन्तरान्तश्रुतिकिसलयितश्रीपदः श्रेयसे स्तात् ।।

एतच्छ्लोकदर्शनेन ज्ञायते यदयं कवितायामण्णयार्यमनुकरोति इति। अनेन कविना बाल्ये एव अयं भाणःरचित इति अन्तपुष्पिकया ज्ञायते। अतोऽयं भाणः क्रि. श. अष्टादशशतकोत्तरार्धे रचितः स्यात्। किरीटि वेङ्कटाचार्यः अस्य कवेः सतीर्थ्यः।

7.25 शृङ्गारभूषणभाणः – चन्द्रगिरि वेङ्कटाचार्यः

अयमपि भाणः अप्रकाशितः अडयार्[50] ग्रन्थालये रक्षितः। वामनभट्टबाणविरचितशृङ्गारभूषणभाणस्य अनुकरणरूपोऽयं श्रीशैलवंश्येन चन्द्रगिरि वेङ्कटाचार्येण रचितः। अस्य कवेः पूर्वजाः तिरुपतिसमीपस्थ चन्द्रगिरिग्रामे स्थिरनिवासाः आसन्, येन 'चन्द्रगिरि' इति गृहनाम्ना एते प्रसिद्धाः। अस्य कूटस्थः चन्द्रगिरि ताताचार्यः। पितामहः चन्द्रगिरि श्रीनिवासार्यः। अस्य कविता सरला हृद्या च। उदाहरणार्थमियं नान्दी–

यद्दृष्ट्वा सुमुमोह दानवपतिः प्रह्लादपौत्रो नृपः
सर्वे देवगणाः सुखद्रुकुसुमैरानर्चुरानन्दिनः।
यद्वेदान्तविदो निदध्युरनघाः संवर्धमानं क्रमात्

---

50 Adayar. VOL V – No. 1580 ; Contribution of Andhra to Sanskrit literature – P. 578-579

In Public domain. Digitization Muthulakshmi Research Academy

तत्पादाब्जयुगं त्रिविक्रममुनेः पायादपायाच्चिरम् ।।

किं च–

कृष्णः कंसविमर्दनः कृतरुचिः गोपीकुचालिङ्गनात्
तद्वक्षस्थलबाहुमूलविगलत्कालेयपङ्काङ्कितम् ।
वक्षो वीक्ष्य निजं मुदा पुररिपुः खेलन्ननर्त स्वयं
लोकानामपि नायको युदवरः क्रीडानटः पातुः नः ।।

अत्र भाणान्ते भरतवाक्ये "भूपालाः पुण्यशीलाः भुवनमविकलं पालयन्त्वि"ति राज्ञां निर्देशः कृतः । अतोऽयं चन्द्रगिरिपालकेन राज्ञा सम्मानितोऽपि स्यात् । कृष्णदेवरायात्परं तद्वंश्यानां चन्द्रगिरिः अपि राजधानी आसीत् यत्र क्रि. श. 1646 वर्षात् 1792 पर्यन्तं तत्रत्ये दुर्गे राज्ञां निवास आसीदिति भारतेतिहासात् ज्ञायते । अतोऽयं कविः क्रि. श. अष्टादशशतके चन्द्रगिरिमध्ये आसीदिति ऊह्यते । अस्य कालविषये स्पष्टं प्रमाणं तु नोपलभ्यते ।

7.26 शृङ्गाररसभृङ्गारभाणः – इन्द्रगण्टि कोण्डय्य

आन्ध्रदेशे प्रसिद्धं शिवक्षेत्रं श्रीशैलम् । तत्राविर्भूतस्य मल्लिकार्जुनस्य उत्सवेषु प्रयोगार्थं रचितोऽयं भाणः[51] तत्र तत्र त्रुटितः अप्रकाशितः मद्रपुरीतालपत्रग्रन्थालयेऽस्ति । अस्य कवितापरिचायकोऽयं श्लोकः ।

कैलासं परिहृत्य शैलसुतया साकं गणैश्च स्वयं
श्रीशैलेऽत्रहि मल्लिकार्जुन इति ख्यातोऽस्ति सर्वेश्वरः ।
तत्सेवार्थमिहासते च विबुधा वृक्षादिवल्ल्यात्मना
भूपालाः सकला द्विजाश्च सकला विद्वज्जनाश्चापि ते ।।

51 GOML – Madras – R No.2309 ; Contribution of Andhra to Sanskrit literature – P. 491-495.

In Public domain, Digitization Muthulakshmi Research Academy

अयं च कविः कोण्डय्य अथवा कोण्डभट्टः, इन्द्रगण्टि वंश्यः अच्चमा–नारायणयोः सुतः, लिङ्गमभट्टस्य पौत्रः आन्ध्रदेशीयः काश्यपगोत्रः ब–ह्वृचब्राह्मणः । अस्यैवान्या कृतिः महेशमानसमहोत्सवः । अस्य भाणकर्तुः प्रपौत्रः लिङ्गम्भट्टः कालिन्दीमुकुन्दचम्पूप्रबन्धं रचितवान् । अयं कोण्डु–भट्टः श्रीहर्षनैषधस्य व्याख्यामरचयत् यस्य लिखितप्रतिकृतिः क्रि. श. 5–3–1834 दिनाङ्काङ्किता लभ्यते[52] । अतोऽयं कविः क्रि. श. अष्टा–दशशतकान्तात् पूर्वमेवासीदिति ज्ञायते ।

7.27 शारदातिलकभाणः – शङ्करः

असम्पूर्णः अप्रकाशितश्चायं भाणः[53] मद्रपुरीतालपत्रग्रन्थालये वर्तते । अत्र नायकः रसिकशेखरः । कोलाहलपुरेऽयं वेशवाटिकायां सञ्चन् स्वी–यशृङ्गारानुभवानां वर्णनं करोति । अयं कविरात्मनं विषये सूत्रधारमुखेन इत्थं प्राचीकटत् –

शङ्करः सकलसत्कविमान्यः
साहितीसरसकाव्यविलासः ।
शारदातिलकमुज्ज्वलरीत्या
कोमलं खलु बभाण भाणम् ।। इति ।

भारद्वाजगोत्रः अयं शङ्करदीक्षितः महाराष्ट्रीयः । अस्य पिता बालकृष्णः आनन्दवने न्यवसत् । बालकृष्णस्य पिता ढुण्ढिराजः प्रसिद्धः मुद्राराक्ष–सटीकाकार एव भवेत्, यः क्रि. श. 1750 प्रान्ते आसीत्, यश्च शा–हविलासगीतकाव्यरचनया शाहजीमहाराजेन अभिनवजयदेवबिरुदेन स–म्मानितः, इति कथयन्ति रामजी उपाध्यायाः । अयं शङ्करदीक्षितः स्व–पित्रा सह मिलित्वा 'प्रद्युम्नविजय' नाटकमरचयत् । प्रद्युम्नविजयना–

52 C.A.S.L. - BR- P. 491
53 GOML-Madras-D19314 ; आधुनिकसंस्कृतनाटक–P. 438-441 ;

In Public domain. Digitization Muthulakshmi Research Academy

टकस्य अभिनयः छत्रसालपौत्रस्य, हृदयसाहपुत्रस्य सभासिंहस्य राज्याभिषेकोत्सवे आसीत्। गङ्गावतारचम्पूः, शङ्करचेतोविलासचम्पूश्च अस्य कृत्यन्तरे। अयं च क्रि. श. अष्टादशशतकोत्तरार्धे आसीदिति वक्तुं शक्यते। अस्य प्रद्युम्नविजयनाटकमपि अप्रकाशितं काश्यां सरस्वतीभवनग्रन्थालये वर्तते।

7.28 मदनलीलादर्पणभाणः – पद्मनाभः

लीलादर्पणापराभिधः अयं भाणः असमग्रः अप्रकाशितः मद्रपुरीतालपत्रग्रन्थालये[54] सुरक्षितः। अस्य प्रतिकृतिद्वयमस्ति। अयं काश्यां विश्वनाथस्य चैत्रोत्सवेषु प्रदर्शितः। अत्र विटः लीलाशेखरः लीलावतीप्रथमरङ्गाधिरोहणोत्सवायाहूतः, प्रातरेव प्रस्थाय तत्र तत्र अटित्वा सायं तत्र गच्छति इति इतिवृत्तम् अन्यभाणेतिवृत्तसममेव। सुधासमानानि कविवचांसि, कान्ताविलासाः, मृद्वीकरसं च कस्य वा आनन्दं न जनयन्तीति पृच्छति कवि स्त्रेत्थम्।

सुधासध्रीचीना जगति कविवाचां विलसितं
विलासः कान्तानामसमशरलीलावशंजुषाम्।
समुद्यन्मृद्वीकामधुमधुरतामुख्यनिलयं
न केषामादत्ते मनसि परितोषं रसविदाम्॥

अयं च भाणः अनेन नान्दीपद्येन आरभ्यते–

लीलालालसमानसाभिरभितो गोपीभिरन्तःपुरे
व्यालिप्तो मृदुचन्दनेन दिशतु श्रेयस्स मे श्रीपतिः।
यत्सौन्दर्यमवेक्ष्य कुन्दरदनाः कन्दर्परूपश्रियं
निन्दन्त्यः कुपितेन तेन दलिता मुह्यन्त्यमन्दं शरैः॥

54 GOML-Madras-Tri.Cat.Vol III – part I – No.2310

In Public domain. Digitization Muthulakshmi Research Academy

अन्योऽप्ययं नान्दीश्लोकः हृद्यः –

चलत्तिमिरचुम्बिताम्बुरुहवैरिबिम्बोल्लस-
च्चकोरमदकालिकोच्चलितचक्रनृत्तक्रमैः ।
दरोदितकपोतकूजितविनिर्भरैस्सुभ्रवो
जयन्तु पुरुषायितैस्स्मरपदप्रणामायितैः ।।

अत्र प्रस्तावना अति दीर्घा, कवेः वंशवर्णनपरा । अत्र श्लोकाः अधिकाः । गद्यानि अल्पान्यपि सुदीर्घाणि । अत्र च शब्दाडम्बर एवाधिकतया दृश्यते । पश्यन्त्विदं मारुतवर्णनम् –

प्रफुल्लहल्लकावली समुल्लसन्महोत्पल-
प्रभातधूलिपालिकाप्रक्लृप्तभिन्नरूपकः ।
पटीरभूमिभृत्तटे कुटीरतस्स्मरन्मरुत्
झरीहरीति चोरवन्मनो मनोभवाज्ञया ।।

अत्रोपलभ्यमानान्तिमश्लोकाविमौ अश्वधाटीवृत्ते –

त्रोटीमनोज्ञशुकघोटीगताञ्जशरधाटी मुहुस्समुदय-
त्पाटीरवायुपरिपाटीविधूतवनवाटीप्रसूनरजसा ।
व्याटीकृतं द्विविधशाटीकनत्कनककोटीपदं धृतपदं
खेटीव मां मदय चेटीशयोपहितवीटीधरे सदधरे ।।

श्रृङ्गीक्षुचापधररङ्गीकृतोपवनलिङ्गीभवत्सुमचर-
द्भृङ्गीचयप्रमदभङ्गीमृदुस्वनितसङ्गीतपद्धतिरसौ ।
अङ्गीकृता परमसङ्गीश्वरैरपि कुरङ्गीदृगाप्रणयिनी
किंगीर्भिराभिरिह सङ्गीतमञ्जरि निरङ्गीकरोतु माम् ।।

एवं शब्दाडम्बरस्याधिक्येऽपि मनोज्ञभावानामपि स्थाने स्थाने विल–सनमस्त्येव । पश्यन्त्विदं सूर्योदयवर्णनम् । पद्मसौधे निद्राणां भद्रादेवीं जागरयितुं सूर्ये प्रस्थिते सति मधुकराः तानं, कोकिलाश्च गानं रचय–

In Public domain: Digitization Muthulakshmi Research Academy

न्तीति भावनात्र हृद्या।

पाथोजसौधतलनिद्रितभद्रदेव्याः
बोधोदयाय हि हरावुदयं प्रयाते ।
तानायितं मधुकरायितकूजितेन
गानायितं च कलकोकिलकूजितेन ।।

एतद्भाणकर्ता पद्मनाभः वेङ्काम्बा–लक्ष्मणयोः सुतः, पद्मनाभपौत्रः, गणपतेः प्रपौत्रः, घनचिद्बोधयतिशिष्यः सुब्रह्मण्यस्य अनुजश्चेति एतद्भाण–प्रस्तावनया अवगम्यते । अयं घनचिद्बोधयतिः यदि कोल्लूरि राजशेखरस्य गुरुः बोधानन्दघनेन्द्रः स्यात् तर्हि अयं पद्मनाभः क्रि. श. अष्टादशशतकमध्यवर्ती स्यात् । अन्योऽपि कश्चन पद्मनाभः आन्ध्रदेशीयः त्रिपुर–विजयव्यायोगकर्ता वर्तते, यस्य पिता कामशास्त्री, पितामहः पद्मनाभः, प्रपितामहः यल्लावधानी च, स तु अन्य एव । कृष्णमाचार्यास्तु[55] उभावप्यभिन्नाविति भ्रान्ताः इति निरूपयन्ति रामराजाः[56]

—***—

55 HCSL-MK. P668
56 Contribution of Andhra to Sanskrit literature-B.Ramaraju. P. 327-329

In Public domain. Digitization Muthulakshmi Research Academy

अध्यायः 8

एकोनविंशशतकभाणाः

अन्यशतकापेक्षया अस्मिन्नेव शतके अधिकतया भाणानां रचना संवृत्ता। अन्यशतकेभ्यः अधिकतया भाणाः शतकेऽस्मिन्नुत्पन्नाः। तेषु उपदश केरलीयाः। पञ्चदशपर्यन्तमान्ध्रदेशे उत्पन्नाः। अन्ये चान्येषु प्रान्तेषु। यथोपलब्धि तेषां परिचयोऽत्र प्रस्तूयते।

8.1 पञ्चायुधप्रपञ्चभाणः–त्रिविक्रमभट्टः

क्रि. श. 1864 वर्षे मुम्बईनगरात् प्रकाशितोऽयं भाणः। अत्रेतिवृत्तं पराश्रयम्। नायकः प्रबलदामः। अयं च कन्दर्पविलासं कलहंसलीलया सह, मदनशेखरं कमनज्योत्स्नया सह योजयति। अत्र भगवती कात्यायनी साहाय्यमाचरति।

अत्रत्या प्रस्तावना सूत्रधारेण रचितेति अस्मात् सूत्रधारवचनात् ज्ञायते इति रामजी उपाध्यायः[1]। तद्धि– "अतीतशारदोत्सवे मकरन्दकन्दलनाम्ना मे भावेन.......भाणं रसिकमनोज्ञं त्रिविक्रमश्चक्रे। मदुपज्ञोऽयम् अभिनवो भाणः प्रज्ञावतां समाजेषु भवताभिनेतव्य इति सादरमुक्त्वा मे

1 आधुनिकसंस्कृत नाटक–Part II – P. 715

In Public domain. Digitization Muthulakshmi Research Academy

समर्पितः " इति। वैचित्र्यार्थं कविनाप्येवं रचयितुं शक्यमिति नायं परम-प्रमाणभूतो भवत्येव। अत्र कविता सरला सरसा च। " न हि नित्यो विधिः फलाभिसन्धानमपेक्षते" "निरन्तरबहुमानलालिताः सकृदवमानिताश्चेत् वैरिणो भवन्ति " इत्यादिलोकोक्तयः सन्दर्भोचिताः हृद्याः।

एतद्भाणरचयिता त्रिविक्रमः। पिता अस्य चिद्घनानन्दः। अस्य ज्येष्ठभ्राता त्र्यम्बकः। अयं च स्वाग्रजस्य त्र्यम्बकस्य सविधे एव विद्यामभ्यस्तवान्। अयं च शा. श. 1727 वर्षे अर्थात्–क्रि. श. 1805 वर्षे[2] अमुं भाणम-रचयत्। यादवेन्द्रमहोदयः, कुवलयाश्वविलासः, पञ्चबाणविलासश्चास्य अन्याः कृतयः।

8.2 शृङ्गारकेतुलीलाचरितभाणः – भास्करः

अस्य भाणस्य मुतुक्कुरिश्शिभाण इति, शृङ्गारतिलकभाण इति च ना-मान्तरे। केरलेषु प्रसिद्धोऽयं भाणः रविवर्मासंस्कृतग्रन्थावलित्रैमासिक-पत्रिकायां क्रि. श. 1965 वर्षे (Vol-13-1) प्रकाशितः। अयं च भाणः भाणन्तरेभ्यो विलक्षणः। एकाङ्केऽपि भाणेऽस्मिन् रङ्गद्वयं वर्तते। पराश्र-यमेवेतिवृत्तमत्र। अत्र विटः शृङ्गारकेतुः सारसिकासत्यकेत्वोः समागमाय प्रयतते। नवचन्द्रिका – चन्दनलता – पद्मिनी – नारायणी – चित्रसेना-दिवेश्यानां वर्णनमानुषङ्गिकम्। अत्र वृद्धवैदेशिकवृत्तान्तः हास्यसूचकः। द्यूतकुक्कुटयुद्धादिवर्णनमत्र नास्ति। कविता सरला, सरसा, भावबन्धुरा च। कालिदासादिमहाकवयोऽत्र भाणकर्त्रा अनुकृताः। पश्यन्त्विदं सार-सिकावर्णनं "अन्योन्यमुत्पीडयदि"ति कुमारसम्भवस्यानुकरणम् –

यद्यत्त्रिलोक्यामुपमानभूतं तत्तद्व्यतीत्याद्य कुचौ तदीयौ।
कमप्यदृष्टात्मसमानमन्योन्यमुत्पीडयतः प्रकामम् ।।

---
2 HCSL-MK-P701.

In Public domain. Digitization Muthulakshmi Research Academy

अयं च कविः भास्करः केरलीयः मुतक्कुरिश्शिवंशीयः नम्बूद्रिब्राह्मणः क्रि. श. 1805 वर्षे षोरनूर् समीपस्थग्रामे जातः व्याकरणवेदान्तादि-शास्त्रेषु निष्णातः, कालिकट् संस्थानाधीश्वरेण मानविक्रमेण[3] पोषितः, कोच्चिन् अधिपतेः वीरकेरलवर्मणः[4] आस्थानविद्वान् आसीत्। अयं बाल्यादेव कवनप्रतिभावानिति, केवलं 32 वर्षाण्येवाजीवदिति च कुञ्जुण्णिराजामहोदयः[5] स्वीयकेरलीय संस्कृतसाहित्येतिहासे सूचयति। अयं च भाणः कविना स्वीयषोडशवर्षपूर्तेः पूर्वमेव रचित[6] इति, मानविक्रमदेवस्य आस्थाने प्रदर्शित[7] इति ज्ञायते। अतोऽयं भाणः क्रि. श. 1820 वर्षे रचित इति अनुमीयते। अस्य च भाणस्य केरलेषु महती प्रसिद्धिरस्तीति अनेन श्लोकेनावगम्यते।

वाग्देवताकेलिरङ्गभूमीकृतमुखाम्बुजः।
सोऽयं देव्या च मेदिन्या तिलकत्वेन धार्यते।।

अस्य व्याकरणशास्त्रपाण्डित्यस्य निकषोपलोऽयं चन्द्रोदयवर्णनपरः श्लोकः–

देवानां मदिरायितः पशुपतेर्देवस्य चूडायितः
कोकानां क्रकचायितः कुमुदिनीदेव्याश्च जीवायितः।
ताराणां तरुणायितः तनुचकोरीणां च भाग्यायितो
दीपः कश्चन मार्गदर्शनविधौ मारेण ते दर्शितः।।

3 केरलीयसंस्कृतसाहित्यचरितम् – Part IV-P306-308 (मलयालभाषायाम्)
4 वीरकेरलवर्मा–(क्रि. श. 1809–1828)
5 Contribution of Kerala to Sanskrit liturature-KKRaja-P. 118.
6 अम्बोधिगम्भीरमतिरुपषोडशहायनः।
श्रृङ्गारलीलानुभवो यस्य प्राग्जन्मनः किल।।
7 "विक्रमभूपतेः लालाटिकैः परिपूर्णया परिषदा सबहुमानं समादिष्टोऽस्मि"–प्रस्तावना–

In Public domain. Digitization Muthulakshmi Research Academy

कवने चाप्रतिमप्रतिभावानयं स्वीयां बहुमुखीं प्रज्ञामस्मिन् भाणे प्रदर्शि–तवान्। पश्यन्त्विमावन्यापदेशपरौ श्लोकौ –

मन्दीकृतमकरन्दं विकसदिदं किमु पिबानि कमलवनम् ।
किमुत विकसिष्यमाणां नवमधुरां कुमुदिनीं प्रतीक्षिष्ये ।।
विजहिहि विगतमकरन्दान्यरविन्दान्यथ भजस्व कुमुदवनम् ।
कालातिपात एको विघ्नस्ते किन्न सोढव्यः ।।

अन्तेऽयमस्य भाणस्य रचनायाः कारणमित्थं श्लोकद्वयेन प्रकटीकृतवान्।

निर्लज्जतायाः कस्याश्चित् निर्बन्धात् रचिता मया।
इदं हास्यैकसक्तानां विदुषामस्तु तुष्टये ।।

अथवा–

श्रेयो हि मे यदिदमद्य महाजनानां
हासास्पदं भवति चेदिदमेव भूयः ।
पूज्यो जडैरिति तु यत्तदपेक्षयापि
हास्यो महद्भिरिति यद्वरमेतदेव ।।

अयं च द्वितीयः श्लोकः "याच्ञा मोघा वरमधिगुणे" इति मेघसन्देशा–नुकरणं किल। एवमनुपदं सरसोऽयं भाणः ।अस्य कवेः रचनान्तराणि न ज्ञायन्ते।

8.3 विटनिद्राभाणः – अज्ञातकर्तृकः

अयमपि केरलीयः भाणः, असम्पूर्णः अप्रकाशितः तिरुवनन्तपुरक्युरेटर् हस्तलिखितग्रन्थालयेऽस्ति। अस्य भाणस्य आरम्भभागः नोपलभ्यते। भरतवाक्यं चेदम् –

यावत्खण्डेन्दुमौलिं श्रयति गिरिसुता यावदास्ते मुरारेः

In Public domain. Digitization Muthulakshmi Research Academy

वक्षस्यक्षीणहारद्युतिमणिशबले देवता मङ्गलानाम् ।
यावद्वक्त्रेषु मैत्रीमुपनयति गिरामीश्वरी पद्मयोनेः
तावल्लक्ष्मीप्रसूतिः स्वयमवतु भुवं रामवर्मा नरेन्द्रः ।।

अनेन च भरतवाक्येन अयं भाणः राणी लक्ष्मीबाई पुत्रस्य केरलीयस्य स्वाति तिरुनाल् रामवर्मप्रभोः काले रचित इति ज्ञायते। अयं च रामवर्मा क्रि. श. 1813 वर्षे जातः, क्रि. श. 1847 पर्यन्तमासीदिति कुञ्जुण्णिराजाः[8]। अयं च रामवर्मा आङ्ग्ल–आन्ध्र–संस्कृत–मलयालभाषासु सङ्गीते च निष्णातः। अनेन च स्वयं तासु भाषासु ग्रन्थाः रचिता इति, अयं कविपण्डितपोषकश्चासीदिति च कुञ्जुण्णिराजाः सूचयन्ति। अयं कविः तस्यास्थानविद्वान् भवेत्। परन्तु भाणकर्ता क इति न ज्ञायते। यद्यपि अस्य अन्या प्रतिकृतिरपि[9] लभ्यते तथापि सापि असम्पूर्णैव लभ्यते। अत्र अन्ते पूर्वकविस्तुतिरित्थं कृता–

सकलनिगमविद्भ्यः संमृहीतार्थशब्द-
स्तुतसकलरसेभ्यः प्राक्तनेभ्यः कविभ्यः ।
भवतु शिवमशेषप्राज्ञहृत्पुण्डरीको-
च्छ्वसनदिनमणिभ्यो भाणकृद्भ्यः चतुर्भ्यः ।।

8.4 रससदनभाणः – युवराजः[10]

केरलीयेषु भाणेषु उत्तमत्वेन परिगणितेषु अन्यतमः अन्वर्थनामा अयं भाणः मुम्बई नगरात् निर्णयसागरद्वारा काव्यमालायां 37 संख्याकत्वेन प्रकाशितः। अस्यैव 'कालीकेलियात्राभाण' इति नामान्तरम्। दक्षिणदेशे तत्तक्षेत्रेषु भगवतामुत्सवाः वर्षे एकवारं महता प्रबन्धेन निरुह्यन्ते, यत्र

8 Contribution of Kerala to Sanskrit literature -P. 180-181.
9 D. C. of Trivendram Curator's M.S. Library-No 1301.
10 H.C.S.L-MK-P664 ; K.S.L-KR-P165, 248, 249 ; संस्कृत मे एकाङ्की रूपक– P. 79, 101 ;

In Public domain. Digitization Muthulakshmi Research Academy

विविधेभ्यः प्रदेशेभ्यः समागतेन जनसन्दोहेन तत्तक्षेत्रं जनसमुद्रमिव लक्ष्यते। सन्दर्भममुं पुरस्कृत्य विविधानि आपणानि, विविधाः विनोदाः, भगवतो विविधाः उत्सवविशेषाश्च रक्तिं भक्तिं च समागतानां साधयन्ति। अयमेव हि कश्चित्तादृशः अवसरः समेषां यत्र निर्निरोधं स्वेच्छया सञ्चरणावकाशः भवति। एतादृशेषु सन्दर्भेषु समागतानामपि उद्देश्यं बहुधा भिन्नमपि भवति। केचिच्च भक्त्या भगवते सङ्कल्पितवस्त्वादिसमर्पणार्थमायान्ति चेत् केचिच्च मनोविनोदनार्थमायान्ति। विशिष्य युवलोकः भक्त्यपेक्षयापि विनोदस्यैव प्राधान्यं ददाति। एतादृशोत्सवविशेषवर्णनार्थमेवोद्दिष्टोऽयं भाणः भद्रकाल्याः वार्षिकोत्सवे समवेतानां विविधमनः प्रवृत्तीनां वर्णनपरः चमत्कारावहसन्निवेशबन्धुरः रससदनमेवेत्युक्ते नातिशयोक्तिः। अत्रेतिवृत्तं भाणान्तरेष्विव परस्परमनुरक्तयोः सङ्गमप्रयासः न। किन्तु स्वमित्रे देशान्तरगते तज्जायायाः सहायको भूत्वा तस्याः कालीकेलीयात्रोत्सवदर्शनाय नयनं, यात्रोत्सवे च आसायं तत्र तत्र अटित्वा सायं पुनः तस्याः स्वगृहं प्रति प्रापणमिति भिन्नमेवेतिवृत्तमत्र। भाणेऽस्मिन् रङ्गं प्रविष्टः नायकः प्रभातवर्णनं कृत्वा, स्नानार्थं तटाकं गत्वा, तत्र स्नानार्थमागतानां वर्णनं करोति। ततः स्नात्वा मित्रगृहं गत्वा मित्रजायाम् उत्सवार्थं नयति। तत्र च कालीमन्दिरवर्णनम्, वेशयुवतीनां तत्र समवेतानां वर्णनं, उत्सवे च सम्मुखमागतैस्सह चमत्कारावहभाषणं च अत्यन्तं हृद्यम्। अस्य भाणस्य वैशिष्ट्यमनेन नान्दीश्लोकेनैवावगतं भवति–

केका राजति जीवनाथ, दयिते कालोह्ययं वार्षिकः
प्रश्नोयं त्वयि, नन्विदं प्रतिवचः सा भारती केवलम् ।
जिह्वाग्रे तव सा कथं नु शिरसि, ब्रह्मा मया कल्पितः
सर्वं त्वत्कृतमीश्वरेति शिवयोः सम्भाषणं पातु वः ।।

In Public domain. Digitization Muthulakshmi Research Academy

वक्रोक्तेरुदाहरणभूतोऽयं श्लोकः पार्वतीपरमेश्वरसंवादरूपः । गङ्गायाः विषये पृच्छन्तीं पार्वतीं कथमपि भ्रामयित्वा गङ्गां गोपयति शिवः । अत्र शैली, भावनापाटवं च हृद्ये । पश्यन्त्विदं प्रभातवर्णनम्–

नग्नां वीक्ष्य नभस्थलीं विगलितप्रत्यग्रधाराधर-
श्रेणीश्यामलवाससं पतिरसौ रक्तः स्वयं मुञ्चति ।
इत्यन्तश्चिरमाकलय्य नलिनी शोकातिरेकादिव
व्यादायाम्बुजमाननं विलपति व्यालोलभृङ्गारवैः ।। (22)

नभस्थली सुन्दरी नीलमेघगणरूपश्यामलवसना । उदयकालकिरणैः नीलमेघगणे अपसृते नग्ना जाता । अतः तादृशीं सुन्दरीं को वा रसिकः मुञ्चेत् ? अतः सूर्योऽपि तस्यां रक्तः मामुपेक्षेतेति विचिन्त्य सुन्दरीपद्मिनी मुखं व्यादाय भृङ्गरवव्याजेन रोदिति इति इयं कल्पना हृद्या किल । यात्रायां कश्चन युवा कस्याश्चित् लताङ्ग्याः कर्णे जपन्निव किमपि अवदत्, तदा सा रुष्टा, सपदि सः धनं प्रादर्शयत्, सा च सुमुखी जातेति तत्र समवेतानां युवयुवतीनां मनोभावादिवर्णनमपि हृद्यम् । पश्यन्तु–

कर्णे जपन्निव निमन्त्रयते कृशाङ्ग्याः
कश्चिद्युवा किमपि सा च सरोषदृष्टिः ।
एवं निरस्यति ततो वसनाग्रबद्धं
रूप्यं स दर्शयति सस्मितमीक्षते सा ।। (74)

एवमिदं कालिकावर्णनमपि हृद्यमत्र–

कालिन्दीकमलं सजीवकमलं पश्चात्सुवर्णापगा-
सम्भूतं कमलं सबिम्बकमलं कुर्वच्छिरः काम्बवम् ।
कुम्भौ स्वं पुलिनं ततश्च नलिनं रम्भातलस्थायुकं
यद्रूपं विदुरेवमुत्कटधियस्तस्यै नमो वस्तुने ।। (87)

एवमत्र सायं वर्णनमपि हृद्यम्–

In Public domain. Digitization Muthulakshmi Research Academy

प्रक्षालनाय वपुषः पतितुं पयोधौ
प्रत्यग्धराधरशिरस्पदमारुरुक्षुः ।
आलम्बनार्थमिव पादपमौलिदेशे-
ष्वात्मीयमर्पयति चण्डकरः करौघम् ।।

एवं सन्दर्भोचितलोकोक्तिप्रयोगः अन्यापदेशकथनानि च हृद्यानि । अन्यापदेशस्य इदमेकमुदाहरणं पश्यन्तु–

तटाकतीरोपवनेषु केषुचित् विनोदनाय स्फुटशाखिशालिषु ।
चरन्नपि श्रान्तिमितः सरोजिनीमनाप्य हंसो न हि याति विश्रमम् ।। (142)

अत्र च पुरुषायित–मेषकुक्कुटादियुद्ध–कलत्रपत्रिकालेखनादिकं नास्त्येव। सन्दर्भोचितवीरसूचनं मल्लयुद्धखड्गक्रीडादिना कृतम् ।

एतद्भाणकर्ता आत्मानं युवराजशब्देनैव ख्यापितवान् । अतोऽयं कः इत्यत्र विमर्शकानामभिप्रायभेदाः सन्ति । केचन अस्य कविताशैलीमालक्ष्य अमुं पञ्चदशषोडशशतकवर्तिनममन्यन्त । कश्चित् अस्य नाम सदाशिव इति, अन्यश्च प्रह्लादन इति च उक्तवन्तौ । एतानि मतानि सम्यक् परिशील्य कुञ्जुण्णिराजा अमुं गोदवर्मनामधेयम्, एकोनविंशशतकवर्तिनं च निर्धारितवान् । " अस्यैव वंशे अनन्तरं समुत्पन्नः 'कोच्चुण्णि तम्पुरान्' इति कविः अस्यैव जीवनचरितं" युवराजचरितम्" इति नाम्ना अरचयत् इति, तत्र तेन अस्य नाम गोदवर्मेति निर्दिष्टमिति, अस्मिन् भाणे प्रतिफलिता केरलीया संस्कृतिरपि एकोनविंशशतकीया" इति च कुञ्जुण्णि राजा महाशयस्य वादः ।

अयं च केरलेषु क्राङ्गनूर् देशस्य युवराजः । क्रि. श. 1800–1851 मध्ये आसीत् । अस्य गुरुः माधवन् अतितिरिः । अस्यैव गुरोः वन्दारुद्विजमाधवः, माधवभट्ट इति नामान्तरे । अयं माधवः पन्तालं सुब्रह्मण्यशास्त्रिशिष्याः, क्राङ्गनूर् अधिपानां समेषामेव गुरुः । (1) त्रिपुरदहनच-

In Public domain. Digitization Muthulakshmi Research Academy

रितम्, (2) देवदेवेश्वराष्टकं, (3) मुररिपुस्तोत्रम्, (4) रामचरितं, (5) श्रीपादसप्तकं, (6) सदाशिवी, (7) सुधानन्दलहरी, (8) हेत्वाभासोदाहरणानि, (9) आशौचदशकम्, (10) आशौचषोडशकम्, (11) आशौचदीपिकाव्याख्या, (12) भास्करीयव्याख्या, (13) गोलाध्यायव्याख्या, (14) गरुडचयनप्रमाणम् इति अस्य युवराजस्य कृत्यन्तराणि। कुम्भकोणं कृष्णशास्त्री, वैक्कन् परमेश्वरन् मुत्तत्तु आदयः अस्य शिष्याः। अयं च भाणः कोटिलिङ्गपुरे अनेन रचित इति भाणप्रस्तावनातः अवगम्यते। अयं च महाकविः। व्याकरणे निष्णातः। कालीभक्तः। अयं स्वयमेव स्वीयं पाण्डित्यमधिकृत्येत्थं वदति–

व्याकृत्यादिसमस्तशास्त्रसमुदायाम्भोधिकुम्भीसुतः
काव्यालङ्कृतिनाटकोद्धसुकृतौ काव्यस्य सत्यं समः।
पुण्यः पण्डितराजराजिगजताकुम्भाद्रिसम्भेदने
दम्भोविद्युवराजकोविदमणिर्वर्वर्ति सर्वोपरि।। (14)

अयं च स्वीयशास्त्रान्तरवैदुष्यं विशिष्यव्याकरणवैदुष्यं द्वित्रेषु सन्दर्भेषु प्रदर्शितवान् सचमत्कारम्। तत्र स्वस्य शिवभक्तत्वं निरूपयति अनेन श्लोकेन व्याकरणास्त्रपाण्डित्यप्रदर्शनद्वारा।

आदेशस्यास्तिधातोः पतयति पुरुषे क्वापि केऽपि श्रयन्ताम्
आदेशस्यास्ति धातुर्व्यतिचलनमिति भ्रान्तिमन्तो नभन्ताम्।
गोत्रापत्याधिकारोत्तरकलितविधानानुवादादिभूते
गोत्रापत्याधिकारोचितवपुषि वयं त्वश्रमेण श्रयामः।।

अस्तिधातोरादेशस्य 'भू' पदार्थस्य पतिरिवाचरति यः तं केचिदाश्रयन्ते, धातुः ब्रह्मणः आदेशस्यापि व्यतिचलनमस्तीति केचित् भ्राम्यन्ति। वयं तु गोत्रापत्याधिकारोत्तरमष्टाध्याय्यां विहितं यत् 'शिवादिभ्योऽण्' इति, तत्रादिमं शिवं, गोत्रापत्यस्य पार्वत्याः अधिकारोचितशरीरम् आश्रयामः इति

In Public domain. Digitization Muthulakshmi Research Academy

अस्य भावः। एवमेवात्र विटः कामपि युवतीं दृष्ट्वा तया सहेत्थं भाषते। एतदपि रमणीयम्–

अदेङ्संज्ञाभिरन्यूनां दृष्ट्वा सर्वाद्युपोत्तमाम् ।
आदैचोराश्रयन् संज्ञां कामः पीडयते भृशम् ।।

अदेङ्संज्ञा गुणाः। सर्वाद्युपोत्तमम् सर्वादिगणे उपोत्तमम् भवत् शब्दः। आदैचः संज्ञा वृद्धिः। गुणवतीं भवतीं दृष्ट्वा स्थितं मां कामः वृद्धिं प्राप्य अधिकं बाधते इत्यर्थः। एवं तिथीनाश्रित्य सुन्दरीवर्णनमिदमपि हृद्यम्।

राका मुखेन दशमी च कपोलकान्त्या
फालेन पञ्चमतिथिः प्रति नन्नखाङ्कैः ।
एषा कुहूरपि कचप्रकरेण धत्ते
प्रायः समस्ततिथिसङ्ग्रहभाजनत्वम् ।। (राका-पौर्णमी, कुहूः-अमावास्या)

8.5 मदनाभ्युदयभाणः – शिष्टु कृष्णमूर्तिशास्त्री

अयं भाणः असम्पूर्णः अप्रकाशितश्च मद्रपुरीतालपत्रग्रन्थालये उपलभ्यते[11]। मदनमञ्जरीमदनशेखरयोः प्रेमवृत्तमितिवृत्तमत्र। अत्र च विटः चन्द्रिकाख्यायाः वेश्यायाः प्रथमरङ्गाधिरोहणोत्सवार्थमाहूतः प्रातरेव प्रस्थितः तत्र तत्र अटित्वा सायं तत्र गत्वा उत्सवे भागं गृह्णाति। भावनाप्रागल्भ्येन सह शब्दसौन्दर्यस्यापि प्रामुख्यमत्र दृश्यते। पश्यन्त्वारम्भे एव सभावर्णनमिदम्–

साहित्यसाहित्यमनोज्ञलीला
सङ्गीतसङ्गीतकलाकलापा ।
सारस्यसारस्यनिधानमेषा
सारङ्गसारङ्गसभा विभाति ।।

11 GOML-Madras-T.C. II R No 1467.

In Public domain, Digitization Muthulakshmi Research Academy

इति वृत्तमत्र पारदारिकम्। परस्त्रीवशीकरणोपायाः धूर्तचेष्टाश्च अत्र वर्णिताः। अस्मिन् शतके आन्ध्रदेशे घूर्जरदेशादागताः बहवः घूर्जराः वाणिज्यं कुर्वन्ति स्म। घूर्जरस्त्रीणां विषये परपुरुषसङ्गासक्तिरूपाः प्रवादाः अनेके आसन्। तादृश एव कश्चन सन्दर्भः अत्रापि कल्पितः। यथा च प्राचीनभाणेषु धूर्तविटसंवादः वैशिकाधिकरणस्य व्याख्यारूप इति प्रथते, एवमयमपि भाणः वात्स्यायनकामशास्त्रस्य व्याख्येति वक्तुं शक्यते। अत्र बाह्याभ्यन्तरसुरतभेदाः सम्यक् वर्णिताः। अत्रत्यकवितायाः उदाहरणभूतोऽयं नान्दीश्लोकः –

श्रीमद्यामुनतीरशाद्वलतले गोपालिकां चालयन्
एकां सैकतसीम्नि तद्वदपरां दूरे मुहुः खेलयन् ।
सङ्केतोक्तलतानिकेतनगतामन्यां रते लालयन्
योऽभूद्वल्लवधाम्नि पल्लवतरो देयात्सवोऽत्युत्सवम् ।।

नान्द्यन्ते सूत्रधारः –

ईषन्मीलितभावलोलनयनं हेलाविवृत्ताननं
चेलाकर्षणजत्रपानुचलनं चेतोभवोद्योतनम् ।
प्रारम्भावसरोच्चलत्प्रयतनं प्रादुर्भवत्कामनं
मोदं वो विदधातु मोहजननं मुग्धाङ्गनालिङ्गनम् ।।

एतद्भाणकर्ता आन्ध्रदेशीयः शिष्टु कृष्णमूर्तिशास्त्री। अनेनैवान्योऽपि भाणः रचितः। तद्विषयेऽपि किंचिद्विचार्य ततः कवेः परिचयं ज्ञास्यामः।

In Public domain. Digitization Muthulakshmi Research Academy

8.6 वल्लवीपल्लवोल्लासभाणः – शिष्टु कृष्णमूर्तिशास्त्री

अयमपि भाणः[12] असमग्र एव अप्रकाशितः मद्रपुरीतालपत्रग्रन्थालये[13] वर्तते। अस्यारम्भभागोऽन्तिमभागश्च न लभ्येते। अतः अत्रेतिवृत्तं किमिति न ज्ञायते। अत्रत्याविमौ श्लोकौ मातृकाविवरणग्रन्थे उल्लिखितौ–

दासा विवृत्तनयनाञ्चलसंप्रवृत्त
बाष्पाम्बुबिन्दुवृषलीजनदत्तचित्ताः।
तत्तत्परासु जनताभिनुतिप्रवीणाः
गायन्ति किञ्चिदुपरिप्रसृतात्महस्ताः।।

उदग्रजनताद्दतेस्सविधमेत्य नीचा भृशं
प्रक्लृप्तकरसंपुटा भुवि भटावलोकोत्सुकाः।
स्वजानुयुगलोपरि प्रणिहिताननास्सम्भ्रम-
न्त्यहो बत ततस्ततो झटिति सन्निषण्णा अपि।।

अथेदानीं एतद्भाणद्वयकर्तारमधिकृत्य विचारयामः। आन्ध्रदेशे पूर्वगोदावरीमण्डले गोल्लपालें ग्रामे क्रि. श. 1780 वर्षे जातः गौरीसर्वेश्वरशास्त्रिणोः सुतः अयं क्रि. श. 1870 पर्यन्तम् आसीत्। अयं बहुषु शास्त्रेषु पण्डितः आसीत्। विशिष्य सङ्गीते अयमत्यन्तं प्रसिद्धः आसीत्। अयं स्वसमये वीणावादकेषु अग्रगण्यः आसीत्।

अयञ्च काकर्लपूडि, दन्तुलूरु, जग्गम्पेट, पेद्दापुरं, कालहस्ति संस्थानाधीशैः पोषितः सत्कृतश्च आसीत्। अयमारम्भे आन्ध्रकविरासीत्। आन्ध्रभाषायामेव अनेन बह्व्यः कविता अपि रचिताः। अयं च षष्ठितमे

---

12 अयं मञ्जुलाचार्यकर्तृकत्वेन संस्कृतभाणसाहित्यमु इति तेलुगु ग्रन्थे उल्लिखितः। CASL-BR P. 146 मध्ये अस्य परिचयः दत्तः यत्र कृष्णमूर्तिशास्त्रिकर्तृकत्वं स्पष्टमभिहितम्। मञ्जुलाचार्येणापि वल्लीपल्लवोल्लासनाम्ना कश्चन भाणः रचितः। तस्यापि परिचयः अग्रे वर्तते।

13 GOML-Madras-Tri.Cat.Vol-I-R No 2115

In Public domain. Digitization Muthulakshmi Research Academy

वयसि कालहस्तिसंस्थानाधीश्वरेण आहूतः शेषजीवितं तत्रैवायापयत्। अनेन च कालहस्तिसंस्थानं प्रत्यागमनात्परमेव सर्वे संस्कृतग्रन्थाः रचिताः। तत्र प्रथमः कङ्कणबन्धरामायणम्। यत्रं एक एव श्लोकः तत्रत्यैकैकमक्षरमारभ्य आनुलोम्येन प्रातिलोम्येन च पठितः 64 श्लोकरूपो भवति। स च श्लोकः अयम्–

> नेतादेवालीनामाशा धाना धीना नेका लोकी।
> मास्थानाभाख्या योगीशं पायादेतं रामे राजा।।

अस्य व्याख्यापि स्वयमनेन रचिता। द्वितीयः यक्षोल्लासकाव्यम् सर्गद्वयात्मकं मन्दाक्रान्तावृत्ते रचितम् मेघसन्देशस्य अनुकरणम्। तृतीयः मदनाभ्युदयभाणः, चतुर्थः वल्लवीपल्लवोल्लासभाणः, पञ्चमः हरिकारिका (प्रकाशिता), षष्ठः नीलशैलनाथीयम् काव्यम्। कालहस्तिसंस्थानाधीश्वरेणायं कविः अभिनवकालिदासबिरुदेन सम्मानितः। 'सङ्गीतमपि साहित्यं सरस्वत्याः स्तनद्वयमि'ति लोकोक्तिमाश्रित्य अयं कविः आत्मानं सरस्वतीदेव्याः स्तनद्वयस्तन्यपायिनं मन्यते। मदनाभ्युदयभाणे च तेनैव इत्थम् उक्तम् –'अम्बुजसतीस्तनयुगस्तन्याप्तिधन्यात्मवान्' इति। अत्र अम्बुजसतीपदं दृष्ट्वा केचन अस्य मातरं लक्ष्मीनाम्नीमाचख्युः। परन्तु तस्य मातुः नाम गौरीति तेनैव कङ्कणबन्धरामायणव्याख्यारम्भे (गौरीसर्वज्ञयोः पित्रोः इत्यादिना) स्पष्टमुक्तम्। अस्य पुत्रः सर्वशास्त्रीति पितेव कविपण्डितः आसीत्। कालहस्ति संस्थाने पितेव आदरमलभत। इतोऽपि अस्य विषये ज्ञातव्यं चेत् मल्लादिसूर्यनारायणशास्त्रिणां संस्कृतकविजीवितं द्रष्टव्यम्[14]।

---

14 संस्कृतकविजीवितम्–मल्लादिसूर्यनारायणशास्त्री– P.633 ; Contribution of Andhra to Sanskrit literature -B.Ramaraju P.142-146 ; दक्षिणान्ध्रसाहित्यमु–तेलुगु–नेलटूरि वेङ्कटरमणय्य–P.328 ;

In Public domain. Digitization Muthulakshmi Research Academy

8.7 शृङ्गाररसुधार्णवभाणः–कोराडरामचन्द्रशास्त्री

आन्ध्रदेशे समुत्पन्नेषु भाणेषु उत्तमकोटिमाटीकमानोऽयं भाणः मचिलीपत्तननगरात् क्रि. श. 1899 वर्षे प्रकाशितः । अयं च भाणः भद्राचलक्षेत्रे विराजमानस्य श्रीरामचन्द्रस्य कल्याणोत्सवे प्रदर्शितः । अत्र विटः भुजङ्गशेखरः कदम्बमञ्जर्याः प्रथमरङ्गाधिरोहणोत्सवार्थमाहूतः प्रातरेव प्रस्थाय तत्र तत्र अटित्वा सायं तत्र गच्छति, कलत्रपत्रिकामाध्यमेन तां कलत्रीकरोतीति सामान्यमेवेति वृत्तम् । अत्र वसन्ततिलकपञ्चवाणविजयबाणयोः अनुकरणानि दृश्यन्ते । अत्रत्यकवितायाः विषये भाणे सूत्रधारमुखेन कविरेवेत्थं वक्ति–

क्वचित्प्रफुल्लकोल्ललन्मरन्दलाहरी
विहारमत्तबम्भरी सुगानमान्यमाधुरी ।
क्वचिद्रसालपल्लवाङ्कुराभिषेवणोल्लसत्
कषायकोकिलाङ्गनारवेन्दिरासहोदरी ।।
क्वचिन्निजद्विजाश्रितोल्लसत्कुरङ्गलोचना-
रदच्छदस्त्रवद्रसापहाससाधुपाण्डिती ।
क्वचित्प्रियोपगूहसम्भ्रमभ्रमन्मरुद्धुनी-
समुत्थितोरुभङ्गराजिभङ्गदक्षभङ्गिका ।।
क्वचित्सुमास्त्रमत्तकृत्तिकादृढस्वयंग्रह-
स्तनाग्रघृष्टनिर्दलत्सुधामयूखवक्षसः ।
विनिष्कवाटनिस्सरत्सुधाझरीसमाश्रय-
द्रसावधीरणक्षमा विभात्यमुष्य भारती ।।
मनोज्ञपदभासुरा महितमञ्जुलालङ्कृतिः
सुवृत्तकवितारसप्रचुररीतिवृत्त्युज्ज्वला ।
सदञ्जनदृगञ्चला कृतिवधूस्सुशय्याश्रिता

In Public domain. Digitization Muthulakshmi Research Academy

द्वतं वितनुते न कं ननु विना तृतीयाकृतिम् ।।

अस्य कवितायाः हृद्यमुदाहरणमिदं कदम्बमञ्जरीवर्णनम्–

गौरी लावण्यलक्ष्म्या मुखसुषमतया सैन्दवी सम्पदाक्ष्णोः
पद्मा भिन्नाङ्गरम्भामणिमयरशना नूपुरैर्मञ्जुघोषा ।
कस्तूर्या चित्ररेखा कलितरचनया शीलतः किं रति र्वे-
त्येता नो सन्त्यवन्यामसृजदिह विधिस्तत्कृते काममेनाम् ।।

एवमन्यदिदमपि सुन्दरीवर्णनं स्वादुतरम् ।

नीलात्यायतशैवलालकचया व्याकोचपद्मानना
प्रोद्यन्नीलकुवालपत्रनयना कल्हाररम्याधरा ।
प्रोद्यत्कम्बुशिरोधराब्जकलिका वक्षोरुहावर्तिका
नाभिर्वा सरसीनितम्बपुलिनासौ भाति लावण्यवाः ।।

न केवलमत्र पद्यमेव रम्यमपि गद्यमपि तु हृद्यम् । द्रष्टव्यमिदं वैदिकवर्णनम्– "बुधोऽपि मन्युविमुखः, सौम्योऽपि राजपूजार्हः, कुजनिरप्यमङ्गलाकृतिः, कलानिधिरप्यदोषाकरः, लोकबान्धवोऽप्यमन्दगुरुः, नीलाम्बरोऽप्यबलः, विग्रहासक्तोऽप्यविग्रहासक्तः, रताशामुक्तोऽप्यसुरताशामुक्तः ..... क्रूरपदसेवानिपुणोऽप्यक्रूरपदसेवानिपुणः" .....इत्यादि ।। एवमिदं प्रमदवनवर्णनमपि अलङ्कारशास्त्रग्रन्थसुगन्धितं हृद्यम्– "कुवलयानन्दमिव तद्गुणमुद्राश्लेषभाविकाक्षेपविभावनासङ्गत्युदात्तसंशयव्याघात – दृष्टान्तदीपकप्रौढोक्तिपरिकरसामान्यालङ्कृतिप्रयुक्तं, विद्यानाथमुखमिव प्रकटितप्रतापरुद्रयशोभूषणम्, प्रतापरुद्रयशोभूषणमिव विवृतचतुर्विंशतिगुणरत्नावल्यलङ्कारानेकनायिकासक्तं, अनेकनायिकासक्तहृदयमिव आहरमाणदक्षिणताक्षीणार्थजातं........" इत्यादि । एवं शब्दालङ्कारनैपुण्यमपि अद्वितीयम् । पश्यन्तु–

कवयस्ते किल कवयो मुखराजडजातसङ्गतिकृतार्थाः ।

In Public domain. Digitization Muthulakshmi Research Academy

कवयस्ते किलकवयो मुखराजडजातसङ्गतिकृतार्थाः ।।

एवं प्रासङ्गिकलोकोक्तयोऽपि स्थाने प्रयुक्ताः रञ्जकाः । पश्यन्तु–

1. विपदोऽपि भवन्ति सप्रसादे बत दैवे बहुसम्पदां समृद्ध्यै ।
अपि दारपरिग्रहागसेन्द्रो मुनिशप्तः किमभून्न दृक्समृद्ध्यै ।।

2. अल्पाहितासहतया प्रलपन्तु नाम
किं वा क्षतिः प्रतिभवेद्विदुषां कदा वा ।
कह्वा रटन्तु कटशङ्खनखापितुन्दाः
वर्षासु मानसचरस्य वहेलनं किम् ?

3. न गणयन्त्यथ विपदस्स्वाभिप्रेतार्थतत्पराः सरसाः ।
भिदिराङ्कुरभयदामपि जलधारां चातका न सेवन्ते ?।।

एवं पञ्जरस्थशुक्या भाषणमिव सुन्दर्या क्रियमाणं भाषणमपीदं रम्यम् ।

वहसि वदने रागं सौम्यं वपुष्यपि सौषमीं
हरसि सरसीस्वान्तं वाचा सुधालहरीमुचा ।
सुरुचिरकरस्पर्शावेशाद्रसादुपलालितः
क्व सरसि वसेदानीमस्मत्करान्तरपञ्जरे ।।

एवमत्र अनुपदं चमत्कारावहसम्भाषणेन, हृद्यवर्णनादिभिश्च रुचिरोऽयं भाणः कायेन महानपि सहृदयास्वाद्य एव बोभूयते । अत्रत्यकलत्रपत्रिकायां शा. श. 1761 वर्षः उल्लिखित इति अयं भाणः क्रि. श. 1839 वर्षे रचित इत्यूह्यते ।

एतद्भाणरचयिता[15] कोराडवंश्यः रामचन्द्रशास्त्री । अयमान्ध्रदेशीयः । पूर्वगोदावरीमण्डले 'कोनसीम' इति प्रथिते उपमण्डले अमलापुरनगरस–मीपस्थकेशनकुर्रुग्रामे जातोऽयं लक्ष्मणशास्त्रिसुतः, कृष्णपण्डितपौत्रः ।

15 संस्कृतकविजीवितम्–मल्लादिसूर्यनारायणशास्त्री– Part II-350; Contribution of Andhra to Sanskrit literature – B.Ramaraju-P. 433-442

In Public domain. Digitization Muthulakshmi Research Academy

अयं प्रथमं स्वमातामहसविधे एव विद्याभ्यासमकरोत्। अनन्तरं मदनाभ्युदयभाणकर्तुः शिष्टुकृष्णमूर्तिशास्त्रिणः सविधे साहित्यव्याकरणवेदान्तादिशास्त्राणि अधीतवान्। अयं शा. श. 1738 युववर्षे आश्वयुजशुक्लदशम्यां जातः अर्थात् क्रि. श. 1816 वर्षेऽयमुत्पन्नः, एकोनविंशशतकान्तं यावत् जीवनमयापयत्। अयं विद्याभ्यासकाले एव आशुकविरिति विख्यातः। अयं विद्याभ्यासकाले एव नडवपल्लिदेवालयप्राङ्गणे शतावधानमकरोत्। ततश्च शतावधानिबिरुदेन सम्मानितः। अयं कृष्णामण्डले मचिलीपट्टणनगरे 'नोबुल् हैस्कूल्' नाम्नि पाठशालायां चत्वारिंशत् वर्षाणि अध्यापकत्वं निरवहत्। अस्य श्वशुरः गोडवर्ति नागेश्वरावधानी। अयं रामचन्द्रशास्त्री आन्ध्रे संस्कृते च त्रिंशत् ग्रन्थान् अरचयत्। तेषु घनवृत्तकाव्यमत्यन्तं प्रसिद्धम्। अन्ये च त्रिचतुरा एव प्रकाशिताः। अनेन कमनानन्दभाणोऽपि रचित इति ऐतिहासिकैः उच्यते। परन्तु तदुपलब्धिविषये किमपि न ज्ञायते। अस्य अन्याः कृतयः–कुमारोदयचम्पूः, रामचन्द्रविजयव्यायोगः, धीसौधः (व्याकरणे), श‍ृङ्गारमञ्जरी, पुमर्थसेवधिकाव्यम्, देवीविजयचम्पूः, मृत्युञ्जयविजयः, कविकण्ठपाशव्याख्या, सर्वालङ्कारसङ्ग्रहव्याख्या, मञ्जरीमधुकरीयनाटिका, रथाङ्गदूतं, नयप्रदीपः, परशुरामविजय इति त्रयः गद्यग्रन्थाः। उन्मत्तराघव – मुद्राराक्षस – शाकुन्तल – उत्तररामचरितनाटकानि आन्ध्रभाषायामनूदितानि अनेन।

8.8 रसिकरञ्जनभाणः – सुन्दराजय्यङ्गारः

अयमपि भाणः केरलेष्वेवोत्पन्नः नाममात्रावशिष्टः, कुञ्जुण्णिराजामहाशयेन स्वीये केरलीयसंस्कृतसाहित्यचरिते सुन्दरराजकृतिषु समुल्लिखितः[16] एतद्भाणकर्ता सुन्दरराजः वैखानसः, आत्रेयगोत्रः, कृष्णाम्बावरदाचार्ययोः पुत्रः केरलेषु तिरुवान्कूर् समीपे एलत्तूरुग्रामे जातः। अयं चेल्लम् अ–

16 H.C.S.L-MK-P666 ; KSL-KR-P253-254.

In Public domain. Digitization Muthulakshmi Research Academy

य्यंगार् नाम्ना प्रसिद्धः। इलत्तूर् रामस्वामिशास्त्री, एत्तियपुरं स्वामिदीक्षितश्च अस्य गुरू। अयं एत्तियपुरं तिरुवान्कूर् अधिपतिभिः पोषितः उपाध्यायवृत्तिमवलम्ब्य जीवनमकरोत्। अस्य कालः क्रि. श. 1841–1905. अस्य कविता सरला हृद्या च।

अनेन च बहवः ग्रन्थाः रचिताः। रामभद्रस्तुतिः, कृष्णरायशतकं, नीतिरामायणमिति काव्यानि, वैदर्भीवासुदेवमिति नाटकं, स्नुषाविजय – हनुमद्विजय – पद्मिनीपरिणय – रसिकरञ्जनानि एकाङ्करूपकाणि, कंसवध-गोदापरिणय–वल्लीपरिणयचम्पूनां व्याख्याः, रामभद्रविजयश्रीनिवासदीक्षितेन्द्रचरितचम्पूप्रबन्धौ च अस्य कृतयः। वैखानसागमेऽपि अयं निष्णातः। तत्रापि अनेके ग्रन्थाः रचिताः।

8.9 रासविलासभाणः – केरलवर्मा

अयमपि भाणः नाममात्रावशिष्टः कुञ्जुण्णिराजामहाशयेनैव स्वीयकेरलीय संस्कृतसाहित्यचरिते उल्लिखितः[17]। एतद्भाणकर्ता केरलीयः पन्तालं राजवंशसम्बन्धी केरलवर्मनाम्ना प्रसिद्धः क्रि. श. 1879–1918 मध्ये आसीत्। अनेन 'कवनकौमुदी' नाम्ना मलयालभाषायां साहित्यप्रतिका प्रकाशिता। अयं संस्कृतपण्डितः। धर्मशास्त्राष्टकं, श्रीकृष्णस्तोत्रं, रासविलासभाणश्च अस्य कृतयः।

8.10 रामजन्मभाणः – ताराचरणशर्मा

काशीराजस्य नारायणसिंहस्य पुत्रस्य रामसिंहस्य जन्मोत्सवविशेषवर्णनपरोऽयं भाणः नारायणसिंहस्य आस्थानविदुषा ताराचरणशर्मणा क्रि. श. 1875 वर्षे रचितः, तेनैव राज्ञा प्रकाशितः, तत्रैव काश्यां ग्रन्थाल–

17 KSL-KR-P. 263

In Public domain. Digitization Muthulakshmi Research Academy

येऽस्ति[18]। अत्र विटः जरत्या, वेशयुवतीभिश्च सह सल्लपन् अटन् अन्ते जन्मोत्सवं प्रति गत्वा तत्रत्यान् विशेषान् वर्णयति। अत्र जन्मोत्सवे गी–यमानानां गेयानामपि समावेशः कृतः। जन्मोत्सवेषु उत्तरप्रदेशेषु अनु–ष्ठीयमाना पद्धतिः अत्र वर्णिता।

8.11 श्यामलाभाणः–चिन्तामणिः

न्यू काटलागस् काटलागोरुम् (NCC) मध्ये अयं भाणः उल्लिखितः। अयं च क्रि. श. 1826 वर्षे रचित इति च तत्रैव उल्लिखितम्। अस्य भाणस्य रचयिता चिन्तामणिः, जीवस्य पुत्रः, महाराष्ट्रियः कोल्हापुरप्रभोः साहूमहाराजस्य आस्थानज्यौतिषिकः आसीत्। अयं साहूराजः शिवा–जीवंशे उत्पन्नः शिवाजीमहाराजात्परं पञ्चमः। अयं चिन्तामणिः 'छन्द–स्सार' इति छन्दोग्रन्थमप्यरचयत्।

8.12 रसिकभूषणभाणः – उदयवर्मा

अयं भाणः कायेन अल्पः। षट्षष्टिश्लोका एवात्र सन्ति। केरलेषु 'लो–कमलयार्कावु' इति क्षेत्रे देवीयात्रोत्सवेषु प्रदर्शितोऽयं भाणः नादापुरं जन–रञ्जनीमुद्राक्षरशालाद्वारा क्रि. श. 1892 वर्षे एव प्रकाशितः। अत्र कविता सरला सरसा च। कविः स्वयमेव स्वीयकविताविषये इत्थं वक्ति –

> **"वाणी तस्य महीपतेः श्रवणयोरानन्दसन्दायिनी**
> **श्रृङ्गारश्च रसोऽत्र शास्त्रकुशलाः सर्वे सभावासिनः।।"** इति।

इदं सूर्योदयवर्णनमस्य शैल्याः निदर्शनम्–

> **क्षोणीं पट्टपटावृतामिति मतिं तन्वद्भिरम्भोजिनी**
> **कान्तोऽयं नवरक्तदीधितिगणैराबोधयन्पद्मिनीम् ।**
> **उत्तुङ्गोदयशैलश्रृङ्गशिखरप्रासादमासेदिवान्**

18 आधुनिकसंस्कृतरुपक–P. 719.

In Public domain. Digitization Muthulakshmi Research Academy

प्राचीवारवधूश्च रागभरिता जाता क्षणेऽस्मिन् बत ।।

एवं नायकस्य नायिकया सह भाषणमपीदं हृद्यम्–

अलमलमिह बाले वाग्भिरेतादृशीभिः
सुमुखि वितर दासे मय्यनुज्ञां निबन्धुम् ।
तव कचभरबन्धव्याजतश्चित्तसंज्ञं
मदगजमिह गात्रालानमूले तवाद्य ।।

अत्र च गद्यमपि नैषधचम्पूप्रबन्धस्य अनुकरणरूपमिति राजराजवर्मा केरलसंस्कृतसाहित्यचरिते लिखति। अयं च भाणकर्ता उदयवर्मा देवीभक्तः। 'श्रीलोकाचलवासिनी भवतु मे नित्यं प्रसन्ना शिवा" इति भरतवाक्यमत्र प्रमाणम्। अयञ्च[19] उत्तरकेरलेषु प्रसिद्धेषु संस्कृतज्ञेष्वन्यतमः। माता देवीतम्पुराट्टी। पिता कुट्टिपुरत्तु कक्काटिल्लत्तु नारायणं नम्बूद्रिः। कोविलकत्तु कृष्णवर्मा अस्य सोदरः। अयं कडत्तुनाट्टु राजवंशसम्बन्धी। अयं स्वीयसोदरस्य सविधे एव विद्याभ्यासं कृतवान्। अयं स्वयं कविः, पण्डितः, कविपण्डितपोषकश्च आसीत्। अयं प्रमुखः पत्रिकाकारोऽप्यासीत्। गोविन्दपिल्लै स्वीयभाषाचरित्रे अमुं विद्वज्जनाश्रयदातृत्वेन रसिकशिरोमणित्वेन कविदिग्गजत्वेन च समकीर्तयत्। अयं कविकलापकाव्यमपि अरचयत्। तस्मिन् प्राचीनाः चतुष्षष्टि संख्याकाः कवयः परिचायिताः। तत्र अनेके केरलीया एव। तेषां ग्रन्थेषु गुणदोषविचारः सम्यगनेन कृतः। अस्य कालः क्रि. श. 1864–1906.

8.13 शृङ्गारसर्वस्वभाणः – स्वामिशास्त्री

लीलावतीलीलावतंसयोः प्रणयवृत्तमितिवृत्तमाश्रित्य रचितोऽयं भाणः तमिलनाडुराज्ये तिरुचिरापल्लिनगरे स्थितस्य मातृभूतेश्वरस्य वैशाखो–

19 केरलीय संस्कृतसाहित्य चरितम् – (मलयाले) – Part IV-P95-99; K.S.L.-KR-P263.

In Public domain. Digitization Muthulakshmi Research Academy

त्सवेषु प्रदर्शनार्थमुद्दिष्टः। अयञ्चाप्रकाशितः मद्रपुरी तालपत्रग्रन्थालये[20] संरक्ष्यते। अत्रत्या नान्दी–

आत्मानं रमणं च चित्रफलके प्रक्रान्तकामावहा–
वालिख्य स्मितपूर्णगण्डफलकामालोकयन्तीं रहः।
आश्लिष्याद्रिसुतां त्रपावनतमप्युन्नम्य तस्या मुखं
भ्राम्यद्भ्रूलतमुल्लसन्नयनमाजिघ्रन् हरः पातुः वः।।

अयं च भाणकर्ता स्वामिशास्त्री अनन्तनारायणशास्त्रिसुतः, सुब्रह्मण्यसु–धीवरस्यानुजः। अयं चित्तूरुमण्डला (आन्ध्र) न्तर्गतकार्वेटिनगरप्रभुणा रामचन्द्रापराभिधानेन 'बोम्मराजु' नाम्ना सम्मानित इति कृष्णमाचा–र्याः[21]। अतः अयं क्रि. श. एकोनविंशशतक – पूर्वार्धे भवेदिति ऊह्यते। अयं मुद्राराक्षसव्याख्यामप्यकरोत्। अयमनन्तसागरग्रामे न्यवसत्।

8.14 शृङ्गारमञ्जरीभाणः – केरलवर्मा

अत्र विटः प्रातरेव प्रस्थाय तत्र तत्र अटित्वा, तैः, तैः सम्भाष्य अन्ते शृङ्गारमञ्जरीगृहं गत्वा तया सह भाषते। अत्रेतिवृत्तमात्माश्रयं वा पराश्रयं वेति स्पष्टं न ज्ञायते। अत्र शैली परिष्कृता निरवरोधा च। अत्रत्यकवि–तायाः उदाहरणभूताविमौ नान्दीश्लोकौ।

लक्ष्मीं पक्ष्मलयन्तु वः सुरवधूसीमन्तमुक्तामणी-
संयोगद्विगुणीकृताङ्घ्रिनखरश्रेणीमयूखाङ्कुराः।
कुर्वाणाश्चरणानतस्य धिषणाध्येयं वचो नैपुणं
पुण्यानां निकरास्समस्तभुवनक्षेमंकराः शाङ्कराः।।

अपि च–

पीयूषद्रववधोरणी मधुरमाहङ्कारसर्वंकषा

20 G.O.M.L. - Madras R No 12709.
21 H.C.S.L-Mk-P. 608-F.N.4

In Public domain. Digitization Muthulakshmi Research Academy

शीतांशोः कुरुते हरत्यपि रुचां यत्कीर्तिमत्तां भृशम् ।
नेत्रासेचनकं मनोभवरिपोर्धैर्यैकपाटच्चरं
कुर्याद्वस्तदहार्यवर्यदुहितुर्मन्दस्मितं मङ्गलम् ।।

भाणेऽस्मिन् प्रातः कालवर्णनं, लेखाक्षराणां तारागणौपम्यवर्णनादिकं च हृद्यम्। इदं च तरुणीमणिकुचमण्डलवर्णनमत्यन्तहृद्यम्–

पुञ्जीभवन्निखिलकामुकधैर्यसार
सर्वस्वसम्भरितकुम्भरुचिं दधाना ।
जीयात्तृतीयपुरुषार्थसमर्थनैक
सामर्थ्यधुर्यतरुणीकुचमण्डली सा ।।

भुवनेश्वरस्य यात्रोत्सवेषु प्रदर्शितोऽयम् अप्रकाशित एव तिरुवनन्तपुरस्थतालपत्रग्रन्थालये[22] सुरक्षितोऽस्ति । एतद्भाणकर्ता[23] केरलवर्मा, बलियकोयिल् तम्पुरान्, केरलकालिदासनामभ्यां प्रसिद्धः पेरप्पनाट्टुराजवंशीयः । अयं क्रि. श. 1845 वर्षे चण्णनाश्शेरि लक्ष्मीपुरराजप्रासादे अजायत । माता देवी अम्बा । पिता मुल्लप्पिल्लै नारायणं नम्बूतिरिः । मातुलस्य निर्देशे एवायं विद्याभ्यासमकरोत् । एलत्तूरु रामस्वामिशास्त्री, चोलदेशीयः रामस्वामिशास्त्री, सुब्बदीक्षितः, सीनु अय्यंगार्, अस्य न्याय-वेदान्त–व्याकरणादिशास्त्रेषु गुरवः । सङ्गीते, मृगयायां चास्यासक्तिरधिका। अस्य विशाखं तिरुनाल् रामवर्मा मित्रम्। अस्य मित्रस्य पित्रा अयिल्यम् तिरुनाल् महाराजेन अयं पोषितः । अयं केरलवर्मा संस्कृते मलयाले च प्रसिद्धः कविः । मलयालभाषायां मयूरसन्देशः, शाकुन्तलस्य अनुवादश्च अस्य कीर्तिकरावास्ताम् । एताभ्यामेवायं केरलकालिदासनामा जातः । अयं स्वीये षोडशे वर्षे तिरुनाल् प्रबन्धं रचितवान् । क्रि. श. 31-7-1868 दिने शृङ्गारमञ्जरीभाणः स्वपोषकमहाराजाय समर्पितः । क्रि.

22 Curators office library-Trivendram-No. 1339.
23 K.S.L. - KR. P. 254-256

In Public domain. Digitization Muthulakshmi Research Academy

श. 1869 वर्षे कंसवधचम्पू प्रबन्धमरचयत् यस्य व्याख्या सुन्दरराज-य्यंगार् महाशयेन रसिकरञ्जनभाणकर्त्रा रचिता। ललितादण्डकं च स्व-पत्न्याः प्रार्थनया क्रि. श. 1875 वर्षे रचितम्। एवं नक्षत्रमाला, पादार-विन्दशतकं, चित्रश्लोकावलिः, गुरुपवनपुरेशस्तोत्रं, कृष्णस्तुतिः, स्क-न्दशतकं, नारदीयमहिमानुवर्णनं, अमृतमथनं, तुलाभारशतकं, विक्टो-रियाचरितमित्यादिग्रन्थाः अनेन रचिताः। अयं च स्वीये 69 वर्षे वयसि दिवंगतः। अस्य भागिनेयः ए. आर्. राजराजवर्मा अस्यैव शिष्यः आसीत्।

8.15 रसरत्नाकरभाणः – जयन्तः

अप्रकाशितेष्वन्यतमोऽयं भाणः मद्रपुरी तालपत्रग्रन्थालये[24] सुरक्षितः। तिरुवान्कूरुमहाराजस्य वाञ्चिभूपस्य आज्ञया तिरुवान्कूरुनगरे प्रदर्शितः। सकलरसभाण्डभूतोऽयं भाण इति सूत्रधारवचनानि भाणस्यास्य महत्त्वं कथयन्ति।

कुञ्ञुण्णम्बियार् इत्यपरनामा एतद्भाणकर्ता जयन्तः क्रि. श. 1804-1874 मध्ये आसीत्। स्वाति तिरुनाल् महाराजेन, उत्तरं तिरुनाल् म-हाराजेन च पोषितः। अयं संस्कृते मलयाले च समानप्रज्ञावान्। अस्य प्रतिभायाः निदर्शनमिदं समसंस्कृतमलयालं पद्यम्-

राधेयं तटिनी केलिवने सहसा कलालि राममतरुते।
चपलकलायवनरुचि प्रियतममामोदयार्द्रता बहुचतुरम् ।। इति।

8.16 वल्लवीपल्लवोल्लासभाणः – मञ्जुलाचार्यः

रसालतिलकापल्लवशेखरयोः प्रेमोदन्तमितिवृत्तमत्र। असम्पूर्णोऽयं म-द्रपुरी तालपत्रग्रन्थालयेऽस्ति[25]। अयञ्च वराहनरहरिदेवस्य चैत्रयात्रोत्सवेषु

24 GOML-Madras R 3307 ; KSL-KR-P. 268
25 GOML-Madras-R No 1292

In Public domain. Digitization Muthulakshmi Research Academy

प्रदर्शित इति ज्ञायते। अयञ्च देवः आन्ध्रेषु विशाखपट्टणसमीपवर्तिसिं-हाचलक्षेत्रे विराजमानः वराहनरसिंहः स्यादित्यूह्यते। अत्रेयं नान्दी–

श्रीकान्ता तव जीवितं खलु ततो वक्षःस्थले लक्ष्यते
नैकान्तामयि चित्तवृत्तिरिह ते बुद्धातिमुग्धाकृतिः।
काकान्ताद्य मदुक्तिरित्यतितरक्रोधाधिकां राधिकां
श्रीकान्तैव भवत्यसीत्यनुनयन् पीताम्बरः पातु वः।।

एतद्भाणकर्ता मञ्जुलाचार्यः आन्ध्रदेशीय सर्कार् मण्डलवासी भवेदिति, क्रि. श. एकोनविंशशताब्दे आसीदिति च कृष्णमाचार्यः[26]। अयं वसिष्ठगोत्रः, गौरीसर्वज्ञपण्डितयोः पुत्रः। सूर्यपण्डितस्य पौत्रः। अस्य जन्म नाम कु-मारकृष्णमूर्तिः। बुच्चयार्यः, वेङ्कटपण्डितश्च अस्य ज्येष्ठपितृव्यौ। अस्य कृत्यन्तरं कङ्कणबन्धरामायणम्।

8.17 शृङ्गारराजतिलकभाणः – अविनाशीश्वरः[27]

वरदराजपुराग्रहारवैशाखोत्सवेषु प्रदर्शित एष भाणः अप्रकाशितः मद्र-पुरीतालपत्रग्रन्थालये सुरक्षितः। वरदराजपुरे वैशाखोत्सवाः किञ्चित्कालं स्थगिताः पुनः मैसूर्–राज्याधिपस्य कृष्णराजपुत्रस्य चामराजस्य आ-ज्ञया पुनरारब्धा इति, तत्सन्दर्भेऽयं भाणः प्रदर्शित इति ज्ञायते। कवितात्र सरला, सरसा च। उदाहरणभूतमिदं वरदराजपुराग्रहारवर्णनम् –

कवेरतनया तटे स्फुरतिनागगन्धर्वरा-
ङ्वसुग्रहविराजितं सघनवाहनं शोभनम्।
बुधाभिवृतमप्सरोगणलसत्सुधर्माश्रितं
पुरन्दरपुरोपमं वरदराजसंज्ञं पुरम्।।

26 HCSL-MK-P195
27 GOML-Madras – Dis. Cat. No. XXI No 12708.

In Public domain. Digitization Muthulakshmi Research Academy

देवनगर्याः अमरावत्याः वरदराजपुरस्य च औपम्यवर्णनमिदं श्लेषालङ्का-रानुप्राणितं हृद्यम्। तथैवात्र नान्दी अपि हृद्या-

कल्याणानि करोतु नः करिमुखः शुण्डास्खलत्स्फूत्क्रिया-
निष्ठ्यूतोत्पततदब्जबन्धुनिकरानालोक्य लोलेक्षणः।
मुक्ताजालधियोत्तरीयचलनस्त्रस्तेभकुम्भोज्वल-
दृश्यादृश्यकुचं समागतवतीः स्वर्वारकान्ताः हसन्॥

एतद्भाणकर्ता अविनाशीखरः आत्रेयगोत्रः, वन्दवाशिवंश्यः, वेङ्कटाम्बाप-ण्डितरामयोः पुत्रः। अस्य गुरुः शेषाद्रिः मैसूर् महाराजस्य चामराजस्य सभापण्डितः आसीत्। राजायम् एकोनविंशशतकोत्तरभागे राज्यपालन-मकरोदिति ज्ञायते। तत्समकालीनोऽयमपि एकोनविंशे शतके आसीदिति वक्तुं शक्यते।

8.18 गोपाललीलार्णवभाणः – उटके गोविन्दाचार्यः

अयमपि भाणः[28] अप्रकाशितः तञ्जापुरहस्तलिखितग्रन्थालये सुरक्षि-तोऽस्ति। अयञ्च भाणः कविना स्वमित्रस्य गोविन्दस्य प्रेरणया विरचित इति, अत्र जामातॄणां दुश्चेष्टितं वर्णितमिति च अनया प्रस्तावनया अवगम्यते-

जामात्रादिजनस्य चेष्टितमभिव्यक्तीचकाराखिलं
यत्र श्रीकमलापतेः सुचरितं सामर्थ्यमप्यात्मनः।
गोविन्दाख्यसुहृत्कृतेऽयमुटके गोविन्दनामा कविः
प्राणैषीदधुनैव भाणमतुलं गोपाललीलार्णवम्॥

अत्र कविता सरसा सरला च। पश्यन्त्विमां नान्दीम् –

क्रीडानिर्भरमीलितेक्षणमतिश्वासोद्गमप्रस्फुर-

28 Tanj- VIII 4583 ; Trivendram – 3393 ; NCC. Part III – P. 192-193

In Public domain. Digitization Muthulakshmi Research Academy

द्वक्षोजद्वितयं विलोलकबरीप्रच्छादितांसाननम् ।
व्रीला (डा) वन्नमितोत्तमाङ्गमनिशं सस्मेरवक्राम्बुजं
रत्यास्तत्सुरतान्तकान्तिरुचिरं भूयाद्वपुः श्रेयसे ।।

अयं च भाणः श्रीनिवासस्य आस्थानोत्सवेषु प्रदर्शितः ।

अयं च भाणकर्ता उटके गोविन्दाचार्यः, सरस्वतीरङ्गाचार्ययोः त्रिषु पुत्रेषु मध्यमः, तञ्जापुरवासी । तञ्जापुरतालपत्रग्रन्थविवरणग्रन्थे अयं महाराष्ट्रस्यादित्यभ्यूहितं तन्न सम्यक् । तथैव विनतानन्दव्यायोगकर्तुः शेषगोविन्दादपि अयं भिन्न एव । अयं च क्रि. श. एकोनविंशे शतके आसीदिति सप्रमाणं निरूपितवन्तः डा. वि. राघवन् महाशयाः । अस्य गुरुः कौलगि वासुदेवाचार्यः । भगवद्विचारललितार्या, विरक्तिमुक्तावलीति ग्रन्थद्वयं गोविन्दाचार्यस्य कृत्यन्तरं अडयार् ग्रन्थालयपत्रिकायां क्रि. श. 1969 वर्षे प्रकाशितम् । तत्र विरक्तिमुक्तावलीरचनासमयः क्रि. श. 1862 वर्षः निर्दिष्टः । अतः अस्य कालः क्रि. श. एकोनविंशशतक इत्यत्र न कश्चन सन्देहः ।

8.19 विटराजविजयभाणः – कोच्चुण्णि भूपालः

अयमपि केरलेषु बहुधा प्रसिद्धः प्रकाशितश्च[29] पराश्रयमेवेतिवृत्तमत्र । आनन्दवल्लीति वेश्यायाः स्वयंवरः । तदर्थं विविधदेशेभ्यः नेपाल् – भूटान्– आदिदेशेभ्योऽपि महाराजाः आगताः । भद्रसेन इति केरलीयः राजा तु तस्यामनुरक्तः तां वाञ्छति । अतः विटः भद्रसेनस्य प्रार्थनया आनन्दवल्लीं भद्रसेने अनुरक्तां कर्तुं प्रयतते, सफलश्च भवतीति इतिवृत्तमत्र कल्पितम् । अतोऽन्वर्थनामायं भाणः । भाणान्ते च विटः आनन्दवल्लीमित्थं प्रचोदयति–

29 Printed with critical notes by panditaraja P.S. Ananta narayana Sastri, at Mangalodayam Press.

In Public domain. Digitization Muthulakshmi Research Academy

यं दृष्ट्वायं वसन्तो वनमधिवसति ह्रीपरादम्बरान्तं
चन्द्रो मन्दाक्षचेलावृतमसमशरस्त्रीजनानां हृदन्तम् ।
राजायं केरलेन्द्रः सकलकलनिधिः भद्रसेनोऽस्य कण्ठं
पुण्याढ्ये मण्डय त्वं दरनिभमनया मालया मालसा स्याः ।।

इति ।

अस्मिन्नपि भाणे विटः प्रातरेव समुत्थाय स्वकार्यार्थं प्रस्थितः । प्रस्थानसमयेऽयमित्थं प्रतिजानीते–'वक्रशस्त्रशलाकां वक्रयन्त्रेणेव वञ्चनशीलां वञ्चनेनैव वशीकृत्य तयैव कार्यमिदं घटयामि' इति । आनन्दवल्लीमपि विटः इत्थमेव सान्त्वयति–

विघ्नान् विनाश्य गणनाथ इवाद्रिकन्या-
भक्तप्रियेण भवतीं घटयामि तेन ।
भीमं झषं बक इवात्र समुद्यतं मां
दृष्ट्वा निमीलयति दृष्टविधिः स्वदृष्टिम् ।।

एतादृशं चतुरं भाषणमान्तं सहृदयानानन्दयति । कवितापि सुमधुरा । पश्यन्त्विदं कन्दुकविहारवर्णनम्–

मन्दोच्चलन्मणिविभूषणमञ्जुनादं
ताटङ्कचक्रहतिताम्रकपोलमूलम् ।
ताराविलासविलसत्तरलायताक्षं
कान्तं वपुर्जयति कन्दुकलीलयास्याः ।।

अत्रत्यप्रभातवसन्तादिवर्णनमपि मनोहरम् । अस्य कवेः कल्पनाशक्तेः निदर्शनम् । एवमन्यापदेशवचनान्यपि अत्र हृद्यानि । तत्रोदाहरणभूतोऽयम्–

जयतीह यन्मधु सुधारसोपमं
नवमल्लिकामपि विमज्जतामहो ।

In Public domain. Digitization Muthulakshmi Research Academy

अभिषेककालमपि सोढुमक्षमो
मधुप क्व यासि परिगृह्य चापलम् ।।

एवमत्र वेश्याजनन्याः विकृतरूपवर्णनेन बीभत्सरसः, गजविजृम्भणादिभिः वीररसः च भाणान्तरेष्विव सूचितौ। हास्यरसस्य च कश्चन चमत्कारावहः सन्दर्भः अत्र कल्पितः। जनपदेषु यदि कश्चन नूतनः विशिष्टवेषधारी समागच्छति चेत् ग्रामीणाः बालाः तं परितः तिष्ठन्ति, तमनुगच्छन्ति च। तथैव कश्चन राजसेवकः कल्याणखण्डनामा समागतः। सः यदा वीथ्यां गच्छति तदा तत्रत्याः बालाः तमनुसरन्ति स्म। एव मनुसरद्भिः बालैः सः सचमत्कारं भाषते इत्थम्–

"अये! अयमुन्मत्तोन्मत्त महोन्मत्त! भवत्तातस्य भवतो वा वयोऽधिकम्। श्रुतमस्माभिः अतीते मासि कश्चन मृत इति किं भवानेव। किं तवास्मिन् कक्षस्थिते भाण्डे? किन्नु मातृश्मश्रुपिण्डमुतहस्तिन्यण्डकोशमथवा स्तनभारः कुम्भकर्णस्य? किमुच्चैश्रवसं रयेण जेतुमेवं धावसि? अथवा आकाशपतनभयेन उत सदागतिग्रहणाय" इत्यादि परिहासवचनवाचालिताशैः बालकैरनुगम्यमानः इत एवागच्छति।" एवमस्य कल्पनानैपुण्यस्य भावगाम्भीर्यस्य च इयं नान्दी एव निदर्शनभूता–

गम्भीरंस्निग्धघोषो जयति गणपतेः कर्णतालः स शम्भोः
नृत्ते मन्दाक्षमन्दं हरिमभिरचयन् दुन्दुभिं ताडयन्तम् ।
यद्वातो दानधाराव्यतिकरसुरभिर्नृत्यदीशानखेद-
स्वेदच्छेदी विधत्ते प्रणतहृदि सुखाम्भोधिमुद्वेलमुच्चैः ।।

एवमनुपदं सहृदयहृदयाह्लादकोऽयं भाणः केरलीयेन कोच्चुण्णिभूपालेन रचितः। अनेनैव अनङ्गजीवननाम्ना भाणान्तरमपि रचितम्। अतस्तस्यापि भाणस्य परिचयात्परं भाणकर्तुः विषये चिन्तयामः।

In Public domain, Digitization Muthulakshmi Research Academy

8.20 अनङ्गजीवनभाणः – कोच्चुण्णि भूपालः

अयमपि भाणः केरलविश्वविद्यालयेन क्रि. श. 1960 वर्षे प्रकाशितः[30]। यदि च अमुं विटराजविजयेन तोलयामः तर्हि रस्यतात्र तदपेक्षया कि-ञ्चिदिव न्यूनैवानुभूयेत अथापि उत्तमकोटिमेवाटीकतेऽयमपि। अयमपि भाणः पराश्रयेतिवृत्तवानेव। अत्र विटः शृङ्गाररसारः। आनन्दवल्लीभद्रसे-नावेव नायिकानायकौ। स्वयंवरानन्तरं कस्मिंश्चित् काले अतीते प्रवृत्ता कथा अत्रेतिवृत्तरूपेण स्वीकृतेति विभावनीयम्। वेश्यास्तु नैकेनैव सर्वदा भवन्ति। अतश्च कालेन आनन्दवल्ली अन्यस्य कस्यचित् कलत्रीभूता। तथासति वियोगमसहमानयोः तयोः द्वयोः पुनः सङ्गमाय विटोऽयं प्रयतते इति चिन्तनीयम्। अत्र च विटः आनन्दवल्लीं यः कलत्रीकृतवान् तं ग्रा-मान्निष्कास्य अनयोः द्वयोः समागमं साधयति इति इतिवृत्तमत्र।

अत्र सङ्गीतसरणिः सम्यग्वर्णिता। भवभूत्यादिपूर्वकवीनां अनुकरणानि बहूनि। कामलोलाख्यवेश्याजरतीवर्णनम्, तया च संभाषणं चमत्कारावहम्। एवमिदं प्रभातवर्णनमपि हृद्यम् –

झटितिघटितकोकचित्तपद्मैः
सरसिरुहाणि समं समुल्लसन्ति।
प्रियविरहवशाद्वधूमुखेन्दुः
सह परिशुष्यति हा सुधाकरेण।।

एवमयमन्यापदेशोऽपि हृद्यः–

अप्यन्यदीयामुपलभ्य गूढं
माणिक्यमालां सकलाभिरामाम्।
अप्येकवारं न गले निधातुं

---

30 Kerala University Sanskrit senies – 191 – AD -1960

In Public domain. Digitization Muthulakshmi Research Academy

कः कामयेतात्र पुमान् रसज्ञः ।।

एवमयमन्यः–

संप्राप्य दिष्ट्या सम्पूर्णं शरत्कालसुधाकरम् ।
कथं तत्किरणास्वादलोला न स्यात् चकोरिका ।।

एवं गाम्भीर्यवतां जनानां प्रवृत्तेः वर्णनमिदमपि बहु हृद्यम्।

गम्भीरस्तु जनोऽतिवर्धितमपि क्रोधं प्रमोदं च वा
लोकानां प्रकटीकरोति बहुशो निर्बन्धनैरेव हि ।
अम्बोधिर्धरणीधरेन्द्रमथनैरेव व्यतानीत् स्फुटं
घोरात्यूष्मलकालकूटगरलं स्वादु प्रियं चामृतम् ।।

एवं स्थालीपुलाकन्यायेन एतद्भाणद्वयगतचमत्काराः केचन परिशीलिताः। अथेदानीं तत्कर्तुः परिचयं किञ्चिज्ज्ञास्यामः ।

कविसार्वभौम–कोडुङ्ङल्लूर्–कोच्चुण्णि तम्पुरान्[31] इति प्रख्यातस्य अस्य जन्म नाम रामवर्मा। माता इक्कावु तम्पुराट्टी। पिता पुराडत्तु नम्बूदिरिः । गुरुः कुलाचार्यः कलप्पिन् आशान् । अनेन काव्याभ्यासः गोदवर्म तम्पुरान् सविधे, व्याकरणशास्त्राध्ययनं कृष्णशास्त्रि–कुञ्जुण्णि तम्पुरान् महोदययोः सविधे, तैकाट्ट् इट्टीरिमास् सविधे वैद्यकाध्ययनं, स्वामिमानगिरिसविधे वेदान्तध्ययनं चाकारि। अयं द्वादशे वयस्येव काव्यरचनायाम् समर्थः आसीत्। विंशे वयस्येव अयं महापण्डितः आसीत्। द्रुतकवितादिविनोदेषु अयमाध्यक्ष्यं कृतवान् । अस्य वंशः तर्क–व्याकरण–मीमांसा–ज्यौतिष–वैद्यक–सङ्गीतादिशास्त्रेषु निष्णातः आसीत् । अयं कविः कोच्चिन् राज्यान्तर्गतकोटिलिङ्गपुरराजवंश्यः । अस्य च चिरिय (बाल) कोच्चिण्णि तम्पुरान् इति नाम। पेरिय (ज्येष्ठ) कोच्चुण्णि तम्पुरान् वंशेऽस्मिन् महाज्यौतिषिकः आसीत् । कविरयं क्रि. श. 1918 वर्षे को–

31 केरलीय संस्कृतसाहित्यचरितम् – (मलयाले) Part V-P248-352

In Public domain. Digitization Muthulakshmi Research Academy

च्चिन् प्रभुणा कविसार्वभौमबिरुदेन सम्मानितः। अयं स्वसमसामयिकैः सर्वैः आदिशेषस्य अवतार इति कीर्तितः। अयं स्वीये विटराजविजये स्वीयपाण्डितीवैभवं शुकपात्रद्वारा इत्थं प्रकाशयति– "किं वदसि ? शृणु। सर्वं सङ्क्षेपतः कथयामि। श्रीकुरुम्बवने देवीपुरस्थितजीर्णाश्वत्थवृक्षद-क्षिणशाखाकोटरे मम जन्म। वर्धितोऽहं नवप्रासादवासिनीभिः कोटि-लिङ्गपुरक्षितीश्वरीभिः। तासामेवास्मि दिष्ट्या लब्धस्य समास्वादितस्य देव्युच्छिष्टत्रिमधुरस्य प्रभावादिदं दिव्यज्ञानं मे जातम्। श्रुतिस्मृतिपुरा-णेतिहासशास्त्रसङ्गवैद्यज्योतिषमन्त्र – तन्त्र – दण्डनीति – नाटका-लङ्कारकवनव्याख्यानसर्वभाषा – चित्रलेखनसङ्गीतेन्द्रविद्याः सकलक-लाश्च मयाभ्यस्ताः। कुम्भकोणे जातः सकलगुणसिन्धुः तत्र भवान् स-र्वज्ञचूडामणिः श्रीकृष्णविप्रेन्द्रो ममाचार्यः।" इत्यादि। अयमपि काली-भक्तः। पाण्डवोदय–सावित्रीचरित–वञ्चीशवंश–श्रीशादित्यचरितादि त्रिं-शद्ग्रन्थाः अनेन मलयालभाषायां रचिताः। संस्कृते च – विटराजवि-जयानङ्गजीवनभाणौ, बाणयुद्ध–विद्वद्युवराजचरितचम्पूप्रबन्धौ, विप्रस-न्देशः, रामचरित–उत्तमचरितमहाकाव्ये, शिवाख्या, दशावतारप्रयोजनम् अन्यापदेशः, देवीमाहात्म्यस्तोत्रं, कृष्णकर्णामृतव्याख्या, आरोग्यशास्त्रं च अस्य कृतयः। अस्य कवितापि मधुरा सरसा भावगम्भीरा च। रसो-पयुक्तपदबन्धः चमत्कारावहकल्पना, अलङ्कारप्रयोगचातुर्यं च अस्य स-हजसिद्धानि। अयं स्वीयभाणद्वये स्वकवितामित्थं प्रशशंस।

> माधुर्यैकनिधानमर्थभरितं कोचुण्णि धात्रीपतेः
> नाश्चर्यं हि नराश्च सूक्तमनिशं जल्पन्त्यनल्पं मुखैः।। इति[32]
> सुललितपदन्यासां दोषव्रजेन विवर्जितां
> गुणगणयुतां सालङ्कारध्वनिं रसवर्षिणीम्।

32 विटराजविजये

In Public domain. Digitization Muthulakshmi Research Academy

निजकृतिनटीं लोकाह्लादप्रदां समनर्तयत्
सकलविबुधोत्तंसो धीमान् स सत्कविपुङ्गवः ।।
विद्याकुन्दसुमोपमद्युतिधरा वाणीप्रसन्ना भृशं
यच्चित्ते विमले विभाति सततं चान्द्रीव लेखाम्बरे ।।
गीर्वाणेषु शचीपतिर्हि सुमहान् सर्पेषु तल्पं हरेः
नागेष्वभ्रमुवल्लभोऽब्धिषु पयःसिन्धू रथिष्वर्जुनः ।
आनन्देषु शिवात्मजाभजनजः शैलेषु हेमाचलो
लोकेषु त्रिदिवः कविष्विव बुधः कोच्चुण्णि भूपालकः ।।[33]

इति अस्य स्तुतिरियं यथार्थैवेति वक्तव्यम् । अस्य कालः क्रि. श. 1858-1926.

8.21 शृङ्गारजगन्मोहिनीभाणः – साधुपल्लि चन्द्रशेखरकविः[34]

अयं च भाणः नाममात्रावशिष्टः । एतद्भाणकर्तृत्वेन प्रथितः बालचन्द्र-शेखराभिधानः साधुपल्लि ग्रामाभिजनः । अयं साधुपल्लिं ग्रामः आन्ध्रक-र्णाटकराज्ययोः सीमायामस्ति । अस्य पिता वेङ्कटरायः शिवभक्तः । अयं कविः मैसूर् महाराजेन पोषितः । अयं कविः अमरुकशतकस्य शृङ्गार-लहरीति नाम्ना आन्ध्रपद्यानुवादमकरोत् । तत्र आत्मनः विषये, आत्मनः कृतीनां च विषये इत्थमवोचत्-

"इति श्रीमत्त्रिपुरसुन्दरीकृपापरीवाहपारम्परीसमालब्ध – षड्वि-धविचित्रकवित्व – निरङ्कुशप्रभाभासमाननिरन्तरमदान्तकार्चनधुरीण – कोटिपञ्चाक्षरीजपप्रवीणसाधुपल्लीवल्लीमतल्लीवासि – सकलबुधजनोल्लासि – विद्वज्जनविधेय – वेङ्कटरायनामधेयतनूभवशृङ्गारजगन्मोहिनीभाण-

33 अनङ्गजीवनभाणे

34 आन्ध्रामरुकम् – चन्द्रशेखरकविः – Essay by Sri Vedam Venkatakrishna sarma – Bharati 1958 (Telugu Jurnal)

In Public domain. Digitization Muthulakshmi Research Academy

निर्माणचातुरीधुरीण – विनिर्मितभाणसन्धान – श्रीमन्महीशूरमहाराजा-स्थानलब्धप्रतिष्ठाविद्योतमानबालचन्द्रशेखराभिधान – विद्वन्मणि प्रणीतं शृङ्गारलहर्याख्यान्ध्रामरुके (प्रथमाश्वासः)" – अस्य च कृतयः अनेनैव स्वीये काव्ये इत्थं निर्दिष्टाः – (1) सत्यभामामणीसान्त्वनम्, (2) मनु-चरित्रम्, (3) प्रचण्डपाण्डवम्, (4) सिद्धान्तकौमुदीटीका (2,3,4 इति त्रयं कन्नडभाषायां) शृङ्गारजगन्मोहिनीमिश्रभाणः, चन्द्ररेखादण्डकं, श्री-कण्ठमहिमतारावलिः, अमरुकशतकस्यान्ध्रानुवादः । अयं क्रि. श. 1825-30 प्रान्ते जातः स्यादिति स्वीये लेखे वेदं वेङ्कटकृष्णशर्मा निरूपयति । अयं मैसूर्-कृष्णराजास्थानविद्वान् भवितुमर्हति ।

8.22 शारदातिलकभाणः – चामयमन्त्री

अयमपि भाणः अप्रकाशितः प्रायः मैसूर् प्राच्यलिखितग्रन्थालये सं-रक्षितः स्यात् । अयं च भाणः स्वगुरोः शठकोपयतीन्द्रस्य दिव्यकृपया रचित इति कविः स्वयं कथयति इत्थम्-

तत्तादृग्यतिपतेः दिव्यकृपावशंवदः ।
करोति सरसं भाणं शारदातिलकाभिधम् ।।

भाणेऽस्मिन् 'हैदर् नवाब्' सभा, तस्य विजयादिकं च वर्णितम् । अयं चा-मयमन्त्री मैसूर् कृष्णराजस्य दत्तकपुत्र इति श्रीरङ्गपट्टणवासीति च कथ-यन्ति । अयञ्च शृङ्गारराजतिलकभाणकर्तुः अविनाशीश्वरस्य समकालिकः इति, अतः एकोनविंशः शताब्द एव अस्य समय इति च विमर्शकाः[35]

---

35 संस्कृतभाणसाहित्यमु – तेलुगु – P. 146

In Public domain. Digitization Muthulakshmi Research Academy

8.23 मन्मथमन्थनभाणः – सुब्रह्मण्यसूरिः

अयं भाणः पुदुक्कोट (तमिलनाडु राज्ये) नगरात् प्रकाशितायां संस्कृतपत्रिकायां प्रकाशित इति रामजी उपाध्यायः[36]। अस्य भाणस्योल्लेखः कृष्णमाचार्येणापि[37] कृतः। अस्य भाणस्य रचयिता सुब्रह्मण्यः पुदुक्कोटसमीपवर्तिनि कडैक्कुडिग्रामे क्रि. श. 1850 वर्षे जातः। अयं रामभद्रदीक्षितश्वशुरस्य चोक्कनाथस्य वंशे उत्पन्नः, चोक्कनाथात् सप्तमः। अयं पुदुक्कोटराजाकलाशालायां संस्कृतोपन्यासकपदवीमध्यतिष्ठत्। क्रि. श. 1913 वर्षे स्वर्गस्थः आसीत्। अयं न केवलं शास्त्रेषु निपुणः, किन्तु चित्रलेखने, सङ्गीते, हरिकथागाने च निपुणः। हरिकथागानेनैव अयमत्यन्तं प्रसिद्धं प्राप्तवान्। अयं संस्कृते बहून् ग्रन्थान् रचितवान्। वल्लीबाहुलेयमिति नाटकमस्य कृतिषु प्रमुखम्। अस्य कृतयः अनेकाः अप्रकाशिताः तत्पुत्रेण संरक्षिता इति कृष्णमाचार्याः कथयन्ति।

8.24 शृङ्गारभूषणभाणः – विंजमूरि अनन्ताचार्यः

वामनभट्टबाणस्य शृङ्गारभूषणानुकरणरूपेण अनेके भाणाः तन्नाम्नैव रचिताः। तेषु अन्यतमोऽयं भाणः। अत्र विलासरसिक इति विटः शृङ्गारवल्लिकायै कल्याण (कलत्र) पत्रिकां लिखित्वा ददाति यस्य च रचयिता पञ्चबाणशास्त्री, साक्षिणौ कन्दर्पमित्रः, मनोजभट्टश्च। इतिवृत्ते तु वैलक्षण्यं किमपि नास्ति। सूर्योदयवर्णनेनैवायं भाणः आरभ्यते। अयं च भाणः कविना स्वबाल्ये एव रचित इति ज्ञायते[38], अथापि कविता सरसा सहृदयहृदयावर्जनी च। वसन्तर्तुवर्णनमिदं हृद्यम्–

36 आधुनिकसंस्कृतनाटक –P. 722.

37 HC.SL. - MK – P. 380

38 श्रीविंजमूरु कुलसञ्जनितेन तेन, शृङ्गारशास्त्ररसिकेन कवीश्वरेण।
वालेन साधुरचितोऽयमनन्तनाम्ना, भाणस्सदा विजयतां कविकौतुकाय॥

In Public domain. Digitization Muthulakshmi Research Academy

माकन्दद्रुममञ्जरीमधुझरीमाधुर्यमुद्वेलयन्
मन्दं मन्दमुदारमुग्धसदृशां मानं समुन्मूलयन् ।
मासोऽयं मधुरुल्लसत्परिमलानुल्लासयन् पल्लवान्
मर्यादामतिलङ्घ्य मोहयति मां मन्दानिलस्पन्दनैः ॥

अत्र कामशास्त्रविषयिणी शिष्योपाध्यायिका वर्णिता। तत्र हि–
प्रथमाध्याये अनङ्गस्य सर्वोत्कृष्टत्वप्रतिपादनम्
द्वितीयेऽध्याये तदुपासनस्य कामपुरुषार्थफलकत्वबोधनम्
तृतीये चाध्याये तारुण्यस्य प्रशंसा
चतुर्थे च कामिनीवैभवप्रतिपादनम्
पञ्चमे च प्रतिव्रतादोषनिरूपणम् इति
पाठ्यग्रन्थस्वरूपमपि सचमत्कारं वर्णितम्।

निर्व्याजप्रेमसम्पन्नौ नित्यकल्याणदम्पती ।
श्रेयसे भूयसे स्यातां श्रीहस्तिगिरिवासिनौ ॥

इति मङ्गलेन आरब्धोऽयं भाणः काञ्चीवरदराजस्वामिनः उत्सवेषु प्रदर्शितः। अयं च अप्रकाशितः अडयार् ग्रन्थालये[39] सुरक्षितः। तत्र हि अस्य प्रतिकृतिद्वयमुपलभ्यते यत्र एकस्यां प्रतिकृतिलेखकेन पिसुपाटि अप्पयाख्येन स्वप्रतिकृतीकरणसमयः विजयसंवत्सरचैत्रशुद्धपञ्चमी – इन्दुवासरः उल्लिखितः[40] यस्य कि.श 25–3–1833 दिनाङ्कः भवति। अतोऽयं भाणः अस्मात्कालात् पूर्वम् क्रि.श. एकोनविंशशतकस्य प्रथमपादे रचित इत्यभ्यूह्यते।

---

39 Adayar Library-Madras -Vol.V - 1574 and 1575
40 Contribution of Andhra to Sanskrit Literature - B. Ramaraju - p. 23-24 ; संस्कृतभाण साहित्यमु – तेलुगु – P. 84

In Public domain. Digitization Muthulakshmi Research Academy

एतद्भाणकर्ता विंजमूरुकुलोत्पन्नः, श्रीवैष्णवः। एतद्वंश्याः गुण्टूरुमण्डले आन्द्रप्रदेशे इदानीमपि सन्ति। अतोऽयमप्यत्रत्य एवेति ऊह्यते। अस्य पिता वेङ्कटाचार्यः। अस्य अग्रजः श्रीनिवासराघवाचार्यः। अयञ्च विषयः अनया भाणप्रस्तावनया अवगम्यते – "श्रीविञ्जमूरुकुलवेङ्कटवर्यसूनुः श्रीवासराघवगुरोः अनुजः प्रसिद्धः" इति। अस्य अग्रज एवास्य गुरुरित्यप्यनेन ऊहितं शक्यते। अस्य समयविषये अनेन न किमपि सूचितमथापि पूर्वोक्तभाणप्रतिकृतिलेखनसमयनिर्देशेन अयं क्रि. श. एकोनविंशशतकपूर्वार्धे आसीदित्यूह्यते।

8.25 शृङ्गारदीपकभाणः – विंजमूरि राघवाचार्यः

अयमपि भाणः अप्रकाशितः मद्रपुरीतालपत्रग्रन्थालये[41] सुरक्षितः काञ्चीपुरदेवराजस्य गरुडोत्सवे प्रदर्शनार्थमुद्दिष्टः। अत्र अनङ्गशेखरस्य साहाय्येन रसिकशेखरः शृङ्गारचन्द्रिकया सङ्गच्छतीति सामन्यमेवेतिवृत्तम्। कविता सरला सरसा च। धाराशुद्धिरत्र दृश्यते। पश्यन्तु –

सोऽयं चारुसुधारसप्रतिमवागासारपूर्णः कविः
भाणस्सद्गुणलालनीयललितः शृङ्गारसम्पूरितः।
सेयं सारविदां व्रजेन महतामध्यासितो रङ्गभूः
सर्वं नस्सदनुग्रहेण महता सञ्जातमद्यान्वितम् ॥

अयं च राघवाचार्यः[42] आन्ध्रदेशे विजयवाडापत्तने कस्यां चित् पाठशालायामध्यापकः। क्रि.श.एकोनविंशतकोत्तरार्धे आसीदिति ज्ञायते। अस्य समयः क्रि.श. 1855–1920. रामानुजश्लोकत्रयी, नरसिंहस्तोत्रम्, मानससन्देशः, हनुमत्सन्देशः, रघुवीरगद्यव्याख्या च कृत्यन्तराणि। अस्य

41 GOML - Madras No. 12702
42 आधुनिकसंस्कृतरूपक – P. 720; संस्कृतभाणसाहित्यमु–तेलुगु – P. 108; HCSL - MK - p. 685 ; CASL-BR- P. 416

In Public domain. Digitization Muthulakshmi Research Academy

स्वग्रामः पश्चिमगोदावरीमण्डले दोन्तवरग्रामः ।

8.26 पौण्डरीकभाणः – कोक्कोण्ड वेङ्कटरत्नम्[43]

अयञ्च भाणः एतावत् पर्यन्तमलभ्यः मातृकारूपेणापि संरक्षितो वा न वेति न ज्ञायते । अस्य रचयिता कोक्कोण्ड वेङ्कटरत्नाभिधः आन्ध्रदेशे गुण्टूर् मण्डले विनुकोण्डग्रामे क्रि.श. 23-4-1842 दिने जनिमलभत। चतुर्दशे वयसि अयं तमिलनाडु प्रान्ते उत्तर-आर्काट् मण्डलान्तर्गतं तिरुवल्लक्षेत्रम् अगच्छत् । तत्र च तनुमध्या-बिल्वनाथेश्वरयोः देवालये तपश्चचार । तेन चायं महाकविरजायत । अयमपि सङ्गीते साहित्ये च समप्रज्ञः आन्ध्रसंस्कृतभाषयोः अनेकान् ग्रन्थानरचयत् । अयं स्वीये विंशे एव वयसि भाणममुमरचयदिति ऐतिहासिकाः कथयन्ति । अनेन च चतुर्विंशतिसंख्याकाः लघुकृतयः स्तुति-अष्टक-गीतादिरूपाः रचिताः, याश्च प्रकाशिताः । केवलमस्य भाणस्य विषये एव न ज्ञायते । अयं क्रि.श. 1915 पर्यन्तमजीवत् ।

8.27 कन्दर्पदर्पणभाणः – नावल्पाक्कं वेङ्कटाचार्यः

अयं भाणः भाणकर्तुः पौत्रेण सम्पादितः तञ्जापुरसरस्वतीमहल् पत्रिकायां प्रकाशितः । तिरुमलरायेनानुष्ठिते विजयदशमीमहोत्सवे प्रदर्शितोऽयं भाणः एकोनविंशशतकभाणेषु उत्तमेषु अन्यतमः । यद्यप्यत्र कविता कदलीनारिकेलपाकाञ्चिता विद्वदनुभववेद्या अथापि हृद्या। अत्र नायकः कलहंसकः । श्रीपार्थसारथिदेवालये कमलमञ्जर्याः प्रथमरङ्गाधिरोहणमहोत्सवायाहूतः प्रातरेव प्रस्थाय तत्र तत्र अटित्वा सायं तत्र गच्छति, कलत्र

---

43 Kokkonda Venkata Ratnam pantulu - Article written by N. Venkata Rao, in "Bharati" - Telugu journal - Vikriti-Phalguna - p.231 ; H.C.S.L - MK - P. 787 ; Andhra Vijnana Sarvasvamu - Vol. III - P. 1114.

 In Public domain. Digitization Muthulakshmi Research Academy

पत्रिकामाध्यमेन तां कलत्रीकरोतीति सामान्यमेवेतिवृत्तमत्रापि। मदगज – आहितुण्डिक – कुक्कुटयुद्ध – मल्लयुद्ध – इन्द्रजाल – खड्गयुद्धादिभिः वीरादिरससूचना कृता। अत्र प्राचीनभाणानां विशिष्य वसन्ततिलक – पञ्चबाणविजय – मदनसञ्जीवनभाणानामनुकरणानि दृश्यन्ते। अस्य कर्ता न्याय – व्याकरण – वेदान्तादिशास्त्रेषु निष्णातः। दरीधरीषि, अन्व-ग्राहिषि, पर्यणंसिषुः, भाषिष्ठाः, वितातर्ति, कैरणाः(किरणाः), सौवं (स्वं), सौवकरतः (स्वकरतः), अषडक्षीणः, शाशाङ्कविम्बानना इत्यादि विशि-ष्टाः प्रयोगाः अस्य व्याकरणशास्त्रपाण्डित्यमभिव्यञ्जयन्ति। अत्र च स्त्री-पात्राणां विषयेऽपि किञ्चित्क्लिष्टा भाषा उपयुक्ता या रसोचिता न भवेत् इति काचित् अत्रत्या न्यूनता वक्तव्या अथापि उक्तिवैचित्र्यादिगुणैः सा अन्तर्हितैवेति विभावनीयम्। अत्रत्या उक्तिवैचित्री उत्तमां कोटिमाटीकते। "न खलु बम्भ्रम्यमाणबम्भरकुलोपेक्षामात्रेण चम्पककुसुमानां नैसर्गिकं रा-मणीयकमपहीयते", "कुतः सफाणितक्षीरपानाय सपादग्राहं प्रार्थयसि,"

"लता पुनः पुष्पवती प्रसूते
फलानि, चामीकरवल्लिका त्वम्।
पुष्पं समेत्यापि फलं न सूषे
ममेति चित्रीयत एव चेतः॥"

इत्यादि अस्य भाणस्य उक्तिवैचित्र्युदाहरणानि।

अत्रत्यं मुखवर्णनं हृद्यमिदम्–

इन्दुः स्वमूर्ध्ना वहते तमांसि, सचाङ्कदेशे विकजे सरोजे।
रात्रिन्दिवं सङ्गमितौ रथाङ्गौ हर्षाश्रुमुक्ताभिरलङ्करोति॥

इयं च पुष्पापचयवर्णनपरा स्वभावोक्तिरपि रम्या –

पादाग्रेण भुवं स्पृशन्त्युपरिगां शाखाशिखां तारवीम्
ऊर्ध्वीभूतकठोरपीवरकुचं सङ्गृह्णती पाणिनिना।

In Public domain. Digitization Muthulakshmi Research Academy

पुष्पालोकनतात्परी परिचलन्नीलारविन्देक्षणा
पुष्पौघानपचिन्वती निदधते वासोऽञ्चले कुञ्चिते ॥

एवमिदं सूर्योदयवर्णनमपि अस्य कवेः प्रतिभायाः निकषोपलः–

नक्षत्रं तिरयन्नभः प्रचुरयन् नीडात्खगांश्चारयन्
निद्रां विस्मरयन् निशां विधुरयन् नेत्राणि विस्फारयन् ।
कोकान्मेदुरयन् गदानधरयन् गाढं तमश्चोरयन्
पङ्कं भङ्गुरयन् खरद्युतिरयन्निन्धेऽब्जिनीं स्मेरयन् ॥

इदं च घनश्यामस्य "मन्देहान् दलयन्" इति सूर्योदयवर्णनस्य अनुकरणमिव दृश्यते। एवं चन्द्रोदयवर्णनमपि अत्यन्तं हृद्यम्। कल्पनापि बहुरमणीया। अत्र च चन्द्रः ताम्बूलभाजनरूपेण वर्णितः। पश्यन्तु–

कन्दर्पप्रभवे प्रकल्पितमिदं वज्रात्मकं यामिनी
वीटीचेटिकयोपनीतमतुलं ताम्बूलिकाभाजनम् ।
स्वाङ्कस्थायिकलङ्कमुज्ज्वलतमःस्वच्छप्रभामण्डलं
तत्रौषारमरीचमण्डलमहं सम्भावये तत्त्वतः ॥

अत्र चन्द्रकलङ्कः पूगीलवङ्गादिसुगन्धद्रव्यसमुदायरूपेण उत्प्रेक्षितः रम्यः किल। एवमान्तं हृद्यकल्पनाशोभितोऽयं भाणः कवित्वपाटवं, भाषापाटवं च कामयद्भिरवश्यं पठनीयः। एवमत्र तन्त्रान्तरैः कामतन्त्रस्य वैलक्षण्यं सम्यक् प्रकाशितम्। कामतन्त्रविषयाः अनेकेऽत्र चर्चिताः। अत्र कलत्रपत्रिकायां प्रमोदवर्षः सूचितः। अयञ्च क्रि.श.1870 वर्षः भवतीति, अयं भाणः तस्मिन् वर्षे रचित इति ज्ञायते।

अथ भाणकर्तारं वेङ्कटाचार्यमधिकृत्य किंचित् विचारयामः। अस्य पौत्रेणैव एतद्भाणकर्तुः जीवनविषये एतद्भाणोपाद्धाते सम्यग्विवृतम्। अतस्तत्रत्य एव विषयोऽत्र सङ्क्षिप्यते। तमिलनाडुराज्ये तुण्डीरमण्डले प्रसिद्धस्य काञ्चीक्षेत्रस्य योजनत्रयमिते दूरे कश्चन अग्रहारः नावल्पाक्कं नामा, यश्च

 In Public domain. Digitization Muthulakshmi Research Academy

चतुस्तन्त्रिणां महामहोपाध्यायानां पण्डितप्रकाण्डानां श्रीवैष्णवानां ज-न्मभूमिः। तस्मिन् ग्रामे कुमारतातार्यपौत्रस्य पौत्रः वेदान्ताचार्य इति कश्चन विद्वान् आसीत्। तस्य पुत्रोऽयं वेङ्कटाचार्यः क्रि.श.1820 वर्षे जातः। माता लक्ष्मीः। अयं विशिष्टाद्वैतप्रवर्तकाचार्यस्य श्रीमद्रामानुजस्य गुरोः श्रीशैलपूर्णस्य वंश्यः। अस्य पितामहप्रपितामहः कुमारतातार्यः पारिजाताहरणनाटकाद्यनेकग्रन्थकर्ता, चतुर्वेदाध्यायी, बहुक्रत्वनुष्ठानप-रश्चासीत्। अस्य गुरुः श्रीशैल अण्णयतातार्यः अस्य ज्येष्ठभ्रातृकल्पः। अस्य पत्नी लक्ष्मीः दिवाप्रदीपवेङ्कटाचार्यस्य पुत्री। अयं भाणकर्ता वेङ्क-टाचार्यः सुनिशितबुद्धिमान् तर्कव्याकरणवेदान्तादिशास्त्रेषु निष्णातः स्वा-ध्यायपारगश्च बाल्यादेव कविताप्रागल्भ्यवानासीत्। अस्य प्रतिभामा-लक्ष्य "शूनाम्बेडु" महाराजः स्वास्थानविद्वत्कविपदं दत्वा अमुं सम-मानयत्। तदा अस्य वेदान्तचार्य इति एकः पुत्रः, अन्या च पुत्री आ-स्ताम्। भार्यायां दिवङ्गतायामयं पुनः द्वितीयविवाहमकरोत् यस्यां द्वौ पुत्रौ, द्वे कन्ये च अजायन्त। तयोः प्रथमः नृसिंह तातार्यः क्रि.श.1864 वर्षे जातः। अयं च वेङ्कटाचार्यः क्रि.श.1874 वर्षे मृतः। अस्य बहवः कृतयः तिरुपतिक्षेत्रे प्रसिद्धैः डि.टि.तातार्यैः स्वीयोद्यानपत्रिकायां धारावा-हिकरूपेण प्रकाशिताः। भाणममुं विहाय लक्ष्मीशतकं, यमकरामायणं, हनुमत्स्तोत्रं, हनुमद्दण्डकं, रघुनन्दनबिरुदावलिः, वैशाखोत्सववर्णनम्, मङ्गलाष्टकं, वैवाहिकश्लोकाः, श्रीहयग्रीवनक्षत्रमाला, रामायणगद्यं, गो-वर्धनधारिस्तवः, श्रीरामचन्द्रस्तुतिः इत्यादयः अनेके ग्रन्थाः अनेन र-चिताः। तर्ककर्कशवाग्व्यापारस्यास्य कथं कवन कौशलमिति सन्दिह्या-त्रसूत्रधारः प्रस्तावनायां तदित्थमुपपादयति –

> तर्कातर्किप्रधानप्रथनपटिमनिर्धूतकौतुस्कुतानां
> सूक्तिर्मल्लीमतल्लीमधुरसलहरीमाधुरीमेति काव्ये।

In Public domain. Digitization Muthulakshmi Research Academy

लङ्कानिश्शेषभस्मीकरणसुनिपुणज्वालजालावलीढो
वाले वातस्य सूनोः शतशिशिररुचां शैतलीमाददेऽग्निः ॥

8.28 शृङ्गारतरङ्गिणीभाणः – ईचम्बाडि श्रीनिवासाचार्यः

अयमपि भाणः क्रि.श. 1883 वर्षे मद्रपुर्यां वाणी विलासमुद्रणालये तेलुगुलिप्यां प्रकाशितः। अयञ्च शुद्धभाणः। नायकः शृङ्गारसारः। रत्नलतानाम्नी वेश्या शुक्रवारोत्सवे मङ्गलदेवताराधनात्परं स्वाभ्यस्तनृत्यस्य प्रदर्शनं विधास्यतीति तद्द्रष्टुं तत्र गन्तव्यमिति रङ्गे प्रविष्टः नायकः सूचयति। ततः परं सर्वं भाणान्तरेष्विव समानम्। अत्र च पुरुषैः क्रीड्यमाना कन्दुकक्रीडा वर्णिता या च "वालीबाल्" नाम्ना प्रसिद्धा। प्रयत्नशीलस्य मानवस्य असाध्यं किमपि नास्तीति प्रबोधयतीत्थम्–

नागेन्द्रास्तीव्रदर्पज्वरभरपरुषाः पारवश्यं भजन्ते
निर्घातानामभेद्याः कुलगिरिदृषदश्शिल्पयोग्याः क्रियन्ते।
भूरापोऽग्निस्समीरो वियदपि विदधत्यात्मशक्तोपकारान्
शङ्के नृणां प्रभावः पटुकरणधियामैश्वरात्किञ्चिदूनः ॥ (64)

कोऽपि वस्तुविशेषः यावदुपलब्धि औत्सुक्यं जनयति। वस्तुनि हस्तं गते सति तस्मिन्नुत्कण्ठा न भवति, किन्त्वन्यस्मिन् प्राप्तव्ये इतीयं मनुष्यसहजा रीतिः कामुकान् लक्ष्यीकृत्येत्थमत्र वर्णिता–

कामयति कामिलोकः प्रथममसञ्जातसौहृदां तरुणीम्।
विस्रब्धरूढभावां विहाय च स्वैरमन्यतश्चलति ॥ (65)

स्त्रीवर्णनमत्रान्यभाणापेक्षया विलक्षणं चमत्कारावहञ्च। तत्र प्रथममिदं मुखवर्णनम्–

हरिदुपलकर्णपूरं हारिसमुत्तरलनयनसञ्चारम्।
वदनं मुग्धस्मेरं विलसति मदिराक्षि शिशिरकरगौरम् ॥ (81)

 In Public domain. Digitization Muthulakshmi Research Academy

एतादृशमेवान्यत्–

मुदितौ नयनचकोरौ मदनस्सज्जीकरोति कोदण्डम् ।
कञ्चुकगर्भनिलीनौ स्तनचक्रौ मुखशशी परिस्फुरति ॥

इतोऽपि रम्योऽयं नारीवर्णनप्रकारः –

हंस त्वं क्वचिदेव गच्छ कमल त्वं मज्ज मध्येजलं
वृक्षानाश्रय कोकिल भ्रमर भो लीयस्व पुष्पान्तरे ।
शङ्खाभ्येहि समुद्रमेव बडिशे पाठीन मुञ्चाप्यसून्
चन्द्रत्वं दिवमेव याहि शिखिनः युष्मद्गतिः काननम् ॥ (44)

एवं सायं सन्ध्याकालवर्णनमिदमपि अत्यन्तहृद्यम्। अत्र हि सङ्कुचत्पद्मेभ्यः निर्गच्छन्तो मधुकराः अश्रुबिन्दुरूपेण उत्प्रेक्षिताः पश्यन्तु –

निजदयितमशेषलोकनेत्रं गतवसुमद्य गिरौ विलीयमानम् ।
दलनयननिमीलनैर्नलिन्यः गलदलिकज्जलमश्रु किं सृजन्ति ॥
(103)

अत्र अश्रुबिन्दूनां नीलिमापि सम्यक् समर्थिता किल। एवमन्यापदेशरचनायां सूक्तीनां लोकोक्तीनां च सान्दर्भिकप्रयोगे च एतद्बाणकर्ता सिद्धहस्त इति प्रतीयते। पश्यन्त्वन्यापदेशममुम्।

स्वच्छन्दपेयनिर्भरमधुभरभरतप्रफुल्लनवकमला ।
नलिनी यदा न दृष्टा क्षुद्रलतां षट्पदः तदाश्रयन्ते ॥ (57)

एवमुक्तिवैचित्री अपि चमत्कारावहा – "किमिति पाठीनशिशुं सलिलस्तम्भमध्यापयसि", "नहि चकोरकाः परच्छन्दानुरोधेन पूर्णचन्द्रिकामनुधावन्ति", "किं खलु सर्वा एव दृषदः सूचीं कर्षन्ति,", किमेतदपि परीक्षणीयं यत्कलकण्ठात् कलकण्ठी विशिष्यत इति", इत्याभाणकानि,

जात्याकृतिप्रभृतिसर्वमतीत्य भाति

In Public domain. Digitization Muthulakshmi Research Academy

सम्माननाय सकलस्य च योग्यतैका।
पाषाणजातिजनितान्यपि भास्वराणि
रत्नानि भूमिपतिमौलिपदं भजन्ते ॥ (69)
अभ्युन्नतं पदमवाप्य कठोरतेजाः
तीव्रैः करैस्तपति यस्तु जगत्समस्तम् ।
क्षिप्रं ततस्सनिपतत्यतिदुर्बलश्रीः
तत्रायमुष्णरुचिरव्यभिचारि मानम् ॥ (96)

इत्याद्युपदेशाश्च रम्याः। अयं च भाणः क्रि.श. एकोनविंशशतके पादत्रये अतीते चतुर्थे पादे चित्रभानुवत्सरे[44] रचितः इति कविरेव वक्ति। अतः अयं क्रि.श.1882 वर्षे रचित इति ज्ञायते।

एतद्भाणकर्ता श्रीनिवासाचार्यः कौण्डिन्यगोत्रः वरदाचार्यपुत्रः, तमिल-नाडुराज्ये दक्षिण-आर्काट्-मण्डले तिरु-अहीन्द्रपुरे क्रि.श.1848 वर्षे अजायत। अयं सहजकविताप्रतिभासम्पन्नः, शतावधानी, चित्रकाव्यर-चनादक्षः कुम्भकोणराजकीयसंस्कृतकलाशालायां संस्कृतविभागाध्यक्षः आसीत्। सङ्गीतमपि साहित्यमिति उक्तरीत्या अयं सङ्गीतेऽपि निपुणः। अयम् उषापरिणयनाटकं, हंसविलास इति षट्सर्गपरिमितं वेदान्तकाव्यं, श्रीकृष्णलीलायित-सारङ्गकोपाख्यानगद्यकाव्ये, नागानन्दमृच्छकटिकयोः व्याख्ये, गीतगोविन्दतुल्यम् अमृतमन्थनगीतकाव्यं, शृङ्गारतरङ्गिणीभाणं च अरचयत्। अस्य समकालिकः तिरु-अहीन्द्रपुर्याम् अनन्ताचार्यः, योऽपि अष्टावधानी आसीत्।

---

44 शतेष्वथाष्टादशसम्मितेषु शकाब्दवर्गेषु त्रिषु चोपरिष्टात् ।
यातेषु तुर्ये किल चित्रभानौ भाणोऽयमाविर्भवतिस्म भूमौ ॥

In Public domain. Digitization Muthulakshmi Research Academy

8.29 रसिकरञ्जनभाणः – प्रतिवादिभयङ्करं श्रीनिवासाचार्यः

अयं भाणः मैसूरनगरात् तेलुगुलिप्यां क्रि.श.1896 वर्षे प्रकाशितः कायेन महान्। मैसूरनगरसमीपस्थयादवाद्रौ (मेलकोटै) विराजमानस्य यतिराजसम्पत्कुमारस्य भगवतः वज्रकिरीटधारणमहोत्सवेषु प्रदर्शितः। अत्र यदुशेखर इति विटशेखरः नायकः। अयं स्वमित्रं वसन्तशेखरं श्रीरङ्गपट्टण-महीशूर-तोण्डनूरु-तिरुनारायणपुरादिदिव्यदेशेषु अन्वेषयति। अन्ते च मदनमञ्जर्याः प्रथमार्तवमहोत्सवं गत्वा तां कलत्रीकरोति। वस्तुतः अस्य भाणनाम्ना व्यवहारापेक्षया चम्पूनाम्ना व्यवहार एव युक्तः स्यात्। अस्य च मैसूरराज्यस्थश्रीरङ्गपट्टणादिक्षेत्रवर्णनमेव मुख्यमुद्देश्यम्। यतोऽयं भाण इति संज्ञितः अतः वेश्यासम्भाषणादिकं, प्रथमार्तवोत्सवः, कलत्रत्वेन स्वीकारादयः योजिताः। अत्र च विटः बहूनां निन्दापात्रं भवति। अत्र च शैली सरसगम्भीरा। अयं प्रबन्धः किञ्चिदिव कठिनोऽपि रसिकात्मरञ्जनः एवेति कविरेव वक्तीत्थम्–

अयं प्रबन्धः कठिनोऽपि कुत्रचित्
भवेदवश्यं रसिकात्मरञ्जनः।
कठोरता श्लाध्यतमं स्तनौ रतौ
स्निग्धं युवत्याः समलङ्कृतं यथा॥ (10)

अत्र च कविः स्त्रीवर्णनव्याजेन स्वीयकवितामेवेत्थं वर्णयति–

ललितवचनाश्लेषोन्मेषाद्विदग्धजनप्रिया
सुभगपदविन्यासान्नित्यं रसज्ञजनादृता।
सुरुचिरगुणालङ्काराद्यैर्विचक्षणमानिता
सुकविवचसातुल्यश्रीका प्रयाति रमण्यसौ॥ (31)

In Public domain. Digitization Muthulakshmi Research Academy

अयं च कविः, श्लेषालङ्कारप्रियः शब्दालङ्कारप्रियश्च। अस्य श्लेषप्रियत्वस्योदाहरणभूतोऽयं नान्दीश्लोकः –

लक्ष्मीवल्लभमक्षिकोणविलसत्स्मेरावलोकादिभिः
पारावारतनूजया कुपितया भूम्यास्सपत्न्याः कृते ।
किन्नो वेत्सि भुजङ्गताविलसति न्यस्ता हरौ ते पुर
स्सेतिव्याजगिराप्रलोभ्य सततं खेलन्तमन्तर्भजे ॥

अत्र च भुजङ्गता, हरौ इति श्लिष्टौ चमत्कारजनकौ। एवमिदं चन्द्रास्तमयवर्णनम् अपि –

स्वयं द्विजपतिश्शुचिश्शिवशिरस्तटीभूषणं
सुधाम्बुधिसुतश्चिरात्पुरसमाजतुष्टिप्रदः ।
सुधामयकलान्वितः कमलवासिनीसोदरो
विधुः कथमिहेहते कुजनसेवितां वारुणीम् ॥ (28)

अत्र वारुणीपदं पश्चिमां दिशं मद्यं च बोधयत् चमत्कारावहं भवति। एवमयं गद्ये बाणभट्टादीननुचकार। गद्यमपि ओजोगुणयुक्तम्। अस्य गद्यस्य भावनाशक्तेश्चेदमुदाहरणम् – "इदं किं प्राचीदिगङ्गनाललाटमध्यस्थलविलसत्सुन्दरसिन्दूरललामम्, अथवा उदयगिरि शिखरवरीवर्त्यमानप्रत्यग्रोन्निद्रपृथुलजपाकुसुमस्तबकः, आहोस्विदनुवनविहरमाणकिरातकिशोरकरतलभ्रष्टलीलाकुरुविन्दमणिकन्दुकः, किमुत सकलविभावरीविहरणमत्तसुरमत्तकाशिनीपादाधःपतित पद्मरागतुलाकोटिवलयम् ..... इत्यनेकसन्देहवैखरीतुन्दिलहृदये जनसमुदये......भगवान् चण्डभानुरुदयगिरिशिखरमध्यास्ते"।

अन्योऽप्यत्र विशेष उपलक्ष्यते सूर्योदयवर्णने। प्रायः सूर्यस्य प्राच्याश्च प्रेयसीप्रियद्वन्द्वरूपेण वर्णनं सर्वत्र समुपलभ्यते। परन्त्वत्र तयोः मातापुत्रसम्बन्धः अभ्यूहितः इत्थम्–

 In Public domain. Digitization Mithun Research Academy

बालोऽयमाशु मिहिरः करपल्लवाग्रैः
मुग्धारुणैः कतिपयैरधिकं पिपासुः ।
प्राचीदिशस्सपदि कोशकुचं स्पृशन्वसन्
प्रोदेति सस्मितमसावुदयाद्रितल्पात् ॥

एवं कुवलयामित्रं सूर्यममुं मित्रं धीमन्तोऽपि कथं वदन्तीति साश्चर्यं कथयति इत्थम् –

उद्यन्नेव निशाचरौघमखिलं निष्पेषमुल्लोलयन्
हृष्टां नीलसरोजिनीं विमुखयन् धात्रीं तपन्नञ्जसा ।
कान्ताः प्रज्वलयन् स्वकाश्चनिखिलाः मध्येनभस्सञ्चरन्
मध्याह्नेतिकरैरपाहरति सोऽप्यानन्दकन्दं नृणाम् ॥ (157)

एवमत्र नारीदूषणं कृत्वा अन्ते वदति–

मानिनीनां मनस्सत्यं कोऽपि पाषाण एव यत् ।
तथा ज्वलति सम्प्राप्ते वल्लभेऽपि विभावसौ ॥

अत्र च घूर्जर–कर्णाट–चोलादिविविधदेशस्त्रीवर्णनं, तथा सम्भोगशृङ्गारादिवर्णनं च पर्याप्तमेव वर्तते ।

एतद्बाणकर्ता[45] प्रतिवादिभयङ्कराचार्यवंश्यः, वत्सगोत्रः, वरदाचार्यपौत्रः, अलर्मेल्मङ्गा–नृसिंहाचार्ययोः पुत्रः, महीशूराधिपेन कृष्णराजवडयार्[46] नाम्ना पोषितः । एतद्बाणरचनाकाले अयं कोयम्बत्तूर् नगरस्थ संस्कृतकलाशालायाः प्रधानोपन्यासकः[47] आसीत् । तस्यां कलाशालायां निश्शुल्कं संस्कृतमध्याप्यते स्म । अयं क्रि.श,.1900 वर्षे दिवंगत[48]

45 इति श्रीमत्प्रतिवादिभयङ्कराचार्यवंश्यश्रीवरदाचार्यपौत्रेण श्रीनृसिंहाचार्यपुत्रेण, श्री अलर्मेल् मङ्गागर्भसंभूतेन श्रीवत्सवंशमुक्ताफलेन
46 श्रीमहीशुरपूर्नाथकृष्णपार्थिवपोषितः, श्लो.223
47 अद्यत्वे कोऽयंपुरीवरीवर्त्यमानधर्मसंस्कृतविद्याशालाग्रिमोपाध्यायेन
48 HCSL-MK-p.701 F.N. for 14

In Public domain. Digitization Muthulakshmi Research Academy

इति कृष्णमाचार्यः । अयं च भाणः 4985 कलिवर्षे[49] रचित इति कविरेव सूचयति । अतः अयं भाणः क्रि.श.1884 वर्षे रचितः इति स्पष्टम् । अयं मैसूर कृष्णराजेन (क्रि.श.1834-1866) पोषित इत्युक्तत्वात् क्रि.श. 1830 प्रान्ते जात इत्यूह्यते ।

8.30 मदनविजयभाणः – विक्किराल शेषाचार्यः

अयं भाणः मद्रपुरीतः श्रीनिकेतनमुद्राशालाद्वारा क्रि.श.1894 वर्षे प्रकाशितः क्रि.श.1892 वर्षे तिरुवल्लूरु वीरराघवस्वामिनो भगवतः चैत्रोत्सवेषु अभिनयार्थं रचितः । अत्र नायकः पल्लवशेखरः । नायिका वेश्यायाः मन्दारमञ्जर्याः पुत्री मदनमञ्जरी । तस्याः प्रथमरङ्गाधिरोहणोत्सवाय आहूतः नायकः सायं तत्र गत्वा तामभिनन्द्य कलत्रीकरोति इति सामान्यमेवेतिवृत्तमत्र । भाणसामान्यानि कन्दुकक्रीडा – सर्पनर्तन – वानरनृत्य – कुक्कुटमेषमल्लयुद्ध – मदगजविजृम्भण – भल्लूकनर्तन – चतुरङ्गक्रीडादिवर्णनानि अत्रापि सन्ति । अत्र पारदारिका अपि वृत्तान्ताः चमत्कारावहाः सन्ति । अत्र वर्णनानि सुदीर्घाणि । वसन्तवर्णनमेव 28 श्लोकेषु कृतम् । तथैवान्यान्यपि । अस्मिन् आन्ध्रकवितल्लजस्य रामराजभूषणस्य प्रभावः अधिकः दृश्यते इति विमर्शकाः । वसुचरित्रप्रबन्धस्थपद्यानामनुवादोऽपि अत्र दृश्यते । पश्यन्त्विदं प्रातः कालवर्णनम्–

प्रातःकालकृषीवलेन गगनक्षेत्रोडुसस्यावलेः
पक्वायाः नितरां च कान्तिकणिशे च्छिन्ने च पूतीकृते ।
तत्पूतच्छविवद्विभाति सुषमा प्राच्यां रवेस्सारथेः
दूरे तिष्ठति तत्पलालनिकराकारः प्रतीच्यां शशी ॥ (49)
यान्त्रीं पद्मगृहं श्रियं द्विजरवैः पुण्याहमातन्वति

49 बाणवसुनन्दवेदैर्ग्रथितेषु कलेर्गतेषु वर्षेषु (श्लो.224)

 In Public domain. Digitization Mothulakshmi Research Academy

प्राञ्चत्पल्लवहस्तनिस्रुतहिमोदैः कुर्वंति प्रोक्षणम् ।
वानस्पत्यगुरौ स्वयं द्विजतया तत्कालसन्दर्शनं
नैकस्यार्हमितीव मञ्जुलरवं कोकद्वयं दृश्यते ॥ (48)

इदं पद्यद्वयं वसुचरित्रप्रबन्धस्य चतुर्थशिवासस्थ 130-131 पद्ययोः अनुवादरूपम्। अत्र प्रथमे "सस्यं यदा पक्वं भवति, तदा कृषीवलः तच्छित्वा ततः अनुपयुक्तं पृथक्कृत्य उपयुक्तमेव राशीकरोति। तदा तत्पूतसस्यकान्तिरिव अरुणोदयः उपमितः। अनुपयुक्तघासादिनिकरच्छविरिव अस्तं गच्छन् शशी वर्णितः। द्वितीये च यदा नववधूः स्वगृहप्रवेशं करोति तदा पुण्याहवाचनमिति किञ्चित्स्मार्तमनुष्ठानमाचर्यते। तद्वत् लक्ष्म्यां स्वगृहमागच्छन्त्यां वानस्पत्यगुरुः पुण्याहवाचनं द्विजरवमाध्यमेन करोति इति, तत्समये दम्पत्योः दर्शनमपेक्ष्यत इति कोकद्वयं तदर्थमुपस्थितमिति च वर्णितम्। अयं च सन्दर्भः तत्तत्प्रान्तप्रसिद्धक्रियाचारवर्णनपरः तत्सन्दर्भावगतावेव हृद्यः भवति। एतादृशाः सन्दर्भाः अनेकेऽत्र सन्ति। अथापि अस्य कवेः सहजप्रतिभायाः परिचायकाः सन्दर्भाः अपि अनेके सन्ति। पश्यन्त्विदं ललनानाभिप्रदेशस्थरोमराजिवर्णनम्।

वक्षोजकुम्भभास्वरतारूण्यगजाधिराजस्य ।
नाभिह्रदे प्रविष्टः कर इव रोमावलिस्तवाभाति ॥ (124)

अत्र तारुण्यमेव गजः। नाभिः ह्रदः। तत्र प्रवेशितः गजशुण्ड एव रोमराजीति रम्यमुत्प्रेक्षितं किल। एवमयमर्थान्तरन्यासोऽपि हृद्यः।

तरुणीपदपल्लवप्रहारः तरुणानन्दकरः कथं नु न स्यात् ।
यदशोकतरुः पदाहतोऽपि स्मितमाविष्कुरुते सुमच्छलेन ॥ (139)

सरसपदबन्धोऽपि तत्तद्रसानुकूलः सहृदयरञ्जकोऽस्त्येवात्र। पश्यन्तु -

मन्दस्मितं कुटिलकोमलकेशपाशम्
आताम्रतामरसपत्रविजैत्रनेत्रम् ।

In Public domain, Digitization Muthulakshmi Research Academy

विम्बाधरं तव तलोदरि वक्रविम्ब-
मालोक्य मन्मथवशो धरणौ न कस्स्यात् ॥

एवमिदं सूर्यास्तमयवर्णनमपि अस्य कवेः भावनाशक्तेः निकषोपलः।

बन्धूकबन्धुच्छविरब्जबन्धुः-
सिन्धौ पतत्यद्य परे नभस्तः।
महेन्द्रपर्वेन्दुमुखीकचान्तः
प्रभ्रष्टकल्हारमिवातिरम्यः ॥

एवमनेके हृद्याः सन्दर्भाः सन्त्यत्र। एतादृश एव गोपालबालवर्णनपरः अयं नान्दीश्लोकः –

नीलं काञ्चनचेलमाश्रितमरुत्सालं निगर्वीकृत-
व्यालं बालशशाङ्कफालमतुलं सम्पीतदावानलम् ।
ब्रह्मेन्द्रेश्वरमूलनाभिकमलं भक्तानुकूलं विप-
द्वातूलं प्रविनाशिताखिलखलं गोपालबालं भजे ॥

अत्र गद्यमपि ओजोगुणयुक्तम्।

अस्य च कविता वर्णनेषु आलोचनामृतरूपा केवलसहृदयमनोह्लादिका। एवं प्रसिद्धकविभावानुवाद एवाधिक इति कश्चन प्रवादः आसीत् यश्च समकालिकैः पण्डितैः तिरस्कृतः[50] भाणोऽपि प्रशंसितः इत्थम्–

उदास्यतां नाम रसानभिज्ञैः
अयं तु भाणः सरसैः प्रशस्यः।
क्रमेलकैः पल्लवितो रसालः त्यक्तः
पिकानां स मुदे धरित्र्याम् ॥

---

50 कुरुकापुरी वरदाचार्यस्येयमुक्तिः – संस्कृतभाणसाहित्यग्रन्थे उल्लिखिता – सं-स्कृतभाणसाहित्यमु –तेलुगु –P. 103.

In Public domain. Digitization Muthulakshmi Research Academy

अयञ्च भाणकर्ता विक्किराल शेषाचार्यः, भारद्वाजगोत्रः एकोनविंशे शतके कविपण्डिततल्लजेषु अन्यतमः आन्ध्रप्रदेशे कालहस्तिग्रामाभिजनः। एतद्वंशीयाः इदानीं आन्ध्रदेशे नेल्लूरुपट्टणपरिसरे कनिगिरिमण्डले 'कलिकिवायि' ग्रामे निवसन्ति। अस्य पितामहः अपि शेषाचार्यः। अस्य पिता शठकोपाचार्यः कालहस्तिसंस्थानस्य आस्थानपण्डितः आसीत्। अयं च एतद्भाणरचनायाः पूर्वमेव समसामयिकैः विद्वत्तल्लजैः नडाधूर् गोविन्दाचार्य – अनन्तशयन गोपालशास्त्रि – कोक्कोण्ड वेङ्कटरत्न – तिम्मावज्झुल कोदण्डरामशास्त्रि– कुरुकापुरी वरदाचार्यादीनां प्रशंसापात्रमासीत्। समसामयिकैः पण्डितैः 'कविकण्ठीरव' बिरुदेन सम्मानितश्च। अयं कालहस्तिश्रीनगरादिसंस्थानास्थानकवीश्वरः आसीत्। अयं च अमुं भाणं मद्रपुरीसमीपस्थश्रीनगर(तिरूर् मिठा)संस्थानाधीश्वरस्य कोप्पनूल्लगोत्रोद्भवस्य चेलिकानिवंश्यस्य जगन्नाथमहीपालपुत्रस्य राजबहादूर् वेङ्कटगोपालरायस्य प्रार्थनया रचितवानिति ज्ञायते। अयं च चित्तूरुनगरसमीपस्थरायवेलूर् – पट्टणस्थ–"चर्च आफ स्काटलांड् मिषन् हैस्कूल्" मध्ये आन्ध्रभाषाध्यापकः आसीत्। अस्मिन् भाणे कलत्रपत्रिकायां नन्दनवर्षः उल्लिखितः। अतः अयं क्रि.श.1892 वर्षे रचितः, शा.श.1816 वर्षे जयनाम्नि संवत्सरे अर्थात् कि.श.1894 वर्षे प्रकाशितश्चेति भाण प्रस्तावनादिभिः[51] ज्ञायते। अनेन तिरुमलवेङ्कटेश्वरस्य स्तुतिरूपः 206

---

51 a) इति श्रीमद्भारद्वाजकुलतिलकस्य श्रीकालहस्तिसंस्थानपण्डितमण्डलाखण्डलस्य.... श्रीमद्विक्किराल शठकोपाचार्यस्य पुत्रेण .... स्वकवितासमाकर्णनसन्तुष्टसमस्तविद्वत्प्रभुवितीर्णकविकण्ठीरवबिरुदेन श्रीकालहस्तिश्रीनगरप्रमुखसंस्थानास्थानकवीश्वरेण रायवेलूर् चर्च आफ स्काटलांड मिषन् हैस्कूल् आन्ध्रोपाध्यायेन श्रीशेषाचार्येण...

b) श्रीमच्चेलिकानिवंशमुक्ताफलायमानश्रीजगन्नाथगर्भपयःपयोराशिराकासुधाकरस्य श्रीराजा राजबहादूर् वेङ्कटगोपालरायस्य प्रेरणया....शालिवाहनशके मतमृगधरमतङ्गजमही (1816) मितेषु वर्षेषु गतेषु जयनाम्नि संवत्सरे ....मुद्रितः

c) Contribution of Andhra to Sanskrit literature - B. Ramaraju- p 610-614.

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकात्मकः 'वेङ्कटेशगुणरत्नशेवधि' नामकः प्रबन्धोऽपि रचितः। अयं मद्रपुर्यां क्रि.श. 1885 वर्षे एव प्रकाशितः। अयं शेषाचार्यः आत्मानमुद्दिश्य स्वयमित्थमुक्तवान्–

शुभ्रांशोः चेलिकानिवंशजलधेः गोपालभूपालकात्
अष्टैश्वर्यमवाप्य तुष्टहृदयश्शिष्टामरक्ष्मारुहात् ।
नित्यं श्रीपतिपादपद्मयुगलध्यानैकतानाशयः
श्रीशेषाचार्यकवीश्वरो विजयते साहित्यविद्याचणः ॥
न शब्दशास्त्राध्ययनं मया कृतं न पूर्वकाव्यान्यवलोकितानि।
तथापि निर्हेतुकजानकीपतिप्रसादतोऽहं कवयामि किञ्चित् ॥ इति।

8.31 शृङ्गारजगन्मोहनभाणः – एक्किराल नरसिंहाचार्यः[52]

आन्ध्रदेशे प्रसिद्धं वनपर्तिसंस्थानमिति, यदधिपः अष्टभाषाबहरीगोपालरायः क्रि.श.सप्तदशशतके स्वयं कविपण्डितः कविपण्डितपोषकश्च आसीत्। अनेन शृङ्गारमञ्जरीभाणः रचितः। अस्मिन्नेव संस्थाने क्रि.श. एकोनविंशशतकपर्यन्तं कवीनां पण्डितानां च सम्माननम् आदरः आस्थानविद्वत्कविरूपेण पोषणं च आसीत्। एकोनविंशशतकीयेषु तादृशविद्वत्सु एकः आन्ध्रसंस्कृतयोः निष्णातः कविपण्डितः एक्किराल नरसिंहाचार्यः। अनेन शृङ्गारजगन्मोहनभाणः रचित इति ज्ञायते। अयं च अप्रकाशितः तत्रैव संस्थाने संरक्षितः स्यात्। अयं कविः आशुकविताप्रवीणः शतावधानी चासीत्। भारतीस्तुतिः, कल्याणी चास्य प्रकाशितौ ग्रन्थौ। मालतीमाधवप्रकरणमान्ध्रीकृतमनेन। दूताङ्गदकाव्यमपि रचितम् अनेन अप्रकाशितमेव अस्ति।

52 आन्ध्रविज्ञानसर्वस्वमु – संस्कृतिखण्डः – part II - p. 1178.

In Public domain. Digitization: Muthulakshmi Research Academy

8.32 शृङ्गारजीवनभाणः–वरदाचार्यः

असमग्रतयोपलभ्यमानेषु भाणेषु अन्यतमोऽयं अडयार् ग्रन्थालये[53] सुरक्षितः। कौशिकगोत्रः शरण्याचार्य पुत्रः वरदाचार्यः अस्य रचयिता। मन्मथस्तुतिपरया अनया नान्द्या अयमारभ्यते–

सौन्दर्ये सकलोपजीवमभवद्योसौ विना व्यङ्ककं
यद्बाणाः पतनं विनापि जगतां चित्तं हरन्ति क्षणात् ।
यत्सैन्ये करिणां न सन्त्यवयनाः शुण्डाशिरोभ्यां परे
स श्रीमान् रतिनायको वितरतां तुङ्गोदयं मङ्गलम् ॥

महाराजसभाविनोदपर्यन्तमेवायं भाणः उपलभ्यते। कवेः समयादिविषये स्पष्टतया न ज्ञायते। कौशिकगोत्रेण वरदाचार्यपुत्रेण श्रीनिवासाचार्येण शारदानन्दनभाणः रचितः। स च श्रीनिवासाचार्यः अस्यैव पुत्रः स्यात्। ततश्च अयमपि क्रि.श. एकोनविंशे शतके स्यादित्यूह्यते।

8.33 शारदानन्दनभाणः–श्रीनिवासाचार्यः

अप्रकाशितेषु भाणेषु अन्यतमः मद्रपुरीतालपत्रग्रन्थालये सुरक्षितः[54] श्रीनिवासाचार्यविरचितोऽयं मिश्रभाणः, यत्रेतिवृत्तम् आनन्दलतारसिकशेखरयोः प्रणयः। तमिलनाडुप्रान्ते श्रीपेरुम्बूर् नाम्नि प्रसिद्धे क्षेत्रे कार्तिकोत्सवेषु प्रदर्शनार्थमुद्दिष्टोऽयमन्वर्थनामा। बाल्यविवाहाचारस्य अयुक्तताप्रदर्शनपुरस्सरं तदवरोधाय समुद्युक्तं समाजं परामृशन्, सत्यामपेक्षायां विधवाविवाहानामपि प्रोत्साहके कालेऽयं रचित इति अनुमातुं शक्यते।

53 Adayar - 157 D.
54 GOML-Madras-D. 12701

In Public domain. Digitization Muthulakshmi Research Academy

अत्र विधवासमाजवर्णनमित्थं कृतम्–

अतिविपुलनितम्बाश्रान्तमन्दप्रयातं
गुरुतरकुचकुम्भाभोगभारापहाङ्गम् ।
कलशजलधिधौतापाण्डुरक्षौमहृद्यं
विलसति विधवानां बृन्दमिन्दूपमास्यम् ॥

यद्यप्ययं स्वभावोक्तिः अथापि सुमङ्गलीलक्षणयुक्तायां विधवापदव्यवहार्यत्वे सति, समाजे तस्याः या दयनीया स्थितिः, सात्राभिव्यज्यमाना समेषां सहानुभूतेः तां पात्रीकरोति । वारकान्तास्नेहः, तटितः विलासः, अविनीतानां सम्पच्च क्षणमात्रस्थायिन इत्युपदेशेनानेन आरभ्यतेऽयं भाणः–

सौहार्दं वारनारीणां सौभाग्यं तटितामपि ।
सम्पदश्चाविनीतानां तत्क्षणैकमनोहराः ॥

प्राचीनकवीनामनुकरणानि बहूनि अत्र विलसन्ति । अथापि स्वतन्त्राः रमणीयाश्च भावाः स्थाने स्थाने सन्त्येव सहृदयरञ्जकाः । पश्यन्त्विदं मदनविजयश्रीरूपेण रूपितं नारीवर्णनम्–

गुरुश्रोणीभारा वलनविषमैरञ्चिततमैः
पदन्यासैश्चञ्चन्मणिनिवहमञ्जीरमुखरैः ।
मुहुश्चेतोवृत्तिं मम कलुषयन्ती समयते
भुवं प्राप्ता साक्षान्मदनविजयश्रीरिह सखी ॥

In Public domain. Digitization Muthulakshmi Research Academy

अयं च कविः कौशिकगोत्रः, वरदाचार्यस्य सुतः। कौशिकगोत्रेण वरदाचार्येण कृतः श्रृङ्गारजीवननाम्ना कश्चन भाणः उपलभ्यते, यश्च अप्रकाशितः असमग्रश्च अडयार् ग्रन्थालये संरक्षितः। प्रायः स एव वरदाचार्यः अस्य श्रीनिवासाचार्यस्य पिता स्यात्। अस्य कालः स्पष्टतया न ज्ञायते अथापि एकोनविंशशतकोत्तरार्धे स्यादित्यूहितुं शक्यते।

In Public domain. Digitization Muthulakshmi Research Academy

अध्यायः 9

क्रि.श.विंशशतकभाणाः

क्रि. श. विंशे शतकेऽपि भाणरचना सम्यगेवासीत् यद्यपि पूर्वशतकापेक्षया संख्या न्यूना एवासीत्। परन्तु एतच्छतकीयभाणेषु इतिवृत्ते महद्वैलक्षण्यं दरीदृश्यते। एतद्वैलक्षण्यमनुसृत्य एतच्छतकीयाः भाणाः द्विधा विभज्यन्ते। तत्र प्रथमविभागीयाः पूर्वतनभाणग्रन्थानामेव यथावदनुकरणपराः यत्र शृङ्गारः शृङ्गाराभासो वा प्रधानः, वीरादीनां सूचनामात्रमिति। अस्मिंश्च विभागे उपदश भाणाः समुपलभ्यन्ते। अथ द्वितीयो विभागः यत्र प्राचीनपरम्परा सर्वथा परित्यक्ता अपितु वर्तमानभारते स्वातन्त्र्यात्परं राजकीयक्षेत्रे तथा अन्येष्वपि क्षेत्रेषु प्रवृद्धानां धूर्तानां विशृङ्खलाः व्यवहाराः लक्ष्यीकृताः। एतादृशानां पुरुषपुङ्गवानां चरितमेवेतिवृत्तमत्र। एतेषां पुरुषपुङ्गवानां नीतिः का? धर्मः कः? पूजा का? इत्यादि तत्तस्वरूपजिज्ञासाः इत्थं समाधीयन्ते।

का नीतिः? परलोकभीतिरहितं या साहसं दीपयेत्
को धर्मः? निजशर्महेतुरपरे मर्मन्तुदापि क्रिया।
का पूजा? जठराग्नितर्पणमयी, का साधुता? मौखिकी

In Public domain. Digitization Muthulakshmi Research Academy

स्निग्धावाक्, तदनुच्छलेन कठिना गुप्ता हतिर्वक्षसि ।। (पुरुषपुङ्गवभाणः)

अस्मिंश्च विभागे अष्टौ भाणाः उपलभ्यन्ते । अथेदानीं प्रथमं प्रथमविभागीयान् भाणान् किञ्चित्परिशीलयामः ।

9.1 विटविलासभाणः – महादेवशास्त्री

अयं भाणः तमिलानाडुराज्ये कुरङ्गनगरीमधितिष्ठतः सुन्दरपरिपूर्णस्वामिनः फाल्गुनमहोत्सवेषु प्रदर्शितः । पुदुक्कोटैतः प्रकाशितायां संस्कृतपत्रिकायां धारावाहिकतया क्रि.श.1907–08 वर्षयोः प्रकाशितः ।

अत्र विटः गन्धवाहः । स्वस्य वासन्तिकादुहितुः मलयवत्याश्च यः रहस्यमयः प्रणयबन्धः तस्य वार्ता बहिरागता इति दुःखमनुभवन् अयं रङ्गे प्रविशति । अयं केवलं कालक्षेपाय वीथीषु अटन् तत्र तत्र सम्मुखमागतान् व्यक्ति विशेषान् व्याजीकृत्य तात्कालिकसामाजिकदुर्वृत्तानि वर्णयति । मलविसर्जनार्थं गृहाद्बहिरागताः बालिकाः कथं विटैः दूष्यन्ते, नाटकादिप्रदर्शनव्याजेन कुलवधूः प्रलोभ्य कथं तैरनुभूयन्त इत्यादि समसामयिकं वर्णितमत्र । एवं काचवलयविक्रेतारः तत्तत्काचवलयपरिधापनमिषया युवतीनामङ्गाङ्गस्पर्शं कथमनुभवन्तीत्यपि वर्णितमत्र । अन्यः कश्चन विशेषः नववधूवरयोः गर्भाधानवर्णनम् । गर्भाधानमुहूर्ते शयनमन्दिरे वधूवरयोः प्रवेशनात् परं द्वारं पिधाय तत्रत्यरन्ध्रादिद्वारा तयोः शृङ्गारचेष्टादिकं तत्रत्ययुवतीगणेन परिशील्यत इति विशिष्य बालविधवाः एतादृशे कर्मणि महतीम् आसक्तिं च प्रदर्शयन्तीति तासां दुश्चेष्टितमपि प्रकाशितमत्र । कवितात्र सरला सरसा च । पश्यन्तु नान्दीमिमाम्–

अङ्कारूढामभिनवरतौ गोपयन्तीं स्वलौल्यं
व्रीडाभाराद्विनतवदनां रुक्मिणीं वीक्ष्य कान्ताम् ।

In Public Domain. Digitization: Muthulakshmi Research Academy

तत्कालार्हं यमकृत विभुर्गोपनारीभुजङ्गः
भूयात् भूत्यै सकिल मधुरस्सम्भ्रमः सन्ततं नः ।।
जीयाचान्द्रीस्मरहरशिरश्शेखरीभूतधामा
वामोरूणामविरलसुखश्लेषहेतुः कला सा ।
भूत्या यस्याः त्रिभुवनपतिः मारहन्तापि गौरी-
गाढाश्लेषादविरलमभूदर्धनारीश्वरात्मा ।।

एतद्भाणकर्ता महादेवशास्त्री आत्रेयगोत्रः, वेदवेदाङ्गनिष्णातः घण्टाशत-पद्यरचनाधुरन्धरः । कुरङ्गनगरी अस्य जन्मभूमिः । अयं स्वयमेवमात्मनः विषये कथयति–

यस्मिन् सद्गुणसंहतिं कलयते नित्याधिवासं बुधाः
यं घण्टाशतपद्यबन्धचतुरं विद्यावधूवल्लभम् ।
आत्रेयाम्बुधिवारिजातमतुलं निस्सीमशीलास्पदं
सत्सौभाग्यरसाकरं श्रुतनिधिं धीमन्दिरं मन्वते ।।

अयं बहुग्रन्थकर्तेत्यपि अस्मादेव सूत्रधारवचनात् ज्ञायते ।

महादेवकवेस्तस्य सन्दर्भेषु बहुष्वपि ।
मह्यं विटविलासोऽयं रोचते भाणशेखरः ।। इति ।

यतोऽयं भाणः 1907, 1908 वर्षयोः प्रकाशितः अतोऽयं कविः क्रि. श. एकोनविंशशतकोत्तरार्धे जात इति विभावनीयम् ।

9.2 कन्दर्पविलासभाणः– बेल्लंकोण्ड रामरायकविः

अयं भाणः आन्ध्रप्रदेशे बापट्लनगरात् भारतीविलासमुद्रणशालाद्वारा क्रि.श. 1910 वर्षे प्रकाशितः । कवयश्च द्विविधाः भवन्ति ! केचन स-हृदयरञ्जनार्थमेव काव्यानि रचयन्तिचेत् केचन स्वपाण्डित्यप्रदर्शनार्थम् । यानि च काव्यानि द्वितीयां कोटिमाटीकन्ते तेष्वन्यतमोऽयं भाणः । यश्च

 In Public domain. Digitization Muthulakshmi Research Academy

व्याख्यां विना सामान्यैरवगन्तुं न शक्यः। कविरेव अस्य भाणस्य विषये एवं वक्ति – "अवधारितबाणादिविद्वत्कविसूक्तिजालैः सूक्तिजालैः ग्रथितः कन्दर्पदर्पविलास इति सभाजनरसभाजनभूतः कश्चन भाणप्रबन्धः" इति। एवञ्च बाणकालिदासादिकाव्यपरिशीलनलब्धप्रतिभावतामेव आस्वादयोग्योऽयं भाणः इति स्वयमेव वक्ति कविः। नायकस्य दर्पविलासोत्सवदर्शनार्थं गमनमेवेति वृत्तम्। सामान्यभाणेष्विव कन्दुकक्रीडादिवर्णनमत्रापि कृतम्। अत्रत्यं सरससुन्दरीवर्णनमिदमस्य कवेः रचनायाः उदाहरणभूतं भवितुमर्हति –

कर्णिकारकृतकर्णिका ब्रुडधमर्णिकाविजितकर्णिका
चूर्णिकातिपरमर्णिका हसितवर्णिका कलितकर्णिका।
स्वर्णिकाय्यतनुवर्णिका मदनपूर्णिकाशमुखजर्णिका
जूर्णिकालल‌द्वर्णिका भविकपूर्णिका कुचगवर्णिका।।

इदं डोलाविहारवर्णनमपि–

आलिका मरालिका करालिका धुतालिका
पालिका मधूलिका कणालिका दमालिका।
कालिका सुशैलिका रमालिका मरालिका
कालिकाभचूलिका निभालिका कुनीलका।।

कवेः व्याकरणशास्त्रपाण्डित्यप्रदर्शनपरमिदं प्रभातवर्णनम् –

चरीकरोतु शंहविद्दरीकरोतु कञ्जनः।
बरीभरीत्वमुं हरिर्वरीवरीतु भाणकः।।

एतादृशोदाहरणैः स्पष्टमिदं यत् अयं भाणप्रबन्धः स्वपाण्डितीप्रदर्शनायैव रचितः यश्च व्याख्यां विना दुर्ज्ञेयः इति।

In Public domain. Digitization: Muthulakshmi Research Academy

अयञ्च कविः बेल्लंकोण्डवंश्यः आन्ध्रदेशे आधुनिकसंस्कृतकविषु अग्रगण्येषु अन्यतमः[1] क्रि.श.1875 वर्षे जनिं लब्ध्वा ऊनचत्वारिंशद्वर्षाणि एव. जीवित्वा क्रि.श.1914 वर्षे दिवमगच्छत्। आन्ध्रप्रदेशे गुण्टूरुमण्डले पमिडिपाडुग्रामः अस्य जन्मभूमिः। हयग्रीवोपासकोऽयं अल्पे एव स्वीये जीवनकाले सार्धशतं (150) ग्रन्थानरचयत्। एते च ग्रन्थाः न केवलमेकशास्त्रसम्बद्धाः अपितु अनेकशास्त्रसम्बद्धाः। जन्मना विशिष्टाद्वैती अयं पश्चात् अद्वैतीभूत्वा अद्वैतविजयः, वेदान्तकौस्तुभः, वेदान्तमुक्तावली, शारीरकचतुस्सूत्रीविचारः, शङ्करभाष्यविमर्शः, अद्वैतान्यमतखण्डनम्, वेदान्ततत्त्वामृतं, वेदान्तसङ्ग्रह इत्यादि ग्रन्थान् अद्वैतसमर्थकान् अरचयत्। रुक्मिणीपरिणयचम्पूः, श्रीकृष्णलीलातरङ्गिणी, कन्दर्पदर्पविलासभाणः, हयवदनशतकं, गरूडसन्देशः, समुद्रमथनचम्पूः इत्यादि प्रबन्धाः, अनेकानि स्तोत्राणि, अनर्घराघवादिग्रन्थानां व्याख्याश्च रचिताः। एषु केचन प्रकाशिताः। केचन अप्रकाशिताश्च। अस्य रामरायस्य पिता मोहनारायणः, माता हनुमायम्मा।

9.3 मदनानन्दभाणः – भट्टर् पार्थसारथि अय्यंगार्

अयं भाणः आन्ध्रदेशे कृष्णामण्डले नूजिवीडुग्रामे क्रि.श. 1921 वर्षे आयुर्वेदमुद्राशालायां मुद्रापितः, नूजिवीडुसंस्थानेन प्रकाशितः। अत्र मदनानन्दः विटः शृङ्गारलीलायाः प्रथमार्तवमहोत्सवायाहूतः प्रातरेव प्रस्थाय यथावत् तत्र तत्र अटित्वा सायं तत्र गच्छतीति सामान्यमेवेतिवृत्तमत्र। अथापि "अधुनातनवर्त्मना" "अभिनवरूपकं नाम मदनानन्दभाण" इति अस्य स्वरूपं कविनैव आद्यन्तयोः निरूपितम्। तथैवास्मिन् भाणे आधुनिकपद्धत्या आधुनिकविज्ञानेन कृताः समाजस्य उ-

1 Contribution of Andhra to Sanskrit literature - B. Ramaraju - p.449 -453 ; संस्कृतभाणसाहित्यमु – तेलुगु –p.109.

In Public domain. Digitization Muthulakshmi Research Academy

पकाराः अपकाराश्च सुनिशितं परिशीलिताः। अत्र आधुनिकयुगे उप-युज्यमानानि यानसाधनानि सैकिल् आरभ्य विमानपर्यन्तं सर्वाणि अत्र यथास्थानं वर्णितानि। अत्र रैल्यानस्य वर्णनमिदम् –

एकत्र ताड्यते घण्टा स्तम्भाग्रस्थोऽपि ध्वजपक्षः
अवनामितो मन्ये तथायं धूमशकटागमनकालः ।।
श्रेणीभूयस्थगितिनिगलाघट्टनाद्यान्ति पश्चाद्
धूमोद्गारिज्वलनजठरस्थानसोनांस्यमूनि।
संलक्ष्यन्ते विबुधविमुखं धुर्यवाप्यावनीपं
पश्चादेष्यत्पतति पुरुषाकल्पकानीव मह्यम् ।।

एवं सर्वकारीयस्वास्थ्यशाखा, तत्रत्यैः क्रियमाणमन्याय्यं, शवविशसनं, रक्षकभटानामौद्धत्यम्, अधिकारिणां दर्पः, तैः क्रियमाणानि दूषणानि इ-त्येवं सामाजिका अनेके विषयाः अत्र सुनिशितं परीक्षिताः। मूढविश्वासाः अपि अत्र सधैर्यं बहिरानीताः। कपटाः सन्यासिनः निरपत्यविधवानां कृते सन्ततिमनुगृह्णन्ति स्म। तादृशसन्यासिनः अनुग्रहस्य आकाङ्क्षिणीं विधवां सम्यगलङ्कृत्य तत्समीपं प्रेषयन्ति स्म। अयं च दुराचारः इत्थमत्र वर्णितः–

नानालङ्करणैः प्रसाधिततनुः चामीकरामत्रके
सूनस्रग्घनसारचन्दनफलान्याहृत्य शुद्धाशया।
प्रेयांसं प्रथमोपभोगसमये कान्ता यथा संसरे
दैकाग्र्येण तथा शयीत विजने देवालये सुन्दरी।।

एवमेकां रात्रिमुषित्वा प्रातः सा देवालयकवाटोद्धाटनात्परं स्वगृह-मायाति स्म। रात्रौ किं वृत्तमिति भगवानेव जानाति। परन्तु ततः परं लोकानामपहास्यस्य भाजनं भवति स्म सा स्त्री।

In Public domain. Digitization: Muthulakshmi Research Academy

एवमत्र सन्दर्भमनुसृत्य आभाणाकानां प्रयोगः कृतः तथा अनेके न्यायाः अपि स्थाने प्रयुक्ताः येषु खलेकपोतन्यायः, गड्डुलिकाप्रवाहन्यायः, रेखा-गवयन्यायः, कूपखानकन्यायः, दण्डापूपिकान्यायः, ब्रह्मास्त्रन्यायः, भ्र-ष्टावसरन्यायः, इत्यादयः उल्लेखमर्हन्ति। अत्र चाधुनिकानां विषयाणां सं-स्कृतभाषायां वर्णनसन्दर्भे तत्तद्वस्तुपरिचायकपदानि संस्कृतभाषायां क-ल्पितानि अनवगतार्थानि भवेयुरिति विचिन्त्य कविनात्र टिप्पण्यां तेषां विवरणमपि प्रस्तुतम्। पारदारिकमधिकतोषप्रदमिति कथं समर्थयति पश्यन्तु-

अहल्यामिन्द्रोगाद्विधुरपि च तारामशरणां
जहार प्रासथ्यादवनितनयां कर्बुरपतिः।
मुकुन्दोऽप्याभीरीस्सति युवतिवारेऽप्यतितराम्
अधीने सौभाग्यं किमपि परदारेष्वनुमितम् ।। (79)

कवेरस्य प्रतिभा, अस्य भावनापटुत्वं चानेन चन्द्रकलङ्कवर्णनेन अवगतं भवति। चन्द्रे कलङ्कः बहुभिः बहुधा वर्णितः। परन्तु नैवं केनापि कविना समूहितं, यच्चात्र कविना समीक्षितम्। पश्यन्तु-

पस्पर्धे मुखमण्डलेन सह यस्तन्व्या तव प्रेयसि
प्राप्तस्सन्निधिमुत्कटामृतमयैः सम्मोहितो वीक्षणैः।
त्वद्वक्षोरुहकाञ्चनाद्रिपतितस्तत्पातजातव्रणस्-
सोऽयं दुस्सहवञ्चनां विषहते चन्द्रः कलङ्कीत्यहो ।।

चन्द्रः मुखेन स्पर्धार्थमागतः, वनितापाङ्गैः मूर्च्छितः, वक्षोरुहशैले पतितः। शिलायां पातेन कस्यापि व्रणः सहजः। स च व्रण एव चन्द्रे दृश्यमानः कलङ्क इति जनैरुच्यत इति कीदृशी कल्पना? एवं स्थाने स्थाने साङ्गि-कविषयानुशीलनेन सहृदयरञ्जकोऽयं भाण इति नातिशयोक्तिः। एतद्भा-

In Public domain. Digitization Muthulakshmi Research Academy

णकर्ता वैयाकरणपञ्चाननः भट्टर् पार्थसारथि अय्यंगार् नूजिवीडुसंस्थानाधीशेन वेङ्कटाद्रि–अप्पाराव् नाम्ना सम्मानितः तदास्थानविद्वत्कविषु अन्यतमः आसीत्। वल्लीपुरवासी रघुनाथचक्रवर्ती अस्य गुरुः। कोदण्डरामस्य चैत्रोत्सवेषु प्रदर्शितोऽयं भाणः विंशशतकभाणेषु उत्तमेषु प्रथमगण्यः भवति।

9.4 रसार्णवतरङ्गिणी भाणः – कपिष्ठलं कृष्णमाचार्यः[2]

अयं भाणः प्रकाशित इति ज्ञायते। परन्तु कुत्रेति न ज्ञायते। नाम्ना अयमपि शृङ्गाररसप्रधान इत्येव ज्ञायते। अयं कविः तिरुपतिवास्तव्यः कौशिकगोत्रः रङ्गाचार्यसुतः। अस्य पितृव्यः कपिष्ठलं देशिकाचार्यः वेदान्तादिशास्त्रेषु प्रसिद्धः पण्डितः। अयं कृष्णमाचार्यः क्रि.श. 1883-1934 मध्ये अवर्तत। अयं विमर्शकाग्रेसरः। अनेके लेखाः अनेन रचिताः। विलासवती काव्यम्, मन्दारवती कथा च कृत्यन्तरे।

9.5 शृङ्गारशेखरभाणः – सुन्दरेशशर्मा

अयं भाणः तञ्जापुरे बृहदीश्वरस्य वसन्तोत्सवेषु प्रदर्शितः। तञ्जापुरसंस्कृतसंसद् द्वारा क्रि.श.1938 वर्षे अयं भाणः प्रकाशितः यस्याः संस्थापकः अयं भाणकर्तैवासीत्। अत्र नायकः शृङ्गारशेखरः। अन्यभाणेष्विव परकीयायामनुरक्तः तया सङ्गतोऽपि अपूर्णकामः पुनस्तस्याः सङ्गमपेक्षमाणः स्वमित्रसाहाय्येन सायं पुनः तां सङ्गच्छतीति इति वृत्तमत्र समानम्। अत्र नायकः स्ववृत्तान्तं स्वमित्राय कथयन् कथं तस्य प्रिया तस्मै सङ्केतमकरोदिति इत्थं कथयति–

वृषभ चर यथेष्टं पत्तने वा स्वतन्त्रो
वस कितव भुजङ्गादर्शितो निष्कुटे वा।

---

2 H.C.S.L-MK-p484; संस्कृतभाणसाहित्यमु – तेलुगु – p. 251

In Public domain. Digitization Muthulakshmi Research Academy

इह किल निशि मध्ये कन्धरे वन्धयिष्ये

करकिसलयरज्जुं शाद्वलासेवनाय।।

एवं सम्यगात्मानं प्रसाध्य बृन्दरूपेण कलाशालां गच्छन्त्यः बालिकाः अपि इत्थं वर्णिताः - "का नामेमाः परिष्कृतचिकुरविन्यस्तार्धचन्द्राकारदान्तवलयाः, लम्बमानधम्मिल्लार्धविराजमानचमरीवालसदृशकेशपाशरमणीयाः, सन्दर्शनीयबाहुमूलकुचपरिणाहसूक्ष्मकञ्चुकधारिष्यः, कान्तिझर गोपनभीत्यैवैकमेव कनकग्रैवेयकं दधानाः, नयनविहितकनकोपनेत्राः, प्रकोष्टपरिकलितघटीयन्त्राः, करलम्बितकुरङ्गचर्मभस्त्रिकाः, चरणनिहितकौशेयपादत्राणाः सङ्घशः।

पादलम्बिसितचेलभूषिताः पुस्तकैश्च विनिगूहितस्तनाः।

मन्दमन्दमधरोदिताशयाः अत्र यान्ति ललनास्समन्ततः।।

अत्र प्रधानतया नागरिकताव्याजेन लक्ष्यमाणाः स्त्रीपुरुषयोः विशृङ्खलप्रवृत्तयः सुनिशितं खण्डिताः। विलासमन्दिराणि, तत्रत्याः स्वैरप्रवृत्तयः दुराचाराश्च सम्यगत्र परामृष्टाः।

एतद्भाणकर्ता सुन्दरेशशर्मा तञ्जापुरनिवासी[3]। अयम् शतकेऽस्मिन् प्रसिद्धः कविः आसीत्। अनेन त्यागराजचरितमिति पञ्चदशसर्गमितं काव्यं रचितं यच्च क्रि.श.1937 वर्षे प्रकाशितम्। कर्णाटकसङ्गीतविद्वन्मणेः रामभक्तस्य श्रीत्यागराजस्य चरितमत्रोपवर्णितम्। रामामृततरङ्गिणीति स्तोत्रसङ्कलनमस्य द्वितीया कृतिः। तृतीया च कृतिरयं भाणः[4]। चतुर्थी च प्रेमविजयनाटकम्। तञ्जापुरे संस्कृतप्रचाराय संस्कृतसंसद् (Sanskrit Academy) अनेन स्थापिता। तद्द्वारा संस्कृतप्रचारकार्यक्रमाः अनेके अनुष्ठिताः।

---

3 आधुनिकसंस्कृतरूपक - p. 1190-91

4 Published by the general stores, Ayyankada Street, Tanjore - 1938.

In Public domain. Digitization Muthulakshmi Research Academy

9.6 वसन्तमित्रभाणः – मङ्गलगिरि कृष्णद्वैपायनाचार्यः

आन्ध्रदेशे गुण्टूरुमण्डले विजयवाडासमीपे मङ्गलगिरीति प्रसिद्धं नृसिंहक्षेत्रम्। तस्य नरसिंहस्य उत्सवेषु प्रदर्शितोऽयं भाणः आन्ध्रदेशे विजयनगरात् प्रकाशितः। अतः विजयनगरसंस्थानाधीशेन पोषितः सम्मानितश्चासीदयं कविरित्यूह्यते। अत्र मङ्गलगिरिनरसिंहमन्दिरदेवदास्याः माधव्याः अनुजायाः प्रथमरङ्गाधिरोहणमहोत्सवार्थमाहूतः विटः प्रातरेव प्रस्थाय तत्र तत्र अटित्वा सायं तदुत्सवार्थं गच्छति। अन्यप्राचीनभाणेष्विवात्रापि वेश्याशृङ्गारादिसन्दर्भाः सन्ति। अथापि अत्र एतच्छतकीयसामाजिकदुराचाराः सुनिशितं खण्डिताः, तेषां दुष्परिणामाः सम्यगत्र विवेचिताः। अत्र च साङ्घिकदुराचारेषु द्वौ दुराचारौ प्रमुखौ। तयोरेकः कन्याशुल्कम्। द्वितीयः बाल्यविवाहः। अस्मिन् शतके अनयोः द्वयोर्विषये एव अनेके ग्रन्थाः आन्ध्रेषु रचिताः। अतस्तावेवात्र प्रधानतया स्वीकृतौ।

कन्याशुल्कलोभेन अत्यल्पवयसि एव कन्यायाः विवाहः वृद्धैः सह क्रियमाणः आसीत्। सा च कन्या यदा युक्तवयस्का भवति तावता भर्ता आसन्नमरणः वा स्यात्, मृतो वा स्यात्। एवमप्राप्तपुरुषसम्पर्काः बालाः द्वितीयविवाहानर्हाः कुट्टिन्यादीनामुपदेशेन वेशवाटिकां प्रविशन्ति स्म। कोकिलवाणीवृत्तान्त एवात्रोदाहरणभूतः। कोकिलवाणी यदा पञ्चवर्षदेशीया तदैव मात्रा द्वादशशतरूप्यककन्याशुल्कं गृहीत्वा अष्टाशीतिवर्षदेशीयाय वृद्धाय दत्ता, यदा सा त्रयोदशवर्षदेशीया आसीत्, तदा तस्याः पतिः चतुर्नवतिवर्षवयस्कः अत्यन्तं वृद्धः चलितुमपि असमर्थः आसीत्। ततश्च यौवनविषयवाञ्छाः प्रबलाः एनां वेशावाटीं नीतवत्यः। एवमन्या स्त्री वसन्तसुमलता। इयं पितृगृहात् बहुधनं, बहूनि आभरणानि च गृहीत्वा श्वशुरगृहं प्राप्ता। पतिस्तु वेश्यालोलः एनामुपेक्षितवान्। ततश्चेयमपि स्वीयपैतृकसम्पत्तिं स्वीकृत्य वसन्ततिलकाभूत्वा वेशवाटीं प्रविष्टा। अस्मिन्

In Public domain. Digitization Muthulakshmi Research Academy

शतके गुरजाड अप्पाराव्, कन्दुकूरि वीरेशलिङ्गं प्रभृतयः एतादृशसाङ्घि-कदुराचारनिर्मूलनाय महान्तं प्रयासमकुर्वन्। विधवाविवाहाः अपि कृताः। अतः सान्दर्भिकविषयप्रचाराय अयं कविरपि स्वीयं भाणम् उपयुक्तवान्। अत्र तत्तत्पात्रोचिता भाषा प्रयुक्ता। वैदेशिकनारीभिः सम्भाषणसन्दर्भे आ-ङ्ग्लभाषापि प्रयुक्ता।

एतद्भाणकर्ता कृष्णद्वैपायनाचार्यः[5] विशाखपट्टणनगरसमीपस्थविजय-नगराभिजनः, कौशिकगोत्रः, वेङ्कटरमणार्यसुतः, क्रि.श.विंशे शतके पूर्वार्धे आसीत्। अयं संस्कृतान्ध्रयोः प्रसिद्धः कवि पण्डितः। अस्य प्रतिभा क-र्णाटकदेशपर्यन्तं व्याप्ता। श्रीकृष्णदासामृतनाटकम्, श्रीकृष्णचरितका-व्यम्, हयग्रीवाष्टकं, वसन्तमित्रभाणश्च अस्य संस्कृते कृतयः।

9.7 रसिकशेखरभाणः – गादाधरविद्याभूषणः

मनोरमापत्रिकायाः प्रारम्भसञ्चिकायां प्रकाशितोऽयं भाणः। एतद्रचयिता गदाधरः विद्याभूषणः उत्कलीयः विंशशतकस्य पूर्वार्धे आसीत्। अस्य कविता सरसा सरला च।

9.8 श्रीनिवासविलासभाणः – पैत्तम्बाडि रामानुजाचार्यः

अयं भाणः आन्ध्रप्रदेशे चित्तूरनगरे स्थितया संस्कृतभाषाप्रचारसभया प्रकाश्यमानायां गैर्वाणी पत्रिकायां क्रि.श.1975–76 वर्षयोः धारावा-हिकतया प्रकाशितः। श्रीशुकपुर्यां प्रदर्शनार्थमुद्दिष्टोऽयं भाणः। साक्षात् भगवान् वेङ्कटेश्वर एव विटशेखरत्वेन वर्णितोऽस्मिन् भाणे। अत्र चेति-वृत्तं तोण्डभूपानुजस्य आकाशराजस्य सुतायाः पद्मावत्याः परिणयोत्स-वार्थं वेङ्कटेश्वरस्य गमनमेव। सामान्यभाणविटवत् अयं भगवानपि प्रातरेव

---
5 आधुनिकसंस्कृतरूपक – p. 1175-76

 In Public domain. Digitization Muthulakshmi Research Academy

प्रस्थाय वेशवाटीं प्रविशति। "तालवृक्षच्छायायां पयः पानमपि मद्यपानं मन्यन्ते जनाः। अतः मद्यमेव पेयम्" इति वत् वेशवाटीं प्रविश्य तास्ताः वेश्याः अनाश्वास्य कुतो गन्तव्यमिति विचिन्त्य वेङ्कटेश्वरः विटः इत्थं निर्णेष्यति–

वामाः कामशरातिविद्धहृदयाः स्मेरारविन्दाननाः
पीनोत्तुङ्गपयोधराः मृदुलया वाचा मनोहारिणीः।
तास्ता मन्मथमन्मथोऽहमधुनाप्याश्वासयन् सादरं
नीत्वाहर्मधुरोक्तिभिः प्रियतमां सायं गमिष्यामि ताम् ।।

मन्मथमन्मथः श्रीनिवासः आसायं ताभिः वेश्याभिः कालक्षेपार्थमेव निर्णेष्यति। अन्यथा स्वीयमन्मथमन्मथत्वं वृथेति चिन्तयति। अयं च कविः बहुभाषाकोविदः। विशिष्यायं श्रीवैष्णवः। मातृभाषा च द्राविडी। अतः सन्दर्भानुसारं द्रविडगाथा अपि योजिताः। भाणेऽस्मिन् अन्यः विशेषः यश्च भाणान्तरेषु नोपलभ्यते सः अन्तर्भाणः। भाणे अन्तर्नाटकप्रयोगवत् अन्तर्भाणप्रयोगः अत्र कविना कृतः। अन्तर्भाणपात्रैः सह प्रधानभाणविटः भाषते। एतादृशाः प्रयोगाः ग्रीक्–भाषारूपकेषु सन्तीति विमर्शकाः[6]। अ-त्रत्यकविताशैल्याः भावनाप्राभवस्य चोदाहरणमिदम् –

रम्भायां नलिनं सनालमुदितं तस्मिंश्च शेते विधुः
तस्मिन् कोकनदेऽधुना विकसिते जातात्र सूर्यात्मजा।
सोत्तुङ्गे च निपत्य मेरुशिखरे व्योमाङ्गणाद्वापिकां
प्राप्तैतच्चरितं विलोक्य तरसा प्राप्तोहमद्याबले।।

यमुनायाः अधः पतनमिव भवत्याः अधः पतनं मास्त्विति तन्नि-वारणाय अहमागत इति कथयति विटीभूतः वेङ्कटेश्वरः। भगवतो वेङ्कटे-श्वरस्यैव विटरूपेण वर्णनरूपं दुस्साहसमत्र कविना कृतम्। अयं च कविः

6 संस्कृतभाणसाहित्यमु – तेलुगु – p. 173

In Public domain. Digitization Muthulakshmi Research Academy

रामानुजाचार्यः, वराहसूरिसुतः । श्रीरङ्गलक्ष्मणः अस्य गुरुः । वेदान्तदेशिकगुरुपूर्वचरितं, मुनित्रयजयरूपकं, कविकोलाहलनाटकं, ब्रह्मण्यानन्दाङ्कः अस्य कृत्यन्तराणि । तमिलनाडुराज्ये तिरुवहीन्द्रपुरे पैत्तम्बाडि अग्रहारः अस्य निवासः ।

9.9 अखिलजनमनोहरभाणः – विक्राल शेषाचार्यः

अयं भाणः प्राचीनभाणानुसारी शृङ्गाररसप्रधानः अप्रकाशितः तत्कर्तुः गृहे एव संरक्षितः । वीरसूचनार्थं मल्लयुद्धकुक्कुटयुद्धद्यूतादयः वर्णिताः । भगवतः ग्रामोत्सवोऽपि वर्णितः । अत्र कवितायाः परिचायकः अयं नान्दीश्लोकः –

बालोऽप्यहो बहुबलाढ्य इति स्मृतो यः
गोपाङ्गनाभिरसकृत्कृतमैथुनाभिः ।
दैत्यैः प्रहारसमयेषु हतैश्च तद्व-
त्सर्वक्रियैककुशलोऽवतु माधवोऽस्मान् ।।

अयं च भाणकर्ता[7] विक्रालग्रामाभिजनः विद्यारण्यबिरुदाङ्कितस्य रामचन्द्राचार्यस्य पुत्रः, चित्र–गर्भ–बन्धकविताप्रणयनलब्धप्रतिष्ठः, आन्ध्रदेशे कलिकिवायिग्रामे निवासमकरोत् । क्रि.श. 1980 पर्यन्तमयं जीवन् आसीत् । ततः परं न ज्ञायते । अनेन 262 ग्रन्थाः संस्कृते आन्ध्रे च रचिताः ।

9.10 मनोजविजयभाणः – शिरिशनगल् कृष्णमाचार्यः

अयं भाणः आन्ध्रदेशीयेन करींनगरमण्डलवासिना कृष्णमाचार्येण रचितः अप्रकाशितः अलभ्यश्च । अयं कृष्णमाचार्यः कविः पण्डितश्च अनेकग्रन्थकर्ता । विशिष्टाद्वैतसिद्धान्तानुयायी विशिष्टाद्वैतसिद्धान्तसमर्थकान् बहून् ग्रन्थानरचयत् । बहूनामान्ध्रभाषायां व्याख्या अपि अरचयत् ।

---

7 संस्कृतभाणसाहित्यमु–तेलुगु – p.115

In Public domain. Digitization Muthulakshmi Research Academy

9.11 कृत्तिकाभाणः – राघववर्मा[8]

राघववर्म तम्पुरान् नाम्ना केरलीयेन विंशेऽस्मिन् शतके कृत्तिकाभाणः रचित इति केरलीयसाहित्यचरितात् ज्ञायते। परन्त्वयमपि भाणः इदानीं नोपलभ्यते।

एवमेतावता – मया ज्ञाताः विंशशतकीयाः केचन भाणग्रन्थाः परिचायिताः ये च प्रथमवर्गे अन्तर्भवन्ति अर्थात् प्राचीनभाणपरम्परामनुवर्तन्ते। एवमन्येऽपि बहवः स्युः।

अथ द्वितीय वर्गीयान् भाणान् कांश्चित् परिचाययामि। तत्र प्रथमः महालिङ्गशास्त्रिणः मर्कटमार्दलिकभाणः।

9.12 मर्कटमार्दलिकभाणः – महालिङ्गशास्त्री

अयं च भाणः सर्वेभ्यः प्राचीनेभ्यः अर्वाचीनेभ्यश्च अत्यन्तं विलक्षणः। अत्र वेशवृत्तान्तोऽपि नास्ति। आधुनिकसामाजिकदुर्वृत्तप्रकाशनमपि नास्ति। दक्षिणप्रान्ते शिशूनां रञ्जनाय पितामह्यादिभिः उच्यमानाः काश्चन दन्तकथाः प्रचारे सन्ति तत्रान्यतमा एका वानरकथा। सैवात्र भाणे इति वृत्तम्। अत्र वानरः नायकः। तस्य पादे कण्टकः लग्नः आसीत्। तदपनयनाय सः क्षुरकं प्रत्यगच्छत्। सः यदा कण्टकमपनयति स्म तदा वानरस्य पुच्छमपि अकस्मात् छिन्नमासीत्। तेन कुपितः वानरः तच्छुरिकां स्वीचकार। ततः गच्छता वानरेण एका वृद्धा दृष्टा। तस्याः हस्ते अनेके कण्डोलाः आसन्। वानरः छुरिकां दत्वा एकं कण्डोलं स्वीचकार। ततः स कण्डोलः कस्मैचित् शाकटिकायादात्। स च तस्य हस्ते भग्नः। तदर्थं तस्य वृषभौ नीत्वा, तैलविक्रयिणः समीपं गत्वा वृषभौ दत्वा एक-

[8] केरलीयसंस्कृतसाहित्यचरितम् – IV P. 683

In Public domain. Digitization Muthulakshmi Research Academy

भाण्डमितं तैलं स्वीकृत्य, कस्यैचित् वृद्धायै दत्वा, तया निर्मितान् अ-पूपान् स्वीकृत्य, भक्षयित्वा, अवशिष्टान् कस्मैचित् भजनबृन्दाय दत्वा, तेषां मर्दलवाद्यं स्वीकृत्य वृक्षाग्रे स्थितः मर्दलं वादयन् स्वीयगाथां व-र्णयति। ततः सर्वे वानराः तं स्वीयमधिपतिम् कुर्वन्तीति कथा। अयं च भाणः क्रि.श. 1951 वर्षे कलकत्तानगरात् मञ्जूषापत्रिकायां प्रकाशितः।

एतद्भाणकर्ता महालिङ्गशास्त्री[9] तमिलनाडुराज्ये तञ्जापुरसमीपे "तिरु-वालंगाडु" ग्रामे क्रि.श. 1897 वर्षे जातः, यज्ञस्वामिसुतः, राजुशास्त्री-त्यपराभिधस्य त्यागराजस्य प्रपौत्रः, अप्पय्यदीक्षित वंश्यः। अयं मद्रास् न्यायालये वाक्कीलः आसीत्। सङ्गीतसाहित्ययोः अत्यन्तं निष्णातः। अयं बह्व्यः संस्कृतकृतीः अरचयत्। तासु प्रथमं क्रि.श. 1927 वर्षे रचितम् उद्गातृदशाननाटकम्। "संस्कृतप्रतिभा" पत्रिकायाम् अस्य कृतयः अनेकाः प्रकाशिताः। उद्गातृदशाननाटकं, प्रतिराजसूयनाटकम्, आदिकाव्योदयप्रकरणं, कौण्डिन्यप्रहसनम्, कलिप्रादुर्भावः, शृङ्गारना-रदीयप्रहसनम्, उभयरूपकप्रहसनम्, अयोध्याकाण्डरूपकमिति कृत्य-न्तराणि रूपकाणि। एवमनेकाः स्तुतयः, काव्यानि च रचितानि। अस्मिन् शतके प्रसिद्धकविषु अयमन्यतमः।

9.13 पुरुषपुङ्गवभाणः – जीवन्यायतीर्थः

संस्कृतसाहित्यपरिषदः सारस्वतोत्सवेषु प्रदर्शित एष भाणः अभ्यु-दयभावनाभावितः सभ्यप्रपञ्चस्य व्यङ्ग्यमर्यादया सत्प्रवृत्त्युपदेशकः न-व्यभाणसाहित्यस्य उपक्रमरूपः। "यावच्च धर्मजडतां न परित्यजन्ति तावत्कुतो भवति भारतनव्यभव्यम्" इति भारतसर्वकारनीतिं परिहसति व्यङ्ग्यमर्यादयायम्। सम्प्रदायविमुखोऽयं भारतीयसमाजः कथं चरित्रहीनो

[9] आधुनिकसंस्कृतनाटक – p. 901-902

 In Public domain. Digitization Muthulakshmi Research Academy

जायते इति सम्यगुपवर्णितमत्र। अस्मिंश्च नायकः वाग्वीरनामा पुरुषपुङ्गवः। यस्य च नाम "वाग्वीर" इति अन्वर्थम्। वाचि एव वीरः न कार्ये इत्यर्थः। अस्य स्वभावः सूत्रधारेणैव अत्र इत्थं वर्णितः – "अरे! समापतति पुरुषपुङ्गवो वाग्वीरनामा। यः किल नारीसदसि वीरायते, धीरायते च शिशुसंसदि, कीरायते च विद्वत्परिषदि, तनोति नीतिवर्जनं परपीडनाय, करोति गर्जनं निरीहशासनाय, कूटसर्जनं च जनवञ्चनाय" इति। अयं च नायकः ग्रामीणानां यूनां चैतन्यजननाय बद्धकङ्कणः तानेवेत्थं प्रबोधयति –

कानीतिः? परलोकभीतिरहितं या साहसं दीपयेत्
को धर्मः? निजशर्महेतुरपरे मर्मन्तुदापि क्रिया।
का पूजा? जठराग्नितर्पणमयी, का साधुता? मौखिकी
स्निग्धा वाक्, तदनुच्छलेन कठिना गुप्ता हतिर्वक्षसि।। इति।।

स्त्रीणां स्वेच्छावर्तनोपदेशे अयं बद्धकङ्कणः, पुरुषाणां परदाराभिगमनं न दोषायेति तथा स्त्रीणां परपुरुषगमनमपि न दोषायेति। परन्तु एषः स्वपत्नीं गृहे बध्नाति। यदि सा बहिरागच्छेत् तर्हि अन्यासक्ता भविष्यतीति भीतिरस्य। तथा च वार्धके वयसि, रुग्णे वा आत्मनि सा न परिचरिष्यतीति भीतिरस्य। परोपदेशे पाण्डित्यमस्य न तु स्वयमाचरणे। "शतंवद, नैकमपि कुरु" इति अस्य उपदेशः। अयं स्वीयाशाराहित्य प्रदर्शिकाम् एकां घटनामित्थं वर्णयति – सः एकदा मित्रगृहं गत्वा तत्र दर्भासने आसीनः आसीत्। स्वगृहं प्रति प्रत्यागमनसमये तस्य वस्त्रेण संलग्नः कश्चन दर्भोऽपि अनेन सह आगतः। स च तद्दर्भं गृहीत्वा मित्रगृहं गत्वा तद्गृहजनेषु सर्वेषु पश्यत्सु तं दर्भं स्वमित्राय समर्प्य स्वीयं परवस्तुग्रहणवैमुख्यं प्राकाशयत्। परन्तु तदैव तत्रत्यं सौवर्णं कर्णाभरणम् अन्येषु अपश्यत्सु चोरितवान्। ततश्च रक्षकभटैः पृष्टः अयमात्मनः निर्दुष्टतां ख्यापयति,

In Public domain, Digitization Muthulakshmi Research Academy

तद्गृहस्था अपि अस्मिन् चौर्यं नाध्यारोपयन्ति प्रत्युत अस्य अनुकूलतयैव साक्ष्यं वदन्ति। परदारासक्ताः पुरुषाः, परपुरुषासक्ताश्च स्त्रियः अत्र सम्यक् विमृष्टाः। विवाहबन्धस्य विच्छेदमाकाङ्क्षमाणा अपि अत्र इत्थं व्यङ्ग्यमर्यादया निन्दिताः – "साम्प्रतिकराष्ट्रविधिना बाधितयथेच्छप्रवृत्तिप्रसरो मादृशपुरुषपुङ्गवः किं करोतु ? केवलं विरहदुःखमनुभवतु। भोः स्वयंवरार्थिनि ललने। त्वमपि सहस्व कियत्कालस्य कृते विरहदावानलज्वालाम्। विधिपरिवर्तनं भवेत्। तदा स्वयंवरे त्वां परिणीय सुखीभवेयम्। वैदिकविधिबलेन गुरुजननिर्वाचनफलेन च परिणीता मया पत्नी कथमपि न विवाहच्छेदमङ्गीकरिष्यति। हा हन्त मे भाग्यम् "इति। स्वसन्ततेः विवाहविषये अनुदाराः पितरः अपि अत्र निन्दिताः। अश्लीलशृङ्गारादिवर्णनं, कुक्कुटयुद्धादिवर्णनं वा अत्र ईषन्मात्रमपि नास्ति। परन्तु सामाजिकगूढपल्लवितप्रकाशनरूपमुद्देश्यं तु अस्त्येव। व्यङ्ग्यमर्यादया तत्तत्पात्रविमर्शनेन चमत्कारः, सन्निवेशनिर्वहणे विस्मयश्चास्त्येव। एवञ्चात्र भरतादिभिः निर्दिष्टमद्भुतस्य अङ्गित्वं, हास्यस्य अङ्गत्वं च सम्यक्पालितमिति वक्तुं शक्यम्।

एतद्भाणरचयिता जीवन्यायतीर्थः वङ्ग(बेङ्गाल्) देशे भट्टपल्लि ग्रामे 26-1-1894 क्रिस्तुदिनाङ्के जातः। अस्य पिता तर्करत्नकविपञ्चाननेत्यादिबिरुदभाक् महापण्डितः आसीत्। अयं च स्वग्रामे एव विद्याभ्यासं संपूर्य, वाराणसीं गत्वा महामहोपाध्यायबिरुदाङ्कितस्य राखालदासमहोदयस्य शिष्यः भूत्वा न्यायतीर्थोऽभवत्। ततः बि.ए(आनर्स), यम्.ए. प्रभृतिपरीक्षासु सर्वासु सर्वप्रथमतया उत्तीर्णः कलकत्ताविश्वविद्यालये एकोनत्रिंशद्वत्सराणि संस्कृताध्यापकपदमलञ्चकार। तस्मात् विश्वविद्यालयात् सेवानिवृत्तोऽयं स्वग्रामे एव एकस्याः संस्कृतकलाशालायाः आध्यक्ष्यं निरवहत्। आधुनिकभावयुक्तोऽयं प्रणवपारिजात – अर्थशास्त्र–

In Public domain. Digitization Muthulakshmi Research Academy

प्रभृतिपत्रिकानां सम्पादकत्वं निरवहत्। अयमपि बहु ग्रन्थकर्ता। महाकविकालिदासः, कुमारसम्भवम्, रघुवंशः, साम्यतीर्थम्, शङ्कराचार्यवैभवः, विवेकानन्दचरितं, नागनिस्तारः, स्वाधीनभारतविजयञ्चास्य नाटकानि। दरिद्रदुर्दैवं, भट्टसङ्कटं, पुरुषरमणीयं, विधिविपर्यासः, चौरचातुरीयम्, चण्डताण्डवं, क्षुतक्षोमीयं, शतवार्षिकं, चिपिटिकचर्वणं, स्वातन्त्र्यसन्धुक्षणम्, रागविरागः, वनभोजनं, विवाहविडम्बनं, नष्टहास्यं, तैलमर्दनं च प्रहसनानि। कैलासनाथविजय–गिरिसंवर्धनव्यायोगौ। एवमस्मिन् विंशे शतके आधुनिकपद्धतिमनुसृत्य रूपकरचनायाः नान्दी अनेन रचिता। भाणोऽयं संस्कृतसाहित्यपरिषत्पत्रिकायां 1961 क्रिस्त्वब्दे प्रकाशितः।

9.14 साक्षात्कारभाणः – शिवप्रसादः भारद्वाजः

पुरुषपुङ्गवभाणवर्गप्रविष्टोऽयं भाणः साक्षात्कार (Interview) प्रक्रियाया विमर्शरूपः, तत्तत्संस्थाधिपतीनां दुश्चेष्टितानि प्रकाशयति। साक्षात्कारपदार्थः व्यक्तिविशेषस्य सामर्थ्यपरीक्षणम्। अत्र वामदेवः साक्षात्कारार्थी। अध्यापकपदवीनिमित्तं साक्षात्काराय गतः। तत्र परीक्षकाणां प्रश्नाः, तत्समये अभ्यर्थिभिः अनुभूयमानाः भयसम्भ्रमादयः, परीक्षकसङ्घस्य कुटिलवर्तनं, वेतनादिविषये नियमाश्च हास्य जनकतया वर्णितानि। अस्मिन् काले साक्षत्कारनाम्ना यन्नटनं प्रवर्तते तदत्र सम्यक् सुनिशितं विमृष्टम्। अत्र साक्षात्कारसमये परीक्षकसङ्घस्य, अभ्यर्थिनश्च मध्ये जायमानः संवादः प्रश्नोत्तररूपः चमत्कारावहः। स चात्र किञ्चिदुदाह्रियते।

अत्र साक्षात्कारसन्दर्भे केनचित् परीक्षकेण'विदग्धो भवानि'ति प्रंशंसितः अभ्यर्थी वामदेवः इत्थं प्रतिवदति – "अहं विदग्ध एव। किन्तु विशेषेण दग्धः। यतः–

In Public domain. Digitization: Muthulakshmi Research Academy

कोपाग्निना क्वचन दुष्प्रभुतामदानां
कामानलेन परतो जनमेलकेषु ।
दग्धो वृथा परिभवेन रुषा विदग्धः
जग्धः पुनः प्रदहता जठरानलेन ।। इति ।

तथैव 'तव धर्मः कः ?' इति पृष्ठः इत्थं समाधत्ते-"भोः । भवतामिव ममापि नैको धर्मः । तथाहि – "अन्तश्शाक्तो बहिश्शैवः सभामध्ये च वैष्णवः । न भवति दासजनस्य कश्चन धर्मः । यतः –

यदा प्रभूणां परशोषकाणामिष्टं परं धर्मपदं लभेत ।
तदा तु कर्मिष्ठिजनस्य धर्मो भवेदधर्मो यदि तत्प्रतीपः ।। इति ।

तथैव 'काजाति'रिति पृष्टः –

जन्मना कुम्भकारोऽस्मि हृदयेन तु बाहुजः ।
नाम्ना तु ब्राह्मणो वर्ते सेवाभावेन पादजः ।। इति ।

एवं साक्षात्कारेण अध्यापकत्वेन चितः वामदेवः । अनन्तरं वेतननिर्णयः । सचेत्थं सचमत्कारं वर्णितः यत्र स्वायत्तसंस्थासु कार्यं कुर्वाणानां तत्तदधिपतिभिः क्रियमाणं पीडनं प्रतिबिम्बितं भवति । पश्यन्तु – "अत्रोपाध्यायस्य मासिकं वेतनं केवलमशीतिः रूप्यकाणि । प्रतिदिनं सप्तघण्टावधि अध्यापनम् । तदधिकतया च रात्रौ प्रभाते च विद्यार्थिनां पाठनकार्यक्रमः । पाठशालाभिवृद्धिसङ्घसभ्यबालकानां पृथक् पाठनम् इत्यादिकमवश्यं कर्तव्यम् । तत्रापि वेतने अर्धभागपर्यन्तं स्थायीसभ्यत्वं विद्यालयभवननिधि–कर्मचारि सहायनिध्यादीनां कृते देयम् ।" इत्येवं रूपेण 'वेतनं कर्मचारिभ्यः एकेन हस्तेन दत्तमन्येन हस्तेन आदीयते' इति सम्यक् विमृष्टमत्र । अन्ते च वामदेवः अहं निर्वेतनमेव कार्यं करिष्यामीत्युक्त्वा स्वीयं क्रोधमसहनमशान्तिं च भरतवाक्येनानेन प्रकाशयति–

प्रोज्ज्वालज्वलनैर्ज्वलेत्क्षितितलं चण्डांशुचण्डांशुभिः

In Public domain. Digitization Muthulakshmi Research Academy

तप्तं तर्पितकोणगह्वरजलैः आलोपितं तोयदैः ।
रुद्रः सन्तनुतामकाण्डविकटं स्वं भैरवं ताण्डवं
मृत्युश्चर्वतु गर्वदुर्भरधियो युष्मादृशान् शोषकान् ।।

एतद्भाणरचयिता शिवप्रसादभरद्वाजः अधीती व्याकरणे पञ्जाबराज्यस्थ-होशियार्पुरस्थविश्वेश्वरानन्द वैदिकसंस्थाने कार्यं कुर्वाणः आसीत्। अयं यम्.ए, यम्.ओ.यल् उपाधिभाक्। अजेयकेसरीचङ्क्रमः अस्य कृत्यन्तरम्। अयं भाणः क्रि.श.1964 वर्षे विश्वसंस्कृतपत्रिकायां प्रकाशितः।

9.15 फण्टूसचरितभाणः – अभिराजराजेन्द्रमिश्रः

अयं भाणः क्रि.श.1967 वर्षे रचितः "नाट्यपञ्चगव्यम्" इति नाम्ना प्रकाशितेषु चतुर्षु रूपकेषु अन्यतमत्वेन क्रि.श.1972 वर्षे प्रकाशितः। अत्रापि इतिवृत्तं प्राचीनभाणविलक्षणं केवलमाधुनिकसमाजसम्बद्धम्। आधुनिकपाश्चात्यवेषभूषादिलोलुपः विशृङ्खलाचारः युवलोक एवात्र पात्रीकृतः। आधुनिकयुवतीभिः पादुकाप्रहारैः सम्मान्यमानस्य युवलोकस्य प्रतिनिधिः अस्मिन् नायकः। फण्टूस इति तस्य नाम। अयं सर्वासु परीक्षासु अनुत्तीर्णः, बह्वीभिः युवतिभिः तिरस्कृतः, कस्या अपि प्रेमपात्रं न भवामीति चिन्ताकुलः, सहविद्यार्थिभिः आत्मानं सन्तोल्य तेभ्यः आत्मानमत्यन्तं नीचैस्तरे वर्तमानं ज्ञात्वा शोकसन्तप्तहृदयः, मातुलकन्यायां वागुरायामनुरक्तः सापि स्वीकरोति वा नवेति सन्दिहानः तां मेलितुं प्रयागनगरे स्वगृहात् प्रस्थाय मातुलगृहपर्यन्तं पद्भ्यां गच्छति। अत्र नायकस्य स्ववृत्तान्तकथनमेव अधिकम्। परवचनानुवादः अत्यल्पः। आधुनिक-एकपात्राभिनयस्य अस्य च साम्यं बहु वर्तते। श्लोकसंख्यापि अल्पीयसी। अत्रत्यकविताशैल्याः उदाहरणमिदम् –

सैव स्फुरत्तडिदिवैति दुकूलवस्त्रा

In Public domain. Digitization Muthulakshmi Research Academy

दृष्ट्वोरोजिद्दढकञ्चुलिकां दधाना।
पारम्परीणमृदुतां हृदि धारयन्ती
चञ्चत्तरीव भुवि चङ्क्रमणं दधाति।।

अत्र व्यवहारे प्रयुज्यमानानि आङ्ग्लपदानि, तथा आभाणकाश्च तथैव प्रयुक्ताः।

एतद्भाणरचयिता अभिराजराजेन्द्रमिश्रः एतद्भाणरचनाकाले प्रयागविश्वविद्यालये संस्कृतविभागे प्रवक्ता आसीत्। अयं च आधुनिककाले संस्कृतकविवरेषु अग्रगण्येषु अन्यतमः अनेककाव्यानि अरचयत्। अयं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य वाराणसीस्थस्य कुलपतिः अपि आसीत्। इदानीं सिम्लामध्ये संशोधनकेन्द्रे अयं गौरवाचार्यपदं विभूषयति। वामनावतरणमहाकाव्यम्, आर्यान्योक्तिशतकं, भारतदण्डकं, कविसम्मेलनम्, राधामाधवीयं, नवरसप्रहसनं, कचाभिशापमित्यादिकृत्यन्तराणि।

9.16 धूर्तानुभवभाणः – सूरं श्रीनिवासुलु

ऋग्वेदीयमक्षसूक्तमेव भाणरूपेण परिवर्तितं धूर्तानुभवभाणनांम्ना। संस्कृतभाणसाहित्यग्रन्थे कविना विरचिते अनुबन्धरूपेण अयं भाणः क्रि. श. 1979 वर्षे प्रकाशितः। अक्षसूक्तमन्त्रास्सर्वेऽपि समीचीनसन्दर्भप्रकल्पनपुरस्सरं सम्यगत्र योजिताः। अन्ते उपदेशरूपेण "अक्षैर्मादीव्यः कृषिमित् कृषस्व" इति मन्त्रः योजितः।

अयं च सूरं श्रीनिवासुलु महोदयः अष्टावधानी आशुकवितानिपुणः। आन्ध्रप्रदेशे गुण्टूरुमण्डले ताडिकोण्डग्रामे संस्कृतकलाशालायामयम् एतद्भाणरचनाकाले व्याख्याता आसीत्। अनन्तरमयं गुण्टूरु मण्डले एव तिम्मसमुद्रं ग्रामे स्थितायाः संस्कृतकलाशालायाः अध्यक्षः आसीत्। क्रि. श.2009 वर्षेऽयं स्वपदात् निवृत्तः, इदानीमपि साहित्यसेवां कुर्वन् व-

In Public domain. Digitization Muthulakshmi Research Academy

रीवर्ति। अनेन महाशयेन अन्येऽपि त्रयः भाणाः रचिताः, येषां विवरण-मधस्तात् प्रदास्यते। सूरं वंशाङ्कुरः अयं श्रीनिवासुलु महोदयः शेषाम्बा-हनुमन्तार्ययोः सुतः आन्ध्रप्रदेशे प्रसिद्धे नेल्लूरुपत्तने 3-6-1951 दिने लब्धजन्मा, प्राथमिकविद्यामारभ्य साहित्यशिरोमणिपर्यन्तं नेल्लूरुपत्तने एव विद्याभ्यासमकरोत्। अस्य गुरुषु प्रधानतया कीर्तनीयाः कृष्णस्वामि-सुब्बरामशास्त्रि-रामानुजाचार्य-वेङ्कटरमणशर्माणः। अयञ्च अवधानी शतम् अष्टावधानानि, एकं शतावधानं च संस्कृतान्ध्रभाषयोः निरवहत्। सं-स्कृतप्रहसनसाहित्यसमीक्षणं कृत्वा परिशोधकोपाधिं (Ph.d) प्राप्तवानयं स्वमित्रवर्येण सह मिलित्वा भाणसाहित्यचरितं तेलुगुभाषायां कृत्वा आन्ध्रसाहि अकाडमी पुरस्कारं प्राप्तवान्। तेलुगुभाषायामनेके ग्रन्थाः रचिताः अनेन। संस्कृतेऽपि पूजाकुसुमम्, करावलम्बम्, भाणचतुष्टयं, चास्य कृतयः। अस्य महानुभावस्य भाणचतुष्टये प्रथमस्य धूर्तानुभवस्य परिचयः प्रदत्तः। अ-न्येषां च परिचयोऽत्र प्रस्तूयते।

9.17 नटसमागमभाणः - सूरं श्रीनिवासुलु

अत्र नटशब्दः वञ्चनैकप्राणानामुपलक्षणम्। अस्मिंश्च भाणे कार्या-लयेषु उत्कोचग्राहिणः भृत्यमारभ्य उत्तमाधिकारिपर्यन्तं कर्मकराः सु-निशितं विमृष्टाः। भृत्यः पलालाशनश्चेत् कार्यकर्ता वृक्षासक्तः, अधिकारी तु वनासक्तः इति उत्कोचग्राहिणां स्तरभेदः सम्यगत्र प्रदर्शितः -

> अधिकारीवनासक्तः कार्यकृत् वृक्षलोलुपः।
> सेवकः पर्णतृप्तश्च कुत्र कर्तव्यपालना।। इति।

कविवर्यः आरम्भतः पदवीविरमणपर्यन्तं स्वायत्तसंस्थास्वेवकार्यं कृतवान्। सर्वकारात् अनुदानं प्राप्य एताः संस्थाः स्वकार्यकर्तृभ्यः वेतनं ददति स्म। अतः अनुदानार्थं सर्वकारकार्यालयाधिकारिणः पदे पदे उपसर्प-णीयाः भवन्ति। तत्र च भृत्यमारभ्य अधिकारिपर्यन्तं सम्भावनं विना प्रा-

In Public domain. Digitization Muthulakshmi Research Academy

द्रव्यमपि न प्राप्यत इति दुःस्थितिः। विशिष्य अध्यापकाः एतैः कथं वा बाध्यन्ते इति सम्यगत्र प्रकाशितम्।

"घट्टे घट्टे धनाकाङ्क्षा घट्टे घट्टे च बान्धवाः।
तं तु घट्टं न पश्यामि यत्र निष्कामकर्मता।।"

इति सनिर्वेदं वक्ति अत्र नायकः। उत्कोचग्रहणमपि कार्यालयेषु कथं क्रियते इति वर्णयतीत्थं – कार्यालयेषु 'लंच् टैम्' भवति। भोजन विराम इत्यर्थः। परन्तु अयं भोजन विरामो न। किन्तु उत्कोचविरामः। उत्कोचग्रहणार्थ समय इत्यर्थः। अस्मिन् समये एकैकोऽपि कार्यालयीयः सद्वितीयः भोजनार्थं गच्छति। स च द्वितीयः न कार्यालयकार्यकर्ता। किन्तु कार्यार्थी उत्कोचदाता। उत्कोचदाता च अमुं नीत्वा आकण्ठं भोजयित्वा पाययित्वा च स्वकार्यपरिमाणानुसारं दक्षिणया सम्भावयति। इदं च तत्र सर्वसाधारणमपि गोप्यम्। यः दक्षिणां दातुं समर्थः तस्यैव कार्यं सिद्ध्यति। नान्यस्य। एवं कार्यालयेषु उत्कोचग्रहणप्रकाराः, कार्यालयीयैः बाधितानां दीनगाधाश्च अत्र वर्णिताः। अयञ्च भाणः उत्कोचविषयमेव प्रधानीकृत्य रचितः। अतश्च सर्वे वृत्तान्ताः तत्सम्बद्धा एव। नास्त्यत्र वेशवाटी, न वा शृङ्गारः। किन्तु सन्ति सर्वे नटाः।

घट्टे नाट्यं गृहे नाट्यं चित्ते बुद्धौ विलोकने।
उद्योगे वर्तने नाट्यमहोनाट्यमयं जगत्।।

इति वञ्चनाशीलान् उद्दिश्य कथयति। दरिद्राः याचकाः स्वप्राणधारणार्थं भिक्षां याचन्ते चेत् एते उत्कोचयाचकाः प्राणरक्षणार्थं न यतन्ते किन्तु प्राणहरणार्थमेवेति इत्थं वर्णयति –

जीवं नयन्ति भैक्ष्येण समाजे जातियाचकाः।
प्राणान् हरन्ति चान्येषामेतादृक्कर्मयाचकाः।। इति।

अयं च भाणः संवित् पत्रिकायां 1985 क्रि.वर्षे प्रकाशितः।

In Public domain. Digitization Muthulakshmi Research Academy

9.18 गुरुवररञ्जनभाणः – सूरं श्रीनिवासुलु

अत्र सर्वकारानुदानेन प्रचाल्यमानविद्यालयाध्यापकानां दुरवस्थाः वर्णिताः। मासे मासे वेतनं न लभ्यते, पञ्चषमासेभ्यः परं तत्तदधिकारिणां पुनः पुनः संदर्शनेन संभावनया च किञ्चित्किञ्चिल्लभ्यते। सर्वं प्राप्तव्यं प्राप्तमिति तु स्वप्नेऽपि चिन्तयितुं न शक्यम्। अत्र नायकः कृपालवनामा कश्चन उपाध्यायः। 'आचार्यदेवो भव' इति वचनस्य 'हे आचार्य! म्रियस्व! ततः देवो भव' इति व्याख्यां करोति। उपाध्यायवृत्त्यपेक्षया चित्रमन्दिरद्वारपालकवृत्तिः उत्तमेति सूचयति। यतः तया प्रतिमासं किञ्चित् प्राप्यते। कृपालवस्य गृहे तण्डुलाः अन्यवस्तूनि च समाप्तानि। वेतनं न लब्धम्। अतः सः यस्मिन्नापणे ऋणरूपेण वस्तूनि गृह्णाति तत्र गत्वा आपणिकं कथयति – मित्र! गृहे वस्तूनां प्रध्वंसाभावः जातः इति। आपणिकोऽपि तथैवोत्तरयति – आपणे वस्तूनामत्यन्ताभाव एवास्तीति। कृपालवः कथं चित् तमनुनीय तण्डुलादिकं स्वीकरोति। स्वकार्यं सम्यङ्निर्वर्त्यापि वेतनादिकमलब्ध्वा दुःखिताः एतादृशाः। अन्योऽप्यस्ति वर्गः उपाध्यायेषु यश्च विद्यालये स्वीयमध्यापनं न निर्वहति, किन्तु गृहे धनं स्वीकृत्य विद्यार्थीनध्यापयति। केचन अध्यापकाः केवलमधिकारिणां सेवायामेव निरताः तत्स्तोत्रपराः भवन्ति। एवम् अध्यापकेषु ये दोषाः तेऽपि बहिर्गमिताः, तथा अध्यापकानां दुःस्थितिरपि सम्यगत्र प्रकाशिता। अतश्च अयं भाणः गुरुजनेभ्य समर्पित इति गुरुवररञ्जन एव।

9.19 कविजनमण्डनभाणः – सूरं श्रीनिवासुलु

कवयः, तेषां सम्मानानि, कविगोष्ट्यः, बिरुदावली, कवीनां कवित्वं श्रोतुमशक्तानां सामाजिकानां दुरवस्था च अत्र सचमत्कारं वर्णितानि। अत्र सूत्रधारः रङ्गे प्रविश्य अभिनीयमानं रूपकं द्रष्टुं जनानामागमनात्पू-

In Public domain. Digitization Muthulakshmi Research Academy

र्वमेव कुतो जवनिका अपनीतेति क्रोधं प्रदर्शयति। ततः जनानामनागमनस्य कारणं नाटकप्रदर्शनात्परं कविसम्मेलनं भविष्यतीति प्रकटनमेवेति जानाति। 'कवित्वे एवं जुगुप्सा जनानां निर्हेतुका नास्ति यतः इदानींतनकवितायां भावस्य, उपदेशस्य, चमत्कारस्य वा गन्धोऽपि नास्ति। एतादृशकवितां को वा श्रोतुमिच्छती'ति जनानामनागमनं समर्थयति। अथापि स्वमातुलस्य कविताकण्डूतिं निवारयितुं कविसम्मेलनार्थमेव उद्युक्तोहमिति सूचयति। अत्रान्तरे बृहस्पतिनाम्नः भाणनायकस्य वचनं श्रुत्वा तस्य दृष्टिपथात् आत्मानं निवारयन् निष्क्रामति। ततः प्रविष्टः बृहस्पतिः। अयं च सम्मानप्रियः अहंकारी, बिरुदानामभिलाषी च। प्रविष्ट एवायम् आत्मनः परिचयमित्थं ददाति –"नवरसाः मम गृहरक्षकाः, गुणदोषाः मे सन्ततिः, रसघ्ना कविता मम प्रिया। अस्मादृशमहाकवीनां प्रजासेवां कवितासेवां विना कार्यान्तरं किम्? अनवरतकवितासेवकस्य मम विश्रान्तिः क्व? अद्य कस्यचित् लुब्धस्य षष्ठ्यब्दपूर्तिः। तत्र प्रधानवक्ताहं सम्मानमपि ग्रहीष्यामि।" इति। मध्येमार्गं सार्वजनिकभोजनालयः (होटल्) दृष्टः। तत्रान्तः प्रविश्य स्वसमान हृदयं मित्रं मिलित्वा, कुशलप्रश्नाद्यनन्तरं कविसम्मेलनार्थं गच्छामीति सूचयति। तदा तस्मिन् भोजनालये चाय–काफी–अल्पाहारादिकं सेवमानाः जनाः अयं कवितां श्रावयेदिति भीत्या मध्ये एव तत्सर्वं त्यक्त्वा धावन्ति। बृहस्पतिः स्वमित्रं सम्माननीतिशास्त्रोपदेशार्थं प्रार्थयति। तदा स इत्थमुपदिशति –

आनेयास्ते स्वमतिलघुकाः कीर्तिकण्डूतिभाजः
सम्मान्याश्च प्रियतमवचो जल्पनाकल्पनेन।
आशाः सर्वा अपि परिचिताः भावनीयाः त्वयास्मिन्
नैकोऽपि स्याद्विमत इति ते दुर्मतिर्वापि सोऽस्तु ।।

In Public domain. Digitization Muthulakshmi Research Academy

उपदेशं श्रुत्वा बृहस्पतिः 'मित्रवर्य मम ग्राममागच्छ। भवत एव सम्मानं कारयामी'ति कथयति। तदा सः किं मम नीतिं मय्येव प्रयोक्तुमिच्छसीति विनिन्द्य निर्गतः। एवं मार्गे अनेके कविवराः मिलिताः। तेषु कश्चन विप्लवकविः, कश्चन सामयिककविः, कश्चन सम्प्रदायवादी, अन्यः अभ्युदयकविः, इतरश्च दलितकविः। एतादृशाः सर्वेऽपि व्यङ्ग्यमर्यादया सुनिशितं विमृष्टाः। ततः सभां गत्वायं बृहस्पतिः सर्वान् एवमुपदिशति– "कविवराः यथेच्छं विहरत। नीतिर्वा पद्धतिर्वा कापि नापेक्ष्यते। कीर्तिः केवलमपेक्ष्यते। नियमबन्धनानि छित्वा अग्रे गच्छत। लिखत। श्रावयत। धनमर्जयत। अयमेव मन्त्रोऽस्माकम्"। इत्यादि। एवं सूरं मनीषी एतेषु चतुर्षु एकैकस्मिन् एकैकं विषयमाश्रित्य जनान् जागरयामास।

एवमज्ञाताः विंशे शतके रचिताः भवेयुः अनेके। परन्तु ये च मम दृष्टिपथे समागताः तेषां तत्कर्तॄणां च यथोपलब्धि परिचयः दत्तः। एवमस्मिन् क्रि.श.एकविंशेऽपि शतके भाणाः रचिताः, रच्यमानाश्च भवेयुरेव। इतिशम्।

In Public domain. Digitization Muthulakshmi Research Academy

अध्यायः 10

अज्ञातकालाः भाणाः

एवं क्रि.श.विंशशतकपर्यन्तं भाणानामुपलभ्यमानानां परिचयः पूर्वेषु अ-ध्यायेषु प्रदत्तः। अथ केचिद्भाणाः अप्रकाशिताः, तत्रापि केचन अपूर्णाः उपलभ्यन्ते येषां निश्चितः समयः न ज्ञायते। तादृशानां भाणानां परिचयः अत्र प्रस्तूयते। एते च प्रायः क्रि.श.एकोनविंशात् शतकात् अनन्तरास्तु न भवेयुः।

10.1 अज्ञातनामकर्तृकः भाणः

मद्रपुरीतालपत्रग्रन्थालये (R. 2461) एव असमग्रः कश्चन भाणः उ-पलभ्यते। अयमपि भाणः केरलीय एव। शिवपुर्यां प्रदर्शनार्थमुद्दिष्टः। प्र-स्तावनायां हेमन्तर्तुः वर्णितः। अत्रत्या सूक्तिः-

विनयादिगुणग्रामदर्शितप्रीतचेतसाम्।
अनुग्रहेण साधूनां महत्त्वं याति मानवः॥

In Public domain. Digitization Muthulakshmi Research Academy

10.2 अनङ्गमङ्गलभाणः – सुन्दरकविः

श्रीरङ्गनिवासिना आण्डाल्–वंशीयेन सुन्दरकविना रचितोऽयं भाणः अप्रकाशितः भाग्यनगरे आन्ध्रभाषानिलये हस्तलिखितग्रन्थरूपेण संरक्षितः अस्तीति NCC ग्रन्थादवगम्यते[1]। अस्मात् अधिकं किमपि अस्य भाणस्य विषये वा, भाणकर्तुः विषये वा न ज्ञायते।

10.3 कामभाणः – नारायणः[2]

अडयार् ग्रन्थालये अप्रकाशित एव हस्तलिखितप्रतिकृतिरूपेण संरक्ष्यमाणोऽयं भाणः पश्चिमचिदम्बरक्षेत्रे विराजमानस्य गोष्ठीश्वरस्य भगवतः नव्यभव्योत्सवे प्रदर्शितः। कन्दर्पमञ्जरीविरहतप्तोऽत्र नायकः प्रातरेव यथावत् प्रस्थाय तत्र तत्र अटित्वा सायं तया सह सङ्गच्छतीति भाणान्तरेष्विव इतिवृत्तमत्रापि। विविधनारीवर्णनं, ताभिः सह सम्भाषणं, वीणावादन–कन्दुकक्रीडा–डोलाविहारादिवर्णनं, पण्डितपुत्राणां परिहास इत्याद्यपि भाणान्तरेष्विव समानम्। अथापि अत्र कविता निर्झरप्रवाहवत् निरवरोधा मनोज्ञा च। गद्यं पद्यं चोभयं धाराशुद्धिशोभितं सहृदयरञ्जकम्। तादृशगद्यस्योदाहरणमिदं विटप्रवेशसूचनार्थं रचितम् – "कन्दर्प इव अखिलालङ्कृतिसुन्दराकृतिः, नर्तनमण्डपः कामसिद्धान्तस्य, केसरिकिशोर इव अतिगम्भीरदृष्टिः, दशरथ इव रामावलोकनकुतुकः, ईषदुन्मीलितकन्धरोऽपि अधुरन्धरः" —। एवम् अस्य पद्यमपि सरसम्। वाराङ्गनास्वभावस्सम्यगित्थं वर्णितः –

सत्सारस्वतसारसारससरोहंसाभविद्वांसम-
प्यापद्भूरिकृतोपकारमतिसौन्दर्यं लसद्यौवनम् ।

---

1 N.C.C. part I - 156.
2 Adayar-1350

In Public domain. Digitization Muthulakshmi Research Academy

शूरं सत्कुलसम्भवं परिचितं त्यक्त्वा विधीर्यान्वहं
द्रव्याप्त्यै धनिनं कुरूपिणमपि प्रार्थ्यन्ति वाराङ्गनाः ।।

कलत्रीकृते भर्तरि शयनमन्दिरं गते केनापि व्याजेन बहिरागत्य ताः कथमन्यं रञ्जयन्तीति वर्णितमत्र–

आयाते रतिगेहमात्मदयिते व्याजेन वा केनचि-
न्निर्याता बहिरन्यमन्यमसकृत्सम्प्रीणयन्ती रतैः ।
श्रान्ता रन्तुमुपेत्य चात्मसदनं वाराङ्गना द्यूतसं-
गीतालापकथाप्रसङ्गकलहव्याजैः निशां नेष्यति ।।

प्रायः भाणेषु विटाः वेश्यायै कलत्रपत्रमर्पयन्ति। परन्त्वत्र वेश्याः अपि विटाय कलत्रपत्रमर्पयन्ति इति कश्चन विशेषः।

अत्रोद्यानवर्णने वृक्षदोहनादिरपि वर्णितम्। एवं नगरवर्णनमपि विहितम्। अत्र च शुद्धवैदिकानां भार्याः तैः कथमुपेक्षिताः भवन्तीति सम्यगभिवर्णितम्। ततश्च तासां सौन्दर्यादिकं आरण्यकज्योत्स्नेव विफला जायते इति निर्वेदोऽत्रेत्थं प्रकाशितः –

इष्टेः कालोऽयमस्मत्पितृदिनमथ सङ्क्रान्तिरद्य प्रदोषो
जन्मर्क्षं पौर्णमासी प्रतिपदमथ कुहूस्तद्वदेकादशीति ।
इत्थं त्याज्या निषेके पुनरपि दिवसा दूषिताश्चापि मूढैः
त्यक्ष्यन्ते श्रोत्रियैस्तत् कुलतरलदृशां यौवनं नष्टमेव ।।

अयं च भाणः अवश्यं प्रकाशनीयेष्वन्यतमः। एतद्भाणकर्ता नारायणकविः भारद्वाजगोत्रः। पिता सुब्रह्मण्यः। कोयम्बत्तूर्–नगरवासी। वैद्यज्योतिर्विद्यादिषु प्रवीणः। कालस्तु अस्य क इति न ज्ञायते।

In Public domain. Digitization Muthulakshmi Research Academy

10.4 कामिनीकामुकोल्लासः – विश्वनाथः

अयं भाणः[3] मद्रपुरीतालपत्रग्रन्थालये असम्पूर्णः उपलभ्यते। अयं च मदनकदनोद्युक्तजनानां सन्तोषदायक इति अस्मात् श्लोकात् ज्ञायते -

मनोजकदनोद्युक्तजनसन्तोषदायकः।
अभाणि भाणस्तेनायं शृङ्गाररसजृम्भितः।। इति।

अस्य शैल्याः उदाहरणभूतोऽयं श्लोकः शारदास्तुतिपरः।

श्रेयो मे विदधातु सुन्दरदरग्रीवाभिरामोज्ज्वल-
स्फारामोदविराजमानसुमनोदामाभिरामाकृतिः।
नीहारद्युतिहारनिर्जरसरिन्नीहारधारामरा
हारासारपटीरहारसुरराण्मातङ्गरुक् शारदा।।

आत्रेयगोत्रः दुव्वूरु कुलोत्पन्नः विश्वनाथः आन्ध्रदेशीयः अस्य भाणस्य कर्ता। अयं सूर्यप्रभुणा पोषित इति ज्ञायते। अन्यत्किमपि अस्य विषये न ज्ञायते।

10.5 चन्द्ररेखाभाणः – शङ्करकविः

चन्द्ररेखा–रसिकशेखरयोः प्रणयवृत्तेतिवृत्तोऽयं भाणः[4] अपि असमग्र एव मद्रपुरीतालपत्रग्रन्थालये वर्तते। अयं च कोलाहलराजधान्यां प्रद-र्शितः। अस्य कविः शङ्कर इति मातृकाविवरणग्रन्थात् ज्ञायते। रचना

3 GOML-Madras - R.no.1876.
4 GOML-Madras - D. 12516.

In Public domain. Digitization Muthulakshmi Research Academy

सरसा। उदाहरणरूपेणायं श्लोकः–

काञ्चीसीमनि कापि काञ्चनमयी निश्रेणिका राजते
तामासाद्य रणोत्सवेन महता केनापि धीर त्वया।
हर्षात्कण्टकशालिना करयुगेनाक्रम्य शैलद्वयं
तस्य प्रान्तनिवासिनः शशभृतः शीता सुधा लप्स्यते।।

10.6 तरुणभूषणभाणः – शठकोपकविः

नगरनिवासरसिकस्य श्रीनिवासस्य अभिनवोत्सवसेवासमागतान् सभासदः रञ्जयितुं प्रयुक्तोऽयं भाणः अप्रकाशित एव मद्रपुरीतालपत्रग्रन्थालये सुरक्षितः[5] वर्तते। अत्र नायकः मदनशेखरः। इतिवृत्तं भाणान्तरसमम्। मन्मथस्य स्तुत्या भाणोऽयमारभ्यते–

रत्यानुभूय रतिकेलिमशेषयूनां तत्तादृशं महमहर्निशमादधानः।
प्रेमाहृतैश्च मिथुनैः विदितप्रभावो मीनध्वजो विजयते जगदेकवीरः।।

मनोहरवर्णननैपुण्येन ललितया शैल्या च अयं भाणः सार्थकनामैव। वनशोभायां वनदेवतात्वमारोपयदिदं पद्यं हृद्यम् –

उन्मीलत्कुसुमस्मितं सतिलकं विस्तार्य गुच्छस्तनी
माध्वीसिक्तसरागचन्दनवती बालप्रवालाधरा।
भ्राजत्किंशुकभूषणा मधुकरश्रेणीलसद्वेणिका
कान्तं प्राप्य वसन्तमद्भुतगुणा रेजे वनश्रीरियम्।।

[5] G.O.M.L.-Madras - R. 5204

 In Public domain. Digitization Muthulakshmi Research Academy

10.4 कामिनीकामुकोल्लासः – विश्वनाथः

अयं भाणः[3] मद्रपुरीतालपत्रग्रन्थालये असम्पूर्णः उपलभ्यते। अयं च मदनकदनोद्युक्तजनानां सन्तोषदायक इति अस्मात् श्लोकात् ज्ञायते –

मनोजकदनोद्युक्तजनसन्तोषदायकः ।
अभाणि भाणस्तेनायं शृङ्गाररसजृम्भितः ।। इति ।

अस्य शैल्याः उदाहरणभूतोऽयं श्लोकः शारदास्तुतिपरः ।

श्रेयो मे विदधातु सुन्दरदरग्रीवाभिरामोज्ज्वल-
स्फारामोदविराजमानसुमनोदामाभिरामाकृतिः ।
नीहारद्युतिहारनिर्जरसरिन्नीहारधारामरा
हारासारपटीरहारसुरराण्मातङ्गरुक् शारदा ।।

आत्रेयगोत्रः दुव्वूरु कुलोत्पन्नः विश्वनाथः आन्ध्रदेशीयः अस्य भाणस्य कर्ता। अयं सूर्यप्रभुणा पोषित इति ज्ञायते। अन्यत्किमपि अस्य विषये न ज्ञायते।

10.5 चन्द्ररेखाभाणः – शङ्करकविः

चन्द्ररेखा–रसिकशेखरयोः प्रणयवृत्तेतिवृत्तोऽयं भाणः[4] अपि असमग्र एव मद्रपुरीतालपत्रग्रन्थालये वर्तते। अयं च कोलाहलराजधान्यां प्रद–र्शितः। अस्य कविः शङ्कर इति मातृकाविवरणग्रन्थात् ज्ञायते। रचना

---

3 GOML-Madras - R.no.1876.
4 GOML-Madras - D. 12516.

In Public domain. Digitization Muthulakshmi Research Academy

सरसा। उदाहरणरूपेणायं श्लोकः–

काञ्चीसीमनि कापि काञ्चनमयी निश्रेणिका राजते
तामासाद्य रणोत्सवेन महता केनापि धीर त्वया।
हर्षात्कण्टकशालिना करयुगेनाक्रम्य शैलद्वयं
तस्य प्रान्तनिवासिनः शशभृतः शीता सुधा लप्स्यते ।।

10.6 तरुणभूषणभाणः – शठकोपकविः

नगरनिवासरसिकस्य श्रीनिवासस्य अभिनवोत्सवसेवासमागतान् सभासदः रञ्जयितुं प्रयुक्तोऽयं भाणः अप्रकाशित एव मद्रपुरीतालपत्रग्रन्थालये सुरक्षितः[5] वर्तते। अत्र नायकः मदनशेखरः। इतिवृत्तं भाणान्तरसमम्। मन्मथस्य स्तुत्या भाणोऽयमारभ्यते–

रत्यानुभूय रतिकेलिमशेषयूनां तत्तादृशं महमहर्निशमादधानः।
प्रेमाहृतैश्च मिथुनैः विदितप्रभावो मीनध्वजो विजयते जगदेकवीरः ।।

मनोहरवर्णननैपुण्येन ललितया शैल्या च अयं भाणः सार्थकनामैव। वनशोभायां वनदेवतात्वमारोपयदिदं पद्यं हृद्यम् –

उन्मीलत्कुसुमस्मितं सतिलकं विस्तार्य गुच्छस्तनी
माध्वीसिक्तसरागचन्दनवती बालप्रवालाधरा।
भ्राजत्किंशुकभूषणा मधुकरश्रेणीलसद्वेणिका
कान्तं प्राप्य वसन्तमद्भुतगुणा रेजे वनश्रीरियम् ।।

[5] G.O.M.L.-Madras - R. 5204

 In Public domain. Digitization Muthulakshmi Research Academy

एवं चतुर्षु दिक्षु व्याप्यमानाः सूर्यकान्तयः, दिनमणिं सूर्यमुद्दिश्य दिशारमणीभिः समर्प्यमाणनीराजनदीपप्रभा इव उत्प्रेक्षिता ह्यत्र-

पर्यायतः प्रसरदातपसान्द्रभीत्या दीप्यद्दिवाकरमणिज्वलनप्रभाभिः ।
पूर्वाद्रिशेखरमणेः दिवसेश्वरस्य नीराजनं विदधतीव दिशारमण्यः ।।

नारायणकवेः कामबाणस्य अस्य च साम्यमस्तीति कथयति सूरं श्रीनिवासुलुमहोदयः । "भो भो राजहंस पद्मिनीमिमां त्यज । याहि । वेगात्सम्प्राप्तोऽयं विषमूर्तिस्ततटित्वान्" इति कामभाणगद्यस्य "हे राजहंस नलिनीं त्यज याहि वेगात् सम्प्राप्त एव विषमूर्तिरिह तटित्वान् ।"
इति श्लोकेन साम्यं दृश्यते । तथा विटाय वेश्यापि कलत्रपत्रिकां लिखित्वा यथा यच्छति कामबाणे तथा अत्रापि वेश्या विटाय इत्थं कलत्रपत्रिकां विरचय्य ददाति-

अन्येन केनचिदहं यदि सङ्गता स्यामेकं विना मदनशेखरमेकवारम् ।
दत्त्वा गृहीतमखिलं पुनरेकचित्ता मासत्रयं तव कलत्रपदा भवेयम् ।। इति ।

कामबाणे तु शार्दूलविक्रीडितवृत्ते अयमेवाभिप्रायः वर्णितः[6] । स च तस्माल्लघुवृत्ते अत्र वर्णितः इति कामभाणात्पर एवायं स्यादिति वक्तुं शक्यते ।

---

6 अन्येनापि च केनचिद्यदि मुदा स्यात्सङ्गताप्येकदा
भूरिद्रव्यदमेकवारमलकाधीशं तमेकं विना ।
दत्त्वा त्वत्प्रतिपादितं तदखिलं प्रेमानुरक्ता पुनः
मासां त्रिष्वपि सत्कलत्रपदभाक् सद्यो भवेयं तव ।।

In Public domain. Digitization Muthulakshmi Research Academy

अयं च शठकोपकविः श्रीवत्सगोत्रस्य श्रीनिवासगुरोः अनुग्रहपात्रम्। अयं च श्रीनिवासः वसन्ताभरणभाणकर्ता स्यात्। अयं बाल्य एवामुं भाणं रचितवानिति भाणप्रस्तावनया ज्ञायते।

10.7 मदनमञ्जरीभाणः – वेङ्कटेशः

अस्य भाणस्य आन्ध्रविश्वविद्यालयग्रन्थालये हस्तलिखितप्रतिकृतिः सुरक्षिता[7] वर्तते। अप्रकाशितोऽयं भाणः आन्ध्रदेशे श्रीकूर्मक्षेत्रस्थकूर्मनाथस्य उत्सवसमये प्रदर्शितः। अत्र सूत्रधारेणैव उषःकालवर्णनं वसन्तर्तुवर्णनं च कृतम्। अनङ्गभूषणस्य काञ्चनरेखया सह सरसालाप एवात्र प्रधानमितिवृत्तम्। तया सह सल्लापसमये सा श्रीहरिदेवालये नाट्याय राज्ञा आहूता सती तत्र गच्छति। नाट्यानन्तरं सा राज्ञा सम्मानिता भवति। तामनुगतः अनङ्गभूषणोऽपि सम्मानितां तां कलत्रत्वेन स्वीकरोति। अत्र कविता सरसा सरला च। अत्र मर्कटभट्टवृत्तान्तः चमत्कारावहः। स च दरिद्रः ब्राह्मणः एकां वेश्यामनुगच्छति। सा च भीता पलायमानेव शीघ्रं गच्छति। तदा तयोर्मध्ये सम्भाषणमिदं हृद्यम्–

वेश्याम्ब! द्विज किं? तवस्तनयुगं दृष्ट्वान्नपिण्डोपमं
प्राप्तोहं, वद किं ददासि वसनं यद्वा धनं नादसम् ।
गायत्र्यैव शपे परं न हि धनं जीर्णाङ्गवस्त्रं दधा-
म्याशीर्वादमिदं तनोमि यदि वा यच्छामि सन्ध्याफलम् ।।

रे खर्वाट! वितन्तुपुत्र! भवनान्निर्याहि याह्यन्यतः
तर्हि श्राद्धनिमन्त्रणाप्तडुबुकान् दद्यां चिरादार्जितान् ।
तन्मे प्रापय नो यदि प्रदिश मे स्पर्शाय वा दर्शये-

7 आन्ध्रविश्वविद्यालयग्रन्थालयः – सं–1261.

त्येवं वैदिककामुकस्समदनः पण्याङ्गनां याचते ।।

भगवतः कूर्मनाथस्य मङ्गलाशासनेनानेन भाणः समाप्यते –

श्रीकूर्मनाथपुरवीथिविहारशालिलीलावतारनिपुणो भगवान् मुकुन्दः ।
जीयाद्रमाधरसुधारसलालसोऽसौ नित्यादृतः कुशलकर्मणि सज्जनानाम् ।।

अस्यैव भाणस्य स्मरमञ्जरी, अनङ्गमञ्जरीति च नामान्तरे। एतद्भाणकर्ता पट्टिसवंश्यः लक्ष्मणाचार्यस्य सुतः वेङ्कटेशः श्रीकूर्मक्षेत्राभिजनः आन्ध्र–देशीयः प्रायः विंशशतकात् पूर्वतन एव स्यात्।

10.8 मदनविजयभाणः – अनन्ताचार्यः

अयं भाणः बि.रामराजुमहोदयेन कर्नमडकलग्रामाभिजनेन अनन्ताचा–र्येण रचित इति स्वीये "संस्कृतसाहित्यं प्रति आन्ध्राणां योगदानमि"ति ग्रन्थे उल्लिखितः[8]। अयमिदानीं नोपलभ्यते।

10.9 रतिभूषणभाणः–कवितार्किककण्ठीरवः

अयमपि भाणः अप्रकाशितः मद्रपुरीतालपत्रग्रन्थालये सुरक्षितः[9]। वि–ष्णुलीलावर्णनपरोऽयं भाणः। अत्र संवादात्मकः नान्दीश्लोकोऽयं हृद्यः–

कस्त्वं, गोपालबालः सुतनु, पशुकुलं याहि मा याहि गेहं,
बाले लीलाविनोदी, सरसमपसर द्रागमीयामि कार्यः ?
निर्वक्री देवि, चक्री भव भुवपतेस्तल्पमाकल्पमेवं
भावापेक्षी प्रियायाः क्वचन वचनतः पातु पद्मापतिर्नः ।।

8 CASL-BR-P.726
9 GOML-Madras-D. 16081.

In Public domain. Digitization Muthulakshmi Research Academy

श्रीपुरस्य चक्रवर्तिवंशस्य नृसिंहार्यस्य कुमारोऽयं कवितार्किककण्ठीरवः भाणकर्ता। कवितार्किक कण्ठीरव इति तु अस्य बिरुदं स्यात्। तेनैव बिरुदेन अयं प्रसिद्ध इति ऊह्यते। अस्यापि कालादिविषये किमपि न ज्ञायते।

10.10 वसन्ताभरणभाणः – श्रीनिवासः

अपूर्णोऽयं भाणः[10] मद्रपुरीतालपत्रग्रन्थालये संरक्षितः। एतद्भाणकर्ता आन्ध्रदेशीयः भवेत्। यतः आन्ध्रभाषायाम् आदिकवेः नन्नयार्यस्य अ-नुकरणमत्र दृश्यते। "श्रीवाणीगिरिजाश्चिराय दधतो वक्षोमुखाङ्गेषु" इति नन्नयार्यस्य पद्यस्य अनुकरणभूतः "त्रयो देवाः सर्गस्थितिलयकृतः स-र्वजगतां वहन्तो जिह्वायामुरसि वपुषि स्वदयिताः।" इति श्लोकः अत्र दृश्यते। श्रीरङ्गनाथस्य वसन्तोत्सवे प्रदर्शितोऽयं भाणः।

अयं कविः श्रीनिवासः श्रीवत्सगोत्रः, गोपालसूरिशिष्यः। तरुणभूषण-भाणकर्ता शठकोपः श्रीवत्सगोत्रं श्रीनिवासम् आत्मनः गुरुम् ख्यापयति। स च श्रीनिवासः अयमेव स्यात्। ततश्चायं भाणः तरुणभूषणभाणात् पूर्वं रचित इत्यूहितुं शक्यते।

10.11 शृङ्गारपावनभाणः–वैद्यनाथः

अयमपि भाणः अप्रकाशितः मद्रपुरीतालपत्रग्रन्थालये सुरक्षितः[11] अस्ति। राधाकृष्णयोः प्रणयं, विवाहं च वर्णयति अयं भाणः। तमिलनाडुराज्ये तिरुवल्लूरुक्षेत्रे त्यागराजेश्वरस्य चैत्रोत्सवे प्रदर्शितोऽयं कृष्णकविपुत्रेण वै-द्यनाथेन रचितः। अत्रेयं राधाकृष्णप्रणयवर्णनपरा नान्दी–

---

10 GOML.Madras-R.8176

11 GOML - Madras -D. 12703

In Public domain. Digitization Muthulakshmi Research Academy

कण्ठोदञ्चत्कपोतध्वनिकृतभगवत्कर्णपीयूषवर्षा
हर्षासारप्रबुद्धप्रथमरसलताकोरकाद्रोमहर्षा ।
रिङ्खद्वक्षोजशैला कलकलरशना नादकामाट्टहासा
राधापुंभावकेली कलयतु सुभगंभावुकं भावुकं वः ।।

अयं कविः परदेवतामुखारविन्दशतकं, लक्ष्मीप्रसादमालां, ज्ञानदीप-कलिकां च अरचयत्। अस्यापि समयः सम्यक् न ज्ञायते।

10.12 शृङ्गारभूषणभाणः – श्रीनिवासाचार्यः

असमग्रः मद्रपुरीतालपत्रग्रन्थालये स्थितोऽयं भाणः[12] श्रीशैलवंश्येन वकुलभूषणाचार्यपुत्रेण श्रीनिवासाचार्यपौत्रेण श्रीनिवासाचार्येण रचितः। अयं मिश्रभाणः स्यात्। यतः प्रस्तावनायां नटी प्राकृतं भाषते।

10.13 शृङ्गारमञ्जरीभाणः – रतिकरः

असमग्रतयोपलभ्यमानेष्वेव भाणेषु अयमप्यन्यतमः मद्रपुरीतालपत्र-ग्रन्थालये सुरक्षितः[13]। नीलानदीतीरे विराजमानस्य भगवतो रामचन्द्रस्य उत्सवेषु प्रदर्शनार्थमुद्दिष्टोऽयं रतिकरेण रचितः। अयं च कविः रतिकर इति अन्वर्थनामेति वदति अत्रत्यः सूत्रधार इत्थं-

अस्ति हि स्वप्रबन्धेन सर्वेषां मनसो रतिम् ।
करोतीति भुवि ख्यातो नाम्ना रतिकरः कविः ।।

अयं च कविः केरलीयः। उपलभ्यमानग्रन्थान्ते स्थितोऽयं श्लोकः अस्य कवितायाः निदर्शनभूतः-

12 GOML - Madras - R 3144C
13 GOML - Madras-R. 5201

In Public domain. Digitization Muthulakshmi Research Academy

सायन्तनप्लवविशेषमनोहराङ्ग्या
मारोत्सवप्रणयिवेषनिसृष्टरत्या ।
श्रृङ्गारमञ्जरिकया सममभ्युपेहि
धारागृहस्य कुमुदाभिधसौधश्रृङ्गम् ।।

10.14 शृङ्गारमञ्जरीभाणः – वेङ्कटनारायणः

अयमपि असमग्रः मध्ये मध्ये त्रुटितः मद्रपुरीतालपत्रग्रन्थालये सुरक्षितः[14]। भाणान्तरेष्विव इतिवृत्तं समानम्। वसन्तवर्णनं, चन्द्रवर्णनम्, उपालम्भः इत्याद्यपि यथावदुपलभ्यते। अस्य कर्ता वेङ्कटनारायणः। अयं च एकमेव विषयं स्पष्टयितुमनेकलोकोक्तीनां प्रयोगं कृतवान्। पश्यन्तु – "ननु अयमेव गण्डस्योपरि पुटकोच्छेदः, इदमेव आस्खलितस्योपरि स्खलितम्, अयमेव नवीनव्रणानामुपरि लवणरसनिष्यन्दः, अथवा वृश्चिकभिया विद्रवतो लेलिहानमुखे विनिपातः मृगतृष्णिकाभिया वनाद्व्रजतो दावानलपरिवेषः" इत्यादि। अस्यापि कवेः विषये किमपि न ज्ञायते।

10.15 शृङ्गारमञ्जरीभाणः

मद्रपुरीतालपत्रग्रन्थालये एव (R.4282) शृङ्गारमञ्जरीनाम्ना कानिचित् पत्राणि लभ्यन्ते। अत्र कर्तुः नामापि नोपलभ्यते। परन्तु अनेन भाणकर्त्रा श्रीरामचन्द्रोदयकाव्यं रचितमिति ज्ञायते। रङ्गनाथस्य वसन्तोत्सवेषु प्रदर्शनार्थमुद्दिष्टोऽयं भाणः। कविता सरसा।

14 GOML - Madras - R 9969

In Public domain. Digitization Muthulakshmi Research Academy

सकलसुगुणधामा संस्तुतौदार्यभूमा
सततविततधैर्यस्स क्षमादेव वर्यः ।
पृथुलतरनिजौजाः प्रीतयेरङ्गधाम्नः
प्रचुररसधुरीणं भाणमेकं व्यभाणीत् ।।

10.16 शृङ्गारमञ्जरीभाणः

आन्ध्रविश्वविद्यालय ग्रन्थालये (AU.29194) शृङ्गारमञ्जरी नाम्ना कश्चन भाणः उपलभ्यते । यस्य कर्ता, इतिवृत्तादि च न ज्ञायते ।

10.17 शृङ्गाररत्नाकरभाणः – सुन्दरताताचार्यः

मैसूर्–राज्यसरस्वतीभाण्डागारे अस्य प्रतिकृतिरस्ति[15]। अप्रकाशितोऽयं भाणः देवचूडामणितनयेन श्रीशैलवंश्येन धन्विनगरवासिना सुन्दरताताचार्येण रचित इति एतद्भाणान्तश्लोकेनानेन ज्ञायते–

श्रीशैलान्वयभव्यशेखरमणेः श्रीदेवचूडामणे
राचार्यस्य तनूभवेन सुतरामाचार्यनित्यक्रतोः ।
श्रीमत्सुन्दरतातयार्यकविना श्रेयोगुणाम्बोधिना
भाणोऽभाणि गुणाधिको बुधमुदे श्रृङ्गाररत्नाकरः ॥

10.18 शृङ्गाररसभाणः

मद्रपुरीतालपत्रग्रन्थालये एव (R. 9959) असमग्रः कश्चन भाणः उपलभ्यते। वसन्तवर्णनेन आरब्धोऽयं भाणः। विलासशेखरः नायकः। अनङ्गमञ्जरी नायिका। कर्तुः विषये किमपि न ज्ञायते। अन्ते 'समाप्तः

15 मैसूर्–महाराजसरस्वती भाण्डागारः–176

In Public domain. Digitization Muthulakshmi Research Academy

शृङ्गाररसो नाम भाणः' इति वर्तते। अत्र शैली सरसा। रत्नापण इव उ-त्प्रेक्ष्यमाणमिदं तारकावर्णनं हृद्यम्–

व्योमस्थली विक्रयवीथिकायां
नवं तमोनीलपटं वितत्य।
प्रदोषसायान्त्रिकविप्रकीर्णा
हारा इवोडुप्रकरा विभान्ति॥

10.19 शृङ्गारशेखरभाणः–रामानुजः

असमग्रतयोपलभ्यमानेषु अयमप्यन्यतमः मद्रपुरीतालपत्रग्रन्थालये वर्तते[16]। अस्य कर्ता श्रीवत्सगोत्रः रघुवरार्यगोपालसूरिशिष्यः रामानुजः। उपलभ्यमानग्रन्थान्ते वर्तमानः अयं श्लोकः अस्य कवितायाः उदाहरणम्–

फुल्लन्मदारमञ्जुस्मितरुचिततिभिर्दिक्षु सन्तन्यमाना
ज्योत्स्नामच्छां मुखाम्भोरुहमधुरमधूल्लोलुपानापतन्तः।
भृङ्गानावारयन्ती झणझणितरणत्कङ्कणाभ्यां कराभ्यां
मन्दं मन्दं मृगाक्षी द्रुतकनकलतेवेयमायाति दूरे॥

10.20 सम्पत्कुमारविलासभाणः – रङ्गनाथः

अयमपि मद्रपुरीतालपत्रग्रन्थालये अप्रकाशित एव हस्तलिखितग्रन्थ-रूपेण संरक्षितः वर्तते[17]। अस्यैव भाणस्य माधवभूषणमिति नामान्तरम्। अस्य कर्ता रङ्गनाथमहादेशिकः तर्कवेदान्तादिशास्त्रेषु निष्णातः। अयं

---
16 GOML - Madras -R 53746
17 GOML - Madras - D.12719

In Public domain. Digitization Muthulakshmi Research Academy

श्रीवत्सगोत्रः ।

10.21 हेमन्ततिलकभाणः[18] – तिरुमलाचार्यः

आन्ध्रप्रदेशे श्रीकाकुलं मण्डले रामतीर्थग्रामवासी रामानुजाचार्यसुतः चिलकमर्रिवंश्यः तिरुमलाचार्यः हेमन्ततिलकभाणं रचितवानिति कृष्णमाचार्यैः उक्तम् । अयञ्च तिरुमलाचार्यः अप्पयदीक्षितकुवलयानन्दस्य चमत्कारचन्द्रिकाख्यायां, विद्यानाथस्य प्रतापरुद्रीयस्य रत्नशाणाव्याख्यां, भाणममुं चारचयत् ।

[18] HCSL - MK -P. 795 ; CASL - P. 782

In Public domain. Digitization Muthulakshmi Research Academy

अध्यायः 11

वेशसंस्कृतिः

यतः भाणेतिवृत्तं वेशवाटीसम्बद्धम् अतः तेषु वेशसंस्कृतिः सम्यक् प्रतिबिम्बिता। वेश्यास्वपि उत्तममध्यमाधमभेदाः आसन्। तासामपि जीवने केचन नियमाः आसन्। ताश्च प्राचीनकाले समाजे बह्वादरपात्राणि अभूवन्। नागरिकैः सर्वैरपि ताः विनावरोधं मिलन्ति स्म। नागरकानां गृहेष्वेव एताः गच्छन्ति स्म। पादताडितके विष्णुनागः एकः श्रोत्रियब्राह्मणः स्वगृहे एव कयाचिद्वेश्यया उपगत इति कथैवात्रोदाहरणभूता। वेश्यासङ्गोऽपि न तथा समाजे निषिद्धः, यथा द्यूतमद्यपानादि। कामसूत्रेषु वैशिकविशेषाः बहवः वर्णिताः। भरतः स्वनाट्यशास्त्रे वैशिकाधिकरणं पार्थक्येन रचितवान्। यतः नाट्यं तस्मिन् काले वेश्याधीनमेवासीत्। गणिकाशब्दोऽपि तासामुत्तमत्वख्यापकः। एषा च वेशसंस्कृतिः भाणेषु कथमस्तीति किञ्चिद्विमृशामः।

11.1 वेशवाटिका

वेश्यानां वासस्थानं वेश इति, वेशवाटिकेति च कथ्यते। एषा च वेशवाटिका

In Public domain. Digitization Muthulakshmi Research Academy

कामावेशः कैतवस्योपदेशः मायाकोशो वञ्चनासन्निवेशः ।
निर्द्रव्याणामप्रसिद्धप्रवेशो रम्यक्लेशः सुप्रवेशोऽस्तु वेशः ॥

इति पद्मप्राभृतके वर्णिता। धूर्तविटसंवादे[1]ऽपि वेशवाटीं प्राप्य जनः प्रागल्भ्य शौर्य – वाङ्नैपुण्य – सौष्ठव – सत्त्वस्फुरण – चित्तज्ञान – प्रमोद – रतिगुणविज्ञान – चित्रादिकलाकौशलादिकं लभते इति कथितम्। एतादृशी भावना प्राचीनकाले नागरिकाणामासीदिति अनेन ऊह्यते। चित्रादिचतुष्षष्टिकलासु यतः वेश्या एव चतुरा अवर्तन्त, अत एव ताभिस्सह सम्बन्धं संस्थाप्य तदानीन्तनाः नागरिकाः कलासु प्रावीण्यं मनोऽनुगुणवर्तनं, सौख्यं च अलभन्त।

11.2 वेश्या

एतादृशे वेशे प्रधाना वेश्या, गणिका, वारमुख्या, वेशदेवता, वेशयुवतिः, वारयुवतिरित्यादिबहुनामभिः आहूयते। एषा च नागरिकसङ्गमाय यतते। नात्र कारणं शारीरिकसुखाभिलाषः। किन्तु धनाशैव। वेश्यायाः प्रेम स्वाभाविकं कृत्रिमं चेति द्विविधम्। यदि वेश्या पुरुषं रतिकामनया समुपगच्छति तर्हि तस्याः प्रेम स्वाभाविकमिति, धनकामनया यद्युपगच्छति तर्हि तत् कृत्रिममिति च कथ्यते[2]। परन्तु वेश्यानां कृत्रिमा प्रवृत्तिरपि सहजैव भासते। वेश्याश्च स्वीयहावभावप्रकटनादिभिः पुरुषान् आकर्षन्ति। तदा पुरुषाः तासां कृत्रिमप्रेमनटनं स्वाभाविकमिति मत्या वञ्चिताः भवन्ति। एताः वेश्याः पुरुषान् वेशवाटीमानेतुं सहायकानपेक्षन्ते। तत्सहायकाश्च पुरुषान् मेषलावकुक्कुटादियुद्धप्रदर्शनमिषया वे-

1 प्रागल्भ्यं स्थानशौर्यं वचननिपुणतां सौष्ठवं सत्त्वदीप्तिं
चित्तज्ञानं प्रमोदं सुरतगुणविधिं रक्तनारीनिवृत्तिम् ।
चित्रादीनां कलानामधिगमनमथो सौख्यमग्र्यं च कामी ।
प्राप्नोत्याश्रित्यवेशं यदि कथमयशस्तस्य लोको ब्रवीति ॥

2 वात्स्यायन कामसूत्राणि 4-2-78, 6-1-11-21

In Public domain. Digitization Muthulakshmi Research Academy

शवाटमानयन्ति[3]।

वेश्या च स्वजन्मसिद्धसंस्कारादिना द्विविधान् पुरुषानेव समाकर्षति। धनाशया यादृशमपि पुरुषं धनवन्तं कृत्रिमप्रेम्णा स्वायत्तीकृत्य तस्य धनं सर्वं हरति। एतदेवोभयाभिसारिकायां–

सर्वथा रागमुत्पाद्य विप्रियस्य प्रियस्य वा।
अर्थस्यैवार्जनं कार्यमिति शास्त्रविनिश्चयः॥ इति

रामवर्मणः शृङ्गारसुधाकरभाणे–

एडं मनोभवकलासु जडं विरूपं
वृद्धं विनष्टनयनं व्रणपूर्णदेहम्।
संख्यानहीनधनसंचयिनं पुमांसं
वेश्याङ्गना द्रविणलोलतया भजन्ते॥

इति च वर्णितम्। यथा कथञ्चित् धनार्जनमेव प्रधानकर्तव्यं वेश्यानाम्[4]। तस्मिंश्च यदि कदाचिद्रोगादिप्रत्यवायः तर्हि सः तेनैव धनेन निवारणीयः। न तु प्राप्यं द्रविणमुपेक्षणीयमिति तासां सिद्धान्तः।

कृत्रिमप्रेम्णा यं वेश्या स्वायत्तीकरोति, सः स्वधनेन, कुलाचारसदाचारजातिमर्यादाभिश्च हीनस्सन् स्वेच्छासञ्चारी भवति। एष च धनलाभाय अकार्यमपि कर्तुं सन्नद्धो भवति। यथाकथञ्चित् धनं सम्पाद्य, तेन धनेन वेश्यासङ्गमयत्न एव अस्य मुख्यं कार्यम्। पञ्चबाणविजये वर्णितः गणेश्वरशास्त्री एतादृश एव। स च वेश्यायाः आभरणं कारयितुं पवित्रं स्फाटिकलिङ्गमेव विक्रीतवान्। एवमेते तस्याः सेवकाः भवन्ति। यदा चैतेषां धनं सर्वमपि अपहृतं भवति, तदैते वेश्याभिः निष्करुणं गृहात् नि–

---

3 वात्स्यायनकामसूत्राणि 6–1–25, 26, 27

4 सर्वथापि स्वयमुपनतं द्रविणं नोपेक्षणीयम्। तन्निमित्तो यदि प्रत्यवायस्स तेनैव वारणीयः।(रससदनभाणः।)

In Public domain. Digitization Muthulakshmi Research Academy

ष्कास्यन्ते। कदाचित् धनैस्सह प्राणानपि स्वीकर्तुं प्रयतन्ते वेश्याः। उभयाभिसारिकायां धनमित्रः कौपीनमात्रावशेषितः वेश्यया वाप्यां पातितः कथञ्चित् बहिरागतोऽत्रोदाहरणम्। एवं विधानि अकार्याणि बहूनि कुर्वन्त्यः वेश्याः, यदि तानि बहिर्गतानि तर्हि स्वमातृषु पातयन्ति। तदुक्तं उभयाभिसारिकायां–

यथा नरेन्द्राः कुटिलस्वभावाः स्वदुष्कृतं मन्त्रिषु पातयन्ति।
तथैव वेश्याः शठधूर्तभावाः स्वं दुष्कृतं मातृषु पातयन्ति॥ इति।

अथ वेश्यायाः स्वाभाविकप्रेम्णः कारणं सौन्दर्यादिगुणगणजनितानुराग एव। रूपयौवनगुणसम्पन्नः पुरुषः यदि कलाकुशलः स्यात् तर्हि वेश्या तस्मै आत्मानमर्पयति। एतादृशेन पुरुषेण सह वेश्या रहस्यमयं सम्पर्कं स्थापयति, यद्येतन्नानुमन्येत मात्रा। उभयाभिसारिकायां अनङ्गदत्ता ईदृशी। एतादृश्यः वेश्याः गृहिण्य इव सञ्चरन्ति। प्रिये देशान्तरगते सति प्रोषितभर्तृकाव्रतमनुतिष्ठन्ति। एताश्च गृहप्राङ्गणे बलिं विधाय भक्षितुमागतान् काकान् स्वप्रियागमनमुद्दिश्यैवं पृच्छन्ति स्म–

भद्रं ते[5] वलभीगवाक्षतिलक श्राद्धोपहारातिथे
जीवन्त्यां मयि कच्चिदेष्यति स मे नित्यप्रवासी प्रियः।
यद्यागच्छति गच्छ तावदितरद्वाराश्रितं तोरणं
निश्शोका हि समेत्य मे प्रियतमं दास्यामि दध्योदनम्॥

प्रियसङ्गमोत्कण्ठिताश्च वेश्याः आभरणादिकं त्यक्त्वा, मलिनं वस्त्रं धृत्वा, ललाटे रक्तचन्दनमालिख्य, द्वारदेशे स्थित्वा कैशिकीमाश्रित्य गायन्त्यः

5 पद्मप्राभृतके

In Public domain. Digitization Muthulakshmi Research Academy

वीणामुपवीणयन्त्यः स्वीयामुत्कण्ठां व्यञ्जयन्ति। पद्मप्राभृतके शोणदासी एवमेव स्वीयामुत्कण्ठामभिव्यञ्जितवती। अत एव तत्र विटो वदति "कै-शिक्याश्रयं हि गानं पर्यायशब्दो रुदितस्ये"ति।

एताः वेश्याः उत्तममध्यमाधमभेदेन त्रिविधा इति धूर्तविटसंवादे[6] ई-श्वरदत्तः। कारणं विनैव वा, धनदानादिना वा या रागमुपैति सा अधमा। दानेन यौवनविभासिरूपेण च या रागमुपैति सा मध्यमा। रूपाधिकं विग-तस्पृहं दातारं दाक्षिण्ययुक्तं च केवलं रूपेणैव रक्ता या सेवते सा उत्तमा। उत्तमास्तु वेश्याः अत्यल्पाः वसन्तसेनाद्याः। अत एव गणिकावृत्तं प्रायशः निन्द्यते। "अविश्वसनीयानि गणिकाजनस्य हृदयानि-

स्निग्धैः प्रश्लिष्टैः क्रीडनैर्लालयित्वा
हृत्वा सर्वस्वं निर्घृणा कामुकानाम्।
लुब्धा वेश्यास्तानन्यसंरञ्जनार्थं
देहान् वैराग्यात् देहिवत्सन्त्यजन्ति॥"

इत्युभयाभिसारिकायां, "कपटानुरागकौशलः खलु वेश्याजनः, कुशला खलु कुबेरमपि कौपीनमपि परिधापयितुमिति" वसन्ततिलके, "विचि-त्रमेव वेश्यानां युगपदनेकयुवजनावर्जनकौशलमि"ति शृङ्गारतिलके, "स-र्वत्र स्त्रीष्वेकराश्येऽपि वाराङ्गनातत्त्वमन्यदेव कपटकञ्चुकितं, निश्चितमेव मनस्यन्यद्वचस्यन्यदिति स्वतःकुटिलानां नारीणाम्, सर्वथा नियमितचि-त्तानामपि चित्ताकर्षणनिपुणं स्त्रैणमिति" रसिकरञ्जने

6 दानाद्रागमुपैति वेशयुवतिर्निष्कारणाद्वाधमा
मध्या रूपमवेक्ष्य यौवनयुतं दानेन वा हृष्यति।
दातारं विगतस्पृहं सुवयसं रूपाधिकं चैव भो
दाक्षिण्येन विभूषितं खलु नरं नार्युत्तमा सेवते॥

In Public domain. Digitization Muthulakshmi Research Academy

"इष्टार्थसिद्धये पूर्वं कुर्वन्ति शपथान् बहून् ।
सिद्धे पुनर्विचेष्टन्ते विपरीतं हि योषितः ॥"

इति रससदने च ताः उपालब्धाः । गतयौवना[7] अपि वेश्याः धनाशया पुरुषान् आवर्जयितुं यतन्ते स्म।

वेश्यानाम् आचारव्यवहाराः ईश्वरदत्तेन धूर्तविटसंवादे सम्यगुपवर्णिताः। एताः सर्वाः सङ्गीतकुशलाः रूपकाद्यभिनये निपुणाः । वक्त्रापवक्त्रादिछन्दस्सु गाने निपुणाः । एतासां गानेषु वीणामृदङ्गमुरजादिसहकारवाद्यान्यप्युपयुज्यन्ते स्म। सप्ततन्त्रीवीणायां काकलीपञ्चमस्वरगानं वेशवाट्याः प्रमुखः विशेषः । वल्लकी, सप्ततन्त्रीवीणा, विपञ्ची, तन्त्री इत्यादि बहुविधाः वीणाः ताभिः उपयुक्ताः । गृहोद्यानेषु मयूराणां पोषणं, गृहे शुकशारिकादीनां पोषणं च बहुलम्। गृहपरिसरे वापीकूपतटाकादिकमासीत् प्राचीनकाले। तत्र प्रासादाश्च कैलासशिखरतुल्याः, वेशवधूस्तनोपरुध्यमानगवाक्षाः अगरुधूपदुर्दिनाः इति, गृहद्वाराणि पुष्पोपहारप्रहसितानीति च वर्णितम्। गन्धतैलैः केशप्रसाधनं, कर्णादिषु पुष्पाणाम् आभरणरूपेणालङ्करणं, माल्यधारणमित्यादि बहु तत्र वर्णितम्। एतादृशवेशवाटीवृत्तं पादताडितकभाणेऽपि समुपलभ्यते।

---

7 पलितभङ्गतरङ्गितमङ्गकं प्रमुषिता प्रथमे च नखव्रणाः ।
फलनिपीडितरन्ध्रमधोविलं तदपि ताम्यति हन्त पणाशया। (शृङ्गारशेखरभाणः)

In Public domain. Digitization Muthulakshmi Research Academy

11.3 आपानगोष्ठी, उद्यानविहारः

प्राचीनकाले वेशसंस्कृत्यां आपानगोष्ठी, उद्यानविहारश्च[8] मुख्यौ। पूर्वाह्णे एव सम्यगलङ्कृताभिः सपरिचारिकाभिः वेश्याभिः सह नागरिकाः उद्यानविहारार्थं प्रतिष्ठन्ते स्म। दिनं सर्वमपि उद्याने कुक्कुटयुद्धद्यूतादिभिः संदर्शनीयक्रीडाविहारादिभिः यापयित्वा सायाह्ने गृहानुपयान्ति स्म। उद्याने वेश्याः मधुमैरेयसुरासवानि विविधलवणफलहरितशाकतिक्तकटुकाम्लोपदंशैः नागरिकान् पाययन्ति स्म। मद्यं च त्रिफलं गोक्षुरलोहचूर्णादिभिः[9] संपाद्यमानमासीत्। एतच्च मद्यं गौडी, माध्वी, पैष्टी इति त्रिरूपम्। मद्ये उत्पलदलानि सम्मिश्र्यन्ते स्म। सहकारतैलमपि मद्ये सम्मिश्र्यते स्म। पानपात्राणि च मयूराकृतीनि। केचन विटाः गुग्गुलुपानमपि कुर्वन्ति स्म। श्रमापनोदनाय गन्धतैलेन शरीरमनुलेपयन्ति स्म। एतादृशी गोष्ठी अनिन्द्येति कामसूत्रेषु[10] प्रतिपादिता।

एतासां वेश्यानां यौवनलीला चतुरवस्था[11]। प्रथमयौवने ऊरू, गण्डः, जघनञ्च बलिष्ठानि, स्तनौ च कर्कशौ भवतः। एषा सुरते उत्साहं प्रदर्शयति। द्वितीययौवने शरीरं, स्तने च भारायन्ते। तृतीययौवने रतिकामना अधिका भवति। चतुर्थे च मुखं म्लानं भवति। रत्याम् अनुत्साहः। एवं एताः सर्वा अपि भाणेषु तत्र तत्र समुपवर्णिताः।

8 (अ) वात्स्यायनकामसूत्राणि 1-4-22 तः 28 पर्यन्तम्।
(ब) उपवनगमनाय संचार्यते वारमुख्यो जनः कामिभिः – धूर्तविटसंवादः।

9 त्रिफलगोक्षुरलोहचूर्णसमृद्धिरस्तु (पद्मप्राभृतकम्)।

10 लोकचित्तानुवर्तिन्या क्रीडामात्रैककार्यया।
गोष्ठ्या सहचरन्विद्वान् लोके सिद्धिं नियच्छति॥ (का० सू० 1-4-39)

11 भरतनाट्यशास्त्रम् (25-43 तः 53 पर्यन्तम्)

In Public domain. Digitization Muthulakshmi Research Academy

11.4 कलत्रीकरणम्

अथ प्राचीनकाले विटैः वेश्यानां कलत्ररूपेण स्वीकरणमासीद्वा न वेति ज्ञातुं न शक्यते, प्राचीनभाणेषु तादृशवर्णनस्यानुपलम्भात्। पञ्चदशशत-कादारभ्योत्पन्नेषु भाणेषु कलत्रपत्रिकालेखनपुरस्सरं वेश्यानां कलत्रीकरणं सर्वेषु वर्णितम्। कामुकाः एतावद्धनादिकं दास्यामीति प्रतिज्ञाय किञ्चि-त्कालं वेश्याः कलत्रीकुर्वन्ति स्म। एतच्च कलत्रीकरणं पत्रिकामुखेन सं-पाद्यते स्म। तस्मिन् काले सा वेश्या अन्यं नोपगच्छेदित्यपि नियमः। तथैव अयमपि विटः अन्यां नोपगच्छेत्। यदि च नियमभङ्गस्स्यात् तर्हि पत्रिकायां निर्णीतरूपेण परिहारादिकं करणीयमासीत्। रामभद्रदीक्षितस्य शृङ्गारतिलके समुपवर्णिता एषा कलत्रपत्रिकैवात्र प्रमाणम्।

स्वस्ति श्रीमति मन्मथे सति विभौ तन्नाम्नि संवत्सरे
मासे तत्सचिवे तदीयसुहृदा पूर्णेन भोज्ये तिथौ।
वेश्यायै वितरामि काञ्चनलतानाम्न्यै कलत्रीक्रिया
चीटीमेष भुजङ्गशेखरविटो हालास्य पुर्यां वसन् ॥

इयमस्तु काञ्चनलता वत्सरमेकं कलत्रं मे।
प्रदिशामि परिपणार्थे प्रतिदिनमस्याश्शतं दीनारान् ॥
दद्यामस्यै मृगमदकुङ्कुमकर्पूरगन्धमाल्यानि।
ताम्बूलान्यपि नित्यं प्रतिमासं क्षौमयुगलं च ॥

इयमन्यमपेक्षेत मध्ये यदि सुमध्यमा।
यावज्जीवं कलत्रं मे भवेत्परिपणं विना ॥
एवं वेत्ति वसन्तक इत्थं जानाति कलहंसः।
विदितमिदं मालत्या विज्ञातमिदं वृद्धकमलिन्या ॥

In Public domain. Digitization Muthulakshmi Research Academy

इत्थं भुजङ्गशेखरकाञ्चनलतयोरनुज्ञया लिखितम् ।
मणलूरुपुराश्रयिणा माधवपुत्रेण चित्रलेखेन ॥

एवं पत्रव्यवहारे सत्यपि वेश्याविटौ उभावपि निगूढतया नियमभङ्गं कुरुतः स्म। तदुक्तं रससदनभाणे–

इष्टं दातुमसन्दिहानमखिलं विस्रम्भभाजं निजं
भर्तारं प्रति वञ्चनामनुदिनं तत्तादृशैः कैतवैः ।
कर्तुं निर्दयमन्यकेन रमितुं निर्व्याजवद्वर्तितुं
चाबाल्यादिव शीलिता मृगदृशः पाटव्यमाबिभ्रति ॥ (188)

एतादृशाः नियमभङ्गाः यदि बहिर्गताः तर्हि कलहाः भवन्ति स्म। तादृशकलहेषु अग्रश्रेणिविटाः न्यायनिर्णेतारः। एतादृशेषु कलहेषु वेश्यायाः पक्षे स्थित्वा कलहेषु प्रधानपात्रधारिणी वेश्यामाता। प्रसङ्गवशात् तस्याः वेशवाट्याश्च सम्बन्धादिकं किञ्चित् विचार्यते।

11.5 वेश्यामाता

विटैः वञ्चिताः काश्चित् गृहिण्यः गार्हस्थ्यजीवनात् बहिष्कृताः वेशवाट्यां वेश्यारूपेणावतरन्ति स्म। एताश्च स्वरक्षायै एकां सेविकां धात्रीरूपेण पोषयन्ति स्म, या व्यवहारकुशला, चतुरा निर्दाक्षिण्या च भवति। तामेव स्वजननीं कथयन्त्यः, स्वकीयरहस्यव्यवहारान् तद्द्वारा निर्वहयन्ति स्म। आदानप्रदानव्यवहार एव वेश्यामातुः मुख्यः उद्योगः। राजानः स्वीयानि दुष्कृत्यानि यथा मन्त्रिषु पातयन्ति, तथैव वेश्याः अपि स्वीयदुष्कृत्यानि मातृषु[12] पातयन्ति स्म। तस्मादेव वेशे वेश्यामातुः प्रमुखं

---

12 यथा नरेन्द्राः कुटिलस्वभावाः स्वदुष्कृतं मन्त्रिषु पातयन्ति।
तथैव वेश्याः शठधूर्तभावाः स्वं दुष्कृतं मातृषु पातयन्ति ॥ उभयाभिसारिका।

In Public domain. Digitization Muthulakshmi Research Academy

स्थानम् आसीत्। ये विटाः वेश्याः अनुभोक्तुमायान्ति स्म तैः वेश्यायाः तन्मातुश्च वस्त्राद्यलङ्कारदानमावश्यकमासीत्। केचन विटाः एनां वेश्यामातरं प्रलोभ्य धनादिभिः, तदधीनां वेश्यामनुभुञ्जते स्म। निपुणाः यथा पिशाचस्य बलिं दत्त्वा निधिं गृह्णन्ति, तथैव वेश्यामातरं प्रलोभ्य वेश्याः अनुभोक्तव्याः इतीदं प्रथमं सूत्रं[13] विटानाम्। कदाचित् अस्याः तर्जनादिकं अगणयित्वा विटाः वेश्याः अनुभवन्ति स्म। तद्वदति शृङ्गारभूषणे विटः–काकोऽपि रटतु घटीयन्त्रं च प्रवर्तताम् इति।

एषा च वेश्यामाता कस्मादपि न बिभेति स्म। धनार्जनमेवास्याः प्रधानं लक्ष्यम्। वञ्चनशीलान् विटान् गृहीत्वा एषा तर्जयति दण्डयति च। भीषणेन वा, बहुकोलाहलं कृत्वा वा विटात् नेयं धनं अधिकमेव नयति स्म। एनां दृष्ट्वा विटाः बिभ्यति स्म। वृद्धवर्धकिनी, जरती, गणिकामाता, जरतीपिशाचिनी, दुष्टाचरणा, कष्टजीवना, वार्धकिहतकी, जरठमर्कटिका, निष्ठुरतरवचनवीचिका, कामुककालरात्रिः, जरतीपिशाचिका, इत्यादिपदैरेषा आहूयते स्म। प्रायशः सर्वेषु भाणेषु एषा निन्दिता। एषा च कामुकजनानां वारयितुमशक्या ईतिबाधेति कथयति विटः उभयाभिसारिकायाम्[14]। एषा कामुकमहाशनिः[15] वानरी[16], कालभुजङ्गीति[17] च वर्णिता। एषा च धनवन्तं विटं प्राप्य, एषा बाला कुलवधूः अनाघ्रातपूर्वा इत्यादिवचनैः तं वञ्चयित्वा वेश्यया संयोज्य धनमपहरति स्म[18] एवं सर्वं धनं वञ्चनया अ–

---

13 प्रादाय प्राक्पटीमस्याः पश्चादञ्च नितम्बिनीम् ।
दत्त्वा बलिं पिशाच्या हि गृह्णन्ति निपुणाः निधिम् ॥ पञ्चबाणविजयम्। (21)

14 गणिकामातरो नाम कामुकजनस्य निष्प्रतीकाराः ईतयः (उभयाभिसारिका)

15 नमोऽस्त्वस्यै कामुकजनमहाशनये (उभयाभिसारिका)

16 तथैव सा लौकिकी गाथा–वृद्धवारविलासिनी वानरी भवति (शृङ्गारभूषणम्)

17 कः प्रभवति कालभुजङ्गमुखे पतितुम् (शृङ्गारतिलकम्)

18 । एनां भवत्कुलवधूमधुना भजेति बालां वितीर्य धनिने प्रथमं जनाय।
आपाद्य चैनमलमल्लकमात्रशेषं अन्यं विलोभयितुमीदृशमारभन्ते ॥ (शृङ्गारशेखरभाणः अभिनवकालिदासः)

In Public domain. Digitization Muthulakshmi Research Academy

पहृत्य, पुनः अन्यमेवं कर्तुं प्रयतते स्म। वार्धक्ये स्थिताप्येषा स्वयमपि विटार्थं प्रयतते स्म। एषा च दुष्टान् विटान् जीर्णशूर्पैः प्रहृत्य गृहात् निस्सारयति स्म। अस्याः स्वरूपं, विटभर्त्सनं च रामभद्रदीक्षितेन शृङ्गारतिलके इत्थमभिवर्णितम्–

"अहो दुर्दर्शनमस्याः रूपम्

पादौ दुष्प्रचलौ पृथूदरभरादेषोऽप्यलाबूफल-
द्राघीयान्हृदिलम्बते कुचभरः श्वेता वलन्ते कचाः।
दृश्यन्ते च मुखान्तरे त्रिचतुराः दन्ताःशलाकोपमाः
किं वक्ष्ये विधिनैव कापि रचिता कृत्या जरत्यात्मना॥

तदियं किंकरिष्यतीति न जाने। न प्रसरति मे पाणिपादं साध्वसेन। तदद्य किं करोमि? भवत्वेवं तावत्। अये मातुलानि मन्दारिके! सुखमास्यते? सक्रोधं किं ब्रवीषि– रे रे दुराचार धूर्तजनाधम कपटैकनिकेतन निर्लज्ज दुरात्मन्! कथमिदानीं करलग्नो मातुलानीति मृदुलमामन्त्र्य वञ्चयसि। अनेन जीर्णशूर्पेण प्रहरिष्यामि। दातव्यं दत्त्वा पुनरन्यतो गच्छ।"

एषा च अतिपरुषभाषिणी। विटानां गुणगणान् वा, पाण्डित्यं वा, उन्नतं कुलं वा न गणयति स्म। पञ्चबाणविजये वसन्तसोमयाजिनामानम्। विद्वज्जनचूडामणिं कथं भर्त्सयतीति पश्यत– "अये ब्रह्मबन्धो! कुब्जकधौरेय! एतावन्तं कालं भवद्भगिनीमनुभूय पुनरागतोसि? गच्छ गच्छ।" एतादृशं जरतीवर्णनं रम्ये गद्ये पञ्चबाणविजये वर्तते।

अथ जरत्या गृहीतस्य अवस्था कीदृशी स्यात्? सा चेत्थमभिवर्णिता पञ्चबाणविजये–"अथ सोऽपि कपिरिव शुनीगृहीतः, मण्डूक इव कालोरगीमुखतः, कुलीर इव शिवाजेघ्रीयमाणः, हरिण इव शार्दूलीगृहीतः, मीन इव बलाकाक्षिप्तः, आखुरिव मार्जारीसाक्षात्करितः, जरत्या निरुद्धः पर्याकुली भवति।"

In Public domain. Digitization Muthulakshmi Research Academy

एवमनुपदं जरत्या बाध्यमानाः अपि विटाः वेश्यासम्भोगायैव यतन्ते इति चित्रमेतत्। अथवा किमत्र चित्रम्। यतः-

अपि यौवनपुष्पितां मुमुक्षुर्गणिकां मातृमतीति को नु कामी।
अपयाति किमन्यपुष्टपोतो वृतिगुप्तेति विहाय चूतयष्टिम् ॥ 19

वसन्ततिलकेऽपि विटः एतादृशदुष्टस्वभावायाः जरत्याः सहृदया तारावली (कस्याश्चित् वेश्यायाः नाम) कथमासीत्सुतेति सन्दिह्य कथयति- अथवा शम्बूकजातिरपि किं न प्रसूते मुक्ताफलं शुक्तिः इति।

एवं वेशवाट्यां प्रधानीभूतायाः अस्याः वर्णनं भाणेषु सर्वेषु हास्यरसपोषणायानुविद्धम्।

11.6 मुख्योत्सवौ

अस्यां च वेशवाट्यां मुख्यतया प्रचाल्यमानौ उत्सवौ द्वौ। एकः प्रथमार्तवमहोत्सवः, द्वितीयः प्रथमरङ्गाधिरोहणमहोत्सवश्च। एतावुभावपि वेश्यावृत्त्यै अर्हताधायकौ।

प्रथमार्तवमहोत्सवे ऋतुमतीं बालां मध्ये निधाय तत्समवयस्काः बालिकाः परितः नृत्यन्त्यः, गानं कुर्वन्ति स्म। प्रौढा वेश्याश्च ताम्बूलानि सेवन्त्यः तद्दृष्ट्वा सन्तुष्यन्ति स्म। सुन्दरेशशर्मणा स्वीये शृङ्गारशेखरभाणे अयमुत्सवः इत्थमभिवर्णितः-

अत्र किल अचिरसम्पत्स्यमानमदनमहाहवसूचकबदरीलिकुचकपित्थफलोपमकुचमण्डलाः नवयुवत्यः कृतहस्ततालाः कलं च गायन्त्यः कन्यकामेकां मध्ये संस्थाप्य प्रदक्षिणीकुर्वन्ति। अन्याश्च प्रगल्भास्तरुण्यः

19 अभिनवकालिदासस्य शृङ्गारशेखरभाणे

In Public domain. Digitization Muthulakshmi Research Academy

सन्नद्धतालफलकलशमहीधराधरीकरणचतुरकुचमण्डलाश्चर्वितमधुरसुरभिताम्बूलाः परितः उपविशन्त्यः समोदमनुभवन्ति नृत्यरसम्।.......अद्य किल कनीयसी मम कलावती कुसुमिता ततश्च प्रवृत्तस्तदभिनन्दनविलासोऽद्य विलासिनीनाम्॥

वामनभट्टबाणस्य[20] शृङ्गारभूषणेऽपि अयं महोत्सवः सम्यगभिवर्णितः। मङ्गलवाद्यानि कलं ध्वनन्ति स्म। सीमन्तिन्यः सर्वा अपि सम्भूय ऋतुमतीं बालामलङ्कुर्वन्ति स्म। गीतानि गायन्ति स्म। विटपीटमर्दचेटादयः पुरुषा अपि उत्सवदर्शनार्थमागच्छन्ति स्म। इत्यादि सुन्दरतया वर्णितं शृङ्गारभूषणान्ते।

अथ द्वितीयः उत्सवः प्रथमरङ्गाधिरोहणोत्सवः। आर्तवमहोत्सवापेक्षया अस्यैव महत्त्वम् अधिकम्। ऋतुमती कन्या ललितकलाभ्यासं संपूर्य शुभे मुहूर्ते दैवसन्निधौ स्वाभ्यस्तकलाचातुर्यं सर्वेषामाहूतानां सविधे प्रदर्शयति। तस्मिन्नेव समये तत्र समायातेषु विटप्रमुखेषु धनी विटश्रेष्ठः कलत्रपत्रिकां निर्धार्य कलत्रत्वेन स्वीकरोति। एतदुत्सवद्वारा समाप्तविद्या कन्या वेश्यावृत्तिम् अनुप्रविश्य वेश्या भवति। एतदुत्सवविशेषाः सर्वे वसन्ततिलके(130 तः 140 श्लोकान्तं) पञ्चबाणविजयान्ते च सम्यगुप वर्णिताः।

काश्चन वेश्याः वेश्यावृत्तिं त्यक्त्वा इष्टेन सहोद्वाहिता अपि भवन्ति स्म। तादृशः पाणिग्रहणमहोत्सवोऽपि शृङ्गारशेखरभाणे अभिनवकालिदासेनोपवर्णितः। एताः वेश्याः प्रभुभिः, राजसेवकैः, नगरग्रामाधिकारिभिश्च पीड्यन्ते स्म। अनिच्छन्त्योऽपि एतैस्सह ताः सङ्गच्छन्ति स्म। कालक्रमेण यतः इयं वेश्यावृत्तिः नीचवृत्तिरूपेण परिगणिता, अतः एताः

---

20 14, 15 शताब्द्योः वेश्यानां गौरवं, प्रामुख्यं राजादरादिकं च अनेन भाणेन सम्यक् ज्ञातुं शक्यम्।

In Public domain. Digitization Muthulakshmi Research Academy

दिवा रक्षकभटेभ्यः भीताः भवन्ति स्म। दिवा ताः स्वेच्छया विटैस्सह सम्भाषितुमपि बिभ्यति स्म। रक्षकभटादिभयेन ताः स्वप्रियान् स्वमित्र-गृहेषु, जीर्णगृहेषु च मिलन्ति स्म। रहस्यतया[21] वेशवाट्यां दिवासम्भो-गोऽपि भवति स्म। परन्तु पुष्पिणी[22]समागमः सर्वथा निषिद्धः आसीत्। यदि विटः पुष्पिणीं बलात्कर्तुं यतते, तर्हि तस्मिन् राजपुरुषभीतिमुत्पाद्य, तं तस्मान्निवर्तयन्ति स्म।

11.7 क्रीडाविहाराः

वेशसंस्कृतौ क्रीडानां, विहाराणां च प्राधान्यमधिकम्। विटानाम् आ-कर्षणाय साधनभूताः एते क्रीडाविहाराः। एतादृक्क्रीडाविहारमिषयैव प्रा-चीनकाले विद्वांसः, पण्डिताश्च वेश्याः सङ्गच्छन्ति स्म। क्रीडामात्रैक-कार्यगोष्ठेः अनिन्द्यता कामसूत्रेषु (1-4-39) प्रतिपादिता खलु। काश्चन क्रीडाः शरीरसौष्ठवाय, काश्चन मनोविनोदाय चोपकुर्वन्ति। ताश्च क्रीडाः कामसूत्रेषु[23] (1-4-27, 28) वर्णिताः। परन्त्वेते क्रीडाविशेषाः भाणेषु न वर्णिताः। परन्तु तत्तुल्याः केचन वर्णिताः।

भाणेषु विशिष्टवर्णनविषयाः क्रीडाः अत्रोदाह्रियन्ते।

1. द्यूतक्रीडा – इदं द्यूतं प्राचीनकालादारभ्यैतावत् पर्यन्तं दुर्व्यसनतया निन्दितमपि वरीवर्ति। अत्यन्तं प्राचीनक्रीडाविशेष एवायम्। यतः ऋग्वेदे द्यूतकरविषाद इति सूक्तं समुपलभ्यते। भाणेषु तत्र तत्र द्यू-

---

21 धूर्तविटसंवादे इरिमवृत्तान्तः

22 वसन्ततिलके–पुष्पिणीति परित्याज्या किं माधवी मधुव्रतानामित्यारभ्य द्र०

23 सम्भूयक्रीडाः–तत्र माहिमान्यः–यक्षरात्रिः, कौमुदीजागरः, सुवसन्तकः। देश्याः – सहकारभञ्जिका, अभ्यूषखादिका, बिसखादिका, नवपत्रिका, उदकक्ष्वेडिका, पाञ्चालानुयानम्, शाल्मली, कदम्बयुद्धानि (जयमङ्गलायां)

In Public domain. Digitization Muthulakshmi Research Academy

तकृन्मिथुनवर्णनमुपलभ्यते[24]। धूर्तविटसंवादेऽपि[25] विटः स्वद्यूतासक्तिम् अशक्ततां च प्रकटयति।

2. चतुरङ्गः – एषापि क्रीडा भाणेषु[26] वर्णिता। गजरथाश्वपदातिरूपैः चतुर्भिरङ्गैः मन्त्रिणा च युक्तयोः द्वयोः राज्ञोः युद्ध एव क्रीडारूपः। तत्तद्बलानां प्रतीकभूतानि वस्तूनि उपयुज्य द्वाभ्यां एषा क्रीड्यते। तत्र प्रत्येकस्य बलस्य विशिष्टा गतिः। एषा च क्रीडा बुद्धिमद्भिरेव क्रीडितुं शक्या न सर्वैः।

3. कन्दुकक्रीडा – मुख्या क्रीडैषा। सर्वाः वेश्याः अस्यां निपुणाः। स्त्रीणां व्यायामार्थमत्यन्तमुपयुक्तैषा। अस्यां च बहवः भेदाः। मणिशिलानिर्मितकन्दुकस्य अविच्छिन्नतया करतलेन भूमौ घट्टनरूपेण क्रीडनं प्राचीनकाले[27] एव प्रसिद्धम्। वेश्याः सखीजनेन सह कन्दुकताडनक्रीडनं पणं विधाय क्रीडन्ति स्म। एकैकापि वेश्या अन्यामनपेक्ष्यैव क्रीडामेनां क्रीडितुं प्रभवतीति अन्यक्रीडापेक्षया अस्यां सौविध्यमधिकम्। मणिकन्दुकक्रीडनानि चित्राणीति वसन्ततिलके[28] वर्णितम्। अर्वाचीनेषु भाणेषु आधुनिक्यः, कन्दुकक्रीडाः अपि वर्णिताः। तत्रैतच्छतकीये सुन्दरेशशर्मरचिते शृ–

---

24 शृङ्गारसर्वस्वम्–नल्लाबुधस्य 87 श्लो.

25 नमोऽस्तु द्यूताय। एकशाटिकामात्राविशिष्टोहि नः परिच्छदः। अक्षाश्च नाम अनभिजातेश्वरा इव न सर्वकालसुमुखाः

26 शृङ्गारसर्वस्वम्–नल्लाबुधस्य (10 श्लो.)

27 पद्मप्राभृतके विटः प्रियङ्गुयष्टिकया इत्थं भाषते–वासु प्रियङ्गुयष्टिके किमिदं कन्दुकक्रीडाव्याजेन नृत्तकौशलं प्रत्यादिश्यते सखीजनस्य। सर्वथा नतोन्नतावर्तनोत्पतनापसर्पणप्रधावनचित्रप्रचारमनोहरं यदृच्छया खलु दृश्यमासादितमस्माभिः। एषा पूर्णं शतमिति व्यवस्थिता।

28 गोमूत्रिकासु कुरुते भुजगस्य लक्ष्मीं चक्राकृतिं भजति मण्डलकल्पनासु।
रेखाकृतिं वहति सम्प्रति वीथिकासु चित्राणि हन्त मणिकन्दुकचेष्टितानि॥

In Public domain. Digitization Muthulakshmi Research Academy

ङ्गारशेखरभाणेऽपि एषा[29] क्रीडा वर्णिता।

4. **डोलाविहारः** – धनवती वेश्या स्वप्रियेण सह उद्याने डोलामारोहति स्म। तस्याः भावं ज्ञात्वा तस्याः सख्यः डोलामान्दोलयन्ति स्म। सा चान्दोलनेन भीतेव नटन्ती प्रियं समाश्लेषेण सन्तोषयति स्म। एवं देश्याः विटानाकर्षन्ति स्म। एष च विहारः प्रायः भाणेषु वर्णितः[30]।

5. **मणिगुप्तकविहारः** – एकस्यां वीथ्यां वर्तमानाः विटाः वेश्याश्चैकत्र सम्भूय एतद्विहारं क्रीडन्ते स्म। वेश्याकुचसदृशपङ्क्तिभूतसैकतराशिषु एकस्मिन् कश्चित् काचित् वा मणिं गोपयति स्म। तस्मिन् समये निर्धारितः निर्धारिता वा अक्षिणी बध्नाति स्म। गोपनात्परं निमीलिताक्षेण निमीलिताक्ष्या वा यस्मिन् मणिर्गुप्ता, सा राशिरेव यदि प्रथमं ज्ञास्यते चेत्तस्य, तस्या वा जयः, नो चेत् पराजय इति व्यवस्था। पराजितः पराजिता वा पुनः अक्षिणी बध्नाति, पुनश्च मणिमन्वेषयति। एष च विहारः नल्लाबुधस्य शृङ्गारसर्वस्वे वर्णितः[31]।

6. **चक्षुरपिधानम्** –प्रथमं काचन निर्धारिता अक्षिणी बध्नाति। तदा अन्याः तत्र तत्र मन्दिरकोणेषु आत्मानं गोपयन्ति। बन्धान्मुक्तच–

---

29 अत्रकिल करकलितकन्दुकविद्राविण्यः कातराक्ष्यः–
आजानुलम्बिदृढबद्धदुकूलरम्याः आबाहुमूलकुचमात्रपटं दधानाः।
उल्लङ्घ्य पार्श्वमभिहत्य च कन्दुकानि क्रीडन्ति कन्दुकविहारमिहायताक्ष्यः॥

30 आल्या भावविदा कयाचन रयादान्दोलिते डोलिका
मञ्चे काञ्चनभीतिमञ्चितवतीमेनां चकोरेक्षणाम्।
पीनोत्तुङ्गकठोरसङ्गतकुचां वाचालमञ्जीरकां
श्लिष्यन्तीं परिरभ्य रूढपुलको धन्यो दरीदृश्यते॥ (पञ्चबाणविजये–श्रीरङ्गार्यस्य)

31 मत्तकाशिनीपयोधराकारतया परिकल्पितेषु पङ्क्तिभूतेषु सैकतराशिषु कुत्रचित्तद्विहारप्रवृत्तेन नरेण क्वचिद्गोपितो मणिः निमीलिताक्षेण तदन्येन येन समुद्ध्रियते तस्य जयः न चेत्पराजय इत्येवं सम्प्रदायो मणिगुप्तकस्य।

In Public domain. Digitization Muthulakshmi Research Academy

क्षुः सा प्रथमं यां सखीम् अन्वेषयति, तस्याश्चक्षुः पुनः पिधीयते। अन्ये पुनः तत्र तत्र निलीयन्ते। एषा च क्रीडा नल्लाबुधस्य शृङ्गा-रसर्वस्वे[32] वर्णिता।

7. **युग्मायुग्मदर्शनम्** – मौक्तिकानि मुष्टौ निधाय प्रतिद्वन्द्विनं अत्र मुष्टौ समसंख्याकानि मौक्तिकानि उतासमसंख्याकानीति पृच्छति। सः प्रतिद्वन्द्वी यदि सम्यगेव कथयति तर्हि तस्य जयः नो चेत् पराजय इति व्यवस्था। एतदपि शृङ्गाररसर्वस्वे[33] वर्णितम्।

8. **गजपतिकुसुमकन्दुकविहारः** – यूनां युवतीनां च समूहः द्विधा वि-भज्यते। ततः एक कुसुमकन्दुकः उपरिनिक्षिप्यते। सच कन्दुकः यस्य करे लग्नो भवति, तत्सूमूहवर्तिनः युवतीः, यूनश्च, द्विती-यसमूहान्तर्गताः यथासंख्यम् अश्वा इव निर्णीतदूरं यावत् पृष्टे व-हन्तः चरन्तीति व्यवस्था। एषापि क्रीडा शृङ्गाररसर्वस्वे[34] एव व-र्णिता। एषा च क्रीडा न तावत् प्रसिद्धा।

9. **अम्बरकरण्डकः** – द्वौ कन्दुकौ हस्तद्वये स्वीकृत्य उपरि निक्षिप्य व्यत्यासेन हस्ताभ्यां स्वीकरणं, पुनरुपरि निक्षेपणमित्यादिक्र-मेणैषा क्रीडा क्रीड्यते। एवं त्रयः चत्वारो वा कन्दुकाः हस्तद्वयेन उपर्युपरि क्रमेण निक्षिप्ताः। क्रमेण स्वीक्रियमाणाः, पुनः पुनः वि-

---

32 कस्याश्चिदायताक्ष्याः काचित्पिदधाति कामिनी नयने।
अन्यास्ततस्समन्तात् आलयकोणेषु लिप्यन्ते॥
पिहिताक्षी कामिनी मुक्तचक्षुः अपिधाना इतस्ततो विलीनाः सखीः अन्वेषयति।
तदा प्रथमं या लग्ना तस्याश्चक्षुः पिधीयते। अन्ये पुनर्निलीयन्ते॥

33 मुक्ताभिः परिपूरितां मुष्टिं प्रदर्श्य अत्रमुष्टौ युग्ममयुग्मं वा मौक्तिकमिति केनचिदनु-युक्तः प्रतिद्वन्द्वी युग्ममिति अयुग्ममिति वा प्रतिजानीते। अनन्तरं मौक्तिकानां विभजने परिशिष्यमाणं प्रतिज्ञानुसारेण सम्पत्स्यते चेत् प्रतिज्ञाकृतो जयः नोचेत् अपजय इति खलु युग्मायुग्मदर्शनाख्यविभ्रमलक्षणम्॥

34 यूनां युवतीनां च समूहे परस्परप्रतिस्पर्धितया व्यवस्थिते यत्समाजानुप्रविष्टस्य कस्यचिज्जनस्य हस्ते कन्दुको लगति, तदनुप्रविष्टा एव त्रिचतुरः प्रतिस्पर्धिसमाजा-न्तर्गतांस्त्रिचतुरानश्वानिचाधिरुह्य प्रतिवसन्तीति मर्यादा।

In Public domain. Digitization Muthulakshmi Research Academy

क्षिप्ताः आकाशे मण्डलमारचयन्ति। एतादृशो विहारः इदानीं सर्कस् मध्ये उपलभ्यते। शृङ्गारसर्वस्वे[35] एव एषापि क्रीडा वर्णिता।

10. पत्रविहारः–(Playing Cards) आधुनिकभाणेषु एषोऽपि वर्णितः। 304 (Three zero four) इत्याख्यः पत्रविहारः सुन्दरेशशर्मणः शृङ्गारशेखरभाणे[36] वर्णितः। एवं जलक्रीडा[37], पुष्पापचयादयः[38] विनोदाः वर्णिताः।

अथ प्राचीने भाणे पादताडितके कन्दुकपिञ्जोलाकृतकपुत्रकदुहितृकाक्रीडनानि इति बालक्रीडा अप्युल्लिखिताः। वेशवाट्यां बाल्यावस्थायां वर्तमानाः अर्भकाः कन्दुकैः पाञ्चालिकाभिश्च क्रीडन्ति स्म। प्रायशः बा–

---

35 कथमम्बरकरण्डकाख्यविभ्रमप्रवृत्तानां मत्तकाशिनीनां इह समवायः समुल्लसति। अत्र काचित्–

एकं करण्डकमुदस्यति दक्षिणेन
वामेन किञ्चिदितरत्करपल्लवेन।
व्यत्यासतो निपतिते करयोरुभेते
पर्यायतः पुनरुदस्यति पक्ष्मलाक्षी॥ (70)
एषा रत्नकरण्डयुग्ममुपरिप्रक्षिप्य दोर्लाघवा-
देकेनैव करेण तन्निपतितं गृह्णात्युदस्यत्यपि।
अन्येनापि करेण तावदनया रीत्यैव शातोदरी
सङ्गृह्णाति समुत्क्षिपत्यपि मणिप्रायं करण्डद्वयम्॥ (71)
आलोलकङ्कणझणज्झणनादभव्यसव्यापसव्यकरकारित ताण्डवानि।
चत्वार्यमूनि मणिखण्डकरण्डकानि कुर्वन्ति हन्त हृदि मे कमपि प्रहर्षम्। (72) शृङ्गारसर्वस्वभाणः

36 कथमिमाश्चतुरधिकं त्रिशतं (304) नाम पत्रविहारमभिविहरन्ति

37 नम्रोन्नम्रशिरः प्रतिक्षणपरिस्पष्टाननाम्बोरुहं
वल्गद्वल्गुपयोधराहतजलं पल्यूलयन्त्यः कचान्।
काश्चित्त द्विहापराश्च निमितश्रोणीदुकूलाञ्चला-
नाप्लावं सुदृशो मुहुः कृतपयश्चात्कारमातन्वते॥ (रससदनभाणः-33)

38 पादाग्रेण भुवंस्पृशन्त्युपरिगां शाखाशिखां तारवीं
ऊर्ध्वीभूतकठोरपीवरकुचं सङ्गृह्णती पाणिना।
पुष्पालोकनतात्परी परिचलन्नीलारविन्देक्षणा
पुष्पौघानपचिन्वती निदधते वासोऽञ्जले कुञ्चिते॥ (नावल्पाकं वेङ्कटाचार्यस्य कन्दर्पदर्पणे–158)

In Public domain. Digitization Muthulakshmi Research Academy

ल्यावस्थायां स्थितानां कन्दुकक्रीडा, पाञ्चलिकाविवाहः, पाञ्चालिकागृ-हनिर्माणम्, इत्यादय एव क्रीडाविशेषाः भवन्ति।

वात्स्यायनकामसूत्रव्याख्यायां जयमङ्गलायां एताः बालक्रीडाः वर्णिताः[39]। (1) आकर्षक्रीडा–पाशक्रीडा (2) पट्टिकाक्रीडा–ग्रथनम् (3) मुष्टिका-द्यूतं (युग्मायुग्मदर्शनं) (4)क्षुल्लकद्यूतम् (5) मध्यमाङ्गुलिग्रहणम् (6) षट्पावाणकं (7)क्ष्वेडितानि–अङ्गव्यायामाः (8)सुनिमीलितिका (च-क्षुरपिधानं) (9) कृष्णपलक्रीडा (10) लवणवीथिका (गजपतिकुसु-मकन्दुकविहारः) (11) अनिलताडितका (12) गोधूमपुंञ्जिका (13) अङ्गुलिताडितका (14) मण्डूकिका (15) एकपदिका इत्यादि। उपरि समुल्लिखितक्रीडासु काश्चन स्वदेशभाषाव्यवहारानुगुणं भाणेषु वर्णिता इव दृश्यन्ते। भाणेषु वर्णिताः क्रीडाविशेषाः केवलं वेशवाटीसम्बद्धा एवेति न-मन्तव्यम्। एताः लौकिकाश्च क्रीडाः यतः वेशवाट्यामपि क्रीड्यन्ते स्म अतः भाणेषु वर्णनमुपलभ्यते। अथ एतच्छताब्दीये सुन्दरेशशर्मणः शृ-ङ्गारशेखरभाणे आधुनिकविलासमन्दिर (Club dances) नृत्यानि व-र्णितानि। तत्र वाद्यमानानि आधुनिकवाद्यान्यपि हास्यभङ्ग्या समुपव-र्णितानि। पश्यत– किमत्र मन्दिरे मेषशिशुमेकः स्वांसे निधाय तत्पुच्छं चुम्बति। अयं च पन्नगमिव वक्षसि कुण्डलितं धरन् मुखे करोति। किमेते समवेषाणां दर्शनमात्रेण युवानो युवत्यश्च सरभसमायान्ति। किमेते वा-द्यविशेषाः।

एते षोडशमनुजाः वाद्यवरान्वादयन्ति किल विविधान्।
स्थायित्रये च क्लृप्तान् सुषिरघनांस्तथानद्धान्॥

[39] द्र० – का. सू. 3.3.8

 In Public domain. Digitization Muthulakshmi Research Academy

एवमेव तत्र जायमानं नृत्यादिकं इत्थमभिवर्णितम्–
कथं तरुण्यः तरुणान् गृहीत्वा करे नर्तनमारभन्ते।

उन्नम्य पाणिकमलं धृतमङ्गुलीभिः
चित्तेप्सितस्य तरुणस्य पुनः प्रगल्भाः।
वक्षोनिविष्ठकुचभारमिवानताङ्ग्यः
नृत्यन्ति तालसदृशं किल पङ्कजाक्ष्यः॥

कथमेताः सहनृत्यन्तं परित्यज्य ह्यन्येन पुनर्नर्तनमारभन्ते। इति।

एतादृशेषु विहारमन्दिरेषु कुलस्त्रिय एव निर्भीकास्सत्यः भागं गृह्णन्तीति च प्रतिपादयति कविरस्मिन् भाणे। एवं तात्कालिकसमाजसम्बद्धाः विषयाः प्रायशः भाणेषु अभिवर्णिताः। अतः भाणवाङ्मयं तात्कालिकसमाजस्यादर्शभूतमित्यत्र नातिशयोक्तिः।

In Public domain. Digitization Muthulakshmi Research Academy

अध्यायः 12

सामाजिकदुष्प्रवृत्तयः

साङ्घिकदुराचारान् वेश्यादुर्वृत्तं च बहिर्गतं कृत्वा, जनसामान्यस्य तेभ्यो निवृत्तौ प्रयतनमेव भाणवाङ्मयस्य मुख्यमुद्देश्यमिति पूर्वमेवोक्तम्। अस्मात् भाणानां निशितदृङ्गार्गात् आत्मानं संगोप्य विमर्शसरणिमनारूढः कोऽपि नास्ति। उन्नतकुलजानां, श्रेष्ठतया प्रथितानां च गूढदुश्चेष्टाः भाणेषु सम्यक् प्रकाशिताः। तेषु कानिचिदत्रोदाह्रियन्ते।

1. वृद्धाः – उत्तरार्धे वयसि प्रविष्टाः श्वेतकेशाः, जर्जरितसन्धिबन्धा अपि श्वेतकेशेषु कृष्णवर्णमञ्जनं सम्मर्द्य, लेपनादिकमुपयुज्य युवकीभूतास्सन्तः सङ्गमाय यतन्ते इति पद्मप्राभृतके वर्णितम्। तत्र पुराणनाटकविटं भाणनायको विट इत्थं परिहसति—भाव जरद्गव! सुभिक्षमनया जरया। हन्त युवैव भावः। सिद्धं हि ते मायया यौवनकर्म इति।
2. वृद्धाः वेश्याः अपि धनकामनया विटार्थं यतन्ते। तादृशीनां सुरतभीभत्सः पादताडितके वर्णितो हीत्थम्–

चुम्बनरक्तं सोऽस्या दशनं च्युतमूलमात्मनो वदने।
जिह्वामूलस्पृष्टं खादिति कृत्वा निरष्ठीवत्॥ इति।

In Public domain. Digitization Muthulakshmi Research Academy

3. परिव्राजिकाः – पुरा परिव्राजिकाः स्त्रियः स्वेच्छासञ्चारिण्यः विटैस्सह सङ्गच्छन्ति स्म। तादृशीष्वेका विलासकौण्डिन्याख्या परिव्राजिका पद्मप्राभृतके वर्णिता। तथाहि–

दृष्टिस्तेऽतिविशालचारुरुचिरा नैकत्र सन्तिष्ठते
क्लान्त्या कान्ततरं रतिश्रमयुतं शूनाधरोष्ठं मुखम् ।
आचष्टे सुरतोत्सवप्रकरणं खेदालसा ते गतिः
व्यक्तं ते कथितं प्रियेण सुभगे रत्यर्थवैशेषिकम् ॥ इति ।

4. षण्डाः – स्त्रीलक्षणयुताषण्डा अपि जानपदान् मोहयन्ति स्म। तादृशीष्वेका सुकुमारिका उभयाभिसारिकायां परिहासपात्रं कृता। अस्याः कुचौ सुरते व्याक्षेपरहितौ भवतः स्म। प्रतिमासं पुष्पवतीत्वबाधापि नास्ति। गर्भधारणमपिनास्तीति सौन्दर्यमस्याः सर्वदा अक्षीणमेव भवति। तस्मात् एतादृश्याः सुरतं यो नाङ्गीकरोति स रत्युत्सवानभिज्ञ एवेति व्यङ्ग्यमर्यादया तां परिहसति[1]।

5. दुष्टभागवताः – पुरा भागवतधर्मः बहुलप्रचारे आसीत्। भागवता नाम वैदिका एव। एतेऽत्यन्तनिष्ठया दैवकार्याण्याचरन्ति स्म। तस्मिन् समये एते परस्पर्शं परिहरन्ति स्म। एतेषु केचन दिवा भागवतवन्नटनं कुर्वन्तः रात्रौ रहस्यरूपेण वेश्याः सङ्गच्छन्ति स्म। एतादृशेषु दुष्टेषु कश्चन पवित्रकनामा भागवतम्मन्यः पद्मप्राभृतके परिहसितः। राजमार्गे एकस्यां वेदिकायाम् आसीनमार्द्रवस्त्रं परस्पर्शं परिहरन्निव शरीरमत्यन्तं सङ्कोच्य स्थित्वा जपं कुर्वन्निवा–

1 व्याक्षेपं कुरुतस्स्तनौ न सुरते गाढोपगूढस्य ते
रागघ्नस्तव मासि मासि सुभगे नैवार्तवस्यागमः ।
रूपश्रीनवयौवनोदयरिपुः गर्भोऽपि नैवास्ति ते
त्वामेवं सुगुणां विहास्यति स चेद्रत्युत्सवं त्यक्ष्यति ॥

भिनयन्तं दृष्ट्वा विटः– "हास्यः खल्वेष तपस्वी। यथा तावदयं मत्तकाशिन्याः दुहितरं वारुणिकां नाम बन्धकीमनु रक्त इति श्रूयते" इत्युक्त्वा तत्समीपमागत्य तेन सहेत्थं भाषते– अङ्गो पवित्रक! किमिदमुष्णस्थलीकूर्मलीलया स्थीयते। अङ्गो! अविज्ञात जन–संस्पर्शो नाम परिह्रियते भवता। वारुणीजघनपात्रं जाह्नवीतीर्थमिव परमपवित्रं ननु" इति।

6. **कवयः** – कवयः स्वकाव्यान् मद्यार्थं विक्रीणन्ति स्म। पादताडितके आर्यरक्षितस्य दुर्वृत्तमत्रोदाहरणम्[2]। आधुनिकाः कविम्मन्याः कविजनमण्डनभाणे सम्यक् विमृष्टाः।

7. **बौद्धभिक्षुकाः** – केचन दुष्टाः बौद्धभिक्षुकाः काषायाम्बरधारिणः बुद्धवचनोपदेशव्याजेन वेश्यागृहाणि प्रविश्य ताः अनुभवन्ति स्म। तादृशेषु कश्चन सङ्घिलकोनाम बौद्धभिक्षुः पद्मप्राभृतके इत्थं परिहसितः। स एष धर्मारण्यनिवासी सङ्घिलको नाम दुष्टशाक्यभिक्षुः। मम वाक्शरगोचरोऽक्षतो न यास्यति। अभिभाषिष्ये तावत्– "विहार बेताल क्वेदानीमुलूक इव दिवाशङ्कितश्चरसि। क्वेदानीं वेशवीथी दीर्घिकागतो बक इव शङ्कितश्चरसि। ननु सुरतपिण्डपातमनुष्ठीयते" इति।

8. **वैद्याः** – रुग्णायाः वनितायाः सर्वाण्यङ्गानि औषधपायनमिषया वैद्याः स्पृशन्ति स्म। तादृशेष्वेकः भिषगैशानचन्द्रिहरिश्चन्द्रः पादताडितके परिहसितः[3]।

---

2 विक्रीणन्ति हि कवयो यद्येवं काव्यमद्य चषकेण।
काशिषु च कोसलेषु च गर्गेषु निषादनगरेषु ॥

3 धून्वन्त्याः करपल्लवं वलयिनं घ्नन्त्याः पदा कुट्टिमं
बिभ्रत्याश्च्युतमंशुकं सरशनं नाभेरधः पाणिना।
तस्या दीर्घतरीकृताक्षमपिबः केशग्रहैराननं
बाला त्वद्दशनच्छदौषधमलं सा वा त्वया पायिता ॥

In Public domain. Digitization Muthulakshmi Research Academy

9. **लाटडिण्डिनमाः**– एते दिगम्बरास्सन्तः स्नान्ति स्म। स्ववस्त्राणि प्रक्षालयन्ति स्म। केशप्रसाधनं न कुर्वन्ति स्म। पादप्रक्षालनं विहायैव शेरते स्म। मार्गे गच्छन्त एव सर्वं भक्षयन्ति स्म। जीर्णवस्त्राणि धारयन्ति स्म। छिद्रप्रहारित्वमेतेषां नैजम् पुष्पिणी समागमश्च। तस्मात् एते पिशाचा एवेति उक्तं पादताडितके[4]।

10. **दुष्टविटाः** – पुरा महापण्डितमारभ्य नागरिकपर्यन्तं सर्वेऽपि विटा एव। विटत्वं च न तदा दुंष्टमिव पर्यगण्यत। परन्तु पादताडितकरचनासमयादारभ्य तेषु विटेष्वपि नीचता समागता। यतोऽस्मिन् भाणे विटास्सर्वेऽपि अकृत्यकरणेनैव विटनामभाजः सम्पन्नाः। तत्रैकः[5] पितृमरणात्परं पञ्चस्वपि रात्रिषु अनतीतेषु बन्धुवर्गे शोकाकुले सति, रुदन्तं बालकमाधाय दूत्या सह मद्यमपिबत्। एतादृशाः दुष्टाः अनेकेऽत्र भाणे वर्णिताः।

11. **पौराणिकाः** – पौराणिकानां दुर्वृत्तं बहुषु भाणेषु वर्णितम्। एते[6] स्वाङ्गवस्त्रे एव पुराणकोशं बद्ध्वा नयन्ति स्म। विधवाः[7] रहस्यतया सङ्गच्छन्ति स्म। बालविधवाकर्षण[8] नैपुण्यमेतेषामसाधारणम्। धनिकानां गृहेषु पुरोहितास्सन्तः एते तद्गृहिणीः एव अनुभवन्ति स्म।

---

4 अहो लाटडिण्डिनो नामैते नातिभिन्नाः पिशाचेभ्यः। कुतः सर्वोऽपि लाटः–
नग्नःस्नाति महाजनेऽम्भसि सदा नेनेक्ति वासः स्वयं
केशानाकुलयत्यधौतचरणः शय्यां समाक्रामति।
यत्तद्भक्षयति व्रजन्नपि पथा धत्ते पटं पाटितं
च्छिद्रेणापि सकृत्प्रहृत्य सहसा लाटश्चिरं कत्थते ॥

5 ताते पञ्चत्वं पञ्चरात्रे प्रयाते मित्रेष्वार्तेषु व्याकुले बन्धुवर्गे।
एकं क्रोशन्तं बालमाधाय पुत्रं दास्या सार्धं पीतवानस्मि मद्यम् ॥

6 शङ्करकवेः शारदातिलके वर्णितम्।

7 पञ्चबाणभाणे (श्लेषभाणे) कलकण्ठवृत्तान्ते।

8 तथा तथा पठति पुराणं तथा तथा वक्ष्यत्यर्थानपि।
तथा तथा प्रेक्षते कितवो यथा यथा रज्यन्ते बालविधवाः ॥

In Public domain. Digitization Muthulakshmi Research Academy

12. दुष्टपुरोहिताः – यौवनं सर्वं दुष्टव्यसनेषु यापयित्वा, वार्धक्ये ब्राह्मणत्वेन हेतुना दर्भान् पञ्चाङ्गादिकं च गृहीत्वा वेशवाट्यां पौरोहित्यमाचरन्ति स्म। तादृशेष्वेकः मुकुन्दानन्दे एवं निन्दितः।

पञ्चाङ्गमञ्चितकुशेन करेण धृत्वा
पङ्क्तिः प्रमृज्य किल पत्ररसेन भूयः।
आवर्तयन्नसकृदक्षरमेकमेकं
तारादि वाचयति यत्पुनरन्यदन्यत् ॥

13. वलयविक्रयिणः – एते कम्बलं प्रसाध्य, तत्रस्त्रियः उपावेश्य, वलय धारणमिषया ताभिस्सह दुर्व्यवहारं कुर्वन्ति स्म। वलय धारणानन्तरं तस्याः हस्तद्वयमपि स्वहस्ताभ्यां स्वीकृत्यान्ते तस्याः शिरसि हस्तं निक्षिप्यैते आशीरपि प्रयच्छन्ति स्म[9]।

14. ब्रह्मचारिणः – दुष्टब्रह्मचर्यं नटन्तः स्वाध्यापकगृहेषु स्वेच्छया चरन्तः गुरूणां दारान् सुताश्च गूढतया सङ्गच्छन्तः दुष्टविद्यार्थिनः रामभद्रदीक्षितेन शृङ्गारतिलके वर्णिताः।

15. सूचीकराः (Tailors) – मुग्धस्त्रियः कञ्चुककरणाय मानस्वीकरणमिषेणैते आलिङ्गन्ति[10] स्म।

16. शाकटिकाः – अश्वशकटे वा, वृषभशकटे वा स्त्रियःसमारोप्य, तच्चालकाः शकटस्य पश्चाद्भागे भारोऽधिकस्सञ्जात इति मिषया ताः पुरः पुरः आनाय्य स्वयञ्च चालनमिषया पश्चात् पश्चाद्गच्छन्तः ताः स्पृशन्तः समानन्दयन्ति[11] स्मात्मानम्।

---

9 नल्लाबुधस्य शृङ्गारसर्वस्वे वर्णितम्।

10 मुग्धांगनामुपेतां कञ्चुककरणाय मानदम्भेन।
सूचीकरः कुलस्त्रियमालिङ्गत्यद्य किं तरुणः ॥ –शृङ्गारशेखरभाणः–सुन्दरेशशर्मणः।

11 भारस्यायं समकृतिमिषादावहन् पार्श्वभागे
साध्वीमूरुं करिकरसमं जानुनि स्वस्य कृत्वा।
वक्षोजाग्रं स्पृशति सततं बाहुपृष्ठेन धृष्टो

In Public domain. Digitization Muthulakshmi Research Academy

17. **कामुकपुरुषाः** – अस्माकं स्वातन्त्र्यप्राप्तेरनन्तरं सर्वकारेण बहुभार्यात्वस्य निषेधात् बह्व्यः स्त्रियः उद्वोढुमसमर्थाः कामुकपुरुषाः पाणिगृहीतीनां कृते त्यागपत्रं दातुं प्रयतन्ते इति एतच्छतकीये पुरुषपुङ्गवभाणे वर्णितम्।

18. **कुलस्त्रियः** – कुलस्त्रीणां दौष्ट्यं, गूढतया तासां परपुरुषसम्भोगादिकञ्च बहुषु भाणेषु वर्णितम्। एतादृशाः, स्त्रियः दिवा कार्ये सत्यपि बहिर्नागच्छन्ति स्म[12]। गृहे पतिव्रतानटनं कुर्वन्ति स्म। गुरून् श्वश्वादीन् च पूजयन्ति स्म। भर्ता यथा स्वस्मिन् विश्वसिति तथा कृत्वा रात्रौ विटैस्सह सङ्गच्छन्ति स्म। एतादृशं दुर्वृत्तं[13] अन्ये कुलस्त्रियः यद्यपि जानन्ति अथापि न बहिष्कुर्वन्ति स्म। तत्र च कारणं स्वरहस्यबहिर्भवनभीतिरेव। एवं कुलस्त्रियः परस्परं स्वदुर्वृत्तं गोपयन्ति स्म। काश्चन स्त्रियः पुरोहितैः भृत्यैश्च सङ्गच्छन्ति स्म। गुर्जरीणां[14] अयमाचार इति मुकुन्दानन्दे वर्णितमपि।

अस्मिन्काले स्त्रीषु (क्लब्) विलासमन्दिरगमनरूपो दुरभ्यासोऽस्ति। गृहे कार्ये महति सत्यपि, अपत्येषु सत्स्वपि, विहाय क्लब् गत्वा तत्र क्रीडासक्ताः स्त्रियः शृङ्गारशेखरभाणे सुन्दरेशशर्मरचिते सम्यक् परिहसिताः। तादृशवनितया क्रियमाणं सम्भाषणं हृद्यम्। क्लब समीपमागतो विटः एवं कथयति। "इयमत्र मम प्रियसखस्य विहारशेखरस्य पूर्वजा मदनमञ्जरी।

वाहं वेगादिव स तु तुदन् सारथिः शाकटस्य ॥ –शृङ्गारशेखरः–सुन्दरेशस्य।

12 कार्ये सत्यपि जातु याति न वहिर्नाप्यन्यमालोकते
साध्वीरप्यनुकुर्वती गुरुजनं श्वश्रूं च शुश्रूषते।
विस्रम्भं कुरुते च पत्युरधिकं प्राप्ते निशीथे पुनः
निद्राणे निजभर्तृवन्धुनिवहे निर्याति रन्तुं विटैः ॥ (मुकुन्दानन्दे 46)

13 सुचरितमीदृशमखिलं सर्वे जानन्ति सर्वेषाम् ।
न तु परिवदन्ति निपुणाः स्फुटतरमेते परस्परत्रासात् ॥ मुकुन्दानन्दे–64

14 गुर्जरीणां कुलाचारक्रमोऽयं यद्गृहे गृहे।
पौराणिकः पुरोधा वा भृत्यो वा गूढवल्लभः ॥ मुकुन्दानन्दे–84

In Public domain. Digitization Muthulakshmi Research Academy

कथं सप्ताष्टाप्यपत्यानि परित्यज्य कन्दुकप्रेषणी हस्ता परिक्रीडति। भाषिष्ये तावदेनाम्–"अयि मदनमञ्जरि! शोभसे नितरां कन्दुकप्रेषणीहस्ता तदुचितप्रसाधनेन च। भवतु। मृतानि किन्तेऽपत्यानि येन त्वं निर्विशङ्कं चिरं परिक्रीडसे। किम्ब्रवीषि – न मृतानि। मासद्वयात्प्रागपि शिशुरेकः कुटुम्बगणनायामधिकतामातनोत् इति। कथं तमपि परित्यज्यायातासि? किं ब्रवीषि——भर्तेति नाम्ना किमर्थमेकः समभिवर्तते इति। उचितासि नागरिकामण्डलाधिपत्यस्य" वा। इति। एवं बालाविधवानां[15] दुर्वृत्तं[16], जामातृणां[17] सन्यासिनां[18] वैष्णवस्मार्तजङ्गमादीनां च दुर्वृत्तं, श्वश्रूणां स्नुषाबाधनादिकं बहुषु भाणेषु वर्णितमित्यलमतिविस्तरेण।

---

15 कोशातकीफलमलं कुशलाय भूयात्
आमूलचूडविपुलं मृदुलं सुदीर्घम्।
आमृश्य वामचरणेन दुरक्षराणि
वैधानि येन विधवाः सुखिताः क्रियन्ते॥ (शृङ्गारमञ्जरी–विश्वनाथः)

16 गोपाललीलार्णवे–उटके गोविन्दस्य

17 घनश्यामस्य मदनसञ्जीवने

18 श्रीनिवासाचार्यस्य रसिकरञ्जने।

In Public domain. Digitization Muthulakshmi Research Academy

परिशिष्टम्

In Public domain. Digitization Muthulakshmi Research Academy

परिशिष्टम्–अ

लोकोक्तयः – सूक्तयः – विशिष्टव्यावहारिकाश्च

1. अक्षाश्च नामानभिजातेश्वरा इव न सर्वकालसुमुखा भवन्ति। (धूर्तविटसं)
2. अङ्कोलबीजस्येव दर्शनमपूर्वं किल भवतः (मदनसं–घनश्यामः)
3. अङ्गणस्थितायाः मल्लिकायाः सौरभ्यं नास्तीति जगत्प्रसिद्धिः (रससद्नं – युवराजः)
4. अङ्गीकारवचः पराम्बुजदृशां केन श्रुतं कथ्यताम् (मुकुन्दानन्दः)
5. अचिन्तनीया हि कालगतिः।
6. अतिगाढो विरोधो न केनापि निवार्यते (शृ.शेखर–अभि–कालिदासः)
7. अति चिरस्थायी किल वैरानुबन्धः स्थावराणामपि (वसन्ततिलकं)
8. अत्यन्तपरिशीलनात् विशिष्टवस्तुन्यपि क्रमेणावज्ञा भवति (रसस–युवराजः)
9. अत्यायतं छिद्यते (पद्मप्राभृतकं)
10. अथवा कुलाङ्गनेत्येवं न विश्वसनीया स्त्रीजातिः (शृं. तिलकं रामभद्र)
11. अथवा दुर्विचार्यं किल नारीधैर्यम् (रसिकरञ्ज–श्रीनिवासाचार्य)

In Public domain. Digitization Muthulakshmi Research Academy

12. अथवा लज्जा नाम विलासयौतकं प्रमदाजनस्य, विशेषतश्चाप्रौ-ढकामिनीनाम् (पद्मप्राभृतकं)
13. अथवा शम्बूकजातिरपि किं न प्रसूते मुक्ताफलं शुक्तिः (वसन्त-तिलकं)
14. अनपहासक्षममेतत् राजयौतकम् (पद्मप्राभृतकम्)
15. अनभिमतसपत्नीसमृद्धिः दुस्सहा किल कुलाङ्गनानाम् (पञ्चबाण)
16. अनवरतजडाशयपरिचयादेव नूनमेषां श्रोत्रियाणां प्रतिदिनमतिशे-तेमतिजाड्यम्। (मुकुन्दानन्द)
17. अनागतसुखाशया प्रत्युपस्थितसुखत्यागो न पुरुषार्थः (पद्मप्रा-भृतकं)
18. अनुचितं चारभ्य मध्ये विरमणम् (रससदन-युवराजः)
19. अनुवृत्तिर्हि कामे मूलम् (धूर्तविटसंवादः)
20. अन्यद्धि शास्त्रमन्यथा पुरुषप्रकृतिः (पादताडितकं)
21. अन्यस्त्रीगोत्रग्रहणं हि महानुपप्लवः कामुकानाम्।
22. अन्यस्सम्पादयति अन्योऽनुभवति (कन्दर्पदर्प.-ना.वेङ्कटा.)
23. अन्यार्थसिद्धये सद्भिः क्वचिद्गन्तव्यमध्वना।
नीचैरप्ययते नार्धिं परार्थव्यसनी जनः ।। (रतिकर)
24. अन्यः पापं कुरुते अन्यः फलं भुङ्क्ते (कन्दर्पदर्प-ना.वेङ्कटा.)
25. अपि गुरुमपि दैवं वा न विजानाति स्वसन्निधिं प्राप्तम्।
न गणयति तृट्क्षुधौ वा प्रसभं क्रीडापिशाचिकाविष्टः ।। (मदन-मञ्जरी - वेङ्कटेश)
26. अपि त्वार्तानुपातानि प्रायश्चित्तानि (पादताडितकं)
27. अपि नाम पराशयज्ञत्वं सुलभम्। मूर्खास्तु सर्वज्ञतामभिनयन्ति। (पञ्चबाणभाणः)

In Public domain. Digitization Muthulakshmi Research Academy

28. अपि शक्नोषि कालभुजङ्गफणान्मणिमादातुम् (शृ. तिलक. – रामभद्र)
29. अपुमान् शब्दकामः (पादताडितकं)
30. अभ्यास एव पाटवमुदञ्चयत्यखिलकार्येषु (शृ. तर. – श्रीनि.)
31. अमृतास्वादने कस्य सन्तृप्तिरुपजायते (शृ. सुधा.– ईश्वर.)
32. अमृदङ्गो नाटकाङ्कः संवृत्तः (पद्मप्रा.)
33. अयन्तु तपस्विलोकः पिपीलिकाधर्मो अन्योन्यानुचरितानुगामी (धूर्तविट.)
34. अयं खलु अयस्कान्तवाटिकायां सूचीविक्रयः। यतो मयित्वं प्रागल्भ्यं दर्शयसि। (शृ. शेखर–अभि.का. ; वसन्ततिलकं)
35. अयं खलु भवान्नद्यां तीर्णायां नाविकमवनमयति (शृ. भू. – वामन.)
36. अर्थस्य त्रय एव विधयः दानमुपभोगो निधानमिति (धूर्तविट.)
37. अवगणितमवद्यैर्दर्दुरैरप्ययाप्यं किमनणकमृणालं राजहंसाः त्यजन्ति (रससद – युवराजः)
38. अविचिन्त्य फलं वल्ल्याः त्वया पुष्पवधः कृतः (पादताडित)
39. अविज्ञातप्रमेयस्वरूपस्य रसं न पुष्णाति विस्तरतः (रससद – युव.)
40. अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्कर इति सत्यमेव संवृत्तम् (मुकुन्दा)
41. अश्वत्थपुष्पस्यैव दर्शनमपूर्वं किल भवत्याः (मदनसं – घमश्याम)
42. असङ्गृहीतमाषस्य वेशप्रवेशो निरायुधस्य सङ्ग्रामावतरणम् (पादता)
43. अहो! पुनर्विधिरपि पुनर्व्याहतमेव व्याहन्तुमीक्षते। (शृ. तिलक.)
44. अहो! वनिताजनानामितरवनिताप्रशंसनमतिदुस्सहमेव (रसस –

In Public domain. Digitization Muthulakshmi Research Academy

युवराज)

45. अहो! वितस्तिमात्रस्योदरस्य पूरणाय किं किं न कुर्वन्ति जन्तवः (रसस – युव)

46. आकाशकुशेशयसहचरोऽयमार्यस्य व्यवहारः (शृ. सु.)

47. आधुनिकानां जनानां स्वभावः खल्वियं यत्स्वदोषमपह्नुत्यापि परदोष मालोक्य परिहासः।

48. आपत्कालसहृत्सुहृत्खलु सखे दुर्हृत् च संपत्सृहृत् (शृ. ति. भा.)

49. आरुह्यते वा सहकारवृक्षः किं नैकमूलेन लताद्वयेन। (पद्मप्रा.)

50. आर्त्यै नूनमभाग्यानाम् आयुर्द्राघीयतीश्वरः।

51. आलमल्लकमात्रावशेषी कृतो भवानेतावदपि सम्पादयितुं प्रभवति (पञ्चबाणभाणः – रङ्गाचार्यः)

52. आलयघण्टामणिनाशेऽप्यर्चकस्य का हानिः (शृं. स–नल्ला)

53. आलेख्ययक्ष इव दर्शनमात्ररम्यः (पादताडितकम्)

54. आशास्यमानमेव वस्तु स्वयमुपतिष्ठते (रससदन – युवराजः)

55. आशीविशेषु मणयः कुणपाशनेषु
वेदाक्षराणि कुनरेषु यथैव सम्पत्।
तद्वद्द्विजातिषु कुजातिषु पूर्वपुण्य–
सङ्केततः क्वचन चन्द्रकलाविरास्ते।। (पञ्च. बा. भा–भट्टिवे.)

56. आहोस्वित् काम्यमानं कामयन्ते स्त्रियः।

57. इक्षुरामूलचूलं (डं) न स्वादु (पञ्चबाण–रङ्गा.)

58. इदमिदानीमभुक्तलिप्सायां भुक्तवतो मोदकलिप्सा (रससद – युव.)

59. इदं खलु भवता समुद्राभ्युक्षणं क्रियते यद्वागीश्वरं वाग्भिरर्चयति (प.प्राभृ.)

60. इदं खलु वर्षर्तुज्योत्स्नादर्शनम् (प. प्राभृ.)

In Public domain. Digitization Muthulakshmi Research Academy

61. इष्टार्थसिद्धये पूर्वं कुर्वन्ति शपथान् बहून्।
सिद्धेपुनर्विचेष्टन्ते विपरीतं हि योषितः ॥
62. उचितं खलु पितुः तनयस्य सदनानुवर्तनम् (मुकुन्दा.)
63. उदकतैलबिन्दुरीत्त्या विकसितं यशः (पादता.)
64. उभयोर्गूढमन्योन्यं वदतोर्यो नरोऽन्तिकम्।
विनाकारणमभ्येति तं द्विपादं पशुं विदुः ॥
65. एकत्रैकं भवति सुलभं तद्वदन्यत्र चान्यत् (मुकुन्दा.)
66. एकाक्षपातमात्रेण धनदस्यापि विभवहरणसमर्थो द्यूतः (उभयाभिसारिका)
67. एकः स्वादु न भुञ्जीत (पञ्चबाणवि-रङ्गा.)
68. एतदेव रन्ध्रं व्याजीकृत्य कृत्यशेषं निर्वाहयिष्यामीति किमप्यालोचयन् स्थितः (रसिकर. - श्रीनिवासः)
69. कथं प्रथमत एव एकब्राह्मणदर्शनम् (रसिकर. - श्रीनिवासः)
70. कथं वराहमारुह्य पुरीषं निरोद्धव्यम् (मुकुन्दानन्द)
71. कदाचिद्विशदमतयोऽपि भ्रमन्ति खलु घण्टापथेषु (वसन्तति.)
72. कनकस्य सौरभं जातम् (शृ. भूषण. - वामन)
73. कन्दुकमपि कापुरुषं करतललग्नं न ताडयेत्का वा (मुकुन्दा.)
74. कर्णे स्पृष्टे कटिं चालयति (पञ्च.बा.भा. - भट्टि.)
75. कष्टमापोशनसलिले एव शिलाघट्टेन।
76. कष्टं नाम कामिनीनां पतिगृहवासपातकम्
77. कष्टं प्रायशोऽबलाजनानां पराधीनवृत्तिर्विशेषतः स्नुषायाः (रसिकर. - श्रीनिवास)
78. कष्टं भोः! कोकिला खलु कौशिकमनुवर्तते (पादता.)
79. कस्य नेष्टवस्तुभ्रमः तत्समदर्शनेऽस्ति (शृ. सु. - ईश्वर.)

In Public domain. Digitization Muthulakshmi Research Academy

80. कस्य वा गच्छतः स्खलनं न भवति (शृ. भूषण. - वामन)
81. काकोऽपि रटतु घटीयन्त्रमपि प्रवर्तताम् (शृ. भूषण. - वामन.)
82. कागतिर्मदनमालिनीं विना मधुपानाम् (शृ. त. - श्रीनिवास)
83. काचे सन्निहिते सति हि काञ्चनं काञ्चनप्रौढिमाढौकते (पञ्चबाणवि. - रङ्गाचार्य)
84. का जानती निजनिपीडनमुत्सहेत (रसस. - युवराज.)
85. कान्तापरिभवो हि दुर्विषहो मानिनः कामिनः (पञ्चबाणवि.)
86. कामाभिभूतः परसेवकश्च धनाभिमान्यश्रुतकाव्यगन्धः।
हास्योत्तरश्चान्यगुणासहिष्णुर्न तत्र वाचं प्रवदेद्विपश्चित्।। (पञ्च. बा. भा. - भट्टि)
87. कामुकानां मनःप्रवृत्तौ न जातिविशेषविचारः
88. कार्यसाधनायानुचितमपि कदाचित्कर्तव्यं भवति (रसस-युव)
89. कार्यार्थिनामभिगम्य दर्शनं तस्य स्वस्मिन्नुन्निद्रता च कार्यसिद्धेर्लक्षणम् (रसस. - युव.)
90. कार्यार्थिनः कुतो गर्वः (सरस.कुला.रामचन्द्र)
91. कितवेष्वपि नाम कैतवमारभ्यते (पद्मप्रा.)
92. किमत्र चित्रं यदाचार्यस्य गुणो न शिष्यस्य? (शृ. भूषण. - वामन)
93. किमिति त्वया दिवादीपप्रज्वालनं क्रियते (पद्मप्रा.)
94. किमिति पयःपानाय पादसंवाहनं करोषि (पञ्चबाणवि. रङ्गा.)
95. किमिति पाठीनशिशुं सलिलस्तम्भमध्यापयसि (शृ. त. - श्रीनि)
96. किमिदमाकाशरोमन्थनं क्रियते (पद्म.प्राभृ.)
97. किमिदमुष्णस्थलीकूर्मलीलया स्थीयते (पद्म.प्रा.)
98. किमिदानीमापणनारिकेलमध्वविनायकाय प्रयच्छसि (शृ. सर्व. नल्ला.)
99. किमिदं गोपालकुले तक्रविक्रयः क्रियते (पद्म. प्रा.)

In Public domain. Digitization Muthulakshmi Research Academy

100. किमिदं नष्टगोयूथ इव गोपालको नवपदान्यन्वेषसे (पद्म.प्रा.)
101. किमेतदपि परीक्षणीयं कलकण्ठात्कलकण्ठी विशिष्यते (शृ. तर. – श्रीनि.)
102. किं खलु सर्वा एव दृषदः सूचीं कर्षन्ति (शृ. तर. श्रीनि.)
103. किं चातकश्चिरतरं तृषितोऽपि धारां पायोधरीं परिविधूय पिबेत्त-दन्याम् (पञ्चबा.वि. – रङ्गा.)
104. किं जन्मभवनमाहात्म्यं सोदरे एव दर्शयसि (शृ. शे. सुन्द.)
105. किं नाम वस्तु किञ्चिदभिमर्शमात्रेण स्वीयं भवति दृश्यते (शृ. सर्व. नल्ला.)
106. किं वसन्तमासो न पुष्पोपहारमर्हति (पद्मप्रा.)
107. कुञ्जरमारुह्य किमिति कुटिलद्वारपथेन गन्तव्यम् (मुकुन्दा.)
108. कुटिलेषु कौटिल्यमेव कर्तव्यमन्यथा ते मर्मभेदं करिष्यन्ति (अ-नङ्गजी. – कोच्चुण्णि.)
109. कुतो मां सफाणितक्षीरपानाय सपादग्राहं प्रार्थयसि (कन्दर्प.– वे-ङ्कटा.)
110. कुतः क्षते क्षिपसि क्षारम् (पञ्चबा. भा. – भट्टि)
111. कुमुदाननवबोधयन् दिवाचन्द्रलीलयातिक्रामति (पद्मप्रा.)
112. कुम्भदासीकृतकरुदितं दुश्चिकित्सम् (धूर्तविट.)
113. कुलुत्थयूषर्थिनः कुतो मन्दुरातुरगाधिकारः (मुकुन्दा.)
114. कुशलासि खलु कुबेरमपि कौपीनमपि परिधापयितुम् (वसन्तति.)
115. कुशलः किल दिगम्बरमपि नग्नयितुं वेश्याजनः (मदनसं. – घन-श्यामः)
116. कृतघ्नता सर्वपापीयसी।
117. कृशा विवर्णा परिपाण्डुनिष्प्रभा प्रभातदोषोपहतेव चन्द्रिका (प-

In Public domain. Digitization Muthulakshmi Research Academy

द्मप्रा.)

118. कैकसेयसीतान्यायः (रसिकर – श्रीनिवासः)

119. कोटरमनुज्वलता नितान्तं दावनलेन वटवृक्ष इवास्मि तान्तः (शृ. सुन्दर. – ईश्वर.)

120. को नाम जनस्स्वकरतलसंलग्नमधुधारामनास्वाद्य संजहाति (शृ. सुधा. – रामचन्द्र.)

121. कोरकिता कल्पलता सौरभ्यं पुष्पितेव पुष्यति हि (शृ. सुन्द. ईश्वर.)

122. को वा करतलकलितां रत्नमालिकामुपेक्षितुमुत्सहते (शृ.सुधा.रामचन्द्र)

123. को वा करतलगतं माणिक्यं मुञ्चेत (वसन्तति.)

124. को वा कुशलस्स्वकरतलकलितलाङ्गलाग्रविलसितां सेवधिमव–धीरयति (शृ. सुधा. – रामचन्द्र.)

125. को वा प्रांदुर्भावसमय एव नवनीतस्य भग्नवान् दधिस्थालीम्। (शृ. ति. – रामभद्र.)

126. कः प्रभवति कालभुजङ्गीमुखे पतितुम् (शृ. ति. – रामभद्र.)

127. क्वनु सुखं विधिविप्लुतस्य (अनङ्गति. – रङ्गनाथ.)

128. क्वेदानीं वेशवीथीदीर्घिकागतो बक इव शङ्कितश्चरसि (पद्मप्रा.)

129. क्षिप्तः कदर्थयित्वा हेमन्ते तालवृन्त इव (पद्मप्रा.)

130. खदिरतरुमात्मगुप्ता पटोलवल्ली समाश्रिता निम्बम् (पादता.)

131. खरकिरणसन्तापितोऽपि शिशिरकरकलामालोकते न किं कुमु–दाकरः (मुकुन्दानन्द.)

132. गगनकुसुमेन प्रसाधनीयमारभसे (शृ. सुन्द. – ईश्वर.)

133. गन्त्रीं छायां परित्यज्य गामिनीच्छायैवानुरुद्धा भवता (कमलावि. – नारायण.)

134. गरलानन्तरोत्पन्नसुधाभासङ्गतिस्त्वयम् (सरसकवि – रामचन्द्र.)

In Public domain. Digitization Muthulakshmi Research Academy

135. गाढाश्लेषः परमसुहृदां कोऽपि सर्वातिरिक्तः (रसस – युव.)
136. गुणवान् खलु गुणवतां सन्निकर्षः।
137. गुणाभिरामा अपि केचिदर्थाः प्रायेण केषाञ्चन सन्त्यनिष्टाः (श्रृ. सुन्दर. – ईश्वर.)
138. गुरुरात्मवतां शास्ता शास्ता राजा दुरात्मनाम्।
इह प्रच्छन्नपापानां शास्ता वैवस्वतो यमः ।। (पञ्चबाणभाणः – भट्टि.)
139. गृहीतमप्यौषधमपथ्ये पर्यवसितम् (पञ्चबाणभाणः–भट्टि)
140. गौरं सर्वं कुवलयदृशो मन्यते क्षीरमेव (कन्दर्प. – वेङ्कटाचार्यः)
141. छणसूत्रस्य पवित्रकमित्यभिधानवत् (पञ्चबाणभा. – भट्टि)
142. छत्रेण चन्द्रातप इव प्रतिषिध्यते (पद्मप्रा.)
143. जरद्भुजङ्ग इव जरात्वचमुत्सृजामि (पद्मप्रा.)
144. जाराणां चोरः किल मुख्यः (मुकुन्दा.)
145. तज्जामातृपदाङ्कितो न कुरुते किं नाम दुश्चेष्टितम् (मुकुन्दा.)
146. तत्प्रायेण भुजङ्गजातिवात्सल्यात् केनचिद्दर्वीकरेण पथि तिर्यग्गतेन भवितव्यम् (पञ्चबाणभाणः–भट्टि)
147. तत्सम्प्रदायस्थाः सर्वेऽपि कुटुम्बकवयः (पञ्चबाणभा. – भट्टि)
148. तदात्वमेवावेक्षितं नायतिकम् (पद्मप्रा.)
149. तदात्वायत्योः तदात्वमेव गरीयः प्रत्यक्षफलत्वात् (धूर्तविट.)
150. तन्न हि प्रसजति क्षीबे विवेकः क्वचित् (श्रृ. तिल. – रामभद्र.)
151. तर्कागोचरः खलु नियतेः भङ्गी (पञ्चबाणभाणः–भट्टि.)
152. तारुण्यलावण्यविलासपण्याः पण्याङ्गनाः पुण्यकृतो लभन्ते (सर.कवि. – रामचन्द्र.)
153. दत्त्वा बलिं पिशाचस्य गृह्णन्ति निपुणा निधिम् (पञ्चबा. वि.)

In Public domain. Digitization Muthulakshmi Research Academy

154. दाक्षिण्यं विरूपामपि स्त्रियं भूषयति (धूर्तविट.)
155. दानं नाम सर्वसामान्यं वशीकरणम् (धूर्तविट.)
156. दिवा पतिव्रता भूत्वा नक्तं च कुलटायते (मुकुन्दा.)
157. दीर्घसूत्रता नाम कार्यान्तरमुत्पादयति (पद्मप्रा.)
158. दुर्विषहः वधूतिरस्कारः ।
159. देशान्तरेऽपि खलु जीवति जीवनाथे नान्यस्य पृष्ठमनुगन्तुमुशन्ति नार्यः (रसस. – युव.)
160. दैवे विमुखे मित्रमप्यमित्रायते (संरस.कु – रामचन्द्र.)
161. नकोऽप्यापणफाणितमपहाय पत्रलिखितं लीढे मूढेन मनसा (कन्दर्प. – वेङ्कटाचार्यः)
162. न खलुं बम्भ्रम्यमाणबम्भरकुलोपेक्षामात्रेण चम्पककुसुमानां नैसर्गिकं रामणीयकमपहीयते (कन्दर्प. – वेङ्कटा.)
163. नग्नश्रमणक इव शरीरमात्रावशिष्टः (धूर्तविट.)
164. न दीपेनाग्निमार्गणं क्रियते (पद्मप्रा.)
165. न प्राप्नुवन्ति यतयो रुदितेन मोक्षम् (पादता.)
166. नलिनी यदा न दृष्टा क्षुद्रलतां षट्पदस्तदाश्रयन्ते (शृ. तर. – श्रीनिवास.)
167. न वायसोच्छिष्टं तीर्थजलमुपहतं भवति (पद्मप्रा.)
168. न सूर्यो दीपेनान्धकारं प्रविशति (पद्मप्रा.)
169. नहि चकोरकाः परच्छन्दानुरोधेन पूर्णचन्द्रिकामनुधावन्ति। (शृ. तर. – श्रीनिवास.)
170. न हि मृदुतरबृंहितसमाहूतापि हरिणी करिणीमुपसर्पति (रसस. – युव.)

In Public domain. Digitization Muthulakshmi Research Academy

171. न हि रथमतीत्य गोयानेन व्रजेत्पुरुषः (धूर्तविट.)
172. न हि रथमतीत्य गोयानेन व्रजेत्पुरुषः (धूर्तविट.)
173. नियमितचित्तानामपि चित्ताकर्षणनिपुणं स्त्रैणम्।
174. निरन्तरबहुमानलालिता सकृदवमानिताश्चेद्वैरिणो भवन्तीति न खलु वितथो लोकवादः (पञ्चा. प्र.)
175. निष्पेषणेन हरिचन्दनयष्टिरेव पुष्णाति सौरभभरं न तु पुष्पमाला (शृ. सुन्दर. – ईश्वर.)
176. नूनं सुतजनिचलिते तारुण्ये स्त्रीषु का रतिर्यूनाम्।
किं विदन्ति मिलिन्दा गलितमधूलीषु पद्मपालीषु।। (पञ्चा. प्र.)
177. नृवरैरर्पितकरो गुरुः सत्यं पयोधरः।
कृपणं बाधते मध्ये मत्त एव निबध्यते।। (पञ्चा. प्र.)
178. पङ्ककृदपि जलमेव हि पङ्कप्रक्षालनायालम् (विट. वि.)
179. पञ्चषड्दिवसोत्पन्नाया अपि मल्लिकाया अभिराम आमोदः प्रसूनस्य (शृ. तिल. – भास्कर.)
180. परकृतसुषिरे पन्नगा यान्ति सौख्यम् (कन्दर्प – वेङ्कटा.)
181. पायसोपवासमिव क्व एतच्छ्रद्धास्यति (पद्मप्रा.)
182. पिता नाम नवयौवनस्य पुरुषस्य मूर्तिमान् शिरोरोगः।
183. पीयूषमेव परिशीलयते जनाय स्वच्छं सुशीतलमपि स्वदते कि-मम्भः (रसस. – युव.)
184. पुष्पिणीति परित्याज्या किं माधवी मधुव्रतानाम् (वसन्तति.)
185. पूज्यो जडैरिति च यत्तदपेक्षयापि हास्यो महद्भिरिति यद्वरमेतदेव (शृ. ति. – भास्कर.)
186. प्रकृत्यैव यं कञ्चिदपि हस्तलग्नमधरी कुर्वन्ति वाराङ्गनाः
187. प्रगल्भास्तु परश्लोकार्थज्ञानं पुराणव्युत्पत्तिं कवितां च बाललीलां

In Public domain. Digitization Muthulakshmi Research Academy

वदन्ति (पञ्चबा. भा. – भट्टि.)

188. प्रचुरपादपान्तरचारिणीव कोकिला स्वभावखरबिल्वपादपमाश्रिता (पद्मप्रा.)

189. प्रत्यक्षे हेतुवचनं निरर्थकम् (धूर्तविट.)

190. प्रत्यक्षं वर्तमानायां देवतायां किमर्चनया (शृ. सुन्दर. – ईश्वर.)

191. प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः (शृ. ति. – भास्कर.)

192. प्रेम्णः प्राप्नोति यः स्त्रीणामतिमात्रस्य पात्रताम्।
स एव कोपविषयो नान्यः साधारणो जनः ॥

193. फलानुबन्धिदोषेषु को वा कार्याकार्यविचारः (पञ्चबा. भा – भट्टि.)

194. बुभुक्षा हि तितिक्षायाः परीक्षा (मदना. – पार्थसारथिः)

195. बुभुक्षूणां महानसप्रतिपालनं कदापि न मुधा भवेत् (कन्दर्प. – वेङ्कटा.)

196. भक्षितेऽपि लशुने न रोगशान्तिरितिवत् कृतेऽपि यज्ञे स्वस्त्रीसमागम एव (सरस. कु. – रामचन्द्र.)

197. भगवति वसुदेवसुते सूते कुत्र नो विजयः (शृ. तिल. – भास्करः)

198. भवत्यः अनेकदन्तं पूजयन्तीति किं वदन्ती (पञ्चबाणभा. – भट्टि.)

199. भीमं झषं बक इवाद्य समुद्यतं मां दृष्ट्वा निमीलयति दुष्टविधिः स्व-दृष्टिम् (विटराजविजयः)

200. भुजगीपरिवेष्टितान्तरा सुलभा किं नु पटीरवल्लरी (शृ. सुन्दर. रा-मवर्म)

201. भोः वेश्या लिपिकारश्च छिद्रप्रहारित्वात्तुल्यमुभयम् (धूर्तविट.)

202. मधुररसास्वादनानन्तरम्.आम्लरसोऽपि मनागास्वादनीयः (रसस)

203. मनो मे कर्षन्त्यम्भोरुहसुरभयष्षट्पदानामिवालिम् (शृ. शेखर. सु-

In Public domain. Digitization Muthulakshmi Research Academy

न्दरेश.)

204. मल्लिकां चम्पकेन सह बध्नतः कियान् क्लेशोऽस्ति (शृ. सु. - ईश्वर.)

205. महतो भाषणस्य कियानयं जनः (पञ्चबाणवि. - रङ्गा.)

206. महिषे सहकाररसो निपातितः (पादता.)

207. मातङ्ग इवागत्य मार्जार इव निर्गतः (वसन्तति.)

208. माधवस्त्यक्तजातिरिति वक्तव्यम् (पञ्चबाणभा. - भट्टि.)

209. मानधना हि विशेषेण क्षत्रजातिः

210. मानिनीनाम्मनस्सत्यं कोऽपि पाषाण एव तत् ।
तथा ज्वलति सम्प्राप्ते वल्लभेऽपि विभावसौ ।। (रसिकर. - श्रीनिवास.)

211. मार्गे गच्छतो मन्दिरनिर्माणं सुकरं, बिभ्रतः खलु भारः (शृ. सर्वस्व. - नल्ला.)

212. मृग्यमाणा प्रतानिनी प्रपदे लग्ना (शृ. सुधा. - रामवर्मा.)

213. मृतमपि पुरुषं सञ्जीवयेत् वेश्यामुखरसः ।

214. मेघावगूढमपि चन्द्रमसं कुमुद्वतीप्रबोधः सूचयति (पद्मप्रा.)

215. मैत्री गलितविस्रम्भे मित्रे न स्थातुमर्हति ।
स्थिताप्यलर्कविषवत् कालेऽनर्थाय कल्पते ।। (पद्म.प्रा.)

216. यत्र क्रीतं तत्रैव विक्रीयते (शृ. सर्व. - नल्ला.)

217. युवजनमनसामन्धङ्करणो मन्मथव्यामोहः (शृ. तर. - श्रीनि.)

218. येन केनाप्युपायेन यस्य कस्यापि देहिनः ।
सन्तोषं जनयेत्प्राज्ञः तदेवेश्वरपूजनम् ।। (पञ्चा.प्र.)

219. यौवनमदमेदुरा दृष्टिः अग्रतः स्थितमपि वस्तु न विषयीकरोति (वसन्तति.)

In Public domain. Digitization Muthulakshmi Research Academy

220. यौवनापसरणादनन्तरं सर्वथा ननु पतिव्रतैव सा (मुकुन्दा.)

221. रत्यर्थिनीं रहसि यः सुकुमारचित्तां
कान्तां स्वभावमधुराक्षरलालनीयाम्।
वागर्चिषा स्पृशति कर्णविरेचनेन
रक्तां स वादयति वल्लकिमुल्मुकेन ।। (पद्मप्रा.)

222. रमते किमितरतोऽपि भ्रमरः सहकारमञ्जरीचपलः (शृ.तिलक. – रामभद्र.)

223. रागो हि रञ्जयति वित्तवतां न शक्तिः (पादता.)

224. राजहंसस्य गङ्गासङ्गः सुकर एव (शृ.सुधा. – रामवर्मा)

225. रुदतस्तनयस्य मोचाफलं दर्शयन्निव (पञ्च.वि. – रङ्गा.)

226. लोप्त्रेषु प्रत्यक्षदृश्यमानेषु किं चौर्यस्य निह्नवेन (शृ. सुन्द. – ईश्वर.)

227. वचसैव गगनगतं चन्द्रमानीय हस्ते ददाति भावः (पञ्च. – भट्टि.)

228. वायस इव ग्रामोपान्तं न मुञ्चति (धूर्तविट.)

229. वारसुन्दरीमुद्दिश्य वषट्कारपूर्वं द्रव्यत्यागमाचरतस्ते यज्ञफलं सिद्धमेव (वसन्तति.)

230. वितरति पयः पण्डितो वञ्चनायाम् (शृ. सर्व. – नल्ला.)

231. विनयादिगुणग्रामदर्शनप्रीतचेतसाम्।
अनुग्रहेण साधूनां महत्त्वं याति मानवः ।। (R2461)

232. विनयः खलु भूषणं विद्यायाः।

233. विपणिवृष इवैषो ध्याति निद्रां च याति (पादता.)

234. विरम सह सङ्ग्रहीतुं बिल्वद्वयमेकहस्तेन (पादता.)

235. विसंवादितं हि शठतायाः सारम् (धूर्तविट.)

236. वृतिभिरनभिगम्यास्स्वादनीया रसालाः
स्फुटमपि पिचुमन्दं किञ्चनाः कामयन्ते ।। (शृ. तर. – श्रीनि.)

In Public domain. Digitization Muthulakshmi Research Academy

237. वृत्तान्ताय विसृष्टोऽपि सर्वमप्यर्थं साधयित्वैव समागतः (मदनसं. – घनश्यामः)

238. वृषस्यन्तीनां कामिनीनां स्वपतिः पितृपतिरेव (रसिक. – श्रीनि.)

239. वेश्यापुनर्वातरोग इवात्यर्थव्ययमुत्पादयति (धूर्तविट.)

240. व्रणे किल तप्तसूचीमाम्रेडयसि (शृ. शे. – सुन्दरेश.)

241. शम्बूकजातिरपि किं न प्रसूते मुक्ताफलं शुक्तिः।

242. शाणोल्लीढमणेर्हि कान्तिरधिका नित्यं समुज्जृम्भते (पञ्च.वि. – रङ्गा.)

243. शान्तिं याति शनैर्महौषधिबलादाशीविषाणां विषम् (उभया.)

244. शिरोवेदना नाम गणिकाजनस्य लक्षव्याधियौतकम्।

245. शैशवेऽपि साधारणस्त्रीणामसाधारणा खलु व्यवहारवैदग्धी।

246. श्रेयांसि बहुविघ्नानि (शृ. सुधा. – रामचन्द.)

247. सकलशशाङ्कविमलायां रजन्यां नास्ति दीपप्रयोजनम् (उभया.)

248. सति प्रादुर्भूते जलधरगणे कोऽत्र कुरुते
फलोत्पत्त्यै वल्ल्याः कलशजलसेकं प्रियतमे।। (अनङ्ग. – कोच्चुण्णि)

249. सति हि कुड्ये चित्रकर्मचिन्ता (मदना. – पार्थसारथिः)

250. सत्यमाह भर्तृहरिः वनिता लताश्च पार्श्वस्थमेव परितः परिवेष्टयन्तीति। (पञ्च.भा. – भट्टि.)

251. सन्तुष्टस्यापि जनस्य न त्वमृते पर्याप्तिरस्ति (पद्मप्रा.)

252. समधुसर्पिष्कं हि परमन्नं सोपदंशमास्वाद्यतरं भवति (पद्मप्रा.)

253. सर्वथा नास्त्यपिशाचमैश्वर्यम् (पादता.)

254. सर्वथा नियमितचित्तानामपि चित्ताकर्षणनिपुणं स्त्रैणम् (रसिक. – श्रीनि.)

In Public domain. Digitization Muthulakshmi Research Academy

255. सर्वो हि सुखिनं द्वेष्टि लोकः (?)

256. सर्वोऽपि जनः सजातीयमेव प्रियं मन्यते (मुकुन्दा.)

257. सर्वोऽप्यात्मानमदोषमेव मन्यते।

258. सहजा खलु चञ्चरीकस्य भ्रान्तिः।

259. सहते न हि कोऽपि पुमान् बलवदुपार्जितोऽपि परिभूतिकलां जगति। (पञ्च.वि. – रङ्गा.)

260. साधुतरे सङ्ग्रामे चापस्य ज्याभङ्गः (शृ. भू. – वामन.)

261. सामान्यापि वरारोहा सामान्येव भविष्यति (पञ्चबा. – भट्टि.)

262. सुन्दरि! न वा नरो वेष्टनमर्हति गर्दभो वा वरप्रवहणं वोढुम् (पादता.)

263. सुमनसः मुसलेन माक्षौत्सीः

264. सूर्यं यजन्ति दीपैः समुद्रमद्भिः वसन्तमपि पुष्पैः।
अर्चामो भगवन्तं वयमपि वागीश्वरं वाग्भिः।। (पद्मप्रा.)

265. सोपानान्तरारोपणं नाम पूर्वस्मात्किञ्चिदधिकसह्यविटचेष्टोन्मुखत्वमिति लोकोक्तिः (पञ्चबा. – भट्टि.)

266. स्त्रीरत्नं दुष्कुलादपि।

267. स्त्रीहस्ते द्रव्यं पुरुषहस्ते बालाः न तिष्ठन्ति (पञ्च. – भट्टि.)

268. स्थितस्य गतिश्चिन्तनीया।

269. स्यात् साध्यस्य सुसिद्ध्यै हि गम्यस्य स्वयमागमः (शृ. सुन्दर. – ईश्वर.)

270. स्वर्गायतिं न परिहासकथा रुणद्धि। (पादता.)

271. स्वैरालापे स्त्रीवयस्योपचारे
कार्यारम्भे लोकवादाश्रये च।
कः संश्लेषः कष्टशब्दाक्षराणां
पुष्पापीडे कण्टकानां यथैव।। (पद्मप्रा.)

In Public domain. Digitization Muthulakshmi Research Academy

272. हन्त प्रवृत्तं काकोलूकम् (पद्मप्रा.)

273. हन्त वन्ध्यापुत्रमन्दहाससहोदरोऽयं वृत्तान्तः (अनङ्गजी.)

274. हस्तन्यस्तं सरसमधुरं स्वादनीयं रसालं
त्यक्त्वा कोवा लषति धरणौ प्रोच्चशाखावलम्बि ।। (विटविलासः– महादेव.)

275. हंसालयस्य न कियत्सरसीरुहिण्यः
तासां स एव कनकाकृतिदानदक्षः ।। (शृ. सुधा. – रामचन्द्र.)

In Public domain. Digitization Muthulakshmi Research Academy

भाणपट्टिका

In Public domain. Digitization Muthulakshmi Research Academy

परिशिष्टम् – ब

भाणपट्टिका

सूचना - अत्र प्रतिपङ्क्ति अन्तिमसंख्याद्वये प्रथमसंख्या भाणकालस्य क्रिस्तुशकशतकद्योतिका, द्वितीया च प्रकृतग्रन्थपुटसंख्या। 'अल' इत्यस्य अलभ्य इत्यर्थः। येषामलभ्यानामत्रग्रन्थे निरूपणं नास्ति, तेषां विषये आकरः तत्रैव निर्दिष्टः।

1. अखिलजनमनोहरभाणः – विक्राल शेषाचार्यः – 20 – 265
2. अज्ञातनामकर्तृकः भाणः – 14 – 75
3. अज्ञातनामकर्तृकः भाणः – 18 – 179
4. अज्ञातनामकर्तृकः भाणः – अज्ञातः – 279
5. अज्ञातनामा भाणः – पेद्दयामात्यः – 14 – 73
6. अनङ्गजीवनभाणः – अप्पयार्यः – अल – 17 – 176
7. अनङ्गजीवनभाणः – आत्रेयवरदाचार्यः – 17 – 111
8. अनङ्गजीवनभाणः – कोच्चुण्णि भूपालः – 19 – 227
9. अनङ्गतिलकभाणः – वात्स्यरङ्गनाथः – 18 – 173
10. अनङ्गब्रह्मविद्याविलासभाणः – वाधूलवरदाचार्यः – 17 – 119

In Public domain. Digitization Muthulakshmi Research Academy

11. अनङ्गभूषणभाणः – वेङ्कटवरदः – 18 – 176
12. अनङ्गमङ्गलभाणः – कवीन्द्राचार्यः – अल – NCC
13. अनङ्गमङ्गलभाणः – श्रीनिवासाचार्यः – 17 – 125
14. अनङ्गमङ्गलभाणः – सुन्दरकविः – अज्ञातः – 280
15. अनङ्गलतिकाभाणः – अज्ञातः – अल – MK.
16. अनङ्गलतिकाभाणः – लक्ष्मीनृसिंहः – अल – 18 – 172.
17. अनङ्गविजयभाणः – कावल जगन्नाथः – 18 – 161
18. अनङ्गविजयभाणः – शिवरामकृष्णः – 18 – 159
19. अनङ्गसर्वस्वभाणः – लक्ष्मीनृसिंहः – 18 – 172
20. अभिनवशृङ्गाररसमञ्जरीभाणः – तिरमलबुक्कपट्टणं वेङ्कटाचार्यः – सं.भा.सा.
21. आनन्दतिलकभाणः – अज्ञातः – अल– सं.ए.रू.
22. उभयाभिसारिका – वररुचिः – 1 BC – 49
23. कन्दर्पदर्पणभाणः – कोकनाथाध्वरी – अल – NCC
24. कन्दर्पदर्पणभाणः – नावल्पाक्कं वेङ्कटाचार्यः – 19 – 235
25. कन्दर्पदर्पणभाणः – श्रीकण्ठः – 15 – 93
26. कन्दर्पदर्पणभाणः – श्रीकृष्णः – अल – NCC
27. कन्दर्पविजयभाणः – उद्दण्डकविः – 15 – 94
28. कन्दर्पविजयभाणः – घनगुरुः अल – MK
29. कन्दर्पविजयभाणः – श्रीकण्ठः – 17 – 125
30. कन्दर्पविलासभाणः– बेल्लंकोण्ड रामरायकविः – 20 – 255[19]
31. कन्दर्पसम्भवः – सर्वज्ञसिङ्गभूपालः – 14 – 72[20]

---

19 कन्दर्पविलासोऽपि अयमेव

20 अयं भाणो वा न वेति सन्देहः

In Public domain. Digitization Muthulakshmi Research Academy

32. कमलानन्दभाणः – कोराड रामचन्द्रशास्त्री अल – 19 – 215[21]
33. कमलाविलासभाणः – नारायणः – 18 – 182[22]
34. कर्पूरचरितभाणः – वत्सराजः – 13 – 64
35. कलकण्ठभाणः – अज्ञातः – अल ? 72
36. कविजनमण्डनभाणः – सूरं श्रीनिवासुलु – 20 – 276
37. कामकलाविलासभाणः – वेङ्कटभूपतिः – 18 – 187[23]
38. कामभाणः – नारायणः – अज्ञातः – 280
39. कामिनीकामुकोल्लासः – विश्वनाथः – अज्ञातः – 282
40. कीलामधुकरभाणः – अज्ञातः – अल – साहित्यदर्पणे उदाहृतः
41. कुसुमबाणभाणः – अज्ञातः – Bibliography of Sanskrit Drama.
42. कुसुमबाणविलासभाणः – अज्ञातः – MK-CC
43. कुसुमायुधजीवितभाणः – श्रीरङ्गाचार्यः – GOML-MAS-8725.
44. कृत्तिकाभाणः – राघववर्मा – अल 20 – 266
45. कैतकलाचान्द्रभाणः – नारायणः – अल – 18 – 168
46. गुरुवररञ्जनभाणः – सूरं श्रीनिवासुलु – 20 – 276
47. गोपाललीलार्णवभाणः – उटके गोविन्दाचार्यः – 19 – 223
48. चन्द्ररेखाभाणः – शङ्करकविः – अज्ञातः – 282
49. चातुरीचन्द्रिकाभाणः – वेङ्कटार्यः – 16 – 109
50. तरुणभूषणभाणः –शठकोपकविः – अज्ञातः – 283
51. धूर्तविटसंवादः – ईश्वरदत्तः – 4 – 54

---

21 अयमेव कमनानन्दोऽपि
22 रमाविलासभाण इति नामान्तरम्
23 कामविलास इति नामान्तरम्

In Public domain. Digitization Muthulakshmi Research Academy

52. धूर्तानुभवभाणः – सूरं श्रीनिवासुलु – 20 – 273
53. नटसमागमभाणः – सूरं श्रीनिवासुलु – 20 – 274
54. नन्दिमतीभाणः – 11 – 63
55. पञ्चबाणविजयभाणः – वाधूलरङ्गाचार्यः – 17 – 135[24]
56. पञ्चबाणसिद्धान्तभाणः – अज्ञातः – अल – MK
57. पञ्चबाणसिद्धान्तभाणः – श्रीनिवासः (बालकविः) – अल – NCC-Baroda II 6694.
58. पञ्चबाणभाणः – भट्टिवेङ्कटेशः – 17 – 154
59. पञ्चायुधप्रपञ्चभाणः–त्रिविक्रमभट्टः – 19 – 199
60. पत्रलेखाभाणः – 6–10 – 63
61. पद्मप्राभृतकम् – शूद्रकः – 1 BC – 43
62. पादताडितकम् – श्यामिलकः –4 – 58
63. पुरुषपुङ्गवभाणः – जीवन्यायतीर्थः – 20 – 267
64. पुष्पबाण विजयभाणः – भाष्यकराचार्यः – सं.भा.सा.
65. पौण्डरीकभाणः – कोक्कोण्ड वेङ्कटरत्नम् – 19 – 235
66. प्रद्युम्नानन्दभाणः – अज्ञातः – अल – सं.ए.रू.
67. फण्टूसचरितभाणः – अभिराजराजेन्द्रमिश्रः – 20 – 272
68. मदनगोपालविलासभाणः – गुरुरामकविः – 16 – 105
69. मदनगोपालविलासभाणः – स्वयंभूनाथः – अल – NCC
70. मदनभूषणभाणः – अप्पाध्वरी – 17 – 146
71. मदनमञ्जरीपरिणयभाणः – वैद्यनाथः – अल – NCC
72. मदनमञ्जरीभाणः – वेङ्कटेशः – अज्ञातः – 284

24 शृङ्गारशृङ्गाटकं, रङ्गराजपञ्चबाणविजयः इति नामान्तरे

In Public domain. Digitization Muthulakshmi Research Academy

73. मदनमहोत्सवभाणः – श्रीकण्ठः (नञ्जुण्डः) – 17 – 121
74. मदनलीलादर्पणभाणः – पद्मनाभः – 18 – 196[25]
75. मदनविजयभाणः – अनन्ताचार्यः – अज्ञातः – 285
76. मदनविजयभाणः – विक्किराल शेषाचार्यः – 19 – 245
77. मदनविलासः – पशुपतिनागनाथः – 14 – 73
78. मदनसञ्जीवनभाणः – घनश्यामः – 18 – 162
79. मदनसाम्राज्यभाणः – भुजङ्गकविः – अल – MK.
80. मदनानन्दभाणः – भट्टर् पार्थसारथि अय्यंगार् – 20 – 257
81. मदनाभ्युदयभाणः – शिष्टु कृष्णमूर्तिशास्त्री – 19 – 208
82. मनोजविजयभाणः – शिरिशनगल् कृष्णमाचार्यः – 20 – 265
83. मन्मथमन्थनभाणः – सुब्रह्मण्यसूरिः – 19 – 232[26]
84. मन्मथाभ्युदयभाणः – वेङ्कटेशः – अल – MK
85. मर्कटमार्दलिकभाणः – महालिङ्गशास्त्री – 20 – 266
86. महिषमङ्गलभाणः – नारायणन् नम्बूतिरिः – 16 – 99[27]
87. मुकुटताडितकभाणः – 12 – 63
88. मुकुन्दानन्दभाणः – काशीपतिः – 18 – 183
89. रतिभूषणभाणः – कवितार्किककण्ठीरवः – अज्ञातः – 286
90. रसरत्नाकरभाणः – जयन्तः – 19 – 221
91. रसविलासभाणः – चोक्कनाथः – 17 – 126[28]
92. रससदनभाणः – युवराजः – 19 – 203

---

25 अस्यैव लीलादर्पण इति नामान्तरम्
26 मन्मथोदनमिति नामान्तरम्
27 मालमङ्गलभाण इति नामान्तरम्
28 रसिकविलास इति नामान्तरम्

In Public domain. Digitization Muthulakshmi Research Academy

93. रसाङ्कुरभाणः – नारायणन् नम्बीशन् – अल – KSCV. VI 385
94. रसार्णवतरङ्गिणीभाणः – कपिष्ठलं कृष्णमाचार्यः – 20 – 260[29]
95. रसिकजनमानसोल्लासभाणः – श्रीनिवासाध्वरी – अल – सं.ए.रू.
96. रसिकजनरसोल्लासभाणः – कामसमुद्रं वेङ्कटाचार्यः – 18 – 192
97. रसिकतिलकभाणः–कविराक्षसः (मुद्दुरामकविः) – 17 – 130
98. रसिकभूषणभाणः – उदयवर्मा – 19 – 217
99. रसिकरञ्जनभाणः – प्रतिवादिभयङ्करं श्रीनिवासाचार्यः – 19 – 242
100. रसिकरञ्जनभाणः – सुन्दराजय्यङ्गारः – 19 – 215
101. रसिकशेखरभाणः – गादाधरविद्याभूषणः – 20 – 263
102. रसिकामृतभाणः – शङ्करनारायणः – 18 – 176
103. रसोदारभाणः – सुरपुरम् अण्णयार्यः – 18 – 191
104. रसोल्लासभाणः – श्रीनिवासाचार्यः – 17 – 127
105. रामजन्मभाणः – ताराचरणशर्मा – 19 – 216
106. रासविलासभाणः – केरलवर्मा – 19 – 216[30]
107. ललितनागरः – 6–10 – 63
108. वर्तमानभाणः – अज्ञातः – बरोडा–
109. वल्लवीपल्लवोल्लासभाणः – मञ्जुलाचार्यः – 19 – 221
110. वल्लवीपल्लवोल्लासभाणः – शिष्टु कृष्णमूर्तिशास्त्री – 19 – 210
111. वसन्ततिलकभाणः – नृसिंहसूरिः – तञ्जावूरु 4590

---

29 रसार्णवतरङ्ग इति नामान्तरम्

30 अयमेव रसविलास इति अन्यत्र (सं.ए.रू; सं.भा.सा.) उल्लिखितः

In Public domain. Digitization Muthulakshmi Research Academy

112. वसन्ततिलकभाणः – भास्करकविः – NCC
113. वसन्ततिलकभाणः – वरदाचार्यः – 15 – 78
114. वसन्तभूषणभाणः – वरदाचार्यः – 14 – 72
115. वसन्तमित्रभाणः – मङ्गलगिरि कृष्णद्वैपायनाचार्यः – 20 – 262
116. वसन्ताभरणभाणः – श्रीनिवासः – अज्ञातः – 286
117. विटनिद्राभाणः – अज्ञातकर्तृकः – 19 – 202
118. विटराजविजयभाणः – कोच्चुण्णि भूपालः – 19 – 224
119. विटविलासभाणः – महादेवशास्त्री – 20 – 254
120. विलासभूषणभाणः – वेङ्कटकृष्णय्य – 16 – 107
121. वीणावतीभाणः – 6–10 – 63
122. वेङ्कटभाणः – श्रीधर पेरुसूरिः – 18 – 165
123. अज्ञातनामभाणः – वेमभूपालः – 15 – 89
124. शारदातिलकभाणः – चामयमन्त्री – 19 – 231
125. शारदातिलकभाणः – शङ्करः – 18 – 195
126. शारदातिलकभाणः – शेषगिरिः – 18 – 172
127. शारदानन्दनभाणः–श्रीनिवासाचार्यः – 19 – 250
128. शृङ्गारकेतुलीलाचरितभाणः – भास्करः – 19 – 200
129. शृङ्गारकोशभाणः – गीर्वाणेन्द्रदीक्षितः – 17 – 123
130. शृङ्गारचन्द्रिकाभाणः – वात्स्यश्रीनिवासाचार्यः – 18 – 173
131. शृङ्गारजगन्मोहनभाणः – एक्किराल नरसिंहाचार्यः – 19 – 249
132. शृङ्गारजगन्मोहिनीभाणः – साधुपल्लि चन्द्रशेखरकविः – 19 – 230
133. शृङ्गारजीवनभाणः – अवधानसरस्वती – 15 – 95

In Public domain. Digitization Muthulakshmi Research Academy

134. शृङ्गारजीवनभाणः–वरदाचार्यः – 19 – 250
135. शृङ्गारतरङ्गिणीभाणः – ईचम्बाडि श्रीनिवासाचार्यः – 19 – 239
136. शृङ्गारतिलकभाणः – रामभद्रदीक्षितः – 17 – 140
137. शृङ्गारदीपकभाणः – विंजमूरि राघवाचार्यः – 19 – 234[31]
138. शृङ्गारदीपभाणः – वेङ्कटाध्वरी – 17 – 114
139. शृङ्गारपावनभाणः – वैद्यनाथः – अज्ञातः – 287
140. शृङ्गारभूषणभाणः – चन्द्रगिरि वेङ्कटाचार्यः – 18 – 193
141. शृङ्गारभूषणभाणः – वामनभट्टबाणः – 15 – 85
142. शृङ्गारभूषणभाणः – विंजमूरि अनन्ताचार्यः – 19 – 232
143. शृङ्गारभूषणभाणः – श्रीनिवासाचार्यः – अज्ञातः – 287
144. शृङ्गारमञ्जरी – 11 – 63
145. शृङ्गारमञ्जरीभाणः – अज्ञातः – 289
146. शृङ्गारमञ्जरीभाणः–अष्टभाषाबहरी गोपालरायः – 17 – 132[32]
147. शृङ्गारमञ्जरीभाणः – केरलवर्मा – 19 – 219
148. शृङ्गारमञ्जरीभाणः – रतिकरः – अज्ञातः – 287
149. शृङ्गारमञ्जरीभाणः – वेङ्कटनारायणः – अज्ञातः – 288
150. शृङ्गारमञ्जरी – विश्वनाथः (दूर्वादि) – 18 – 189
151. शृङ्गारमञ्जरी – सर्वज्ञसिङ्गभूपालः–14 – 71
152. शृङ्गाररत्नाकरभाणः – सुन्दरताताचार्यः – अज्ञातः – 289
153. शृङ्गाररसभाणः – अज्ञातः – 290
154. शृङ्गाररसभृङ्गारभाणः – इन्द्रगण्टि कोण्डय्य – 18 – 194
155. शृङ्गाररसोदयभाणः – लिङ्गमगुण्ट रामकविः – 16 – 103

---

31 शृङ्गारदीपिकाभाण इति नामान्तरम्

32 अस्यैव भाणस्य शृङ्गारराजभाण इति नामान्तरम्

In Public domain. Digitization Muthulakshmi Research Academy

156. शृङ्गारराजतिलकभाणः – अविनाशीश्वरः – 19 – 222
157. शृङ्गारविलसितभाणः – नारायणः – 18 – 168
158. शृङ्गारविलासभाणः – साम्बशिवशास्त्री – 18 – 166
159. शृङ्गारशेखरभाणः – रामानुजः – अज्ञातः – 290
160. शृङ्गारशेखरभाणः – वेल्लाल उमामहेश्वरः – 15 – 90[33]
161. शृङ्गारशेखरभाणः – सुन्दरेशशर्मा – 20 – 260
162. शृङ्गारसञ्जीवनभाणः – गूटाल शठजित्कविः – 18 – 183
163. शृङ्गारसर्वस्वभाणः – अनन्तनारायणः – 18 – 167
164. शृङ्गारसर्वस्वभाणः – नल्लाबुधः – 17 – 148[34]
165. शृङ्गारसर्वस्वभाणः – राजचूडामणिदीक्षितः – 16 – 98
166. शृङ्गारसर्वस्वभाणः – वेदान्ताचार्यः – 16 – 97
167. शृङ्गारसर्वस्वभाणः – स्वामिशास्त्री – 19 – 218
168. शृङ्गारसुधाकरभाणः – अश्वति तिरुनाल् रामवर्मा – 18 – 177
169. शृङ्गारसुधार्णवभाणः–कोराडरामचन्द्रशास्त्री – 19 – 212
170. शृङ्गारसुन्दरभाणः – ईश्वरवर्मा – 18 – 179
171. शृङ्गारस्तबकभाणः– नृसिंहः – 17 – 117
172. श्यामलाभाणः–चिन्तामणिः – 19 – 217
173. श्रीनिवासविलासभाणः – पैत्तम्बाडि रामानुजाचार्यः – 20 – 263
174. श्रृङ्गारतरङ्गिणीभाणः – रामचन्द्रः – MK, CCI-660
175. श्रृङ्गारतरङ्गिणीभाणः – वेङ्कटाचार्यः – MK
176. श्रृङ्गारमञ्जरभाणः – वेङ्कटाचार्यः – अल – 17 – 130.

---

33 कवेरस्य अभिनव कालिदास इति नामान्तरम्

34 अस्य कवेः भूमिनाथ इति नाम। भूतिनाथ इति सं.ए.रू. ग्रन्थे उल्लिखितम्।

In Public domain. Digitization Muthulakshmi Research Academy

177. श्रृङ्गाररसभृङ्गारभाणः – विश्वनाथः – अल – सं. ए. रू.

178. श्रृङ्गाररसायनभाणः – द्विवेदि नारायणशास्त्री – अल – सं.भा.सा.

179. श्रृङ्गारश्रृङ्गाटकभाणः – श्रीरङ्गाचार्यः – GOML

180. सङ्कर्षणभाणः – अज्ञातः

181. सम्पत्कुमारविलासभाणः – रङ्गनाथः – अज्ञातः – 291

182. सरसकविकुलानन्दभाणः – वेल्लाल रामचन्द्रकविः – 18 – 168

183. साक्षात्कारभाणः – शिवप्रसादः भारद्वाजः – 20 – 270

184. सारस्वतोल्लासभाणः – वेङ्कटरामः – अल – MK

185. हरिविलासभाणः – हरिदासः – 15 – 95

186. हेमन्ततिलकभाणः – तिरुमलाचार्यः – अज्ञातः – 291

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकानुक्रमणिका

अगणितगुणधारा..., 119
अङ्कारूढामभिनवरतौ..., 254
अङ्गारश्रियमातनोति..., 80
अञ्जलिरयं जनानाम्..., 150
अतिविपुलनितम्बा..., 251
अद्वैतं युयोरस्तु..., 139
अद्वैतपात्रमग्राम्यहास्यं..., 105
अधरः कुचयुग्मं..., 156
अधिकारीवनासक्तः..., 274
अन्यार्थसिद्धये..., 322
अन्येन केनचिदहं..., 284
अन्येनापि च केनचि..., 284
अन्योन्यं करताडनेन..., 68
अपि गुरुमपि दैवं..., 322
अपि यौवनपुष्पितां..., 91, 304
अप्यन्यदीयाम..., 227
अभ्युन्नतं पदमवाप्य..., 240
अम्भोजबन्धुरिति..., 80
अयं प्रबन्धः..., 242
अर्धालक्ष्यमनोहरोरुयुगलं..., 100
अर्हति न तत्र धूर्ते..., 68
अलमलमिह बाले..., 218
अलसललितमुग्धा..., 127
अल्पाहितासहतया..., 214
अशङ्कितनखक्षतं..., 23
अस्ति हि..., 288
अस्त्यस्तोकगुणो..., 124
अहरहरनुभूता..., 67
अहल्यामिन्द्रोगाद्वि..., 259
आकाशसीम्नि..., 189
आगुल्फायतवेणिकां, 124
आजानुलम्बिदृढबद्ध..., 308
आत्मानं रमणं..., 219
आत्मानुभूतशंसी..., 3
आदेशस्यास्तिधातोः..., 207
आनन्दामृतवर्षसूर..., 130
आनेयास्ते स्वमति..., 277
आपादलम्बिवसना..., 114
आमग्रोन्नतपीवर..., 162
आयाते रतिगेहमा..., 281
आरीढानामपि..., 175
आलिका मरालिका..., 256
आलिङ्गन्ति सलीलम्..., 177
आलोकैरनुषज्य..., 121

In Public domain. Digitization Muthulakshmi Research Academy

आल्या भावविदा..., 308
आशीविशेषु मणयः..., 324
आसीत् ख्यातो..., 116
आसील्लिङ्गमगुण्टपट्टणवरे..., 104
आस्ते कुत्रचिदम्बरे..., 142
आस्थानी मदनस्य..., 133
इन्दिरा वरविहार..., 185
इयमन्यमपेक्षेत..., 300
इयमस्तु काञ्चनलता..., 300
इष्टं दातुमसन्दिहानमखिल..., 301
इष्टार्थसिद्धये पूर्वं..., 298
इष्टः कालोऽयमस्मत्..., 281
इहास्तिनूनं तुहिनांशुबिम्बे..., 67
ईषन्मीलितभाव..., 209
उच्चैर्गाथापठनमशुभं..., 69
उत्थस्यन्ति..., 169
उत्सङ्गे भवतीं..., 152
उत्सङ्गे सिन्धुभर्तुर्वसति..., 66
उदग्रजनतादृते..., 210
उदञ्चितकचः..., 15
उदास्यतां नाम..., 247
उद्यन्नेव निशाचरौघम..., 244
उन्नम्य पाणिकमलं..., 312
उन्मीलत्कुसुमस्मितं..., 283
उभयोर्गूढमन्योन्यं..., 181
उभे तदानीमुभयो..., 72
एकं करण्डकमु..., 310
एकं भ्रूवलनैः..., 187
एकत्र ताड्यते..., 258
एडं मनोभवकलासु..., 295
एते योषडशमनुजाः..., 311
एनां भवत्कुलवधूमधुना..., 302
एषा रत्नकरण्डयुग्ममु..., 310
कटकेषु जयन्तु..., 84
कण्ठोदञ्चत्कपोत..., 287
कन्दर्पप्रणिधिः..., 106
कन्दर्पप्रभवे प्रकल्पित..., 237
करकिसलयराज..., 152
करपल्लवताडितः..., 91
कर्णिकारकृतकर्णिका..., 256
कर्णे जपन्निव..., 205
कर्पूरसुरभिवीटीद्विगुणित..., 115
कलरवकलरवमुखरैः..., 170
कल्याणानि करोतु..., 223
कल्याणी मयी दृष्टिमर्पय..., 115
कल्हारन्ति कचान्तरे..., 137
कवयस्ते किल..., 213
कविश्चेत्कुशलो..., 104

In Public domain. Digitization Muthulakshmi Research Academy

कवेरतनया तटे..., 222
कस्त्वं गोपालबालः..., 286
कस्याश्चिदायताक्ष्याः..., 309
का नीतिः ?, 253
काचं काञ्चनसन्निधौ..., 139
काञ्चनाद्रिकटकेषु..., 189
काञ्चीतूर्यमसक्त..., 56
काञ्चीसीमनि..., 282
कानीतिः ? परलोक..., 268
कान्तः कल्याणवर्मा..., 75
कामयति कामिलोकः..., 239
कामाभिभूतः पर..., 326
कामावेशः कैतवस्योपदेशः..., 293
कार्ये सत्यपि जातु..., 318
कालिकातुलितचूलिका..., 138
कालिन्दीकमलं..., 205
किञ्जल्कतामुपगताः..., 128
किमालापः स्वैरं..., 23
कुटिलमसितमेघ..., 100
कुन्दालिं दर्शयालि
..., 132
कूजत्कोकिलजालो..., 170
कृत्वान्तर्हितमञ्जनैः..., 123
कृष्णः कंसविमर्दनः..., 194
कृष्णस्य व्रजयोषिदम्वरमुषः...,
111
केका राजति..., 204
केलीवने निशि..., 172
कैलासं परिहृत्य..., 194
कोपाग्निना क्वचन, 271
कोशातकीफल..., 190
कोशातकीफलमलं..., 319
क्रीडानिर्भरमीलि..., 223
क्रीडासद्मनि..., 151
क्वचित्प्रफुल्ल..., 212
क्वचित्सुमास्त्रम..., 212
क्वचिन्निजद्विज..., 212
क्षरन्मरन्दान्यु..., 180
क्षोणीं पट्टपटावृतामिति..., 217
गच्छन्तीनां तटभुवि..., 142
गम्भीरस्तु जनोऽति..., 228
गम्भीरस्निग्धघोषो..., 226
गरिमां भजते..., 174
गिरां देवी देवीकर..., 160
गीर्वाणेषु शचीपतिर्हि..., 230
गुरुरात्मवतां..., 329
गुरुश्रोणीभारा..., 251
गुर्जरीणां कुलाचार..., 318

In Public domain. Digitization Muthulakshmi Research Academy

गृहमार्जनकारिण्यः..., 25
गोमूत्रिकासु कुरुते..., 307
गौरी लावण्यलक्ष्म्या..., 213
ग्रन्थिच्छटाविकट..., 66
घट्टे घट्टे..., 275
घट्टे नाट्यं गृहे..., 275
चकास्ति घटका..., 160
चक्रद्वन्द्वं चटुलनलिनी..., 143
चरणकमलकान्त्या..., 190
चरणकमलयुग्मैरर्चितं..., 16
चरीकरोतु..., 256
चलत्तिमिरचुम्बि..., 197
चलद्वलाकावलि..., 174
चुम्बनरक्तं सोऽस्या..., 313
चुम्बनसक्तस्सोऽस्या..., 33
चेतोभूजयकेतवः..., 138
जयं दिशतु नः..., 109
जयति मधुमासलक्ष्मीः..., 87
जयतीह यन्मधु..., 225
जयनाम्नि वत्सरे..., 158
जलधरनीलालेपः..., 17
जात्यन्धां सुरतेषु..., 22
जात्यश्वदन्ति..., 131
जात्यश्वदन्तिशिबि..., 131
जात्याकृतिप्रभृति..., 240
जामात्रादिजनस्य..., 223
जीयाच्चान्द्रीस्म..., 255
जीवं नयन्ति भैक्ष्यैण..., 275
ज्योतिश्शास्त्रविदां..., 101
झटितिघटित..., 227
तटाकतीरोपवनेषु..., 206
तत्तनयो दत्तनयो..., 116
तत्तादृग्यतिपतेः..., 231
तत्तादृग्विविधोपचार..., 23
तत्पादाम्बुरुहं..., 186
तत्सख्याः सविधं..., 170
तथा तथा पठति, 316
तनुरुचि यो न..., 165
तनोति तरुणाश्लेषं..., 173
तरुणीपदपल्लवप्रहारः..., 246
तर्कातर्किप्रधान..., 238
तर्के कर्कशवक्र..., 184
तल्पेऽनल्पभुजङ्ग..., 109
तस्य वेदान्त..., 82
तस्याः मदालसविघूर्ण..., 59
ताते पञ्चत्वं..., 316
तातो यस्य चिदम्बरेश्वर..., 147
ताम्रः श्मश्रुमुखः..., 177

In Public domain. Digitization Muthulakshmi Research Academy

ताराजालकचुम्ब्यमान..., 87
तिप्पाध्वरीन्द्रतनयो ननु, 126
तीरोत्सृष्टनिचोलचेलम्..., 115
तैस्तैर्वचोभिरनुनीय..., 86
त्रेतायां रघुनायक..., 162
त्रोटीमनोज्ञशुक..., 197
त्वं पद्मबान्धव इति..., 121
त्वं मेति शब्दं..., 182
दातारः सुलभाः..., 54
दानाद्रागमुपैति..., 297
दारिद्र्येण निपीडितां..., 25
दासा विवृत्तनय..., 210
दास्येऽहं परिरम्भणानि, 66
दिगन्तान् पश्यन्ती..., 80
दिवसमखिलं कृत्वा..., 17
दृष्टिस्तेऽतिविशालचारु..., 314
देवानां मदिरायितः..., 201
द्युतेषु मा स्म..., 60
धनमानपरित्यागी..., 119
धन्वन्तरिक्षपण..., 53
धन्वन्तरिक्षपणकामर..., 34
धून्वन्त्याः करपल्लवं..., 315
न खलु बम्भ्रम्यमाण..., 330
न गणयन्त्यथ..., 214
न शब्दशास्त्राध्ययनं..., 249
नक्षत्रं तिरयन्नभः..., 237
नग्नःस्नाति महाजने..., 316
नग्नां वीक्ष्य..., 205
नटनारभटी..., 107
नम्रोन्नम्रशिरः प्रतिक्षण..., 310
नलो नष्टश्रीकः..., 147
नागेन्द्रास्तीव्रदर्पज्वर..., 239
नाटकं सप्रकरणं..., 1
नाथो मे विपणिं..., 79
नानालङ्करणैः..., 258
नान्द्यते सूत्रधाषः..., 119
नायं विधुः..., 171
निजदयितमशेष..., 240
निबन्धन्ति स्वैरं..., 149
निर्लज्जतायाः..., 202
निर्व्याजप्रेमसम्पन्नौ..., 233
नीचैर्भावः प्रियवचनता..., 16
नीलं काञ्चन..., 247
नीलात्यायतशैव..., 213
नूनं सुतजनिचलिते..., 331
नृवरैरर्पितकरो गुरुः..., 331
नेता यः कविता..., 116
पञ्चाङ्गमञ्चितकुशेन..., 317

In Public domain. Digitization Muthulakshmi Research Academy

पटिरपङ्करूषित..., 108
पद्मेत्वन्नयने स्मरामि..., 84
पद्ये परीमान् किल..., 86
परिचरतु गुरून्..., 60
पर्यायतः प्रसरदा..., 283
पलितभङ्गतरङ्गितमङ्कं..., 298
पस्पर्धे मुखमण्डलेन..., 259
पाकशासनदि..., 174
पाणिग्रहावसर..., 140
पाथोजसौधत..., 198
पादपतनेन भगवान्..., 74
पादलम्बिसितचेल..., 261
पादाग्रचुम्बितधरा..., 170
पादाग्रेण भुवं स्पृशन्त्युपरिगां..., 236
पादाग्रेण भुवं..., 310
पादावलम्बकलया..., 151
पादेऽलक्तकपङ्कतां..., 128
पादौ दुष्प्रचलौ..., 142, 303
पादौ पद्मभुवः..., 188
पीयूषसिन्धुरजनिष्ट..., 67
पुञ्जीभवन्निखिल..., 220
पुण्यास्तावद्वेदाभ्यासाः..., 46
पुत्राः के दयिता..., 163
पौत्रो यज्वोत्तमश्री..., 113
प्रक्षालनाय..., 205
प्रणयकलहं कोपोद्वेगं..., 29
प्रतिभाति विभ्रमनदी..., 106
प्रफुल्लहल्ल..., 197
प्रयतकरया मात्रा यत्नात्..., 58
प्रवालमणिमण्डिता..., 174
प्रागल्भ्यं स्थानशौर्य..., 294
प्राचीकुचमुदयाद्रिं..., 152
प्रातःकालकृषीवलेन..., 245
प्राप्तसाहित्य..., 118
प्रासादाग्रप्रचुरविल..., 114
प्रोज्ज्वालज्वलनै..., 272
फुल्लन्मदारमञ्जु..., 291
फुल्लाम्भोरुहनिस्सरन्मधुझरी..., 129
बन्धूकबन्धुच्छवि..., 247
बहिस्तु मधुराकारमन्तः..., 17
बालोऽप्यहो..., 265
बालोऽयमाशु मिहिरः..., 243
बिम्बं धवलिमसहितं..., 182
बिम्बोष्ठे तव नाञ्जनं..., 112
भक्षितनिजबहुविभवाः..., 19
भजन्तु लोका भुवमम्बु..., 146

In Public domain. Digitization Muthulakshmi Research Academy

भद्रं ते वलभीगवाक्ष, 296
भद्रं देवो विनिद्रं..., 72
भद्रं स वोदिशतु..., 118
भाणस्तु धूर्तचरितं..., 6
भारती संस्कृतप्रायो..., 12
भारस्यायं..., 317
भावः स्पष्टानुभावः..., 191
भूयो निपीय..., 185
भ्रमक इति..., 181
मकरन्दघर्मजल..., 174
मणिकन्दुकखेल..., 103
मनोजकदनोद्युक्त..., 282
मनोजधनुराहित..., 167
मनोजनानां..., 181
मनोज्ञपदभासुरा..., 212
मनोज्ञैः सल्लापैः..., 179
मन्दस्मितं कुटिल..., 246
मन्दीकृतमकरन्दं..., 202
मन्दोच्चलन्मणि..., 225
महादेवकवेस्तस्य..., 255
माकन्दद्रुममञ्जरी..., 232
माधुर्यैकनिधानमर्थभरितं..., 229
मानिनीनां मनस्सत्यं..., 244
मानिनीनाम्मनस्सत्यं..., 333
मुकुलितनयनार्धा..., 127
मुक्तागुच्छमिषाद्यशो..., 98
मुक्ताफलं किरन्त्याः..., 150
मुग्धांगनामुपेतां..., 317
मुग्धे मुखकमलं ते..., 86
मुदितौ नयनचकोरौ..., 240
मुहुर्मात्रा पुंसः..., 75
मृद्वी शय्या ललित..., 169
मेरूकरोति तृणम्..., 110
मैत्री गलितविस्रम्भे..., 333
यं दृष्ट्वायं वसन्तो..., 224
यः पूर्वं मदनस्स..., 171
यथा नरेन्द्राः कुटिल..., 296
यदा प्रभूणां..., 271
यदा यदा सा कुसुमानि..., 133
यदि वदन्ति मृषागिर..., 133
यदृच्छालाभ..., 169
यद्दृष्ट्वा सुमुमोह..., 193
यद्यत्रिलोक्या..., 200
यमालोक्यस्वस्मिन्..., 90
यस्मिन् सद्गुणसंहतिं..., 255
यस्य घ्राणसुखाः..., 94
यस्याज्ञया..., 107
यस्योतसङ्ग..., 107

In Public domain. Digitization Muthulakshmi Research Academy

यान्त्रीं पद्मगृहं श्रियं..., 245
यावत्खण्डेन्दुमौलिं..., 202
येन केनाप्युपायेन..., 333
येनैवोपमितिं..., 146
यो हि सर्वकलोपेतः..., 18
रङ्गलङ्करणं दयाधिकरणं..., 137
रतक्षमायाः प्रौढायाः..., 143
रतिरमणप्रियसुहृदा..., 68
रत्यर्थिनीं रहसि..., 45, 334
रत्यानुभूय रतिकेलिम..., 283
रथेभमहसादिभिः..., 179
रम्भायां नलिनं..., 264
रसज्ञलोकैरभिनन्दितानां..., 85
रसालयरसाल..., 109
राका मुखेन..., 208
राजत्कीर्तिविभूषित..., 101
राजाऽपलायत..., 128
राधेयं तटिनी..., 221
रे खर्वाट
वितन्तु..., 285
लक्ष्मीं पक्ष्मलयन्तु..., 219
लक्ष्मीकुचालङ्कार..., 105
लक्ष्मीवक्षोज..., 191
लक्ष्मीवल्लभमक्षिकोण..., 243
लता पुनः पुष्पवती..., 236
लब्धव्या रसिकेन..., 141
ललितवचनाश्लेषो..., 242
लास्यं विधातुं..., 175
लीलालालसमान..., 196
लीलोद्यतस्य कलहे..., 56
लोकानन्दममन्द..., 131
लोके कलङ्कमपहातुमयं..., 79
लोचनयोस्तारल्यं..., 171
वक्षोजकुम्भभास्वरता..., 246
वक्षोजेषु नखक्षतानि..., 188
वन्दे वन्दारुमन्दा..., 183
वररुचिरीश्वरदत्तः..., 41
वल्गद्विषाण..., 163
वल्लरीषु मधुपेन..., 21
वहसि वदने..., 214
वाग्देवता..., 201
वाचस्तस्य कवेः..., 87
वाचां विलासो..., 105
वाचालत्वं पदालग्नः..., 67
वाचालमञ्जीरमनोहरेण..., 86
वाणी तस्य महीपतेः..., 217
वामाः कामशराति..., 264
विकचनवोत्पलतिलका..., 57

In Public domain. Digitization Muthulakshmi Research Academy

विकस्वरपिकस्वरं..., 124
विक्रीणन्ति हि कवयो..., 315
विघ्नान् विनाश्य..., 225
विद्याकुन्दसुमोपम..., 230
विद्यारण्यगुरून्..., 88
विधाय परिरम्भणं..., 91
विनयादिगुणग्राम..., 279, 334
विपदोऽपि भवन्ति..., 214
वीतासूयैर्वियश्चिद्भिः..., 100
वीथी समवकारश्च..., 4
वीरायितेषु..., 185
वृतिभिरनभिगम्या..., 334
वृषभ चर..., 260
वेश्याङ्गणं प्रविष्टो..., 47
वेश्याङ्गणं..., 47
वेश्याजघनरथस्थः..., 22
वेश्याजनेभ्यो द्रविणं..., 115
वेश्याम्ब
द्विज किं..., 285
व्यत्यासतो निपतिते..., 310
व्याकृत्यादि..., 207
व्याकोचप्रसवश्रियोऽपि..., 187
व्याक्षेपं कुरुत..., 314
व्याक्षेपं कुरुतः..., 51
व्याक्षेपं कुरुतस्स्तनौ..., 314
व्योमस्थली..., 290
शकयवनतुषारपारशीकैः..., 61
शकलयति मनो..., 152
शङ्करः सकल..., 195
शतेष्वथाष्टादश..., 241
शशिपदमणिजालं..., 79
शाठ्यमनृतं मदो..., 16
शीलं नाद्रियते कुलं..., 24
शुभ्रांशोः चेलिकानि..., 249
शृङ्गीक्षुचापधररङ्गी..., 197
शैलाब्धीश्वर..., 167
शोके च वावदूके..., 168
श्रीकान्ता तव जीवितं..., 222
श्रीकूर्मनाथपुरवी..., 286
श्रीपत्यन्वय..., 97
श्रीमत्पद्माक्षवक्ष..., 193
श्रीमद्गोपशिशो..., 137
श्रीमद्यामुनतीर..., 209
श्रीमानेलापुरीशो..., 183
श्रीरामचन्द्रजयो..., 165
श्रीविंजमूरु कुलसञ्जनितेन..., 232
श्रीशाहक्षितिपाल..., 148
श्रीशैलान्वयभव्य..., 290

In Public domain. Digitization Muthulakshmi Research Academy

श्रेणीभूयस्थगितिनिगला..., 258
श्रेयः प्रदैरिहसुखैः..., 118
श्रेयो मे विदधातु..., 282
श्लिष्टा सभङ्गा..., 154
संप्राप्य दिष्ट्या..., 228
संभोगहीनसंपद्विटस्तु..., 18
सकलनिगमविद्भ्यः..., 203
सकलसुगुणधामा..., 289
सकविर्बभाण भाणं..., 104
सततसुराजीविन्यः..., 156
सति प्रादुर्भूते..., 335
सत्सारस्वतसार..., 280
सन्मार्गे चरितं बुधाश्च..., 134
समुल्लासो वाचां..., 79
सम्मर्देन रसस्य..., 188
सर्वया रागमुत्पाद्य..., 295
सा मधुरा सा काञ्ची..., 122
साध्यं कर्म न..., 169
साम्राज्यमादिमरसस्य..., 117
सायन्तनप्लव..., 288
सालक्तदामचरणाहति..., 73
साहित्यसाहितय..., 208
सीताप्राणसखस्य..., 112, 116
सुकुमारार्थसन्दर्भ..., 160
सुचरितमीदृशम..., 318
सुधा वा ज्योत्स्ना..., 129
सुधासध्रीचीनां..., 196
सुललितपदन्यासां..., 229
सुवर्णालङ्कारा..., 110
सूर्यं जयन्ति दीपैः..., 336
सूर्यं यजन्ति..., 48
सैव स्फुरत्तडि..., 273
सोऽयं चारुसुधार..., 234
सोऽयं वेमयमन्त्रिण..., 190
सौन्दर्ये सकलोपजीवम...., 250
सौभाग्यस्य निधिः..., 86
सौम्यजामातृ..., 83
सौहार्दं वारनारीणां..., 251
स्त्रीणां जन्मैव कष्टं..., 146
स्निग्धच्छायत..., 105
स्निग्धैः प्रश्लिष्टैः..., 297
स्मितललितवदन..., 190
स्रस्तकचं मग्नकुचं..., 167
स्वच्छन्दपेयनिर्भर..., 240
स्वयं द्विजपतिश्शुचिश्शिव..., 243
स्वर्भानुपीडनम्..., 175
स्वस्ति श्रीमति..., 300
स्वैः प्राणैरपि विद्विषः..., 15

In Public domain. Digitization Muthulakshmi Research Academy

स्वैरालापे स्त्रीव..., 336
हंस त्वं क्वचिदेव..., 240
हंसालयस्य न..., 337
हरिदुपलकर्णपूरं..., 239
हस्तन्यस्तं सरस..., 337
हृदयमनितरस्थं..., 24

In Public domain. Digitization Muthulakshmi Research Academy

उपयुक्तग्रन्थसूची - सङ्केतसहिता

1. संस्कृतवान्मयचरितम् - मल्लादि सूर्यनारायनशास्त्री।
2. आन्ध्रविज्नानसर्वस्वमु - vol -II and IV.
3. संस्कृतभाणसाहित्यमु - डा.रामकृष्णमूर्ति–डा.सूरं श्रीनिवासुलु (सं.भा.सा)।
4. History of Clasical Sanskrit Lterature - M. Krishnamachariar - (HCSL-MK).
5. Andhra's Contribution to Sanskrit Literature - Dr.P.sriramamurty -(ACL).
6. Contribution of Andhra's to Sanskrit Literature - Dr.B.Ramaraju -(CASL-BR).
7. Contribution of Kerala to Sanskrit Literature - Dr. Kunjunni Raja -(KSL-KR).
8. Sanskrit Literature of Kerala - E.Esvaran Nambudri.
9. New Catalogues catalogorum - (NCC).
10. Catalogues catalogorum - (CC).
11. आधुनिकसंस्कृतनाटक – डा.र्रामजी उपाध्याय।
12. संस्कृत मे एकांकी रूपक – वीर बला शर्मा।

In Public domain. Digitization Muthulakshmi Research Academy

13. मध्यकालीन संस्कृत रूपक।
14. केरलीयसंस्कृतसाहित्यचरितम् – परमेश्वरन् – (मलयालम्)।
15. हस्तलिखित(तालपत्र)ग्रन्थालयग्रन्थसूच्यः
    मद्रपुरीशासकीयतालपत्रग्रन्थालयः (GOML-Madras).
    अडयार् ग्रन्थालयः (Adayar).
    तन्जापुरतालपत्रग्रन्थालयः (Tanjore).
    Trivendrum Curater's office catalogue etc.

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

ISBN - 978-93-80171-18-0

परिचयः

कन्दाल वेङ्कटरामकृष्णमाचार्यनामा अयं विद्वान् आन्ध्रेषु कृष्णामण्डले कैकलूरुग्रामे १९४७तमे वर्षे जनिमलभत। यतिराजवल्लीवीरराघवस्वामिनौ पितरौ। मातामहाः तिरुमलाचार्याः प्राथमिकविद्यागुरवः। ज्येष्ठभ्रातरः वेङ्कटरामनरसिंहाचार्याः साहित्यविद्यागुरवः। व्याकरणे ब्रह्मश्री लङ्का नरसिंहशास्त्रिणः, म.म.पेरि सूर्यनारायणशास्त्रिणः, न्याये म.म.गोडा सुब्रह्मण्यशास्त्रिणः, म.म.रामचन्द्रुल कोटीश्वरशर्माणः, वेदान्तशास्त्रे म.म.रामानुजताताचार्याः सम्प्रदाये कुमाण्डूरि वेङ्कटाचार्याश्च गुरवः। राजमहेन्द्रवरनगरस्थ-गौतमीविद्यापीठे व्याकरणशास्त्रमधीत्य आन्ध्रविश्वविद्यालयीय - व्याकरणविद्याप्रवीणपरीक्षां १९६४ तमे वर्षे सर्वप्राथम्येनोत्तीर्य स्वर्णपदकं, तातासुब्बरायपुरस्कारञ्च प्राप्य १९६४ तमे वर्षे अन्नवरसत्यनारायणस्वामिदेवस्थान-संस्कृतपाठशालायामारब्धाध्यापनोयं क्रमशः अनेकासु पाठशालासु, गौतमीविद्यापीठसंस्कृतकलाशालायां चाध्यापकत्वं निरुह्य १९७३ तमे वर्षे तिरुपतिस्थसंस्कृतविद्यापीठे अध्यापनाय प्रविष्टः तत्रैव व्याकरणविभागे इदानीमाचार्यत्वं निर्वहति। तस्मिन्नेव विद्यापीठे अयं वर्षचतुष्टयपर्यन्तं कुलसचिवोप्यासीत्। २००५ तमे वर्षे अयं जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृत-विश्वविद्यालयस्य कुलपतिरूपेण नियुक्तः वर्षत्रयं यावत् सम्यक् कुलपतित्वं निरवहत्। १९९९तमे वर्षे केनडादेशसरस्वतीविकाससंस्थायाः "रामकृष्णपुरस्कारं ", २००० तमे वर्षे ज्ञानप्रबोधिन्याः "जयश्रीगुणे" स्मारकपुरस्कारञ्च प्राप्तवानयं "शब्दविद्याप्रवीण-संस्कृतमहामहोपाध्याय-शास्त्रविद्वन्मणी" त्यादिसम्मानोपाधिभिः विविधसंस्थाभिः सम्मानितः। अनेन बहवः ग्रन्थः रचिताः सम्पादिताश्च। तत्रान्यतमोयं भाणवाङ्मयचरितग्रन्थः इदानीं प्रकाश्यते।

संस्कृत अकाडमी
राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था
उस्मानिया विश्वविद्यालयः, हैदराबाद्